BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDR THE SUPERINTENDENCE OF

R. T. H GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 99.

श्रीमदणुभाष्यम् ।

श्रीश्री... आचार्यविरचितम् ।

...जीमहाराजविरचितभाष्य-

...व्याख्यासमेतम् ।

...श्वरशुद्धाद्वैतसंप्रदायविदुषा

...ट्टेन संशोधितम् ।

...BHÂSHYA,

...Y SRÎ VALLABHÂCHÂRYA,

With the Commentary called Bhâshya Prakâsa,

By Goswami Srî Purushottamjee Mahâraj.

EDITED BY RATNA GOPÂL BHATTA.

Fasciculus I.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H D GUPTA,

Secretary ... Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,

BENARES.

1905.

श्रीगोपीजनवल्लभाय नमः ।

अथ श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचित-
भाष्यप्रकाशाख्यव्याख्यासमेतम् ।

श्रीकृष्णाय नमः ॥ सङ्गीतं श्रुतिमूर्द्धभिस्तदविदां वागाद्यतीतं विदां
दूरं साधनसम्पदां निरुपधिस्नेहैः सुखापं वृतैः ॥
रासोल्लासवशंवदव्रजवधूवृन्दे वसन्तं सदा
दासक्लेशहरं मुदा परतरं श्रीकृष्णदेवं श्रये ॥ १ ॥
मन्दान् वीक्ष्य जनान् विभुः श्रुतिगणं व्यस्याऽथ कारुण्यतः
स्त्रीशूद्रादिहिताय भारतमुखेनोक्त्वा तदर्थं पुनः ॥
बुद्धिं शोधयितुं चकार सुविदां यो ब्रह्मसूत्रात्मकं
वेदान्तार्थविकासकाद्भुतपदं शास्त्रं गुणैरुज्ज्वलम् ॥ २ ॥
एवं सर्वहितं चरन्नपि यदाऽखिद्यत्तदा नारदात्
तत्रोपायमवेत्य खेदहतये दृष्ट्वा समाधौ हरिम् ॥
श्रीमद्भागवतेन संशयमहन् भक्तिप्रचारोद्यत-
स्तं कृष्णं मुनिमानमामि सततं ज्ञानावतारं हरेः ॥ ३ ॥
सर्गादौ स्वमतं समस्य विधये यं ब्रह्मवादं जगौ
कौन्तेयोद्धवयोः प्रकाश्य च पुनर्वेदान्तसारं हरिः ॥
तं व्यासाशयगोचरं प्रथयितुं यैर्भाष्यमाभाषितं
तानाचार्यवरान्नमामि करुणान् श्रीवल्लभाख्यान् प्रभून् ॥४॥
श्रीवल्लभप्रतिनिधिं तेजोराशिं दयार्णवम् ॥
गुणातीतं गुणनिधिं श्रीगोपीनाथमाश्रये ॥ ५ ॥
श्रीविठ्ठलेशपादाब्जनखचन्द्ररुचः सदा ॥

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

इदमत्र विचार्यते । वेदान्तानां विचार आरम्भणीयो नवेति ।

अलङ्कुर्वन्तु मत्स्वान्तं मायावादतमोहराः ॥ ६ ॥
तत्पुत्रान् सह सूनुभिर्निजगुरून् श्रीकृष्णचन्द्राह्वयान् ॥
भक्त्या नौमि पितामहं यदुपतिं तातं च पीताम्बरम् ॥
वन्दे च व्रजराजमन्वयमणिं यद्रोचिषा मादृशो-
ऽप्यासीन्मूर्ध्नि कृपापरः प्रभुवरः श्रीबालकृष्णः स्वयम् ॥ ७ ॥
श्रीवल्लभाचार्यपदाम्बुजाते भक्त्या मुदाऽन्तर्हृदि संनिवेश्य ॥
भाष्यप्रकाशे प्रयतेऽतिदीनो निःसाधनस्तत्करुणाबलेन ॥ ८ ॥
आचार्यवाचः प्रणमामि भाष्यसुबोधिनीस्था इतराश्च यास्ताः ॥
मत्स्वान्त आगत्य कृताप्लुतास्ता मदीयवाचां रचयन्त्वलङ्कृतिम् ॥ ९ ॥

अथ स्वालौकिकानुभावप्रकटनहृदयस्य भगवत आज्ञया तदर्थमाविर्भूताः श्रीमदाचार्यास्तस्यानुभावस्य सर्ववेदान्ततात्पर्यगोचरत्वज्ञापनाय वेदार्थतामरसतरणेर्भगवतो बादरायणस्य सूत्राणि व्याकरिष्यमाणाः, 'सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति' भाष्यलक्षणात् सूत्रोपन्यास एवानुसरणसिद्धेः स्वकृतेरादित एव भाष्यत्वाय सूत्रीयाथशब्देनैव मङ्गलसिद्धेश्च सूत्रमेवादौ पठन्ति * अथातो ब्रह्मजिज्ञासेति * नच मङ्गलाचरणान्तरादर्शनाच्छिष्टाचारविरोधः शङ्कनीयः । महाभाष्ययोगभाष्ययोर्ग्रन्थकृत्कृतस्याथशब्दातिरिक्तस्य मङ्गलस्यादर्शनेन, शाबरभाष्ये च 'अथातो धर्मजिज्ञासा' इति सूत्रमेवोपन्यस्य भाष्यारम्भदर्शनेन च विरोधाभावादिति । अस्यारम्भसूत्रत्वादधिकारिविषयसम्बन्धप्रयोजननिरूपणद्वारा शास्त्रारम्भः समर्थनीयः । शास्त्रप्रवृत्त्यावश्यकत्वहेतुरूपा सङ्गतिश्च निरूपणीया । अन्यथा प्रेक्षावत्प्रवृत्त्यभावेन शास्त्रवैयर्थ्यं स्यात् । शास्त्रस्य वैधत्वमपि विचारणीयम् । अन्यथा वेदान्तानुपयुक्तत्वं, प्रामाणिकानादरणीयत्वं च स्यात् । तदिदं सर्वं हृदि कृत्वा भगवता श्रीबादरायणाचार्येणेदमधिकरणरूपं सूत्रं प्रणीयते, न तु ब्रह्मविचारप्रतिज्ञामात्रमत्र क्रियत इत्याशयेनाहुः * इदमित्यादि *

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्' इति लक्षणाद् विषयादिपञ्चकघटितं वाक्यमधिकरणम् । तेनास्मिन् सूत्रे, इदं वक्ष्यमाणं बुद्धिस्थं विचार्यते । अग्रिमसूत्रेषु वेदान्तानां विचारणीयत्वादुपोद्घातेन चिन्त्यत इत्यर्थः । विषयादिकमाहुः * वेदान्तानामित्यादि * नन्वत्रायं विषयाद्युपन्यासो न युक्तः । असौत्रत्वात् । किन्तु, ब्रह्मजिज्ञासा कार्या न वा ? ब्रह्म जिज्ञास्यं न वा ? इत्येवं सूत्रानुसरणाद् युक्त इति चेन्न । तथोपन्यासे, तपसा ब्रह्म विजिज्ञासस्वेतिश्रुत्या तपस एवोपदेशात् तद्विहाय व्यासपादैः किमिति वेदान्तवाक्यानि विचार्यन्ते, तपः कुतो नोपदिश्यत इत्याशङ्का स्यात् श्रुतिविरुद्धत्वं च भायात् । एवमुपन्यासे त्वधीतवेदस्य, वेदान्तविज्ञानसुनिश्चितार्था इतिश्रुतिस्फुरणादस्यां च श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताकथनात् तस्य च विचारसाध्यत्वात् तत्स्फूर्त्याशङ्कानुदयाद् युक्त इति ।

किञ्च । जिज्ञासापदस्य च यौगिकार्थ एव प्रायः प्रसिद्ध इति ब्रह्मज्ञानेच्छा कर्तव्या न वा, ब्रह्म ज्ञानेच्छाविषयं कार्यं न वेति प्रथमतो बोधे, ततस्तावन्मात्रस्यापुरुषार्थत्वात् तत्रानुपपत्तौ जातायां पश्चाद् विचारं लक्षयित्वा ततस्तत्कर्तव्यत्वादिकं विचार्यम् । तदपि वेदान्तैरेव वक्ष्यमाणरीत्या विचार्यम् । अन्यथाऽऽकस्मिकता स्यात् । अत आवश्यकत्वादपि युक्तः ।

किञ्च । व्यासप्रवृत्तिबीजबोधनार्थत्वेनापि युक्तः । तथाहि । प्रथमस्कन्धे चतुर्थाध्याये 'द्वापरे समनुप्राप्त' इत्यारभ्य, 'एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः !' इत्यन्तेन सर्वेषां श्रेयोऽर्थे प्रवृत्तिर्व्यासचरणानामुक्ता । पञ्चमे च, जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनमिति नारदेन ब्रह्मविचारान्तायाः कृतेस्तथात्वं बोधितम् । तथाच ज्ञानविधिनार्थज्ञानार्थं प्रवृत्तानपि यदा जैमिनीयादिदर्शनैरेकदेशीयविरुद्धज्ञानवतो दृष्टवांस्तदा भारतकरणोत्तरमत्र प्रवृत्तः । वेदार्थनिश्चयो वेदान्तार्थनिश्चयं विना न भविष्यतीति । अत एवात्राग्रे वेदान्तवाक्यैरेव ब्रह्मविचारदर्शनम् । ब्रह्मणः सर्ववेदार्थत्वस्याग्रे सूत्रेषु स्थाप्यत्वाच्च । तदर्थं वेदान्तविचारावश्यकत्वमवश्यं साधनीयम् । तेन तत्र हेत्वाकाङ्क्षोपशमात् । अतस्तदुपोद्घाततयाऽयं विचारोऽपि शेषषष्ठ्यन्तब्रह्मपदादेव बोध्यत इति सौत्रत्वाद् युक्त इति ।

किं तावत् प्राप्तम् । नारम्भणीय इति । कुतः ।
साङ्गोऽध्येयस्तथा ज्ञेयो वेदः शब्दाश्च बोधकाः ।
निःसन्दिग्धं तदर्थाश्च लोकवद् व्याकृतेः स्फुटाः ॥

तत्र विषयो नामापाततः प्रतिपन्नः सन्दिग्धोऽर्थः । तादृशश्चात्र वेदान्तविचारो न तु वेदान्ताः । तेषामग्रिमसूत्रेषु विचार्यत्वात् । विशयः संशयः । एकधर्मिकविरुद्धकोटिद्वयावगाहि ज्ञानम् । तदाकारश्चात्र, आरम्भणीयो न वेत्यनेनोक्तः । पूर्वपक्षः प्रतिवादिमतम् । तदाहुः *नारम्भणीय*इति । तत्र पृच्छन्ति*कुत*इति । वेदान्तविज्ञानसुनिश्चितार्था इति श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताबोधनाद् विचारं विना च तदसम्भवात् स आवश्यक इति कुतो नेत्युच्यत इत्यर्थः । एवं प्रश्ने प्रतिवादी अनारम्भणीयतामुपपादयन् गृह्णाति * साङ्ग* इत्यादि । अयमर्थः । वेदान्तविचारस्यारम्भणीयत्वं वदता सिद्धान्तिना विधिप्रयुक्त्याऽऽरम्भणीयत्वं वक्तव्यम् । तत्र विचारे प्रत्यक्षविधेरदर्शनात् कथञ्चित् कुतश्चिद् वैधत्वं साधनीयम् । ततश्च कर्मादिविधिभ्यस्तत्सिद्ध्यसम्भवादध्ययनादिविधिभ्यः साधनीयम् । तत्र, स्वाध्यायोऽध्येतव्य इत्येकः । अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेदित्यपरः । साङ्गो वेदो ध्येयो ज्ञेयश्चेत्यन्यः । एते त्रयः पूर्वकाण्डस्थाः । श्रोतव्य इत्यादिरुत्तरकाण्डस्थश्चेतरः ।

तत्र भाट्टास्तावदेव मन्यन्ते । अध्ययनविधेरक्षरग्रहणमात्रपर्यवसानेऽदृष्टकल्पनापत्तेरर्थज्ञानरूपदृष्टफलार्थतैव युक्ता । न च विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनाध्ययनस्य स्वाध्यायसंस्कारद्वाराऽर्थज्ञानहेतुत्वप्राप्तेर्न तावत्पर्यन्तं विधिव्यापारो युक्त इति वाच्यम् । विमतं वेदाध्ययनं नार्थज्ञानहेतुर्वेदाध्ययनत्वादाधुनिकाध्ययनवदिति प्रत्यनुमानेन तद्बाधात् । न च लोकेऽवगतसामर्थ्यानां शब्दानां वेदेऽपि बोधकत्वाल्लिखितपाठादिनाऽप्यर्थज्ञानसम्भवाच्चार्थबलादेव तत्प्राप्तेरर्थज्ञानांशे तस्यापूर्वविधित्वाभावान्न तत्पर्यन्तं विधिव्यापारो युज्यत इति वाच्यम् । अर्थज्ञानांशेऽस्य नियमविधित्वाङ्गीकारात् । न च यथाऽवघातनिष्पन्नैरेव तण्डुलैर्दर्शपूर्णमासापूर्वसिद्धिर्न पेषणादिनिष्पन्नैस्तथाऽध्ययनावगतेनैवा-

र्थेन क्रत्वपूर्वसिद्धिर्नतु प्रकारान्तरावगतेनेति फलांशे नियमविधित्वं न युक्तम्, अनारभ्याधीतत्वेन श्रुत्याद्यभावेन च क्रत्वर्थतायाः अशक्यवचनत्वादिति वाच्यम्। वैदिकशब्दानां विलक्षणत्वेन पूर्वोक्तरीत्या सम्यगर्थज्ञानाभावे गृहस्थादीनां द्रव्यादियज्ञासिद्धेः सर्वधर्मलोपप्रसङ्गात्। अतः पूर्वोक्तदूषणेनापूर्वविधित्वनियमविधित्वयोरशक्यवचनत्वेऽपि, वसन्ते ब्राह्मणमुपनयीतेत्यादिवाक्येषु द्वितीयानिर्देशेन तेषां संस्कार्यत्वावगमात् संस्कारस्य च कार्यान्तरयोग्यतासम्पादनरूपत्वादुपनयनसंस्कृतानां त्रैवर्णिकानां कार्यान्तरापेक्षत्वेन तत्सन्निधिपठितस्याध्ययनस्य चानिर्दिष्टकर्तृकतया कर्त्रपेक्षत्वेन परस्पराकाङ्क्षासन्निधियोग्यत्वैस्त्रैवर्णिकानां यज्ञरूपकार्यान्तराधिकारनियमार्थत्वस्याध्ययनविधौ सुखेन सम्भवात्। एवञ्चाधानाग्निहोत्रादिविधयस्त्रैवर्णिकेषु विद्वत्सु सत्सु तानेवाधिकुर्वन्ति। अन्यथा चतुर्थादेरप्याक्षिपेरन्। सोऽयमधिकारो वक्ष्यमाणऽपशूद्राधिकरणेऽध्ययनविधिप्रसादलभ्य इत्यध्ययनविधिरर्थज्ञानपर्यवसायीति।

प्राभाकरास्तु, 'सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इत्याचार्यकरणे विहितेनोपनयीतेत्यात्मनेपदेनोपनयनरूपस्य माणवकसंस्कारस्याचार्यत्वसिद्धिप्रयोजनताप्रत्ययेऽपि, 'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' इति स्मृतौ क्त्वाप्रत्ययेनोपनयनस्याध्यापनाङ्गताप्रतीतेस्तत् कथमध्यापनस्योपकरोतीत्यपेक्षायां, शिष्यमिति, तमध्यापयेदिति च द्वितीयोक्तकर्मत्वलिङ्गादुपनेयासत्तिद्वारेति निश्चीयते। उपनीतोऽपि नाकिञ्चित्करोऽङ्गमिति तद्व्यापारापेक्षायां वाक्यान्तर उपनयनं प्रक्रम्य विहितं वेदाध्ययनमेवाध्यापनोपकारकत्वादुपनीतव्यापारतयाऽध्यवसीयते। तदेवं स्वाङ्गमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारेणाध्ययनं प्रयुङ्क्ते। ततश्चाध्ययनस्यापि प्रयोजने विचार्यमाणे स्वानन्तर्येणान्तरङ्गत्वादर्थज्ञानमेव तथात्वेन निश्चीयते, न त्वाचार्यत्वसिद्धिर्बहिरङ्गत्वात्। न च प्रथमावगतत्वेनाचार्यत्वसिद्धिरेवाध्ययनप्रयोजनं, न तु पश्चादवगतमर्थज्ञानमिति वाच्यम्। तत्सिद्धिं विनाऽप्यध्ययनानुष्ठानसम्भवेन प्रथमं तदनवगमात्। न च शब्दादवगतो नियोग एव प्रयोजनमस्त्विति वाच्यम्। अर्थज्ञानस्यापि प्रतीयमानत्वेन त्यागायोगात्। नचैवमध्ययनस्यार्थज्ञानार्थत्वेऽध्ययन-

विधिनैवार्थज्ञानप्राप्तिः किमिति नाद्रियत इति शङ्क्यम् । अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्ताध्यात्मलाभानङ्गीकारे विश्वजिदादिवन्नियोज्यकल्पनापत्तेः । अतोऽध्यापनविधिप्रयुक्तमेवाध्ययनमर्थज्ञानं च, नाध्ययनविधिप्रयुक्तमित्याहुः ।

एवं मीमांसकमतद्वयेऽप्यर्थज्ञानस्य वैधत्वात् तदाक्षिप्तविचारस्यापि वैधत्वम् ।

रामानुजाचार्यास्तु, अध्ययनविधिना स्वाध्यायाख्यस्य वेदस्याक्षरराशेर्ग्रहणं विधीयते । तत्रेतिकर्तव्यताकाङ्क्षायामध्यापनविधिना, 'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्' इत्यादिभिश्चापेक्षितानि विधीयन्ते । तेनाचार्योच्चारणानूच्चारणरूपमध्ययनमक्षरराशिग्रहणफलकमित्यवगम्यते । तच्च चतुर्वर्गफलस्य विधिवाक्ये कर्मत्वेन बोधितस्य स्वाध्यायस्य कार्यान्तरयोग्यतासम्पादनरूपः संस्कारः । तेनाध्ययनविधिरक्षरग्रहणमात्रपर्यवसायी । अध्ययनगृहीतं च स्वभावादेवार्थबोधकमिति स्वाध्यायस्यापि तथात्वात् तत्रापाततोऽवगम्यमानानामर्थानां स्वरूपप्रकारविशेषनिर्णयाय वेदवाक्यविचाररूपमीमांसाद्वयश्रवणेऽधीतवेदः पुरुषः स्वत एव प्रवर्तते । तत्र कर्मस्वरूपनिरूपणे तेषामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चाऽमृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलकवेदान्तविचाररूपशारीरकमीमांसायामधिकरोतीत्याहुः ।

शैवस्तु, अध्ययनविधेरक्षरग्रहणमात्रपरत्वमङ्गीकृत्याध्ययनेनाऽऽपाततोऽर्थप्रतीतेस्तदनु ब्रह्मस्थूलोपासनभूतज्योतिष्टोमादिविधायकानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां चेतरेतरविरोधाभासं पश्यंस्तद्विचारं पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्ततेऽतो नानिबन्धनो विचार इत्याह ।

भास्कराचार्यास्तु स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेऽपि ब्रह्मज्ञानं तेनाक्षेप्तुं न शक्यम् । यज्ञेन दानेनेति, शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वा आत्मन्येवात्मानं पश्येदिति श्रुत्या ब्रह्मज्ञानस्योपायान्तरसापेक्षत्वात् । कर्मावबोधनसमर्थेषु पुरुषेष्वध्ययनविधेः कृतार्थत्वेनोपायान्तराक्षेपाक्षमत्वात् । श्रवणायापि बहुभिर्यो न लभ्य इत्यादिश्रुतेर्ब्रह्मणो दुर्ज्ञेयत्वाच्च । अतो ब्रह्मजिज्ञासा न त-

त्कारिता। किन्तु, श्रोतव्यो मन्तव्य, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्यादिवेदान्तविध्यधिकारिता वास्त्वित्याहुः।

तत्राध्ययनविधेरर्थज्ञानार्थत्वकल्पनमसङ्गतम्। यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीतिवाक्येनाक्षरग्रहणमात्रेऽपि फलबोधने तदतिहाय फलान्तरकल्पनस्यायुक्तत्वात्। वाक्यबलेनाऽदृष्टद्वारकत्वस्याप्यदुष्टत्वात्। तेन तेन क्रत्वध्ययनेनास्याध्येतुरिष्टं मनोवाञ्छितं भवतीति दृष्टफलार्थत्वस्यापि शक्यवचनत्वाच्च। नच प्रत्यक्षविरोधः। इदानीन्तनाध्ययनस्य व्यङ्गत्वेनादोषात्। नच व्यङ्गत्वे मानाभावः। स्वाध्यायपदस्य वेदे योगरूढ्या सुष्ठुसमन्तादध्यायो यस्येति योगस्यापि ग्राह्यत्वे देशकालगुरुशिष्यनिष्ठानां शोभनगुणानां पाठार्थानुष्ठानेषु शङ्काराहित्यरूपस्य समन्तत्वस्य च ग्रहणेन स्वाध्याय इति समाख्याया एव तत्र मानत्वात्। नचैवं सत्यर्थज्ञानस्यापि प्राप्तेः कथं तदर्थत्वकल्पनस्यासङ्गतिरिति शङ्क्यम्। तैस्तस्य माणवकाधिकारत्वेनाङ्गीकारात्। वेदस्य गुरुमुखाद् ग्रहणदशायां तं प्रति स्वाध्यायत्वस्य भावित्वेन तदानीमभावात्। वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति सत्यं वद धर्मं चर स्वाध्यायान्मा प्रमद इति तैत्तिरीयाणां शिक्षोपनिषच्छ्रुत्या तथा निश्चयात्। आधानाग्निहोत्रादिविधीनामपि तत्र तदपेक्षकत्वस्याध्ययनविधिप्रसादलभ्यत्वोपगमेन प्रसादस्य च माणवके सामर्थ्याभावादभावेन तेषामप्याक्षेपकतायां कौण्ठ्याच्च। आश्रिते चैकवाक्यत्वे, ज्ञेयश्चेतिविध्यन्तरस्यापि संग्राह्यत्वात् तद्बलादेवार्थज्ञानमङ्गीकार्यम्। अन्यथा तद्वैयर्थ्यादिति। अत एव प्राथमिकाध्ययनस्यापि तदर्थत्वमसङ्गतम्। किन्त्वध्यापनप्रयुक्तत्वं यदुक्तं तन्मात्रं युक्तम्। ज्ञातुर्नियोज्यस्याचार्यत्वकामिनस्तत्रैव विधौ सत्त्वेन लिङ्प्रयोगेण च तत्र विधित्वस्यासन्दिग्धत्वात्। कृत्यानामावश्यकार्थेऽप्यनुशासनात्। वयसा जातस्वातन्त्र्याणां त्रैवर्णिकानामध्ययनस्यावश्यकत्वबोधनेन वाक्यसार्थक्यसिद्धेः। एवञ्च यद्यप्यध्यापनविधावध्यापनमात्रं श्रुतं, तथापि, साङ्गो वेदोऽध्येयो ज्ञेयश्चेतिश्रावणाद् गुरुणाङ्गपाठनेऽर्थाज्ञापने च तदसिद्ध्या वैयर्थ्ये वाक्यस्य प्रसक्ते तद्वारणाय तथाध्यापनमङ्गीकरणीयम्। आचार्यलक्षणस्मृतौ वेदस्य सकल्पं सरहस्यं चेति विशेषणाच्च। एवं साङ्ग-

ऽधीते ज्ञाने च तस्य स्वाध्यायः सिद्ध्यति। तदोक्तं फलमपि सम्पद्यत इति वाक्यत्रयैकवाक्यतयाऽवसीयते। तस्मात् प्राथमिकाध्ययनमध्यापनप्रयुक्तम्, अर्थज्ञानं च प्रत्यक्षश्रुतिलभ्यमिति भाट्टप्राभाकरयोः पूर्वोक्तकल्पना असङ्गतैव। कृत्यप्रत्यययोर्विध्यर्थकत्वपक्षेऽप्युक्त एव प्रकारो युक्तः। अन्यथा विधिकौण्ठ्यप्रसङ्गात्। एवञ्च रामानुजाचार्यैरध्ययनविधेरक्षरग्रहणपर्यवसायित्वं, स्वाध्यायस्य च स्वभावादर्थबोधकत्वं यदुक्तं तदप्युक्तदिशैव युक्तम्। नत्वन्यथापि। एवमेव भास्कराचार्योक्ते स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेपि बोध्यम्। शैवस्तु विचारसार्थक्यमात्रमाह, न तु शास्त्रप्रयोजकं कञ्चन विधिमपीति तन्मतेऽवैधत्वमेवायाति। तेन तत्तूदासीनप्रायम्। एवं वेदान्तस्थविध्यावपि श्रवणपदेन शब्दग्रहणं मननपदेनाववोधोऽन्वेषणवि जिज्ञासापदाभ्यां चेच्छा विधीयत इति बोद्धव्यम्। नचेच्छाया अविधेयत्वम्। तिस्रः खलु एषणा एषितव्या इति चरके पतञ्जलिनाऽभिधानात्। अतस्तद्विजिज्ञासस्व तद् ब्रह्मेति विधिरपि तथा। एवञ्च भैक्षवं ये विधय उक्ताः, आत्मेत्येवोपासीत, स म आत्मेति, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति। तेऽपि ज्ञान एव, न विचारे। ये चापि मध्वाचार्यैर्जिज्ञासासूत्रे, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्युक्तास्तेऽपि सर्वे ज्ञान एव पर्यवस्यन्ति।

यत्तु शैवः। किमयं श्रोतव्य इति विधिर्नियमः परिसङ्ख्या वा?। नाद्यः। वेदान्तश्रवणं स्वविषयमात्रावगतिसाधनं शास्त्रश्रवणत्वाद् वैद्यकशास्त्रश्रवणवदित्यनुमानेनापि प्राप्ततयाऽपूर्वत्वाभावात्। न द्वितीयः। अवघातवद् दृष्टफलस्योपायान्तरस्याप्राप्तत्वात्। नेतरः। तथा सति श्रोतव्या एव वेदान्ता नाध्येया इति स्यात्। ततश्च विचारस्याप्ययोगात् पुरुषार्थासम्भवः। एवञ्च वेदाध्ययनादिरपि निवर्तेतेति महाननर्थः स्यादिति विकल्पितवान्। तत्तुच्छम्। हेतोः साधारणत्वेनानुमानतोऽप्राप्तावपूर्वविधित्वस्य स्थिरत्वात्। कथं साधारणतेति चेद्? वेदान्तश्रवणं न स्वविषयावगतिसाधनं शास्त्रश्रवणत्वात् सूत्रश्रवणवदित्येवमवधेहि। किञ्च, श्रवणपदं शब्दग्रहणमात्रपरं वा, वाक्यार्थज्ञानपरं वा। आद्ये विधिवैयर्थ्यापत्तिः। स्वाध्यायविधिनैव चारितार्थ्यात्। नचाध्ययननियमाभावाय पुनर्विधानमिति वाच्यम्। आचारविरोधात्। त्रैवर्णिकाधिकारस्यापि स्वा-

अर्थज्ञानार्थं विचार आरम्भणीयः। तस्य च ब्रह्मरूपत्वात् तज्ज्ञाने पुरुषार्थो भवतीति न मन्तव्यम्। विचारं विनापि वेदादेव साक्षादर्थप्रतीतेः ।

गापत्तेश्च । द्वितीये तु निराबाधं विधित्वम् । अन्यथा वाक्यवैयर्थ्यापत्तेरिति ।

अतः पूर्वकाण्डविधेरर्थज्ञानमात्रार्थत्वेनोत्तरकाण्डीयस्यापि ब्राह्मणश्रमणन्यायेन विशेषार्थतया विचारस्यावैधत्वान्नारम्भणीयः। ननु सन्देहाभावायाध्ययनादिविधौ विचार आक्षेप्य इत्यत आह । * शब्दाश्चेत्यादि * ।

विशेषबोधनाय स्वोक्तं विभजते *अर्थज्ञानेत्यादि* सर्वोऽपि प्रयोजनमुद्दिश्य कार्यमारभते । तत्रास्य विचारस्य प्रयोजनं वेदार्थज्ञानं वाऽन्यद् वा। तत्रान्यस्यादर्शनाद्, वेदान्तविज्ञानसुनिश्चितार्था इतिवाक्यबोधितमाश्रमेवादर्तव्यम् । तत्रापि तस्य स्वतोऽपुरुषार्थत्वात् प्रयोजनान्तरमेष्टव्यम् । तच्च प्रयोजनमनन्तविधमप्यैहिकामुष्मिकपुरुषार्थेऽन्तर्भूतत्वात् पुरुषार्थरूपम् । तच्च वेदार्थज्ञानेन भवतीति तदर्थं विचार आरम्भणीयो, न तु स्वतःपुरुषार्थत्वात् । वेदार्थश्च, सर्वे वेदा यत्पदमामनन्तीति, वेदैश्च सर्वैरहमेव वेद्यः, वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियमित्यादिश्रुतिस्मृतिभिर्ब्रह्मरूपः । नच वेदोऽखिलो धर्ममूलमित्यादिस्मृतिभिर्धर्मरूप इति वाच्यम् । यज्ञो वै विष्णुरिति, धर्मो यस्यां मदात्मक इति श्रुतिस्मृतिभ्यां धर्मस्यापि ब्रह्मरूपत्वबोधनात् तद्रूपेणैवार्थत्वात्। ब्रह्मणस्तु ज्ञानादेव पुरुषार्थसिद्धिः। ब्रह्मविदाप्नोति परम्, आनन्दं ब्रह्मेत्युपक्रम्य, य एवं वेद प्रतितिष्ठति, अन्नवा अन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या। दहरविद्यायां दहरपुण्डरीकवेश्मास्थितस्याकाशस्यैतदमृतमभयमेतद् ब्रह्मेत्यनेन ब्रह्मत्वमुक्त्वा, एवंवित् स्वर्गं लोकमेतीत्येवंविधेषु वाक्येष्वैहिकामुष्मिकपुरुषार्थस्य ज्ञानमात्रेणैव श्रावणात् तावतापि पुरुषार्थसिद्धेर्ब्रह्म * न मन्तव्यं * न विचार्यमित्यर्थः। न च श्रोतव्य

नचार्थज्ञानमविहितम्, अविचारिताश्च शब्दा नार्थं प्रकाशयन्तीति वाच्यम् । ज्ञेयश्चेति विधानात् । ' गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ' इति बाधोपलब्धिश्च । शब्दश्चक्षुरादिवन्न सन्दिग्धार्थप्रतिपादकः । तदर्थश्च व्याकरणादिना निश्चीयते । यथा लौ-

———

इति विधिना श्रवणं विधाय तदर्थमननाय मन्तव्य इति विध्यन्तरदर्शनादवबोधसामान्यस्य तदर्थत्वेनाशक्यत्वघनत्वाद् युक्तिभिरनुचिन्तनमेव मननपदार्थो वक्तव्य इति विचारोऽपि प्राप्त एवेति वाच्यम् । तस्य शारीरपरत्वात् । प्रियत्वलिङ्गेन तथा निश्चयात् । नच वाक्यार्थः शारीरः परमात्मा वेति सन्देहे लिङ्गादिभिस्तन्निश्चितार्थबाधार्थमेव विचार आक्षेप्य इति वाच्यम् । वेदे साङ्ग इति विशेषणादधीतनिगमनिरुक्तव्याकरणस्य विचारं विनापि तैरेव तत्सम्भवात् । तेषु श्रुतीनामेवोदाहृतत्वात् । न च मास्तु वाक्यार्थज्ञानार्थे विचारापेक्षा । पदार्थज्ञानार्थं त्वावश्यकः । शब्दानां प्रायशोऽनेकार्थत्वेनानेकवृत्तिकत्वेन च कया वृत्त्या कमर्थमत्र बोधयन्तीति निश्चयाभावात्, तदर्थज्ञानस्य चाविहितत्वेन तद्विचारादिति शङ्कनीयम् । अध्येयत्ववत् साङ्गस्य ज्ञेयत्वविधानेन गुरुमुखादेव पदार्थज्ञानस्यापि सिद्धेः । नच विध्यभावाद् गुरुणार्थो न वक्तव्य इति शङ्का कार्या । वाक्यान्तरे बाधोपलब्धेः । तदिदमुक्तं, *नचार्थेत्यादिना* नापि सन्देहाभावाय तदपेक्षा । शब्दस्य निःसन्दिग्धार्थबोधकत्वात् । न हि गौरित्युक्ते सत्त्वान्तरबोधो भवति । अतोऽनेकार्थत्वादिसङ्करेऽपि व्याकरणोक्तस्वरादिना सुखेन तन्निरासात् । किञ्च । लोके प्रत्यक्षादिसंक्रमात्र तथा व्याकरणापेक्षेति तद्विरुद्धमपि क्वचिन्निर्णीयते । अत एव लौकिकशब्दार्थनिर्णायकत्वेऽपि न तत्र तेषामङ्गत्वप्रसिद्धिः । वेदे तु तेषामङ्गत्वस्य शास्त्रप्रसिद्धत्वात् प्रमेयस्य चा-

१ न वारे पत्युः कामाय पतिः प्रियो भवति किं तर्हि आत्मनः कामाय सर्वं प्रियं भवतीति श्रुत्युक्तलिङ्गेनेत्यर्थः ।

किकवाक्ये तथा वेदेऽपि । न च तद्विरुद्धं निर्णेतव्यम् । अप्रामाणिकत्वप्रसङ्गात् । तस्माद् वेदार्थज्ञानार्थं विचारो नारम्भणीयः ।

स्यादेतत् ।

न वेदार्थज्ञानमात्राय विचारः । किन्तु ब्रह्मज्ञानाय । तस्य चात्मरूपत्वात् तस्य चाविद्यावच्छिन्नत्वाद् देहात्मभावदृढप्रतीतेस्तद्व्यतिरिक्तस्य ब्रह्मणोऽभावान्न वेदमात्रादसम्भावनाविपरीतभावनानिवर्तकं ज्ञानमुत्पद्यते ।

त्यन्तालौकिकत्वेन विचारनादिनोऽपि तेषामाश्रयणीयत्वात् तद्धेतुन्यायेन तैरेवार्थज्ञानसिद्धेः कृतमजागलस्तनप्रायेण विचारेणेति । तदिदमुक्तं * नचेत्यादिना * ।

अथैकदेशी स्वमतेन विचारकर्तव्यतामुपपादयति * स्यादेतदिति * वक्ष्यमाणप्रकारेण विचारस्यारम्भणीयत्वमुपपद्यतामित्यर्थः । तदाह * न वेदार्थेत्यादि * । * तस्येति * ब्रह्मणः । पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहेत्यादिषु विशेषणमात्रस्यापि तत्पदेन ग्रहणदर्शनात् । अयमर्थः । अनुपपद्यमानत्वान्मास्तु वेदार्थमात्रत्वेन ब्रह्मज्ञानाय विचारः । परं त्वात्मत्वेन ब्रह्मज्ञानाय विचारो न प्रतिक्षेप्तुं शक्यः । नच सन्दिग्ध एव विषये विचारस्य प्रवृत्तेरात्मनश्चाहंप्रत्ययगोचरत्वेनासन्दिग्धत्वादेवमप्यविचार्यत्वमेवेति शङ्क्यम् । अहंप्रत्ययस्य स्थूलोऽहं कृशोऽहं बधिरोऽहं गच्छाम्यहं श्वसिम्यहं जानाम्यहमित्यादौ देहाद्युपाधिगोचरत्वेन विपर्यस्तत्वात् तेन सन्देहानिवृत्तेरभावात् । नच देहादिरेवात्मेति युक्तम् । देहस्यावस्थाभेदेषु परिणामान्तरदर्शनेन नश्वरत्वनिश्चयात् । अहंवित्तिवेद्ये त्वात्मनि, यः कृशः पूर्वं स इदानीं स्थूल इति पूर्वापरकाले ऐक्यभानेन तदभावात् । नच सोऽहमिति प्रत्यभिज्ञया देहादेरात्मत्वं वक्तुं शक्यम् । प्रत्यभिज्ञाया सोऽयं दीपस्तदिदं जलमितिवत् सजातीयविषयत्वेन पूर्वापरकालकतदैक्यानिश्चायकतया तदविषयत्वात् । एवं तत्तदिन्द्रियनाशेऽपि जीवनदर्शनाच्छ्वासोच्छ्वासयोर्बहिरागच्छतः

प्रत्युत देहात्मभावदृढप्रतीतिः श्रुतेरुपचरितार्थत्वं स्तुतित्वं वा कल्पयिष्यतीति ।

मैवम् ।

प्राणस्यापि ज्ञानादर्शनेनाचेतनत्वनिश्चयाद् बुद्धिमनसोरपि करणत्वेन सिद्धतया कर्तृत्वेनासिद्धत्वाद् विषयपार्थक्यस्य सर्वानुभवसाक्षिकत्वात् सर्वेषामिदङ्काराऽऽस्पदत्वाच्च । नचेदङ्कारास्पदानामात्मत्वं युज्यते । पुरोऽवस्थित एव विषये तथाप्रयोगदर्शनात् । आत्मनश्च प्रत्यग्वित्तिवेद्यत्वेन तथात्वाभावात् । नचैवं सिद्धे देहादिभ्यो विवेके सन्देहाभावादजिज्ञास्यत्वम् । तस्याविद्यावच्छिन्नत्वाद् विदुषां शास्त्रपरिपक्वबुद्धीनामप्यहंप्रत्यये विविक्ततत्स्वरूपस्यागोचरत्वात् सुखदुःखादीनां प्रादेशिकत्वस्य चाभिमानेन तथा निश्चयात् तेषामपि देहात्मभावदृढप्रतीतेरविद्यासम्बन्धरहितस्य केवलस्यात्मनः प्रत्ययाभावेन दर्शनान्तरेऽपि व्यापकतया प्रतिपन्नस्य तस्यैव बृहत्त्वेन बृंहणत्वेन च तदतिरिक्तस्य ब्रह्मणोऽभावाद् विविक्ततत्स्वरूपज्ञानाय विचार आवश्यकः । नच वेदमात्राद् विविक्तात्मस्वरूपविषयासम्भावनाविपरीतभावनानिवर्तकं ज्ञानं सिद्ध्यति । प्रत्यक्षापेक्षया शब्दस्य निर्बलत्वात् । प्रत्युत प्रबलप्रमाणेन देहात्मभावदृढप्रतीत्या शास्त्रपक्वबुद्धिरपि दर्शनान्तराभिमानेन विविक्तात्मस्वरूपबोधिकाया श्रुतेः कल्पनोपदेशतयोपचरितार्थत्वं वा, उपासनाशेषतया स्तुतित्वं वा कल्पयिष्यति । अतोऽसम्भावनाद्यपनयनेन श्रुतावुपचारादिनिवृत्त्यर्थं वेदार्थभूतात्मत्वेन ब्रह्मज्ञानाय विचार आवश्यक इति ।

एवमुक्तमेकदेशिमतं चोदकः प्रतिक्षिपति * मैवमिति * यदुक्तं, न वेदार्थज्ञानमात्राय विचारः, किन्तु ब्रह्मज्ञानायेति । तत्र किं दर्शनान्तरवच्छ्रुत्युदासीनात्मत्वेन ब्रह्मज्ञानाय वेदान्तविचारः । ततश्च वेदार्थज्ञानमानुषङ्गिकमिति तव मनीषितम्, उत वेदार्थभूतात्मत्वेन तदर्थं स इति । तत्राद्यस्तु दर्शनान्तरैरेव सिद्धो, न विवक्षितपदवीमधिरोहति । द्वितीयश्चेत् तत्रापि तत्र सङ्गच्छत इत्यर्थः ।

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते।
तपसा वेदयुक्त्या तु प्रसादात् परमात्मनः॥

न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः।

उक्तरूपस्यात्मनो वेदार्थत्वाभावे हेतुं कारिकया गृह्णाति *अलौकिक इति*। हिशब्दो हेतौ। अलौकिकत्वादित्यर्थः। किं तेनेत्याह *न युक्त्येति*। कथं तर्हि तत्प्रतिपत्तिरित्यत आह *तपसेत्यादि* तपोऽनशनादिरूपम्। वेदोक्ता युक्तिर्वेदयुक्तिः। न्यग्रोधफलमाहरेत्यादिरूपा। परमात्मप्रसादो मुख्यं साधनम्। अन्यथा तेषां प्रकृतिवैचित्र्याच्चित्रा वाचः स्रवन्ति हीनिन्यायेनान्यदेव बुद्ध्येतेति। एतदेव विभजते *न हीत्यादि*। अयमर्थः। भवान् हि श्रुतीनामनुपचरितार्थत्वाय दर्शनान्तरे आत्मगमकत्वेन स्वीकृतस्याहम्प्रत्ययस्य प्रादेशिकग्राहकत्वं प्रदर्श्य तस्याविद्याख्योपाध्यवच्छिन्नात्मग्राहकत्वेन भ्रमत्वं च प्रदर्श्य तेन तन्निश्चयाभावात् कर्तृत्वभोक्तृत्वाद्यंशेऽपि तस्य भ्रमत्वं साधयितुं चिदेकरसस्यात्मनो ज्ञानाविषयत्वं च साधयितुमध्यासभाष्यसूचितां विषयत्वेन जडत्वेन व्याप्तिमङ्गीकृत्यैवमाह। अहंवित्तौ प्रकाशमानस्यात्मनो ज्ञानान्तरविषयत्वेन जडत्वापत्तिः। सर्वास्वर्थवित्तिषु प्रकाशाश्रयत्वेन सिद्धस्यात्मनो घटमहं जानामीत्यादौ विषयत्वायोगः। चैत्रो ग्रामं गच्छतीत्यादौ क्रियाफलस्य संयोगस्योभयनिष्ठत्वेऽपि ग्रामादौ परसमवेतक्रियाफलशालित्वस्य कर्मत्वेन स्वसमवेतक्रियाफलशालिन आत्मनः परत्वाभावेन आत्मानमहं जानामीत्यादौ विषयस्यात्मनः कर्मलक्षणानाक्रान्ततया कर्मत्वायोगः। तस्य कर्तृभेदाङ्गीकारे कर्मभूतस्य तस्यानात्मत्वप्रसङ्गः। अप्रकाशमानत्वस्यैव जडत्वेन स्वस्मिन्नप्रकाशमानतयापि जडत्वापत्तिः। अनुभवबलेन कर्मकर्तृविरोधे परिहृते सिद्धे चाभेदे प्रकाशाश्रयरूपकर्तृत्वेनैव प्रकाशत इत्यङ्गीकारेऽपि यस्मिन्नर्थात्मानौ प्रकाशेते तस्य ज्ञानरूपप्रकाशस्य स्वयमप्रकाशमानतया जडत्वे विषयाप्रकाशकत्वप्रसङ्गः। तस्याप्रकाशमानत्वेऽपि निलीय चक्षुरा-

दिवत् प्रकाशकत्वे तत्फलस्यैवैतत्फलस्यैव स्वयम्प्रकाशताया आ-
स्थेयतयाऽस्य जडत्वापत्तिः । पूर्वज्ञानफलस्यैतस्य जडत्वे एतज्ज्ञान-
फलस्याप्यसस्यापि जडत्वापत्तिः । परम्पराङ्गीकारेऽनवस्था जगदा-
न्ध्यापत्तिश्चेत्यतः फलरूपा संवित् स्वयंप्रकाशाऽभ्युपेतव्या, न तु
विलीय चक्षुरादिवत् प्रकाशिका । ततः स्वयंप्रकाशत्वस्यैव चेत-
नत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वाप-
त्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशा-
भावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतःप्रकाश-
त्वमेव चेतनत्वम् । ततश्च संवित्तुल्यत्वादात्मनोऽपि जडत्वमिति
युक्तम् । तथा सत्यर्थस्यापि चेतनत्वापत्तः । अथ संविदर्थात्मनां प-
रस्पराविनाभावादात्यन्तभेद इति विभाव्यते, तदा तु संविद इव
तयोरपि स्वयम्प्रकाशत्वं सिद्धमित्यर्थात्मनोः संविदतिरेकेणानिर्वा-
च्यत्वात् संविदेव केवला सिद्ध्यति, न त्वर्थात्मभ्यां सहिता । वस्तु-
तस्तु संविदोऽर्थसहभावोऽपि न नियतः । अतीतानागतस्थले व्यभि-
भिचारात् । नच तत्राभाव एव विषय इति वाच्यम् । तस्याऽसत्त्वा-
त् । नच सोऽपि सन्निति वाच्यम् । सत्त्वस्य निर्वक्तुमशक्यत्वात् ।
सत्त्वं हि सत्ताख्यसामान्यसमवायो वा, अर्थक्रियाकारित्वं वा प्रका-
शमानत्वं वाऽभ्युपेयम् । तत्र नाद्यौ । सत्तायां सत्तासमवायाभावेन
अर्थक्रियाकारित्वेऽर्थक्रियाकारित्वाभावेन च तयोरसत्त्वेन तयोरितरो-
ऽप्यसत्त्वसिद्धेः । सत्तान्तराद्युपगमेऽनवस्थापाताच्च । न तृतीयः ।
मरुमरीचिकादेरपि तोयाद्यात्मना सत्त्वापातात् । नच मरुमरीचिका-
दीनां तोयाद्यात्मना असत्त्वेऽपि स्वरूपेण सत्त्वात् प्रकाशमानत्वं नानु-
पपन्नमिति वाच्यम् । तथापि सत्त्वस्य प्रकाशमानत्वातिरिक्तधर्मान्तर-
त्वेन प्रकाशमानत्वस्य तत्त्वाभावात् । अथ भावधर्म एव सत्त्वम् ।
अभावेऽपि भाव एव । भावान्तरमभावोऽन्यो न कश्चिदनिरूपणादि-
ति भावस्यैव भावान्तरात्मनाऽभावरूपत्वादिति विभाव्यते । तदापि
स भावधर्मः को वा । व्यवहारयोग्यत्वमिति चेत् । को नाम तत्र
व्यवहारः । अभिलाप इति चेत् । तद्योग्यत्वस्य खपुष्पेऽपि तुल्यत्वा-
त् । अतोऽभावस्य खपुष्पतुल्यत्वेनातीतानागतस्थलेऽर्थवियुक्तैव सं-
वित् । एवमर्थसहभावानियमे सिद्धे यत्र सहभावाभिमानस्तत्राप्यर्थ-
सत्ताया निर्वक्तुमशक्यत्वादर्थस्यानिर्वाच्यत्वमेव । तथैवात्मनो व्या-

एकत्वेनाहम्प्रत्यये प्रादेशिकत्वस्थूलत्वकृशत्वादिना भासमानस्य चन्द्रसद्भावे चन्द्रान्तरवद् भानात् तस्याप्यनिर्वाच्यत्वम् । तच्च सतो बाधाभावादसतश्चाभानात् सत्त्वासत्त्वयोरेकत्र विरोधेन सदसद्रूपताया अशक्यवचनत्वात् सदसद्विलक्षणत्वमत्र । तथाच सति विषयत्वेन भासमानानां मरुमरीचितोयतुल्यत्वात् संविदेव केवला सती सिद्ध्यतीति सैवात्मा । तस्या अविषयत्वेऽपि तत्रैव कर्तृत्वभोक्तृत्वादयोऽध्यस्यन्ते । अप्रत्यक्ष आकाशे मालिन्यवदिति ।

तदसङ्गतम् । विषयत्वेन जडत्वेन व्याप्तेः प्रत्यक्षबाधितत्वात् । आत्मनश्चेतनत्वस्योभयसम्मतत्वात्, तस्य च प्रत्यग्वित्तिवेद्यत्वात्, प्रत्यग्वित्तिगोचरत्वेन विषयत्वस्य व्यापकतया जडत्वेन विषयत्वेन व्याप्तेरेव प्रत्यक्षसिद्धत्वाच्च । नच प्रत्यग्वित्तेश्चिदेकरसात्माग्राहकतया तदविषयत्वमेवेति वाच्यम् । तेन रूपेणाविषयत्वेऽपि प्रत्यक्त्वादिना रूपान्तरेण विषयत्वात् । अन्यथा विषयाभावेन तद्वित्तिलोपप्रसङ्गात् । सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यग्रसः प्रमाणैरेतैरवगत इति तापनीये प्रत्यक्त्वस्यापि तत्प्रमाणत्वेनैव श्रावणाच्च । नच तत्राहङ्कारस्यैव विषयत्वं, नात्मन इति वाच्यम् । न्यायादिमते आत्मन एव तथा भानात् । सांख्यादिमते च तस्य जडत्वेन तस्यां प्रतीतावहन्त्वचैतन्ययोः सामानाधिकरण्याभानप्रसङ्गात् । भासमाने च सामानाधिकरण्ये तस्यामहङ्कारविषयताया निवृत्तत्वात् प्रत्यक्त्वेनेतराविषयतया पारिशेष्यादात्मविषयत्वस्यैव सिद्धेः । नचैवं सति तत्स्वरूपतयाऽप्यात्मभानप्रसङ्गः । साधनान्तरवैकल्येन तथाऽऽपादयितुमशक्यत्वात् । लोकेऽपि मणिपरीक्षादौ तथा निर्णयात् । अन्यथा सांख्यादिशास्त्रैर्नित्याऽनित्यवस्तुविवेकस्याप्यसम्भवे त्वदभिमतविचाराधिकारस्यासम्भवापत्तेः । अतोऽनिच्छतापि प्रत्यग्वित्तिवेद्यत्वमात्मनोऽङ्गीकार्यम् । नचैवं परतःप्रकाशत्वेन जडत्वापत्तिः । इदानीं तथात्वेऽपि, अत्रात्मा स्वयंज्योतिर्भवतीतिश्रुतेः स्वप्न एव तस्य स्वतःप्रकाशत्वेन जाग्रति तदभावेऽपि भस्मच्छन्नाग्निवददोषात् । जाग्रति तथाऽभ्युपगमस्योक्तश्रुतिविरुद्धत्वाच्छ्रौते मते चित्स्वरूपत्वे सति स्वयम्प्रकाशसंविदाश्रयत्वस्यैव चेतनत्वात् तेनैवार्थेनोभयस्य परिहारात् कर्मकर्तृविरोधस्यानुभवबलेनैव परिहृतत्वाच्च । एवमाश्रयाश्रयिभावेन सिद्धे

आत्मसंविदोर्भेदे विषयत्वेनार्थोऽपि भिन्न एव । नच सत्त्वस्यानिर्वाच्यत्वात् तद्योगिनोस्तयोरनिर्वाच्यत्व शङ्क्यम् । सत्त्वनिर्वचनस्य तवाप्यावश्यकत्वात् । अन्यथा संविदोऽप्यसत्त्वापातात् । प्रकाशस्वरूपत्वमेव सत्त्वमिति चेत् सिद्धमेव तर्हि तद्योगित्वादात्मनः सत्त्वम् । असत आश्रयत्वायोगात् । नच तत्प्रकाशस्वरूप एवात्मा, न तु तद्योगीति वक्तुं युक्तम् । प्रत्यक्त्वस्य तत्राभानात् । अहं जानामीति, ज्ञानवानहमित्येवमात्मधर्मत्वेनैव तस्य भानाच्च । एवं सिद्धे प्रकाशभिन्नस्यात्मनः सत्त्वे, सिद्धं चानारोपितरूपेण विषयत्वादर्थस्यापि सत्त्वम । असतोऽविषयत्वात् । खपुष्पं पश्याम्यनुभवामि प्रत्येमीत्याद्यप्रत्ययात् मरीचितोयादीनां चारोपितरूपेण विषयत्वात् । न चाभावे सत्ताव्यभिचारः । तस्यापि भावत्वात् । अननुभूयमानप्रतियोगिरूपेणैव तत्राभावव्यहारात् । अन्यथा निष्प्रतियोगिकत्वेनापि तस्य प्रत्ययापत्तेः । नचैवं संविदोऽर्थाद्यविनाभावेऽर्थं विना संविदप्रकाशात् स्वतःप्रकाशत्वहानिः । दीपादेस्तेजोरूपत्वस्येव संविदः प्रकाशस्वरूपत्वस्यैव स्वतःप्रकाशपदार्थत्वात् । अत एवात्मनोऽपि तथात्वात् । नचात्मनो व्यापकत्वेन सर्वत्र सत्त्वात् तत्रारोप्यमाणस्य शरीरादेर्मरीचिकादावारोप्यमाणतोयादेरिव सत्त्वदेशस्याशक्यवचनत्वादसत्त्वमास्थाय प्रतीयमानत्वमात्रेण सदसद्विलक्षणत्वमनिर्वाच्यत्वं चास्थीयत इत्यपि मास्मनम् । वस्तुपरिच्छेदास्थातुर्मते तत्समवाय्यादीनां सत्त्वेन तेषामेव देशत्वसिद्धेः । तदनास्थातुर्मते च ब्रह्मकार्यत्वाद् ब्रह्मण एव तथात्वसिद्धेः । एवं सिद्धे देशे शरीरादीनां च सिद्धत्वे तेषामात्मन्यारोपोऽपि सुकरः । अन्यथा खपुष्पादेरिव दुष्करः स्यात् । अप्रत्यक्ष आकाशे मालिन्याध्यासवदप्रत्यक्ष आत्मनि शरीराद्यध्यासोपपादनमप्यसङ्गतम् । बालानामवकाशरूपेण बुद्धानां वस्तुस्वभावेनैव चाकाशस्यापि प्रत्यक्षत्वात् । अतः कल्पनाया असङ्गतत्वात् तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति, भोक्ता भोग्यं प्रेरितारं च मत्वेत्यादिश्रुतिविरोधाच्च, न कर्तृत्वभोक्तृत्वादिरहित आत्मा । नच स वेदार्थः । ब्रह्मणो वेदार्थत्वात् । किन्तु स्वबुद्ध्या तथा कल्पित इति. न तदर्थं विचारः शक्यवचनः । तदिदमुक्तं, न हीत्यादि ।

अथ सत्यं ज्ञानमनन्तं ब्रह्म, अस्थूलमनण्वित्यादिश्रुतिभ्यो-

ब्रह्म पुनर्यादृश वेदान्तेष्ववगतं तादृशमेव मन्तव्यम्।

अणुमात्रान्यथाकल्पनेऽपि दोषः स्यात्। 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा' नैषा तर्केण मतिरापनेया इति श्रुतेश्च।

नच विरुद्धवाक्यानां श्रवणात् तन्निर्द्धारार्थं विचारः। उभयोरपि प्रामाणिकत्वेनैकतरनिर्द्धारस्याशक्यत्वात्। अचिन्त्याऽनन्तशक्तिमति सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च।

ऽधिगत इति वदन्ति। तत्राह * ब्रह्मेत्यादि * यथा हीदमस्थूलत्वादिकं वेदान्तेषूच्यते, तथा सर्वकामः सर्वगन्धः सर्वरसः, विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिकमप्युच्यत इति तादृशमपि मन्तव्यं न तु निर्विशेषमात्रम्। न च तत्र स्वस्यान्यथाकल्पनं युज्यते। प्रतिज्ञाहानिदोषात्। प्रतारकत्वापत्तेश्च। नच श्रोतुर्मन्दत्वे कश्चिदुपायो विधेय इति तदर्थं किञ्चित्कल्पनेऽप्यदोष इति वाच्यम्। तथा सति श्रुत्यभिप्रेतात्मस्वरूपाज्ञानेन श्रातुर्योऽन्यथा सन्तमितिश्रुत्युक्तदोषापत्तेः। तथा वक्तुरपि, नैषा तर्केणेतिश्रौतनिषेधातिक्रमदोषापत्तेः। श्रुतिविरोधदोषापत्तेश्च। तदिदमुक्तम् * अणुमात्रान्यथेत्यादि *। ननु विरुद्धवाक्यश्रवणे श्रोता सन्दिग्ध। सन्देहे चावश्यमनिष्टम्। अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीतिस्मरणात्। यस्य स्यादद्धा न विचिकित्सास्तीतिश्रुतेश्च। अतस्तन्निवारणायार्थनिर्द्धार आवश्यक। स च विचाराधीन इति तदर्थं स कार्य एवेत्यत आह * नचेत्यादि * विचारः कथं कार्यः? किमेकतरबाधेन, किंवोभयसामञ्जस्येन। यद्याद्य. पक्षस्तदा तद्बाधनायाप्रामाणिकत्वं तस्य वक्तव्यम्। तथा सत्यन्यत्रापि तदापात इत्युपचारनिवृत्त्यर्थं यतमानस्याऽप्रामाणिकत्वापत्त्या वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे निपातः। अथ द्वितीयस्तदा, परास्य शक्तिर्विविधैव श्रूयते, स हैतावानासेत्यादिश्रुतिभिर्ब्रह्मसामर्थ्येनैव विरोधस्य परिहारे विचारस्य वैफल्यमेवेति युक्त्या वेदार्थ. सर्वथा न प्रतिपत्तुं शक्य

अत एवोपनिषत्सु तत्तदुपाख्याने बोधाभावे औपाधिकबोधे च तपस एवोपदेशः। नच तपःशब्देन विचारः। तस्य पूर्वानाधिक्यात् तप एव । नचोपाख्यानानां मिथ्यात्वम् । तथा सति सर्वत्रैव मिथ्यात्वं भवेद् विशेषाभावात् । न ह्यप्रामाणिकोक्ते विधौ वा उपाख्याने वा ब्रह्मस्वरूपे वा कस्य चिदपि विश्वासो यथा

इत्यतो वेदार्थज्ञानायोपायान्तरमेष्टव्यम् । तदपि श्रुत्यविरुद्धम् । तत्र प्रमाणमाह । ~ अत एवेत्यादि ~ तैत्तिरीये भृगोर्बोधाऽभावे वरुणेन तपसा ब्रह्म विजिज्ञासस्वेति, छान्दोग्ये इन्द्रप्रजापतिसंवादे इन्द्रस्यौपाधिकबोधे प्रजापतिना, वस द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमिति साधनान्तरस्य तपस एवोपदेशः कृत इत्यर्थः । ननु तप सन्तापे इतिवत्, तप आलोचने इत्यपि धातुरिति तन्निष्पन्नोऽयं शब्दो विचारार्थक एव मन्तव्यः । तथा सति श्रुत्यैव विचारस्य प्राप्तिरित्यत आह ~ नच तप इत्यादि ~ । ~ तप एवेति ~ तप एव तपःशब्देनोच्यते इत्यर्थः । अयं भावः । विचारो ह्येकतरबोधेन वा, ब्रह्मणः सामर्थ्यादिप्रदर्शनेन वा साधनीयः । न तु श्रोतरि तेन कोऽपि विशेषः सम्पाद्यः । तथा सति पठितवेदस्य साधनान्तरश्रवणं विनाऽपि विचारे वेदार्थः स्फुरेदेवेति पूर्वानाधिक्यादुपसदनवैयर्थ्यापत्तिः । गुरुवाक्योत्तरं विचार इत्यङ्गीकारे गुरोः खलत्वापत्तिः । उपसदनोत्तरमपि तस्यैवायोग्योपदेशेन दयाराहित्यप्राकट्यात् । तपसोऽङ्गीकारे तु तेन शिष्ये विशेषाधानादधिकारसम्पत्तौ साङ्गवेदवाक्येभ्य एव स्फूर्तिरेव च कोऽपि पूर्वोक्तदोष इति तपःशब्दो रूढ एवादरणीयः । तदेतदुक्तं, तप एवेति । अन्यथा छान्दोग्यविरोधस्यापरिहार इत्यपि बोधयितुं साधकारणमुक्तम् । ननु सत्यमुपनिषत्सु तप उपदिश्यते, तथाप्युपाख्यानेषु । न तु ज्ञानसाधनत्वेन क्वापि पृथग् विधीयते । उपाख्यानानि तु विधिस्तुत्यर्थमसदपि बोधयन्तीति, न तदनुरोधे निर्बन्धः कार्य इत्यत आह ~ नचोपेत्यादि ~ । तथाच श्वेतकेतूपाख्यानस्य युक्तीनां त्रिवृत्करणादीनां च मिथ्यात्वं स्यात् । तथाच सर्वो वेद एवोच्छिद्येतेत्यर्थः । तत्र हेतुमाह ~ न हीत्यादि ~ । सिद्ध वस्तु

लोके । तस्माद् वेदे अक्षरमात्रस्याऽप्यसत्यार्थज्ञानस्याभावाद् वैदिकानां न सन्देहोऽपि । किं पुनर्विरुद्धार्थकल्पना ।

विद्यासु च तदश्रुतेः । यदि वेदार्थज्ञाने विचारस्योपयोगः स्याद् अङ्गत्वेन व्याकरणस्येव विद्यासु श्रवणं स्यात् ।

स्वातन्त्र्ये च पुराणादेरिव मीमांसाया अपि प्रकारभेदेन प्रतिपादकत्वं स्यात् । तं त्वौपनिषदं पुरुषं पृच्छामीति तु तेषां निषेधः । अन्यथाज्ञानं नोपनिषदुक्तं फलं समर्पयति । तस्मानारम्भणीय एव ब्रह्मविचारः ।

अनेन धर्मविचारोऽप्यपास्त एव ।

स्वोक्ते प्रत्यक्षसंवादमप्याह * तस्मादित्यादि * । *वैदिकानामिति* प्राज्ञवैदिकानाम् ।

प्रकारान्तरेणापि विचारानर्थक्यमाह * विद्यास्वित्यादि * स्वोक्तं व्याचष्टे * यदीत्यादि * चरणव्यूहे, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गान्युक्त्वा, तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयत इत्येवोच्यते । तस्मात् साङ्गो वेदो ध्येयो ज्ञेयश्चेति विधावपि नाक्षेपो युक्त इत्यर्थः । एवं विधिनयेऽपि विचाराक्षेपस्याशक्यवचनत्वाद् विधिप्रयुक्त्याऽऽरम्भणीयत्वं निवारितम् । ननु माऽस्त्वङ्गमध्यपातस्तथापि पुराणादिवत् स्वातन्त्र्येणैवारम्भणीय । नचाऽप्रामाणिकत्वम् । प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानीति तत्रैवोपाङ्गेषु पाठात्, स्मृतावपि 'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश' इति विद्यासु गणनाच्चेति चेत्तत्राह *स्वातन्त्र्ये चेत्यादि* । * तस्मादिति * वेदार्थज्ञानार्थं ब्रह्मज्ञानार्थं वाऽनुपयोगात् ।

ननु मास्तु ब्रह्मविचारस्यारम्भणीयत्वं, धर्मविचारे तु दोषाभावात् तदारम्भे को दोष इत्यत आह * अनेनेत्यादि * स तृतीयमतप्यत, स एतं दीक्षितवादमपश्यदित्यादौ तपस एव कथनेनेत्यर्थः ।

न ह्येतन्निराकर्तुं सोऽयमतिभार इति पूर्वपक्षः ।

सिद्धान्तस्तु ।

सन्देहवारकं शास्त्रं बुद्धिदोषात् तदुद्भवः ।
विरुद्धशास्त्रसम्भेदादङ्गैश्चाशक्यनिश्चयः ॥
तस्मात् सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः ।
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथाविधः ॥

परम्परया पाठवदर्थस्यापि गुरुमुखादेव श्रवणेऽपि मन्दमध्यमयोः सन्देहो भवेत् । समानधर्मदर्शनात् । पदादिपाठवत् । तत्र यथा लक्षणानामुपयोग एवमेव मीमांसाया अपि ।

नन्विदमपि शास्त्रम् ऋष्युक्तत्वात् प्रामाणिकमतः कथं निराक्रियत । इत्यत आह * नहीत्यादि * गुरोर्मते एव निराकृते शिष्यस्य का वा गणनेत्यर्थः । एवञ्च यथा मीमांसाकरणात् पूर्वमङ्गैरेव सन्देहनिवृत्तिस्तथेदानीमपि भविष्यतीति व्यर्थं तत्करणमिति केवलवैदिककृतः पूर्वपक्षो निरूपितः ।

उत्तरं वक्तुं गृह्णन्ति * सिद्धान्त इत्यादि * । ननु शब्दस्य निःसन्दिग्धमर्थप्रतिपादकत्वात् सन्देह एव कथमित्यत आहुः * बुद्धीत्यादि * । तन्निवृत्तिर्व्याकरणादिभिरेव भविष्यतीत्यत आहुः * विरुद्धेति * । * सर्वनिर्णय इति * पूर्वोत्तरकाण्डार्थनिर्णयः । कथमिदमित्यपेक्षायां व्याचक्षते * परम्परयेत्यादि * । * समानधर्मदर्शनादिति * अर्थे समानधर्मदर्शनात् । यथा अक्ताः शर्करा उपदधातीत्यत्राञ्जनकरणत्वं घृततैलवसादिषु समानम् । तथाच यथा संहिताध्ययनदशायां, देवाय ते यजमानाय शीकाय ते स्वाहेत्यादौ सन्देहाभावेऽपि पदपाठकाले, देवय ते शीकयं त इति ह्रस्वश्रुत्या सन्देहः, अथादावुत्तरे विभागे ह्रस्वव्यञ्जनपर इत्यधिकारस्तस्य, देवाशीकेत्यादेः । त्रपुश्च मे सिसुश्च रन्तं सुश्चन्द्रदस्म इत्यादेः पदपाठे, त्रपु च सिसु चरन्तं, सुचन्द्रेति पाठात् सन्देहः, त्रपुणि शुपूर्वं शकारश्च परः, सुपूर्वश्चन्द्रपर इति । उत स्वानासो दिवि षन्तु, अ षो हिष्ठा ग्रयांशुग

तदुक्तम् ।

असन्दिग्धेऽपि वेदार्थे स्थूणाखननवन्मनः ।

मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु ततो दृढमिति ॥

तथाच निर्णये येन केन चिदुक्तव्ये हरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति । ब्रह्मजिज्ञासा कर्तव्ये-

---

इत्यादेः पदपाठे, उत खानाम्नः, दिवि सन्तु, आप हि स्थ इति पाठात् सन्देहे, खानासोदित्यापोहीत्यादिसूत्रस्योपयोग इति लक्षणानां प्रातिशाख्यसूत्राणां सन्देहनिवृत्तावुपयोगः । तथाऽर्थश्रवणेऽपि वाजिन्यां वाजिनामित्यत्र किमामिक्षाऽन्नवन्तो विश्वेदेवा वाजिनामानोऽन्ये वा वाजिनयागदेवताः । गायत्र्यां सविता, सूर्यो वा परब्रह्म वा । आकाशादेव समुत्पद्यन्त इत्यत्र भूताकाशो वा ब्रह्म वेति सन्देह. समानधर्मदर्शनान्मन्दादीनां भवेदिति तन्निवृत्त्यर्थं मीमांसाद्वयस्याप्युपयोग इति ज्ञानविधावुपाङ्गभूतयोस्तयोरप्याक्षेपो युक्त एवेत्यर्थः ।

अस्मिन्नर्थे प्राचां संमतिमाहुः * तदुक्तमित्यादि * । * दृढमिति * सन्देहाभावो दार्ढ्यं चेत्यर्थ. । एतेन शास्त्रप्रयोजनमारम्भसमर्थनायोक्तम् । विचारकर्तव्यतासमर्थनेनोपोद्घातरूपा अधिकरणसङ्गतिरपि बोधिता । अतः परं प्रयोजनवत्त्वेऽपीदं शास्त्रं कया सङ्गत्या आगतम् । श्रुतौ च तपस उपदेशात् तदेव च कुतो नोक्तमित्याकाङ्क्षायां शास्त्रसङ्गतिं वदन्त एव सूत्राक्षराणि व्याकुर्वन्तः प्रथमतो वाक्यार्थमाहुः *तथाचेत्यादि* । उक्तरीत्या वेदार्थनिर्णयस्यावश्यकत्वात् तन्निर्णये येन केन चिदुक्तव्ये यदा कालवशात् तप आदीनामसम्भवं व्यञ्जनया तेषामसाधकत्वं च दृष्टवाँस्तदा जगदुद्धरीकरणार्थं हरिः स्वयं व्यासरूपेणावतीर्य वेदव्यासादिकार्यं कृत्वा सर्ववेदार्थनिर्णयार्थं ब्रह्मविचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति । ब्रह्मजिज्ञासा कर्तव्येति । धर्मादिवद् व्यासोक्तत्वादपि कर्तव्यता । अत इदानीं तपो न वेदार्थज्ञानसाधनं. किन्त्विदमेव साधनम् । किञ्च

ति । व्यासोक्तत्वादपि कर्तव्यता । कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति । अन्यथा, अथ योगानुशासनमितिवत् स्वतन्त्रता स्यात् । तथा च ज्ञानानुपयोगः । तथाहि । तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यं ब्रह्म, न शास्त्रान्तरवेद्यम् । तद् यदि मीमांसा स्वतन्त्रा स्यात् तज्जनितं ज्ञानं न ब्रह्मज्ञानं भवेत् ।

अथवा, अध्याहारकरणापेक्षयाऽथशब्द एवाधिकारे व्याख्येयः । वेदाध्ययनानन्तर्यं तु सिद्धमेव । न ह्यनधीत एव वि-

---

तापमानाम् ऋषीणामपि स्वभावभेदाल्लोकानां सन्देहं यदा दृष्टवांस्तदा कृपया कृतवानिति तदुक्तरीत्या प्रयतने प्रमादोऽपि भविष्यति, तेन वेदार्थबोधश्चेति नास्य गतार्थत्वम् । कृपैव च सङ्गतिरित्यर्थः । ननु सूत्रे कर्तव्यपदाभावादध्याहारस्य च दोषत्वात् किमित्येवं व्याख्यायत इत्याकाङ्क्षायामाहुः ॥ कर्तव्यपदेत्यादि ॥ ॥ भवेदित्यन्तम् ॥ अत उक्तदोषानिवृत्त्यर्थमध्याहृत्य व्याख्यायत इत्यर्थः । अत्र सर्वसंमतत्वादेवमध्याहारपक्ष उक्तो वाक्यार्थश्च ।

अतः परं पदानामर्थं वदिष्यन्तः पूर्वोक्तः पक्षो वक्ष्यमाणदोषग्रासान्न साधुरित्याशयेन पक्षान्तरमाहुः । ॥ अथवेत्यादि ॥ । अधिकारो नाम नियमविशेष इति केचित् । यथा, आकडारादेका संज्ञेति । प्रारम्भ इत्यन्ये । यथा, अथ योगानुशासनमिति । प्राधान्येन निरूपणमित्यपरे । प्रस्ताव इति कैयटः, अथ शब्दानुशासनमित्यत्र व्याख्यानात् । तत्रैकसंज्ञानियमस्य पूर्वप्रकृतत्वापेक्षत्वात् पूर्वं च कस्याप्यप्रकृतत्वात् सोऽत्र न युज्यते । अतः प्रारम्भादेः प्रस्तावाव्यतिरेकात् प्रस्ताव व्याख्येयः । तथा च ब्रह्मजिज्ञासारूपं शास्त्रमधिक्रियते प्रस्तूयत इति व्याख्याने कल्पनाराहित्यादिदं तदपेक्षया ज्याय इत्यर्थः । नन्वधिकारार्थत्वे आदृते कर्तव्यपदाध्याहाराभावेन ब्रह्मजिज्ञासाया विध्यनाक्षिप्तत्वाद् वैदिकाधिकारिणोऽप्यप्राप्तेः शूद्रादिरनधीतवेदोऽपि ब्रह्मजिज्ञासायामधिकुर्यादिति कथं ज्याय इत्यत आहुः । ॥ वेदेत्यादि ॥ । अग्रे वेदवाक्यानामेव विचारदर्शनादेतद्विचारकस्य वेदाधीतत्वस्यापि वेदाध्ययनानन्तर्यं स्वर्थादेव सिद्धमिति न वैदिकाधिका-

चारमर्हति। तत्रैतत् स्यात् स्वतन्त्रतेति। तत्र प्रतिविधास्यामः। वेदार्थब्रह्मणो वेदानुकूलविचार इति। किमत्र युक्तम्। व्याख्यानमिति। व्याख्यानतो विशेषप्रतिपत्तेः। यथा कर्मणि दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः। अथातो दर्शपूर्णमासौ व्याख्यास्याम इति।

रिणोऽप्रतिरित्यतो ज्याय इत्यर्थः। ननु नर्थाविधत्वनाक्षिप्ततया पुराणादिवत् स्वातन्त्र्यं तु सिद्धम्। तथा सति पूर्वोक्तो ज्ञानानुपयोगरूपो दोषस्तु स्यादित्याकाङ्क्षायां, तत्रैतत् स्यादित्यादिनाऽनूद्य प्रतिविधानप्रकारमाहु। * तत्रेत्यादि *। अनुपदमेव वक्ष्याम इत्यर्थः। ननु प्रक्षालनपङ्कन्यायेनैतदपेक्षया तदादरणमेव युक्तमित्यत आहु। * वेदार्थेत्यादि *। वेदार्थभूतं यद्ब्रह्म तत्सम्बन्धी सारिकरतज्ज्ञापको वेदानुकूलो वदवाक्यानां विरोधपरिहारादिना तपूपचारादिदोषनिवर्तको विचारो मीमांसारूप इति हेतोः। अत्र हि सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यम्। अन्यथा वेदवेदान्तयोरैकशास्त्र्यं न स्यात्। तदभावे च जैमिन्याद्युक्तादिशा मुमुक्षुप्रवृत्तिप्रतिघाते शास्त्रवैयर्थ्यमापद्येत। विचारस्य च यदि वेदानुकूल्यं न स्यात् तदाऽऽस्तिका न प्रवर्तेरन्। अत आवश्यकत्वात् स्वातन्त्र्येऽपि विरोधाभावादानुकूल्येन तज्जनितज्ञानस्य ब्रह्मज्ञानरूपत्वात् प्रतिविधानमेव युक्तमित्यर्थः। अयं प्रकारो माध्वानामपि सम्मतस्तद्बाधकस्कान्दवचनोपन्यासादवगन्तव्यः। अध्याहारपक्षेऽप्येवं वक्तु शक्यत्वात् न ज्यायांस मन्यमानोऽनुयुङ्क्ते। * किमत्रयुक्तमिति * स्वतन्त्रताप्रतिविधानस्यात्राप्यपेक्षितत्वेन प्रतिपत्तिगौरवदोषस्यात्रापि सत्त्वादध्याहारकरणाथशब्दव्याख्यानपक्षयोर्मध्ये किं युक्तं, तद्वक्तव्यमित्यर्थः। तत्रोत्तरमाहुः। *व्याख्यानमिति*। अथशब्दव्याख्यानपक्ष एव युक्त इत्यर्थः। तत्र हेतुमाहु। *व्याख्यानत इत्यादि*। ननु कात्र विशेषप्रतिपत्तिरित्यत आहु। * यथेत्यादि * तथाच यथा कल्पसूत्रेण प्रयोगप्रकारादिबोधनात् तत्पदार्थसन्देहनिवृत्तिस्तथानया मीमांसया ब्रह्मणीति तत्र यथाऽधिकारेऽथशब्दस्तथात्रापीति

अथैवं तर्हीमानि सिद्ध्यन्ति प्रयोजनानि । अधिकाकाङ्क्षा न भवेत् । अध्याहारश्च । पुरुषार्थश्च सिद्ध्येत् । उच्छेदश्च न भवेदिति । रूपम् । अथशब्दोऽर्थचतुष्टये वर्तते । मङ्गले, अधिकारे, आनन्तर्ये, अर्थान्तरोपक्रमे च । तत्र श्रुतिमात्रेणैव मङ्गलसिद्धेरर्थान्तरस्य पूर्वोक्तस्याभावान्नात्र तत्कल्पनम् । अथावशिष्यते आनन्तर्ये वाऽधिकारे वेति । आनन्तर्ये त्वध्ययनस्य स्वतःसिद्धत्वादधिकाकाङ्क्षा भवति । तथा तदभावान्न विचारः सिद्ध्येत् ।

फलासूत्रतौल्यरूपविशेषस्य प्रतिपत्तिरित्यर्थः ।

नन्वध्याहारपक्षेऽपीदं सुवचमतः सर्वसंमतत्वादध्याहारपक्ष एव युक्तो, नाऽथशब्दस्याधिकारव्याख्यानपक्ष इत्यत आहुः * अथैवमित्यादि * । *एतर्हीति* व्याख्यानपक्षे । अत्र चोदयति *कथमिति* स्वोक्तं विभजन्ते * अथेत्यादि * । तत्र मङ्गले, 'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभाविति' । अधिकारे यथा, अथैष ज्योतिरिति वेदे । अथ योगानुशासनमित्यादि च लोके । आनन्तर्ये यथा, भुक्त्वा अथ व्रजतीति । अर्थान्तरोपक्रमे यथा पूर्वं किञ्चिदुक्त्वा पुनर्विकल्पान्तरे क्रियमाण उच्यते, अथायमाशय इति । यद्यपि कोशे, 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेति । अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चय' इत्यर्थान्तरमप्युक्तम् । गौडो भवान् अथोन ब्रूम इति प्रतिज्ञायामपि दृश्यते । तथापि प्रच्छकस्य सन्देग्धुश्च कस्याप्यनुक्तत्वेन, अथ शक्तोऽसि भोक्तुमित्यादिवत् प्रश्नसंशयव्यञ्जकवाक्याभावेन च प्रश्नसंशययोर्वक्तुमशक्यत्वात् स्वसंशयस्य स्वतोनिवृत्त्यभावेन स्वसंशयस्य, अविज्ञातं विजानतामितिश्रुतेः कृत्स्नस्य ब्रह्मणो विचारयितुमशक्यत्वेन कार्त्स्न्यस्य च प्रक्रमविरुद्धत्वाद् विकल्पस्य पक्षान्तरात्मकत्वेनारम्भस्योपक्रमात्मकत्वेन चार्थान्तरोपक्रमानतिरेकात् समुच्चयनियमस्याधिकारयोरप्यर्थान्तर-

सापेक्षत्वेन त्रिकल्पतुल्यकक्षत्वादुपयुक्तविचारकात्स्न्यंप्रतिज्ञयोरपि प्रस्तावाव्यतिरेकादथशब्दोऽत्रार्थचतुष्टये सम्भावितो वर्तते। तत्रान्यार्थकृतस्य पटहमृदङ्गादिध्वनेरिवाथशब्दस्यापि श्रवणमात्रेण मङ्गलसिद्धेः स्मृतिव्याकोपपरिहारात् तस्याः स्वरूपश्रवणमात्रकार्यत्वेन मङ्गलस्यार्थान्तरबोधनाप्रतिरोधकत्वाच्च न तन्मात्रकल्पनं युक्तम् । पूर्वं कस्याप्यर्थस्यानुक्तत्वादर्थान्तरोपक्रमस्यापि कल्पनं न युक्तम्। यत् पुनरानन्तर्यप्रस्तावरूपमर्थद्वयमवशिष्यते, तत्रानन्तर्यं यस्य कस्य चिदानन्तर्यं तु स्वभावादेव प्राप्तमिति, न तस्य वक्तव्यम् । यदि च शाबरभाष्योक्तमध्ययनानन्तर्यमङ्गीक्रियते, तर्ह्यनधीतवेदो विचारेऽधिकरोतीति । तदा तस्य विचारार्थकजिज्ञासापदेनैवार्थात् सिद्धेरथशब्दोक्तानन्तर्यप्रतियोगिनोऽभिकाकाङ्क्षा भवति, अध्ययनातिरिक्तात् कस्मादनन्तरं ब्रह्म विचारयितव्यमिति । तस्यां च सत्यामध्ययनातिरिक्तस्य कस्यापि तन्मतेऽदर्शनान्न प्रकृतविचारसिद्धिरित्यर्थः। ननु संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति वदद्भिः प्राचीनवृत्तिकारैर्द्वयोर्मीमांसयोरैकशास्त्र्यमङ्गीकृतम् । ततश्चाग्नेयादिषट्कभेदवदध्यायभेदवच्चावान्तरप्रमेयभेदेन भेदेऽपि प्रयोजनैक्याद्, अथाऽतो धर्मजिज्ञासेत्यारभ्य, अनावृत्तिः शब्दादित्यन्तमेकं शास्त्रमत. कर्मविचारानन्तर्यमस्येति रामानुजाचार्याः ।

आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादकत्वेनैकशास्त्र्यम् । अथाऽतो ब्रह्मजिज्ञासेति पृथगारम्भस्त्वथातः शेषलक्षणमित्यादिवदवान्तरपरिच्छेदार्थ इति तदेकदेशी नव्यः शैवः ।

पूर्वं धर्मजिज्ञासा कार्या, पुरुषमात्रविषयत्वात् । ब्रह्मज्ञानं तु कस्य चिदेव मुमुक्षोरिति धर्मविचारानन्तरं चतुर्णां प्रतिपन्नाश्रमान्तराणां सा । सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रयतः सूत्रकारस्यापि ज्ञानकर्मसमुच्चयादेव मोक्षप्राप्तिरभिप्रेतेति ज्ञायते । अपरिज्ञाते च कर्मणि केन समुच्चयः, केन नेति न ज्ञातुं शक्यम् । ज्ञाते तु तस्मिन् नित्यकाम्यनिषिद्धानां हेयोपादेयविभागविज्ञानात् काम्यनिषिद्धे हेये, नित्येन समुच्चय इति सुखेन ज्ञातुं शक्यते। किञ्च। तृतीये, कर्मसमृद्ध्यर्थानामुद्गीथाद्युपासनानां चिन्तनात् तेषां च कर्माधिकृतपुरुषमात्रविषयत्वात् कर्माविज्ञानेन तच्चिन्ताया

तथा हि, न तावद्धर्मविचारानन्तर्यम् । विपर्ययसम्भवात् ।

अप्यनुपपत्तिरतोऽपि तदानन्तर्यमिति भट्टभास्कराचार्या. ।

किञ्च, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति श्रुतौ तर्कोपकरणेन शब्देन परमात्मानं सम्यग् ज्ञात्वा प्रज्ञाख्यभावनाविधानात्, पतञ्जलिनाऽपि, स तु दीर्घकालादरनैरन्तर्यसत्काराऽऽसेवितो दृढभूमिरिति सूत्रयता दीर्घकालासेवितस्याव्यवधानासेवितस्य ब्रह्मचर्यतप.श्रद्धायज्ञादिरूपसत्कारासेवितस्य योगस्य दृढभूमित्वकथनाच्च क्रियमाणया भावनाख्योपासनाया दृढत्वाय यज्ञाद्युपयोगः कैश्चिदिष्यते ।

तत्तत्फलार्थं विहितानामपि कर्मणां, तमेतं वेदानुवचनेनेत्यादिश्रुत्या, एकस्य तूभयत्वे संयोगपृथक्त्वमितिन्यायेन क्रत्वर्थत्वादिरूपस्य वीर्यार्थत्ववद् ब्रह्मभावनार्थत्वं कैश्चिदिष्यते ।

तथापरैः श्रेय.परिपन्थिकल्मषनिबर्हणद्वारा यज्ञोपयोग इष्यते ।

अन्यैः पुनर्महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनु, यस्यैतेऽष्टाचत्वारिंशत् संस्कारा इति स्मृत्या यज्ञादिसंस्कृतस्य पुरुषस्य दीर्घकालादरनैरन्तर्यैर्ब्रह्मभावनामासेवमानस्य समूलकाषमविद्यावासनानिवृत्त्या प्रत्यगात्मवैशद्यात् पुरुषसंस्कारद्वारा यज्ञोपयोग इष्यते।

अथेतरैर्ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेद् इति स्मृत्या ऋणत्रयापाकरणेन कर्मणां ब्रह्मज्ञानोपयोग इष्यते इति नाना मतानि वाचस्पत्ये लिखितानि । अतः कर्मज्ञानसमुच्चयस्य बहुवादिसम्मतत्वात् पूर्वोक्तरीत्या धर्मविचारेणाधिकाकाङ्क्षापूरणसम्भवात् तदनन्तरं सुखेन ब्रह्मविचारसिद्धिरित्याकाङ्क्षायामाहुः । * तथाहि, नेत्यादि * । तदुक्तरीत्या समुच्चयाङ्गीकारेऽपि धर्मविचारानन्तर्यं नोपपद्यते । कुत *विपर्ययसम्भवात्* हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इति वद् वेदवेदान्ताध्ययनक्रमनियामकप्रमाणाभावात् । नच कर्त्रैक्यात् क्रमनियमः शङ्क्यः । आग्नेयदर्शपूर्णमासवत् कर्मब्रह्मविचारयोरेकाङ्गिप्रयुक्ताङ्गत्वेन वा, पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन वा, गोदोहनादिवदधिकृताधिकारत्वेन वा, पदयागवत् फलैक्येन वा कर्त्रैक्यं येन बोध्येत तादृशप्रमाणस्याप्यनुपल-

नचं पाठतो नियमः । तत्रापि तथा ।

नचाऽऽचाराद् व्यवस्था । तत्राप्यनियमसम्भवात् । प्रत्य-

क्षभात् । ननु, विद्यां चाविद्यां च यस्तद् वेदोभयं सह, सत्येन लभ्य-स्तपसा ह्येष आत्मेत्यादिश्रुतिरेव क्रमे प्रमाणमिति वाच्यम् । समु-च्चयमात्रबोधकत्वेन चारितार्थ्यात् । किञ्च । धर्मो न यथाकथञ्चिज्ज्ञातो विद्यया समुच्चेयोऽपि तु निर्णीतस्वरूपः । निर्णयस्तु यथा कर्मस्वरू-पविषयकः पूर्वतन्त्रात् तथा कर्मशेषभूतपुरुषस्वरूपविषयकस्तद्द्वारा-श्रयभूतब्रह्मस्वरूपविषयकश्चोत्तरतन्त्रात् । अतोऽभ्यर्हितत्वात् पूर्वं वेदान्तविचारेण तदवगन्तव्यम् । नानावादैरात्मस्वरूपे च विप्रति-पन्ने वैदिकानां वेदवाक्यैरेव तन्निरासस्यावश्यकत्वात् । ज्ञाते तयोः स्वरूपे कर्मणि सुखेन प्रवृत्तिसम्भवादिति । नचाध्ययनादिविधेः क-र्मावबोधनसमर्थेषु पुरुषेषु चरितार्थत्वेन, शान्तो दान्त इत्यादिश्रुत्यु-क्तसाधनान्तरसापेक्षब्रह्मज्ञानोपायभूतशमाद्याक्षेपासामर्थ्यात् पूर्वं ध-र्मविचारस्यैव प्राप्तिरिति वाच्यम् । शान्तो दान्त इति श्रुतौ पश्येदि-तिपदाच्छमादीनां दर्शनसाधनत्वेन विचारे तदपेक्षाभावात् । प्रह्लाद-कठादिवदाबाल्यान्मुमुक्षाशमादिमत्सु तदप्रवृत्तौ तेषां विचारमा-त्राप्रसक्तेर्यथाकथञ्चित् प्रवृत्तौ वाऽभ्यर्हितस्यैव प्राप्त्या नियमभङ्गाच्च । तदेतदुक्तम् ।

ननु पूर्वं धर्मकाण्डं पठ्यते, अनन्तरं ज्ञानकाण्डमिति पाठस्य क्रमनियामकत्वमस्त्विति चेत् तत्राहुः * नचेत्यादि * पाठक्रमे वि-द्यमानेऽपि पूर्वकाण्डं न सर्वैरादित आरभ्य पठ्यते । अपि तु यतः कुतश्चित् । अतोऽवान्तरकाण्डक्रमानियमवज्ज्ञानकाण्डक्रमानियमस्या-पि शक्यवचनत्वात् तत्रापि तथेत्यर्थः । ननु पाठः शिष्टाचारादनि-यतोऽस्तु, न तु विचारोऽपीत्यत आहुः * नचाचारेत्यादि * प्रत्यवा-याश्रवणस्योभयत्र तौल्यात् तथेत्यर्थः । ननु धर्मस्य ब्रह्मबोधहेतु-त्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्या-

---

-- -१ कविर्हरिरन्तरिक्ष प्रबुद्ध पिप्पलाय । आविर्होत्रोऽथ द्रुमिलश्चमस करभाजन ।

चायाश्रवणात् । सम्भवेऽपि न वक्तव्यत्वमध्ययनवत् । तथाच ततोऽप्याकाङ्क्षा भवेत् ।

नच वैराग्यशमदमादिः पूर्वसिद्धः ।

तेषामेवाभावात् । न च यदैव सम्भवस्तदैव तत् कर्तव्यमि-

दिप्रामाण्यप्रतिपादनानां ब्रह्मविचारोपयुक्तत्वाच्च धर्मविचारानन्तर्यं ब्रह्मविचारस्य नियमेन सम्भवतीति चेत् तत्राहुः । * सम्भवेऽपीत्यादि * स्फुटार्थमेतत् ।

ननु तर्हि, नित्यानित्यवस्तुविवेक ऐहिकामुत्रिकभोगविरागः शमदमादिसाधनसम्पन्मुमुक्षुत्वं चेति शङ्कराचार्योक्तं साधनचतुष्टयानन्तर्यमाद्रियतामित्याशङ्कायां, भास्कराचार्यैर्यद्यपि शमदमादयोऽन्तःकरणधर्माः पूर्वं न प्रकृताः स्वशब्देन चानिर्दिष्टा इति सूत्रकारस्य न विवक्षिता इत्येव दूषणं दत्तम् । रामानुजाचार्यैश्चैषां पूर्वमीमांसोक्तकर्मफलकरणेतिकर्तव्यताधिकारिविशेषनिश्चयानन्तरभाविनदनित्यत्वज्ञानाऽऽत्मनित्यत्वज्ञानाधीनतया शास्त्रद्वयविचारोत्तरभावित्वं दूषणमुक्तम् । तथापि तन्न तथा स्फुटमिति प्रकारान्तरेण दूषणमाहुः * नचेत्यादि * । तदानन्तर्यं तदा युज्येत यदि तत्सत्ता पूर्वं स्यात् । सा त्वतिदुर्लभा । न हि नित्यानित्यवस्तुविवेकमन्तरेणेहामुत्रार्थभोगात् पुरुषो विरज्यते । न वा सांख्यदर्शनात्यन्ताभ्यासतदुदितसाधनाद्यन्तरेण तादृशविवेक उदेत्युदिते वा सर्वः शाम्यति दाम्यति वा । दुर्वासःप्रभृतिष्वपि तदभावस्य स्मरणात् । कथञ्चित् किञ्चित् कस्यचित् कदाचित् सम्भवेऽपि, न सर्वसाधनानि तथा । तदेतदुक्तं, * तेषामेवाभावादिति * तथाच समुदितसाधनचतुष्टयसम्पदत्यन्तदुर्लभेति तदानन्तर्यमत्र न शक्यवचनमित्यर्थः । साङ्ख्याद्यभ्यासाभावेऽपि लौकिकदुःखादिना विरज्यमाना दृश्यन्ते। किञ्चित्कामनयापि शाम्यन्ति दाम्यन्ति चेत्युक्तविवेकरहितवैराग्याद्यानन्तर्यमप्यत्र न युक्तम्। तदपायस्य भूयोदर्शनादित्याशयेन वैराग्यादीनामेव ग्रहणम् । ननु केषांचित् पूर्वं वैराग्याद्यभावेऽपि पश्चात् तानि दृश्यन्त इति तदानन्तर्यादरणे को दोष इत्यत आहुः। *न च यदैव-

ति वाच्यम् । तदसम्भवापत्तेः । तथाहि । ब्रह्मणः परमपुरुषार्थत्वे ज्ञाते तज्ज्ञानस्यैव साधनत्वेऽवगते तच्छेषत्वे च यागादीनामवगते तदर्थकर्मकरणे चित्तशुद्धौ सत्यां वैराग्यादि । इदं च वेदान्तविचारव्यतिरेकेण न भवतीत्यन्योन्याश्रयः ।

निर्द्धारिते तु वेदान्ते विचारो व्यर्थ एव । नच साक्षात्कारस्तत्फलम् । तस्य शब्दशेषत्वेन तत्कल्पनायां प्रमाणाभावात् । दशमस्त्वमसीत्यादौ प्रत्यक्षसामग्र्या बलवत्त्वाद् देहादेः प्रत्य-

---

त्यादि * । * तदसम्भवापत्तेरिति * वैराग्यादेर्विचारस्य चासम्भवापत्तेरित्यर्थः । कथमिदमित्याकाङ्क्षायामेतदेव विभजन्ते । *तथाहीत्यादि * दर्शनान्तराभिमानिनां ज्ञानकर्मसमुच्चयवादात् तत्तदुक्तज्ञानानां च भिन्नविधत्वात् तत्तदभिमतरीत्या साधनीभूतयागाद्यनुष्ठाने विवक्षितविचारोपयोगिचित्तशुद्ध्यभावात् ब्रह्मणः परमपुरुषार्थत्वज्ञानार्थं ज्ञानस्य केवलस्यैव साधनत्वज्ञानं चावश्यकमिति तदर्थं चैकदेशिना वेदान्तविचारः पूर्वं मृग्यः । तथा सत्युक्तरीत्या तत्करणमिति चक्रकन्योऽन्याश्रय इति तदसम्भवापत्तिरित्यर्थः । नन्वध्ययनदशायां गुरुमुखात् साधनान्तराद्वा वेदान्तर्थे निर्द्धारिते सुखेन तत्सम्भवान्नान्योन्याश्रय इति शङ्कायां दूषणान्तरमाहुः । * निर्द्धारित इत्यादि * विचारो ह्यर्थनिर्द्धारार्थः । अर्थनिर्द्धारश्च वैराग्यादिप्रयोजकतया यदि पूर्वमभ्युपेतस्तदा फले जाते निष्प्रयोजनत्वान्निःसन्दिग्धविषयत्वाच्च स व्यर्थ इत्यर्थः । एवकारेण तदर्थकप्रवृत्तिविघातोऽपि संगृह्यते । नन्वर्थे निर्द्धारितेऽपि न विचारवैफल्यं, तस्यात्मसाक्षात्कारार्थत्वादित्यत आहुः । * नचेत्यादि * विचारस्यार्थज्ञानजनकतया शब्दाङ्गत्वेन तदुपकारकत्वस्यैव प्रत्यक्षसिद्धत्वेन तस्यात्मसाक्षात्कारफलकत्वकल्पनायां प्रमाणाभावादित्यर्थः । ननु दशमस्त्वमसीत्यादेः शब्दादपि दशमोऽहमित्याकारकात्मसाक्षात्काररूपं फलं विचारद्वारा दृश्यत इति तथा कल्पनायां दृष्टमेव प्रमाणमस्तीति कथं प्रमाणाभाव इत्याकाङ्क्षायां दृष्टान्तवैधर्म्यं स्फुटीकुर्वन्ति *दशम इत्यादि* । अयमर्थः । उक्तवाक्यदृष्टान्तेन विचारद्वारा

अत्वान् स्वदेहमपि पश्यन् दशमोऽहमिति मन्यते । न तथा प्रकृते । मनननिदिध्यासनविधीनामानर्थक्यप्रसङ्गात् ।

नचाधिकारिभेदः कल्पनीयः । शब्दज्ञाने तत्कल्पनायां प्रमाणाऽभावात् ।

आत्मसाक्षात्कारः कस्योपपद्यते । किं देहाविशिष्टात्मवेदिनो वा, देहात्मवेदिनो वा । तादृशस्यापि चक्षुष्मतोऽन्धस्य वा विविक्तात्मवेदिनो वा । तत्र नाद्यः । व्यामुग्धादिषु परेण बोध्यमानस्य दशमत्वस्य बाह्यत्वेन नाद्विशिष्टस्य बाह्यस्यैव देहादेस्तथात्वमित्युक्तरीत्या तस्य ज्ञानस्यात्मविषयकत्वाभावात् । अत एव न द्वितीयः । अन्धस्येतराऽज्ञानात् । तस्य प्रज्ञाचक्षुष्ट्वेन तथा ज्ञायमानस्यापि चाक्षुषकल्पत्वाच्च । न तृतीयः । तस्यात्मविस्मृत्यभावेन तत्र शब्दस्याऽकारणत्वात् । न च पूर्वविकल्पोक्तानामात्मनिष्ठमान्तरमेव दशमत्वं शब्दाद् भासत इति वाच्यम् । दशमत्वस्य वक्त्रीक्षाबुद्धिजन्यत्वेन तस्यां च बुद्धौ संख्याघटकानां परात्मनां भानाभावेन स्वस्यापि दशमत्वाभानप्रसङ्गात् । अतो नवमत्वादिवद् दशमत्वस्यापि बाह्यत्वमेव । कृशोऽहमितिवद् दशमोऽहमितिप्रत्यग्वित्त्यापि देहस्यैव वेद्यत्वाच्च । प्रकृते विचारे तु वेदान्तवाक्यैर्ब्रह्मत्वेनात्मसाक्षात्कारस्य तत्राभिमतत्वेन तथा धर्मधर्मिणोरुभयोरप्यान्तरत्वान्न दृष्टान्तसाम्यम् । न हि समीपवर्तिभिरिन्द्रियैरग्राह्य आत्मा तद्ग्राह्येण ग्राह्येन शब्दप्रमाणेन ग्राहयितुं शक्यते । अथ दर्शनाव्यवधानेन श्रवणस्य विधानोच्छक्यत इत्युच्यते तदा मनननिदिध्यासनविधिवैयर्थ्यम् । तथाच दृष्टान्तवैषम्यान्मनननिदिध्यासनविधिविरोधाच्चात्मसाक्षात्कारस्य न श्रवणफलत्वं विचारफलत्वं वा वक्तुं शक्यमित्यर्थः । ननु मुख्याधिकारिणः शब्दादपरोक्षं भवति, न तु मन्दादेरिति तादृशेषु मननाद्युपयोगान्न तद्विध्यानर्थक्यमिति चेत्तत्राहुः * नचेत्यादि * शब्दजन्ये ज्ञानेऽधिकारिभेदस्तदा कल्प्यो यदि स विधिवैयर्थ्यं समादध्यात् । न तु तथा । मन्दस्य पदशक्त्यादिज्ञानशून्य-

---

१ आत्म° क° अरे दृश्य° चैतन्य इत्यत्र ।

अत्यन्तासत्यप्यर्थे शब्दस्य ज्ञानजननात् प्रमाणसङ्करापत्तेश्च ।

तया मननाद्यसामर्थ्येन, मध्यमस्य च विदितपदपदार्थसंसर्गतया-ऽऽकाङ्क्षादिबलेन दशमादिवदपरोक्षभवनसौकर्येण मननाद्यनुपयोगेन ताभ्यां तदसमाधानात् तत्कल्पनायां श्रुतार्थापत्तिरूपप्रमाणाभावा-दित्यर्थः । ननु विदितपदपदार्थसंसर्गस्यापि वाक्यतात्पर्याज्ञाने दशमादिवाक्यादप्यपरोक्षादर्शनान्मननादिना तज्ज्ञाने तद्दर्शनात्, तात्पर्यज्ञानशून्येनाधिकारिणा तत्समाधातुं शक्यत एवेति कथं प्रमाणा-भाव इत्यत आहुः * अत्यन्तेत्यादि * शब्दस्येतिषष्ठ्या करणत्वं बोध्यते । तथाच खपुष्पं सुरभीत्युक्तेऽत्यन्तासतोऽपि ज्ञानं जायते । एवं गुर्वादिनोक्तवेदान्तवाक्ये अगोचरस्याप्यात्मनस्त्वदभिमतं ज्ञानं भविष्यतीत्युक्तविधिवैयर्थ्यं कुर्वारमनः प्रमाणाभाव इत्यर्थः । ननु विधिबलादेव ज्ञायते सर्वेषां न भवतीत्यतो न तदभाव इत्यत आहुः * प्रमाणेत्यादि * सङ्करो मर्यादाभङ्गेन जायमानं कार्यम् । यथा वर्णसङ्कर इति । तथाच तत्र यथा न वर्णत्वमेवमत्रापि दशमस्त्वमसीतिवाक्यस्य युष्मत्पदस्मारितपदार्थोल्लङ्घनेनास्मत्पदार्थविषयकज्ञानजनने तस्य ज्ञानस्य प्रमाणत्वं न स्यादिति तादृशज्ञानोपपादनप्रयासवैफल्यम् । किञ्चैवं भग्नायां प्रमाणमर्यादायां तं घटमानयेत्यत्रापि वाक्यार्थज्ञानं प्रत्यक्षं स्यात् । आत्मन इव घटस्यापि पूर्वमनुभूतत्वात् । चीत्कारेण गजानुमितिरपि न स्यात् । यद्वा, प्रमाणे ज्ञानेऽनुव्यवसीयमानयोः प्रत्यक्षत्वपरोक्षयोर्जातित्वबाधकसङ्करापत्तिः स्यात् । न चेष्टापत्तिः । व्यवहारे भट्टनयमुपगच्छतस्तथा वक्तुमयुक्तत्वात् । भारत आजगरेऽपि, 'जातिरत्र महासर्प मनुष्यत्वे महामते । सङ्करात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिरिति' युधिष्ठिरेण ब्राह्मणत्वजातिबाधकतया सङ्करस्योपगतत्वाच्च । अतोऽनेकदूषणग्रासादधिकारिभेदशब्दापरोक्षयोः कल्पनमेवायुक्तमित्यर्थः । ननु मास्तु शब्दादपरोऽक्षं, तथाऽपि दशमस्त्वमसीतिवाक्यसहकृतचक्षुषा दशमोऽहमितिवन्मनसैवानुद्रष्टव्य इति श्रुतेस्तत्त्वमस्यादिवाक्यसहकृतमनसैव विविक्तात्मसाक्षात्कारो भावीत्यधिकारिभेदो नायुक्त इति चेत्तन्ना-

मनसा तज्जननेऽपि तथा । तस्मात् प्रथमं शाब्दमेव ज्ञानमिति मन्तव्यम् । अनुभवसिद्धत्वात् । इदानीन्तनानामपि शमादिरहितानां निर्विचिकित्सितवेदार्थज्ञानोपलम्भेः । संन्यासानुपपत्तिश्च ।

किञ्च । अध्याहारश्च कर्तव्यः । स च कर्तव्यादिपदानाम् । यदि तत् स्वार्थं, व्यर्थमेव वाक्यं स्यात् । परार्थत्वे त्वशक्यम् । न हि तैर्विचारः कर्तुं शक्यते । स्वकृतिवैयर्थ्यं च । असङ्गतिश्चास्य सूत्रस्य भवेत् ।

हुः । * मनसेत्यादि * वाक्यमहकृतमनसा । यदि सर्वेषां साक्षात्कारस्तदा मननादिविधिवैयर्थ्यम् । यदि कस्य चित् तदा यस्य न साक्षात्कारस्तस्य वेदान्तार्थनिर्द्धार एव विचारफलत्वेन वाच्यस्तथा सत्युक्तरीत्या वैराग्यादिसम्पादकत्वेन तस्य प्रागेवापेक्षितत्वात् पूर्वोक्ताऽन्योन्याश्रयादिदोषतादवस्थ्यमित्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । * मन्तव्यमिति * सर्वेषां भवतीति मन्तव्यम् । अनुभवसिद्धत्वं विशदयन्ति * इदानीमित्यादि * तथाच पूर्वोक्तं दूषणं दुरुद्धरमित्यर्थः । उक्तदार्ढ्याय दूषणान्तरमाहुः * सन्न्यासेत्यादि * गृहाद्वा प्रव्रजेद् वनाद्वा प्रव्रजेदितिश्रुतौ तत्तदाश्रमानन्तर्यकथनाद् दृढं वैराग्यं संन्यासाङ्गमिति ज्ञायते । श्रुत्यन्तरे च वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वा इति वेदान्तार्थनिश्चयोत्तरं सन्यासस्योक्तत्वात् तदङ्गभूतवैराग्यस्य वेदान्तार्थनिश्चयोत्तरत्वमेवायाति । ततः पूर्वभावित्वं च विचारस्येति तत्तदभावे दृढवैराग्याभावात् संन्यासानुपपत्तिः । तथाचानन्तर्यपक्षे तन्निरूपकस्य वक्तुमशक्यत्वात् किमनन्तरमित्याकाङ्क्षायाः कथमपि न पूरणमित्यर्थः ।

द्वितीयं दूषणं विवृण्वन्ति *किञ्चेत्यादि* । * तदिति * विचारकरणम् । तथाच स्वयमेव मनसि विचार्यमिति स्वार्थत्वे शास्त्रानर्थक्यमित्यर्थः । * अशक्यमिति * अशक्योपदेशरूपम् । तथाच फलाऽभावाद् वैयर्थ्यमित्यर्थः । * असङ्गतिरिति * परैः कर्तव्यमितिप्र-

किञ्चाधिकारपक्षे पुरुषार्थः सिद्ध्यति, नानन्तर्यपक्षे। उक्तन्यायात्।

किञ्च, तादृशस्याधिकारिणः श्रवणमात्रेण कृतार्थस्य समाधिनिरतस्य प्रवचनासम्भवाच्छास्त्रोच्छेदः। शास्त्रविरोधश्च। साधनानामग्रे स्वयमेव वक्तव्यत्वात्। अतोऽनेकदोषदुष्टत्वादधिकारार्थ एव श्रेयान्।

नच ज्ञातुमिच्छा जिज्ञासा नाधिकर्तुं शक्येति वाच्यम्। जिज्ञासापदस्य विचारार्थत्वात्।

तिज्ञाया अग्रिमसूत्रीयस्वयंकृतिविरुद्धत्वादसङ्गतिरित्यर्थः।

तृतीयं विवृण्वन्ति * किञ्चाधिकारेत्यादि *। * उक्तन्यायादिति * तदसम्भवापत्तेरित्यनेनोक्तान्न्यायात्। विचारव्यतिरेकेण ब्रह्मणः परमपुरुषार्थत्वज्ञानाद्यभावात् तदभावे चित्तशुद्ध्याद्यभावेन विचाराभावात् तथेत्यर्थः।

चतुर्थं विवृण्वन्ति * किञ्च, तादृशस्येत्यादि *। * तादृशस्येति * साधनचतुष्टयसम्पन्नस्य। *साधनानामिति* वैराग्यादिसाधनानाम। * अग्रे इति * तृतीयाध्याये। तथाचानन्तर्यनिरूपकतया पूर्वसिद्धानां पुनः कथनानर्हत्वात्, कथनेन च पूर्वं तदभावनिश्चयात् सिद्धत्वाङ्गीकारे व्याख्येयशास्त्रविरोध इत्यर्थः। एतेन यन्माध्वैर्जातिकृतं गुणकृतं च ब्रह्मविद्यायामधिकारत्रैविध्यमङ्गीकृत्य तदानन्तर्यमथशब्दार्थो, न त्वध्ययनमात्रानन्तर्यमिति साधनाध्यायानुसारेणाङ्गीक्रियते, तदपि प्रत्युक्तम्। विचारब्रह्मविद्ययोरैक्याभावात्। अतो न तदुपन्यस्तश्रुतिस्मृतीनामपि विरोधः।

एवमथशब्दार्थं निर्णीय जिज्ञासाशब्दार्थं निश्चेतुमधिकारार्थविरुद्धं मतान्तरीयं तदर्थमनूद्य परिहरन्ति * न चेत्यादि *। * ज्ञातुमिच्छा जिज्ञासेति * 'धातोः कर्मण' इति धातुवाच्यस्यार्थस्येप्सितत्वस्मरणाज्ज्ञानप्रधानेयमिच्छा प्रस्तोतुमशक्येत्यर्थः। * विचारार्थत्वादिति * जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतमिति,

अत एव जिज्ञासितुमिच्छेदिति पुराविदां वचनानि । जिज्ञासापदेन चैतज्ज्ञापयति । ब्रह्मज्ञानं पुरुषार्थसाधनत्वादिष्टम् । तदिच्छापूरणाय विचार आरभ्यत इति । यस्मात् कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमिति ततस्तज्ज्ञानाय विचारोऽधिक्रियत इति

जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनमिति, अजिज्ञासितगङ्गो गुरु मुनिमुपाव्रजेदिति, जिज्ञासायां सम्प्रवृत्तो नाद्रियेत् कर्मचोदनामित्यादिषु जिज्ञासितजिज्ञासापदयोरिष्टेच्छावाचकत्वे वाक्यार्थेऽनन्वयेन तत्र विचारार्थकत्वनिश्चयेन तथात्वात । तथाचैवंविधाप्तवाक्यग्राहितां रूढिमनादृत्य वृथा यौगिकादरणमप्रयोजकमित्यर्थः । अत्र शाबरभाष्यसम्मतिमाहुः * अत एवेत्यादि * । ननु विचारे प्रारम्भणीये, अथातो ब्रह्मविचार इत्येव कुतो नोक्तमित्याशङ्कायामाहुः * जिज्ञासापदेनेत्यादि * । भृगुप्रपाठके, अधीहि भगवो ब्रह्मेतिश्रुतेर्ब्रह्मज्ञानेच्छयोपसन्नाय भृगवे, यतो वा इमानीति ब्रह्मलक्षणकथनपूर्वकं तद्विजिज्ञासस्वेतिपदेन तदिच्छापूरणाय विचारोपदेशादिहापि तथैव विचार आरभ्यत इति ज्ञापयतीत्यर्थः । नचात्र तपोऽनुपदेशाच्छ्रुतिविरोधः शङ्क्यः । तपस इदानीमसाधनतायाः प्रागुपपादितत्वात् । नच विचारस्याश्रौतत्वं शङ्क्यम् । लक्षणवत्तदुपयोगस्य प्रागुपपादितत्वात । नच मन्तव्यादिप्रत्यक्षविधिमूलकत्वं परित्यज्य किमिति ज्ञानविध्याक्षिप्तमङ्गीक्रियत इति वाच्यम् । तथा सति तत्रात्मादिपदात तावन्मात्रत्वेनैव विचारार्थत्वापत्त्याऽग्रिमसूत्राणां विरोधापत्तेः । तस्मादेतावदेवात्रार्थत्वेन ग्राह्यमित्येव युक्तम । एवं जिज्ञासाशब्दार्थं निश्चित्य सिद्धान्तरीत्या सिद्धं वाक्यार्थं वदन्तोऽत शब्दार्थमाहुः * यस्मादित्यादि * । अत्र केचन, क्षेमः सुभिक्षोऽय देशोऽतोऽहमस्मिन् वसामीत्यादौ स्वोक्तस्य गम्यमानस्य वा वृत्तस्य हेतुभावे अतःशब्दप्रयोगदर्शनात् प्रकृते च कर्मज्ञानं पूर्वं वृत्तमिति तस्य हेतुत्वमतःशब्दोऽत्रोपदिशतीत्याहुः । अन्ये तु बृहदारण्यकीयसप्तान्नब्राह्मणस्थायाम्, अथातो व्रतमीमांसेत्यादिश्रुतौ, 'अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम् ।

अतःशब्दार्थः ।

अधिकारी तु त्रैवर्णिक एव । न हि वेदविचारस्य वेदाधिकार्यतिरिक्तः शक्यते कल्पयितुम् । न हि मन्दमतेर्वेदो ना-

---

अस्पष्टानां विधिं सम्यग् दर्शयिष्ये प्रदीपवद्' इति कात्ययनादिस्मृतौ चातःशब्दस्य पूर्वावधौ प्रयोगदर्शनादत्राप्यतःशब्देन पूर्वावधिरेवोच्यते । तथाच, अतः—अस्मात्सूत्रादारभ्येत्यर्थमाहुः । तत्र पूर्वस्मिन् मते देशदृष्टान्ताद्धर्मज्ञानस्य न तेन रूपेण हेतुत्वं, किन्तु वृत्तत्वेन वाच्यम् । तत्त्वानन्तर्यपक्षदूषणादेवापास्तम । धर्मज्ञानत्वेन हेतुत्वं तु प्रत्यक्षबाधितम । द्वितीये तु, स्मृतौ कर्मणामस्पष्टत्वेन विशेषितत्वात् तदेवातःशब्देन गोचरीक्रियते, न तु पूर्वावधिरनुक्तसिद्धत्वात् । एव श्रुतावपि पूर्वं, त एते सर्व एव समाः सर्वेऽनन्ता इत्यनेन ब्राह्मणो वाङ्मनःप्राणानां साम्यबोधनादुपासकेन कस्य कर्म प्रनत्वेन धार्यमित्यपेक्षायां यस्य व्रतमुत्कृष्टं तन्निश्चायनार्थं व्रतमीमांसायाः प्रवर्तितत्वेन तदुत्कर्षज्ञापनमेव हेतुतयाभिप्रेयते, न तु पूर्वविधिरिति बोध्यम । तेन मतद्वयमप्ययुक्तमितिज्ञापनायोक्तमिति । *अतःशब्दार्थ इति * तथाच धर्मो यशःप्रदः सुखदश्चातः करोमीत्यादाविष्टेऽप्यतःपदप्रयोगदर्शनादयमेवार्थो न त्वन्यविध इत्यर्थः । नन्वस्य प्रथमसूत्रत्वादत्र प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थमधिकारिविषयसम्बन्धप्रयोजनानि वाच्यानि । तत्रानन्तर्यपक्षे विचारितधर्मो वा शमादिमान् वाधिकारी प्राप्यते । अधिकारपक्षे तु तदप्राप्त्या शास्त्रस्यानर्थक्यप्रसङ्गः, सर्वाधिकारकत्वं वा स्यादित्याशङ्कायामाहु । * अधिकारी त्वित्यादि * तथाच ब्रह्मणो वेदार्थत्वात् तद्विचारेऽधिकृते ब्रह्मजिज्ञासापदादेव तत्प्राप्तेर्न पूर्वोक्तो दोष इत्यर्थः । नन्वेव त्रैवर्णिकाधिकारोपगमे तेषां सर्वेषामधिकारप्राप्त्या, शान्तो दान्त इति श्रुतिविरोधात् तत्सङ्कोच आवश्यक इति शमाद्यानन्तर्यपक्ष एव श्रेयानित्यत आहुः * नहि मन्देत्यादि * तथाच तत्र यथा मनिमत्त्वस्यार्थात् प्राप्तिस्तथात्राप्युपयुक्तस्य विशेषणस्य प्राप्तिरिति सङ्कोचस्यानावश्यकत्वादधिकारो न दुष्यतीत्यर्थ । ननु यद्येवं स्याच्छ्रुतिः

यातीति त्रैवर्णिके मतिमत्त्वमधिकारिविशेषणं कल्प्यते । अन्य-पङ्ग्वादीनामिव कर्मणि गृहाद्यासक्तस्य मननाद्यसम्भवात् साक्षात्कारो न भविष्यति ।

नच धर्मन्यायेन गतार्थत्वमस्य । अप्रतिज्ञानादनुपलब्धेश्च । न च जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति सन्देहे किञ्चिदधिकरणमस्ति ।

स्यादेतत् । अथातो धर्मजिज्ञासेति धर्मविचारं प्रतिज्ञाय नोदनावाक्यार्थस्य धर्मत्वमुक्त्वा प्रामाण्यपुरःसरं सर्वे सन्देहा निवारिताः । तत्र ब्रह्मज्ञानस्यापि धर्मत्वम् । आत्मेत्येवोपासीत,

---

किमिति वदेदित्याकाङ्क्षायामाहुः । * अन्धेत्यादि * तथाच तेषां यथाऽऽज्यावेक्षणविष्णुक्रमक्रमणादिकरणाशक्त्या तत्कृतकर्मणो व्यङ्गत्वात् फलाजनकत्वं, तथैतदीयशाब्दज्ञानस्यापि व्यङ्गत्वात् साक्षात्काराजनकत्वमिति बोधयितुं फलोपकाराय वदन्ति, आत्मन्येवात्मानं पश्येदिति । अतो विचारे स्वरूपोपकारार्थं शमाद्यनङ्गीकारेऽपि न श्रुतिविरोध इत्यर्थः । ननु यदि त्रैवर्णिकाधिकारेणार्थादध्ययनानन्तर्यसिद्ध्या तदर्थं वेदार्थभूतब्रह्मविचारः प्रतिज्ञात इत्यायाति तदा शास्त्रवैयर्थ्यापत्तिः । धर्मजिज्ञासेत्यत्र धर्मशब्दस्य वेदार्थमात्रोपलक्षकतया पूर्वतन्त्रन्यायेनैव वेदार्थज्ञानसिद्धेरित्यत आहुः * नचेत्यादि * । * धर्मन्यायेनेति * पूर्वमीमांसया । *अप्रतिज्ञानादिति* जैमिनिना ब्रह्मविचारस्याप्रतिज्ञानात् । अनुपलब्धेरित्यस्यैव विवरणम्, * न च जगदित्यादि *

एवमानन्तर्यपक्षे निरस्ते पूर्वमीमांसकोऽस्यास्त्रैवर्णिकाधिकारकत्वं सर्ववेदार्थज्ञानार्थत्वं च श्रुत्वा प्रत्यवतिष्ठते * स्यादेतदित्यादि * यदि त्रैवर्णिक एवाधीतवेदोऽधिकारी, यदि च सर्ववेदार्थ एव ज्ञातुमिष्टस्तदा वक्ष्यमाणमेवाङ्गीकार्यमित्यर्थः । * प्रामाण्यपुरःसरमिति * औत्पत्तिकसूत्रे शब्दस्यान्यानपेक्षप्रामाण्यव्यवस्थापनपूर्वकम् । * सर्वे इति * शब्दस्वरूपविषयकास्तदर्थविषयका-

आत्मानं श्लोकमुपासीत, तद् ब्रह्मेत्युपासीत, आत्मा वारे द्रष्टव्य इत्यादिनोदनावाक्यार्थत्वात् । अथ हि परमो धर्मो यद्योगेनात्मदर्शनमिति स्मृतेश्च । सृष्ट्यादिवाक्यानां त्वर्थवादत्वम् । आरोपापन्नादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषयस्तावकत्वात् ।

नच ज्ञानादीनामविधेयत्वं, प्रमाणवस्तुपरतन्त्रत्वेनाऽकृतिसाध्यत्वादिति वाच्यम् । न हि सर्वात्मना असाध्यम् । प्रकारभेदस्त्वप्रयोजकः । सर्वस्यापि कारणेषु पुरुषव्यापृतिः । तदत्र

श्च । ननूक्तं, जगत्कारणविचारो न कृत इति सन्निश्चायनार्थत्वान्न गतार्थत्वमिति तत्राह * सृष्ट्यादीत्यादि * तथाच पूर्वमीमांसकानां मते प्रवाहनित्यतोपगमेन जगतः स्वातन्त्र्यात् कर्तुरभावेनोपासनाविषयस्यात्मनः प्रशंसार्थं क्वचित् कर्तृत्वधर्मारोप्यते । अन्यदन्न च तदपोद्यते । क्वचित् सर्वकामत्वादिकं प्रतिपाद्यते । अन्यन्नापोद्यते । यदि तद्वास्तवं स्यान्नापोद्येतेति तर्ह्यारोपापन्नादविषयो यः कर्तृत्वादिधर्मस्तत्प्रतिपादकत्वेन तेषां विधेयस्तावकत्वनिश्चयात् सिद्धेऽर्थवादत्वे तेषां स्वार्थे तात्पर्याभावेन ब्रह्मणि विरुद्धधर्माधारत्वादिकल्पनस्याप्रयोजकत्वात् तदर्थत्वेऽपि गतार्थत्वमित्यर्थः । ननूपासनावाक्यशेषाणामस्त्वर्थवादत्वं, न तु ज्ञानवाक्यशेषाणामपि । ज्ञानस्य प्रमाणवस्तुभ्यां जायमानत्वेन तदर्थं कृत्यपेक्षाभावेन तस्य विध्यर्थत्वाभावात्, कृतिसाध्यत्वस्यैव विध्यर्थत्वात् । नच तव्यद्विरोधः आवश्यकार्थेऽपि जायमानत्वात् । अतस्तच्छेषाणां स्तावकत्व भावेन तद्विचारस्यावश्यकत्वान्नास्या गतार्थत्वमिति शमाद्यानन्तर्यवादिनः शङ्कायामाह * नचेत्यादि * आदिपदेनेच्छाप्रयत्नौ । तेन तदन्वेष्टव्यम, तद्विजिज्ञासितव्यम, मन्तव्यो निदिध्यासितव्य इत्यादीनां सङ्ग्रहः । तद् दूषयति *नहीत्यादि* सन्निकर्षादिजनककृत्यपेक्षायास्तत्रापि सत्त्वात् तथेत्यर्थः । ननु तथापि कर्मवत् साक्षात्कृतिसाध्यत्वाभावात् कथं ज्ञानादीनां विधेयत्वमित्यत आह * प्रकारेत्यादि * ज्ञानादेरविधेयत्वसाधनायैवं प्रकारभेदो यः कल्प्यते स

वृत्तिसम्पादने प्रमाणसम्पादने वा पुरुषकृतिसाध्यत्वम् ।

अन्यथा सिद्धान्तेऽपि मननादिशास्त्रवैफल्यापत्तेः । साधनप्रतिपादकश्रुतिविरोधश्च । येनापि सर्वक्रियाफलत्वं निराकार्यं, तेनापि गुरूपसत्त्यादिना यतितव्यमेव ज्ञानार्थे । तस्माद् यत्रापि विध्यश्रवणं, तत्रापि विधिं परिकल्प्य तत्रस्थानां तच्छेषत्वं कल्प्यमिति, नार्थोऽनया मीमांसया । अन्यथा विरोधोऽपि ।

स्यादेतत् । ब्रह्मविचार एवारम्भणीयो, न धर्मविचारः । सर्ववेदव्यासकर्त्रा वेदव्यासेनाकृतत्वात् तुच्छफलत्वाच्च । कल्पोक्तप्रकारेण निःसन्दिग्धं करणसम्भवाच्च । आचारपरम्परयापि करणसम्भवाच्च । एतर्ह्यपि सन्देहे सूत्रभाष्ययाज्ञिका-

---

त्वविधेयताप्रयोजको न भवति । यतो धर्मस्यापूर्वात्मकत्वेन तस्य सर्वस्यापि कारणीभूते क्रियाकलाप एव यत्नात्मा पुरुषव्यापारो दृश्यते, न तु साक्षात् । तत्तस्मादत्र ज्ञानार्थो वृत्तिसम्पादने बुद्धिजन्यायाः पदार्थान्तररूपाया बुद्ध्यवस्थाविशेषरूपाया वा तस्या उत्पादने प्रमाणसम्पादने वा, आवृत्तचक्षुरमृतत्वमिच्छन्निति, अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणेत्यादिश्रुतेस्तादृशचक्षुरादिसम्पादने वा तथात्वमिति, न ज्ञानादेरविधेयत्वमिति तयोरपि विधावेवेत्यर्थः । अविधेयत्वोपगमे दूषणमप्याह * अन्यथेत्यादि * । साधनप्रतिपादकश्रुतयस्तु, तपसा ब्रह्म विजिज्ञासस्व, वसाऽपराणि पञ्च वर्षाणि, शान्तो दान्त इत्याद्याः । * तत्रस्थानामिति * वाक्यानां ब्रह्मादिपदानां चेत्यर्थः । * अन्यथेत्यादि * विध्यकल्पने ऐकार्थ्याऽभावेन वाक्यभेदापत्तावैकशास्त्र्यविरोधः । अपिशब्दात् कर्मप्रतिपादनतन्निन्दनकृतो विरोधो, वेदोऽखिलो धर्ममूलमित्यादिस्मृतिविरोधश्च संगृह्यते । अत्रैकदेशी वितण्डया प्रत्याह * स्यादेतत् । ब्रह्मेत्यादि * । * सर्ववेदेत्यादि * तथाच जैमिनिस्तच्छिष्यः सामगो, न सर्वज्ञ इति तदुक्तं न प्रमाणमित्यर्थः । उपासनायामप्यनुपयोगमाह * आचारेत्यादि * सूत्रभाष्येति * कल्पसूत्रभाष्येत्यर्थः । * पूर्वयापी-

नामेवानुवृत्तिः क्रियते, न मीमांसकस्य। तस्मात् साङ्गवेदाध्येतुर्निःसन्देहकरणासम्भवान्न पूर्वयाऽपि कृत्यम।

किञ्च परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वभियान्वसीयते। विपरीतबोधिका तु पूर्वमीमांसा तस्मादपि न कर्तव्येति।

नैवम्। किं विचारमात्रं न कर्तव्यं, पूर्वकाण्डविचारो वा। नाद्यः। तुल्यत्वात् समर्थितत्वाच्च।

द्वितीये सामान्यन्यायेन सन्देहे निवार्ये लक्षणवत्तदुपयोगः। अनिष्टतया निरूपणं न मीमांसादोष। किन्तु विचारकाणां स्वभावभेदात्।

किञ्च। आवश्यकत्वादपि। निवृत्तानामपि यागादिज्ञान-

स्यपिशब्दः पूर्वपक्षिगर्हार्थः। शेषमतिरोहितार्थम्।

एवं केवलवैदिकरीत्या विचारद्वये आक्षिप्ते पूर्ववादी समाधत्ते। * नैवमित्यादि *। पूर्वयापि न कृत्यमिति न वक्तव्यम। कुत इत्याकाङ्क्षायामपिशब्दस्य समुच्चायकत्वं मन्वानः पक्षद्वयं विकल्प्य प्रथममुभयनिषेधाभावे हेतुमाह * तुल्यत्वादिति * यत्रोभयोः समो दोष इति न्यायेन परिहारसाम्यात् तवापीष्टसिद्धेरभावेन दूषणसाम्याद्वा, अप्रतिज्ञानादिरगादिभिस्त्वया समर्थितत्वाच्चेत्यर्थः। * सामान्यन्यायेन सन्देह इति * अक्ताः शर्करा उपदधाति, निर्मन्थ्येनेष्टकाः पचन्तीत्यादौ घृततैलवसानां चिरनिर्मथिताऽचिरनिर्मथितप्रभृतीनां चाञ्जनपाककरणयोग्यतादेः सामान्येन जाते सन्देहे। ननु तुच्छफलत्वान्नोपयोग इत्युक्तं, तत्राह * अनिष्टतयेत्यादि *। * स्वभावभेदादिति * तेषां प्रकृतिवैचित्र्यादित्येकादशस्कन्धीयवाक्योक्तरीतिकात् तस्मात्। अनुपयोगिरूपं दूषणमुत्तरमीमांसायां हृदि कृत्वाह * किञ्चेत्यादि *। आवश्यकं विवृणोति *निवृत्तेत्यादि* तथाच त्रैवर्णिकाधिकारपक्षे शास्त्रवैयर्थ्य-

स्यानश्यकत्वम् । चित्तशुद्ध्यर्थत्वात् । परमाश्रमभेदेन प्रकारभेदः कायिकादिभेदात् । तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक इत्याश्रमिणाम् । तस्मादेकेनैव चरितार्थत्वात् किं द्वितीयेनेति प्राप्ते ।

उच्यते । उपासनाया धर्मत्वेऽपि न ब्रह्मणो धर्मत्वम् । ज्ञानरूपत्वात् । धर्मस्य च क्रियारूपत्वात् ।

स्यापरिहार्यत्वात् तद्विहाय पूर्वतन्त्रमेवादरणीयमित्यर्थः ।

अत्र समादधते * उच्यते * उपासनाया इत्यादि * त्रैवर्णिकाधिकारपक्षे स्यातां ब्रह्ममीमांसाया गतार्थत्वानुपयोगौ यद्युत्तरकाण्डस्य मुख्यतयोपासनारूपधर्मप्रतिपादकत्वं स्यात् । तदेव तु न । किन्तु ब्रह्मप्रतिपादकत्वं, ब्रह्मण एव सर्ववेदार्थत्वात् । सर्वे वेदा यत्पदमामनन्ति, वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, मां विधत्तेऽभिधत्ते मामित्यादिवाक्येभ्यः । किं बहुना, धर्मोऽपि ब्रह्मात्मकत्वेनैव प्रतिपाद्यः । धर्मो यस्यां मदात्मक इति वाक्यात् । जैमिनिस्तु पुरःस्फूर्तिकर्मत्वेवाचेति न दोषः । ब्रह्म च न शारीरमात्रं, येन सृष्ट्यादिवाक्येषु वाचो धेनुत्ववत् तस्मिन् जगत्कर्तृत्वादीनामसम्भवतां धर्माणामारोपापवादादिभिर्विधेयोपासनाविषयस्तावकतयोपासनाशेषता सम्भवन्ती गतार्थत्वानुपयोगौ दृढीकुर्यात् । किञ्चोपासनाविषय आत्मनि निरङ्कुशजगत्कर्तृत्वादयो ये धर्माः स्तुत्यर्थमारोप्यन्ते, ते किमत्यन्तासन्तः खपुष्पवद् उत क्वचित् सन्तो रजतवत् । तत्राद्य आरोप एव बाधितः । द्वितीये तु सिद्धमतिरिक्तेन ब्रह्मणा । तच्च पूर्वकाण्डे परोक्षवादत्वान्न स्फुटं प्रतिपादितमिति तत्प्रतिपादकमुत्तरकाण्डं न धर्मप्रतिपादकम् । अत उपासनाया धर्मत्वेऽपि नोत्तरमीमांसागतार्थत्वमित्यर्थः । नन्वस्त्वेवं, तथापि सृष्ट्यादिवाक्यानां विधिमन्त्रादिरूपत्वाभावादर्थवादत्वमेव वक्तव्यम् । ततश्च ब्रह्मस्तावकत्वात् तेषां न स्वार्थे प्रामाण्यमिति तद्विचारशास्त्रस्य क्वोपयोग इत्य-

नचार्थवादानां धर्म इव ब्रह्मण्युपयोगः कर्तुं शक्यः । उत्पाद्यप्रकारफलभेदानामभावात् । प्रकृते तु माहात्म्यज्ञानार्थं तदुपयोगः । तस्य च ज्ञानोपयोगो यथा तथा वक्ष्यते चतुर्थे । उपासनादर्शनादिपदानां मनोव्यापारत्वमेव ।

विचारस्यापि यथा ज्ञानोपयोगित्वं, तथाग्रे वक्ष्यते ।

त आहुः । * नचेत्यादि * । स्यात् स्वार्थे अप्रामाण्यं, यदि कर्मणीव ब्रह्मण्युपयुज्येरन् । कर्मणि हि त्रेधा तेषामुपयोगः । यथा, असावादित्यो न व्यरोचतेत्यादीनां सौर्याद्युत्पत्तौ । यथा वा पवै सोमेन जानादित्यत्र । अष्टाक्षरा गायत्रीत्यस्याग्नेयपुरोडाशीयेऽष्टाकपालत्वरूपे प्रकारे । यथा च, वायुर्वै क्षेपिष्ठेत्यादीनां भूत्यादिरूपे फले । न तथा ब्रह्मणि । नित्यत्वात् सदैकरसत्वात् स्वस्यैव फलत्वाच्च । अस्ति तु माहात्म्यज्ञानार्थमुपयोगः । माहात्म्यं च सदेव ज्ञानं फलाय, न त्वसत् । असत्त्वे तदधिष्ठानस्यासमर्थतायां ततः फलाभावप्रसङ्गात् । तदाहुः * तस्य चेत्यादि * माहात्म्यज्ञानेन भक्तिद्वारा साक्षात्कारोपयोग इति फलाध्याये प्रथमपादे, आदित्यादिमतय इतिसूत्रे वक्ष्यत इत्यर्थः । नन्वस्तु ब्रह्मणि माहात्म्यज्ञानार्थे सृष्ट्यादिवाक्योपयोगस्तथापि तेषां विध्युपयोगोऽवश्यं वक्तव्यः । नो चेदुपासनादिविधीनां प्ररोचनाभावेन व्यापारकौण्ठ्ये वाक्यवैयर्थ्यापत्तेः । एवं सिद्धे तेषां विधिशेषत्वे तेषु निरूप्यमाणं ब्रह्मापि तच्छेषमेवेत्युत्तरकाण्डस्य न तत्प्रतिपादकत्वम् । ततश्च सिद्धावुत्तरमीमांसाया गतार्थत्वानुपयोगावित्याकाङ्क्षायामाहुः * उपासनेत्यादि * । अस्त्वेवम् । तथापि विधेयानामुपासनाज्ञानादीनां मनोव्यापाररूपतया सविषयत्वेन विषयाधीनत्वात् तद्विषयस्य ब्रह्मणो न मुख्यत्वं हीयते । अहीयमाने च तस्मिन्निह प्रमाणागोचरस्य तस्य ज्ञानायोत्तरकाण्डविचारस्यावश्यकत्वाच्च तन्मीमांसाया गतार्थत्वानुपयोगावित्यर्थः । ननु तथापि ब्रह्मण आसंसारं प्रसिद्धानुभावत्वात् तज्ज्ञाने विचारस्यानुपयोगाद् वैयर्थ्यमस्य शास्त्रस्यानिवार्यमित्यत आहुः * विचारस्येत्यादि * । * अग्रे वक्ष्यत इति * तृतीयस्य द्वितीयपादे, उभयव्यपदेशाद्यधिकरणेषु वक्ष्यते ।

किञ्चोपनिषद्ज्ञानस्यापि कर्मोपयोगित्वम् । यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीति । अत एव ब्रह्मविदामेव जनकादीनां कर्मणि सर्वदेवसान्निध्यम् । अन्यथा आभासत्वमेव । नच ब्रह्मरूपात्मविज्ञाने देहाद्यध्यासाभावेन कर्तृत्वाभावात् कर्मानधिकार इति वाच्यम् । निरध्यस्तैरेव देहादिभिः कर्मकरणसम्भवात् । अत एव जीवन्मुक्तानां सर्वे व्यापाराः । तथाच स्मृतिः । 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्छृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् । ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति । अतो ब्रह्मविदामेव कृतं कर्म शुभफलं भवति । अतो धर्मविचारकारणमपि ब्रह्म जिज्ञास्यमेव । तस्मान्न गतार्थत्वानुपयोगौ ।

ननु फलप्रेप्सुरधिकारी । फलं च विचारस्य शाब्दं ज्ञानं, तस्य मननादिद्वाराऽनुभवः, तस्य चानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः । तथाच विरक्तोऽनर्थजिहासुः परमेप्सुश्चाधिकारी कस्मान्न भवति । 'शब्दब्रह्मणि निष्णातो न निष्णायात् परे

उपासनाद्यर्थमेव न ब्रह्म जिज्ञास्यं, किन्तु पूर्वकाण्डोक्तेऽपि कर्मणि मुख्यफलार्थं तदवश्यं जिज्ञास्यमिति, नान्यथा गतार्थत्वानुपयोगावित्याह * किञ्चोपनिषदित्यादि * निगदव्याख्यातमेतत् । तथाच त्रैवर्णिकाधिकार एव दोषरहित इत्यर्थः ।

एवं त्रैवर्णिकाधिकारपक्षे स्थिरीकृते आनन्तर्यवादी पुनः शङ्कते । नन्वित्यादि । सिद्धान्ते ज्ञानविधिरनार्थजातप्रासस्तत्र कैमर्थ्याकाङ्क्षायामुक्तवाक्याभ्यां, ब्रह्मविदाप्नोति परमिति श्रुत्युक्तपरप्राप्तिरूपफलार्थतेति वक्तव्यम् । अन्यथा प्रवृत्तिविरहापत्तेः । तत्कथनेन च सिद्धमस्मदुक्तेनाधिकारिणां । तदेतदुक्तं * कस्मान्न भवतीति *

यदि । श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षत' इति भगवद्वचना-
त् केवलस्य निन्दाश्रवणादिति चेत् । न । फलकामनाया अ-
नुपयोगात् । अन्येनैव तत्समर्पणात् । नित्यत्वात्स्वार्थज्ञानस्य न
फलेप्सुरधिकारी । निन्दार्थवादस्तु मननादिविधिशेष इति
मन्तव्यम् ।

ननु ब्रह्मणो विचारे प्रतिज्ञाते विरोधनिराकरणादीनामप्र-

अथ वक्तव्यं, सूत्रे ब्रह्मजिज्ञासापदात् तज्ज्ञानस्यैव फलत्वं लभ्यत
इति प्रणाडीसिद्धफलपर्यन्तता किमर्थमङ्गीकार्येति । तथा सति
श्रीभागवतोक्तकेवलार्थविन्निन्दाशास्त्रविरोधापत्तिः । अतस्तदभावा-
योक्तफलपर्यन्तताऽवश्यमभ्युपेया । ततश्च सिद्धमुक्तेनाधिकारिणे-
त्यङ्गीक्रियमाणोऽपि वैराग्याद्यानन्तर्यपक्षेऽधिकारिबलादायातित
इत्यर्थः ।

अत्र समाधत्ते *नेत्यादि* विचाराधिकारित्वेन फलकामना तदोपयु-
ज्यत, यदि ब्रह्मजिज्ञासापदात् प्राप्येत । तत्तु न । अनन्यलभ्यस्य शा-
स्त्रार्थत्वात् । अतस्त्रैवर्णिकोऽर्थजिज्ञासुरेवाधिकारी । फलकामना तु,
ब्रह्मविदाप्नोति परमित्यादिवाक्यार्थे ज्ञान उत्पद्यत इति तेन समर्पि-
ता । फलं चार्थज्ञानस्य नैकम् । भगवतां विद्यायामन्यत्र च, य एवं
वेद प्रतितिष्ठतीत्यादिफलान्तराणामपि श्रवणात् । ततश्च भवदभि-
मताधिकार्यङ्गीकारेऽन्येषामनधिकारेण विचारे प्रवृत्तौ विहितानां न-
च्छास्त्रमेव व्यर्थं स्यात् । अतस्त्वदभावाद्यार्थजिज्ञासोरेवाधिकारित्वं
वक्तव्यम् । अर्थज्ञानं च नित्यम् । स्थाणुरयं भारहारः किलाभूदधीत्य
वेदं न विजानाति योऽर्थमित्यादिष्वनर्थज्ञनिन्दाश्रवणात् । अतोऽर्थ-
ज्ञानस्य नित्यत्वं ज्ञात्वा यो जिज्ञासति स एव मुख्योऽधिकारी । नच
निन्दार्थवादविरोधः । तस्य मननविधिशेषत्वात् । शब्दब्रह्मणि नि-
ष्णातकथनोत्तरं तत्कथनेन तथार्थस्य लाभात् । विचारं विना परनि-
ष्णातासम्भवादिति । एवमत्राधिकारी प्रयोजनं चोक्तम् ।

अतः परं विषयसम्बन्धौ वक्तुमाशङ्कापूर्वकं मतान्तरमाहुः ।
नन्वित्यादि ब्रह्मजिज्ञासेत्यत्र, कर्तृकर्मणोः कृतीति विशेषविधा-

विज्ञातार्थत्वम् । न वा नक्ताव्यत्वम् । निर्विचिकित्सज्ञानानुदयप्रसङ्गादिति चेत् ।

न । ब्रह्मण इति न कर्मणि षष्ठी, किन्तु शेषषष्ठी । तथाच ब्रह्मसम्बन्धि तज्ज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यम् । नच गौणतापत्तिरजिज्ञास्यत्वं च स्यादिति वाच्यम् । ब्रह्ममात्रे

नात् कर्मषष्ठ्यङ्गीकार्या । यद्यपि, प्रतिपदविधाना च षष्ठी न समस्यत इति निषेधाद् ब्रह्मणे जिज्ञासेति चतुर्थीसमासः शङ्क्यते । तथापि, कृद्योगा च षष्ठी समस्यत इति प्रतिप्रसवात् समाससिद्धेरत्र कर्मषष्ठ्यां गृहीतायां ब्रह्मविचार एव प्रतिज्ञातो भवति । नच शेषषष्ठी युक्ता । यद्यपि सम्बन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षतया ब्रह्मणः कर्मतालाभस्तथाप्याक्षेपतः प्राप्त्यपेक्षया अभिधानिकग्रहणस्यैव ज्यायस्त्वात् । तथा सति तदन्यतिरिक्तानां विरोधनिराकरणादीनां ज्ञानपरिकरतया सिद्धावप्यप्रतिज्ञातार्थत्वम् । प्रतिज्ञा हि साध्यविशिष्टपक्षप्रतिपादकं वाक्यम् । तच्च प्रथमसूत्रम् । तत्र च ब्रह्मण एव कर्मत्वेन जिज्ञास्यतया प्रतिज्ञानात् तदन्येषां तथात्वाऽभावात् । नचेष्टापत्तिः कर्तुं शक्या । तथा सति तेषामवचने निर्विचिकित्सब्रह्मज्ञानानुदयेन प्रतिज्ञावैयर्थ्यप्रसङ्गात् । तथाच कर्मषष्ठ्यङ्गीकारे द्वितीयाध्यायादीनामाकस्मिकत्वम् । शेषषष्ठ्यङ्गीकारे व्याकरणविरोधो, ब्रह्मण इतरतौल्याद् गौणत्वापत्तिश्चेत्युभयतःपाशा रज्जुरित्यर्थः ।

अत्र समादधते * नेत्यादि * कृद्योगे कर्मणि षष्ठ्यनुशासनेऽपि विभक्तीनां विवक्षाधीनत्वात् समासस्य सामर्थ्यमात्रापेक्षत्वाच्च ब्रह्मणः कर्मत्वे अविवक्षिते कर्मषष्ठ्यभावेन शेषषष्ठ्यामपि सामर्थ्यात् समाससिद्धेर्व्याकरणविरोधाऽभावः । सर्वेषां प्रतिज्ञातत्वसिद्ध्या, न द्वितीयाद्याकस्मिकत्वम् । तर्हि गौणत्वाजिज्ञास्यत्वे स्यातामित्यत आहुः * नचेत्यादि * केन प्रकारेणाऽजिज्ञास्यत्वमापाद्यते । किं ब्रह्मत्वेन, उत रूपान्तरेण । तत्राद्ये त्वोमिति ब्रूमः । अध्ययनादिदशायां, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यार्थावधारणादेव तत्स्वरूपे सता-

सन्देहाभावात् । सन्दिग्धस्यैव जिज्ञास्यता । गौणत्वं तु शब्दत एव, न त्वर्थतः ।

वेदप्रामाण्यं तु प्रतितन्त्रसिद्धत्वान्न विचार्यते । तस्माद् ब्रह्म जिज्ञासितव्यमिति सिद्धम् ॥ १ ॥

यां च सन्देहाभावात् । किन्तु यद् वेदे लक्षितं ब्रह्म तत् किम । यतो वेदे नानापदार्थानां लक्षितत्वेऽप्याम्नायव्याख्यानरूपे भारते विवृतत्वेऽप्यत्रे-तज्जिज्ञासैव प्रस्तूयते । यदि तज्ज्ञानस्य मोक्षसाधनत्वेन, तर्हि कथं तज्ज्ञानस्यैव तथात्वम् । यदि वेदार्थत्वेन तज्ज्ञानस्य तथात्वं, तदा धर्मविचारेणैव गतार्थता । षोडशलक्षण्या सर्वस्यैव तस्य निर्णीतत्वात् । अत एव न वेदान्तार्थत्वेन । अतः सर्ववेदार्थतानिर्वाहकवक्ष्यमाणरीतिकगुणवत्तया जिज्ञास्यत्वं वक्तव्यम् । ततश्च तादृग्गुणवत्त्वेनैतस्य जिज्ञास्यतासिद्धेर्नाजिज्ञास्यत्वम । नापि गौणत्वापत्तिः । गुणजातस्य ब्रह्मसम्बन्धित्वेन जिज्ञास्यतया ब्रह्मणो मुख्यत्वस्यैव सिद्धेः । शब्दतो गौणत्वं तु न स्वरूपमुख्यत्वविघातकम् । पुत्रः पित्रा सहागत इत्यादौ तथा दर्शनादिति । नन्वस्त्वेवं, तथापि वेदार्थस्य ब्रह्मणो वेदानुकूलो विचारोऽत्र प्रतिज्ञात इति तदर्थं वेदप्रामाण्यमपि विचारणीयम् । तदत्र कुतो न विचारितम् । यतो न विचारितं, ततो वेदार्थत्वेन विचार इति पक्षो न युक्त इत्यत आहुः* वेदेत्यादि *। * प्रतितन्त्रसिद्धत्वादिति * आस्तिकं तन्त्रमात्रं लक्ष्यीकृत्य सिद्धत्वात् । न हि नास्तिकनिग्रहायाचार्यस्य विचारे प्रवृत्ति, किंत्वास्तिकशिक्षणाय । ते तु सर्वे वेदप्रामाण्ये निर्विचिकित्सा इति प्रयोजनाभावान्न विचार्यते । तावता न वेदानुकूलविचारत्वहानिरित्यर्थः । सिद्धमाहु * तस्मादित्यादि * ब्रह्मसम्बन्धिनां विचारेऽपि ब्रह्मणो विषयत्वस्यार्थतः सिद्धत्वात् तादृशगुणकत्वेन ब्रह्म जिज्ञास्यमिति सिद्धमित्यर्थः । अपेक्षितगुणवत्तयैवात्र ब्रह्म जिज्ञास्यं, न त्वशेषविशेषशून्यतयेति शेषषष्ठ्येव युक्तेत्यत्र गमकमप्याहुः * किञ्चेत्यादि, इतीत्यन्तम् * त-

---

१ द्वितीयसूत्रावतरणे द्रष्टव्यम् ।

याच प्रथमसूत्रे ब्रह्मविचारं प्रतिज्ञाय ब्रह्मणो येन रूपेण वेदार्थता तानि रूपाणि प्रकारांश्च वक्तुमग्रिमे कार्यलक्षण प्रमाणं च वदतीत्यतस्तथेत्यर्थः । एवं विषये निर्द्धारिते प्रतिपाद्यप्रतिपादकभावः सम्बन्धोऽप्यनुक्तसिद्ध एवेति प्रेक्षावत्प्रवृत्त्युपयुक्तं सर्वमत्र निरूपितम् । प्रकारभेदेन काण्डद्वयस्यापि ब्रह्मप्रतिपादकतयैकवाक्यत्वसमर्थनान्मीमांसाद्वयस्यैकशास्त्रत्वस्य सूचनेन वृत्तिकाराविरोधोऽपि बोधित ।

शाङ्करास्तु ब्रह्म जिज्ञास्यं न वेति सन्देहे, अहंवित्तिवेद्यत्वेन प्रत्यक्षस्यात्मन एव ब्रह्मत्वान्न जिज्ञास्यमिति पूर्वपक्षे कर्तृत्वादिशून्यनिर्विशेषचिदेकरसत्वेन जिज्ञास्यत्वमङ्गीकृत्य केवलज्ञानादेव मोक्ष चाङ्गीकृत्य मोक्षं प्रति केवलज्ञानस्यैव हेतुत्वाज्ज्ञानकर्मसमुच्चयं नाङ्गीकुर्वन्ति । तन्मते पूर्वोत्तरकाण्डयो स्वर्गमोक्षरूपप्रयोजनभेदात् कर्मब्रह्मस्वरूपाभिधेयभेदाच्छेषशेषिभावाद्यभावेन परस्पराकाङ्क्षाभावाच्चैकवाक्यत्वाभावे उत्तरकाण्डस्य वेदान्त इति समाख्याया विरोधः नापि कर्मशेषभूतकर्तृस्वरूपप्रतिपादकत्वेनापेक्षा । कर्मानुपयुक्तकर्तृभोक्तृभावशून्यात्मप्रतिपादकताऽभ्युपगमात् । नापि कर्मपौष्कल्यजनकविद्याप्रतिपादकत्वेन सा । यदेव विद्यया करोति तदेवास्य वीर्यवत्तरं भवतीति वाक्यस्योद्गीथविद्यामुपक्रम्य पठितत्वेन तन्मते तन्मात्रस्य तथात्वबोधकतया सर्वस्य काण्डस्य तथात्वसम्पादनाक्षमत्वात् । मानवीऋचौ धाय्ये कुर्यादितिवत् । न च वैदिकाभिधाने स्वरादिनियमयोगनैकवाक्यत्वमिति शङ्क्यम् । अप्रयोजकत्वात् सूत्रोक्तैकवाक्यलक्षणविरोधात् । न च यज्ञानां विविदिषोत्पादकत्वेन पूर्वोत्तरकाण्डशेषतायामेकवाक्यत्वसम्भव इति वाच्यम् । मन्त्रस्य-योक्तच्छायामिष्यमाणपर्यन्तत्वं, वादेन जिगीषतीत्यादौ दृष्टं, केवलाया अपुरुषार्थत्व चेति तावन्मात्रान्तत्वस्यासङ्गतत्वात् । इष्यमाणपर्यन्तत्वस्य चानुपगमात् । अत एवं वदता, वेदमनूच्याचार्योऽन्तेवासिनमनुशास्तीति पृथक्समाम्नातिश्रुतेः, वेदाः साङ्गोपनिषद इति पौराणिकपृथङ्निर्देशाच्चात्यन्तभेद एवास्येय. । नचैवं वैदिकप्रसिद्धेर्वेदान्तशब्दो रूढ एवेति वाच्यम् । तथा सति स्वाध्यायादिविधौ तदनिवेशेन तदध्ययनार्थज्ञानविचाराणामवैधत्वापत्तेः । न च तद् विजिज्ञासस्व, तद् ब्रह्मेत्यादिविधिना विचारप्राप्तौ तेनाध्ययनाध्याक्षेपान्न दोष इति वाच्यम् । तथा सति जिज्ञासुमात्रप्राप्तौ त्रैवर्णि-

काप्राप्त्या अधिकारविरोधापत्तेः। अतस्तन्मते उपनिषदां वेदान्तत्वं न कथमपि सिद्ध्यतीत्यवधेयम।

रामानुजाचार्यास्तु ब्रह्मपदस्य निर्दोषपूर्णगुणपुरुषोत्तमवाचकत्वं, तस्य च स्थूलसूक्ष्मचिदचिच्छरीरविशिष्टतया वेदान्तार्थत्वेन जिज्ञास्यत्वं चोपगम्य यज्ञादीनां विविदिषोपयोगमाश्रवणेऽपि व्यासपादैराप्रायणात्तत्रापि हि दृष्टमित्यादिसूत्रेषु यावज्जीवं तत्करणबोधनाद् ध्रुवानुस्मृतिरूपोपासनाभक्त्यादिनामकदर्शनसमानाकारज्ञानजनकत्वेन भावनात्मकोपासनया समुच्चयमङ्गीकुर्वन्ति।

भास्कराचार्यास्तु ब्रह्म प्रसिद्धं न जिज्ञास्यम। अथ प्रसिद्धं नतरामिति पूर्वपक्षे, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिषु जगत्कारणताश्रवणेन प्रसिद्धमपि ब्रह्म स्मृतिकारैस्त्रिगुणस्य प्रधानस्य परमाणूनां च तथात्वाङ्गीकाराद् विप्रतिपन्नमिति तन्निवृत्त्यर्थमत्र कारणकार्यजीवरूपवेदान्तोक्तेश्वररूपं जिज्ञास्यमित्युपगम्य पूर्ववत् समुच्चयमङ्गीकुर्वन्ति। सूत्राणि च शारीरपदेनावर्षादिमतानुसृत्य निर्दिशन्ति। तन्मते पूर्वोत्तरकाण्डयोरभिधेयभेदेऽपि प्रयोजनैक्यादेकशास्त्र्यात्, सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्यो, वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियं, मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्। मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदतीति श्रुतिस्मृतिविरोधो दुर्वारः। गीतायां, ब्रह्मसूत्रपदैश्चैवेत्युक्तेस्तद्विरोधश्च।

भिक्षुभाष्ये तु, आत्मेत्येवोपासीतेत्यादिविहितज्ञानविषयं किं ब्रह्म, किं वा तस्य ब्रह्मतानिर्वाहकं गुणजातं, कीदृशं तस्य ज्ञानं, कीदृशं च तस्य ज्ञानस्य फलमित्यादिकं विशिष्य मुमुक्षूणां जिज्ञासितं भवतीत्येवं जिज्ञासामुखेन संशयमधिकारिणं चोपन्यस्य शास्त्रभेदेन श्रुतिस्मृत्योन्यविरुद्धतायाः प्रतिभासनादिति जिज्ञासाजनकसंशयहेतुं चोपन्यस्य तन्निर्णयार्थं ब्रह्ममीमांसाशास्त्रस्यारम्भमनुक्त्वा ब्रह्मणोऽन्य चोदनालक्षणतया, अयं तु परमो धर्मो यद्योगेनात्मदर्शनमित्यादिस्मृत्या च धर्मत्वेऽपि न पूर्वमीमांसया ब्रह्मनिर्णयस्य गतार्थत्वं कल्पसूत्रवद्दर्शनतन्निर्धारणार्थत्वादित्यनेन अन्यत् सर्ववेदार्थत्वं, ब्रह्ममीमांसायाः पूर्वमीमांसाशेषत्वं च प्रकटीकृत्य, तयोः शास्त्रभेदं ब्र

विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतिसिद्धत्वाद् ब्रह्मस्वरूपे जिज्ञासा नोपपद्यत इत्याशङ्क्य, ब्रह्मस्वरूपज्ञानं किं साङ्ख्यासिद्ध जीवचैतन्यं, किं वा चैतन्यान्तरमिति जिज्ञास्यमस्त्वादाकाङ्क्षितं ब्रह्ममीमांसाशास्त्र वेदव्यासः प्रतिजानीत इत्युक्तम् ।

तन्मतेऽपि पूर्वोक्तवाक्यविरोधो जैमिनेरकुशलत्वापत्तिश्च । किञ्चेदं शास्त्रं धर्मविशेषविचारार्थं प्रवर्तितमुत ब्रह्मविचारार्थम् । आद्ये धर्मविशेषजिज्ञासा ब्रह्मज्ञानजिज्ञासेति वा प्रतिज्ञां कुर्यात् । प्रकरणित एव ज्ञेयत्वेन तस्यैव प्रतिज्ञातव्यत्वात् । तदकरणेन व्यासस्याप्यकौशलमापद्यते । द्वितीये तु प्रतिपाद्यभेदात् पूर्वशेषत्वाभावेन फलपसूत्रन्यायविरोधः । सिद्धान्ते तु ब्रह्मणः सर्ववेदार्थत्वाज्जैमिन्युक्तं धर्मस्य तथात्वमप्यास्तुं तथा शङ्कानिरासावश्यकावित्यदोषः । तस्मादिदमपि पूर्वतुल्यम् ।

यत्तु शैवो रामानुजमतैकदेशमादायाराधनाराध्यभूतधर्मब्रह्मप्रतिपादकयोर्मीमांसाशास्त्रयोः फलैक्यादैक्यम् । यथा हि व्रीहिप्रोक्षणं दर्शपूर्णमासोत्पत्त्यपूर्वहेतुतया स्वर्गे समुच्चीयते, तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्तेऽतो गुणकर्मत्वादङ्गत्व ज्योतिष्टोमादीनाम् । न च नित्यविधिप्राप्तानां तेषामितिकर्तव्यताविरोधात् कथं संस्कारतासिद्धिरिति शङ्क्यम् । करणतया स्वतन्त्रविध्यन्तरविहितसौत्रामणीबृहस्पतिसवादेऽग्निचयनवाजपेयाद्यङ्गत्ववदुभयविधिबलादुभयसिद्धेः । अतो ज्ञानोदयावधि कर्माणि कर्तव्यानि । न च विविदिषन्तीति श्रुत्या विविदिषोत्पत्तिपर्यन्तत्वं कर्मणां शङ्क्यम् । इच्छाया अपुरुषार्थत्वात् । अतः पूर्ववदेव शास्त्रैक्यमित्यङ्गीकृत्य ततो रामानुजाचार्यधृतेषु वाक्येषु परीक्ष्य, 'लोकान् कर्मचितानित्यादिवाक्यद्वयं विषयत्वेनोपन्यस्य ब्रह्म विचारार्हं न वेति सन्देहे, अयमात्मा ब्रह्मेतिश्रुतिरहंवृत्तिप्रत्यक्षसिद्धमात्मानं ब्रह्मेत्युपदिशतीति सन्देहाभावात् । किञ्च, विचारफलं विषयपरिच्छेदः । वेदान्तविचारजन्यं ज्ञानं चेद् ब्रह्म परिच्छिनत्ति तदा परिच्छेदानीतस्वभङ्गप्रसङ्गः । यदि न परिच्छिनत्ति, तदा प्रकाशाभावाद् ब्रह्मविषयज्ञानस्यासम्भवः । तस्मान्न विचार्यमिति पूर्वपक्षमुक्त्वा, विचारयोग्य ब्रह्म, अयमात्मा ब्रह्मेतिश्रुत्याऽहङ्कारबद्धस्य संसारिण आत्मनो ब्रह्मत्वाभिधानादेव सन्देहसम्भवात् । निरस्तसमस्तोपप्लवकलङ्कस्य निरतिशयज्ञाना-

नन्दादिशक्तिमहिमातिशयवत्त्वे हि ब्रह्मत्वम्, अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशतिःसीमतापसहिष्णुत्वं जीवत्वमिति तयोर्लक्षणेनेतरेतरभेदनिश्चये तयारैक्यदौर्घट्यस्फूर्ते । किञ्च । अन्नं ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आदित्यो ब्रह्म, नारायणं परं ब्रह्मेत्यादयोऽन्यमन्यमर्थं ब्रह्मेत्याहुः । तत्र किं ब्रह्मेत्येवं सन्देहादपि विचारार्हं ब्रह्म । नचापरिच्छिन्नत्वाद् ब्रह्मणस्तद्विषयं ज्ञानं न सम्भवतीति शङ्क्यम् । ईदृगिदमिति ब्रह्मणः परिच्छेदासम्भवेऽपि लक्षणमुखेनेतरव्यावृत्ततामात्रेण परिच्छेदसम्भवात् । लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयकेतरव्यावृत्तताज्ञानरूप एव दृष्ट इत्यदुष्टः । अत उपदिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च सति तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यः सर्वेभ्यो व्यावृत्तं ब्रह्म विज्ञायत इति तदर्थं युक्तः शास्त्रारम्भ इत्याह । एतन्मतेऽपि तेषां वाक्यानां विरोधः पूर्ववदेव । जीवलक्षणन्तु जीवप्रकरणे दूषयिष्याम ।

किञ्च । ज्ञात्वा शिवं शान्तिमत्यन्तमेति, ईशं तं ज्ञात्वा अमृता भवन्ति, तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्, आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ध्याननिमर्थनादेव पाशं दहति पण्डितः, ज्ञात्वा देवं मुच्यते सर्वपाशैरितिश्रुत्युक्तमोक्षप्राप्तिलिङ्गेन शिवस्य परब्रह्मत्वं यत्तेनोपगतं, तदप्यसङ्गतम् । ब्रह्मविदाप्नोति परमिति तदुपन्यस्ते फलवाक्ये, नारायणं परं ब्रह्मेतिश्रुत्युक्तनारायणरूपब्रह्मणस्यैव युक्तत्वात् । उभयत्रापि परब्रह्मपदोपबन्धसाम्यात् । लिङ्गापेक्षया श्रुतेर्बलिष्ठत्वाद् । ऋतं सत्यं परं ब्रह्मेतिवाक्यस्यापि सन्दिग्धत्वात् । शिवशम्भ्वादिपदानां च भगवद्वाचकत्वमेवेत्यादिकमस्माभिः प्रहस्ते निपुणतरमुपपादितम् । पुनरग्रेऽपि तत्र तत्रोपपादयिष्यते ।

माध्वास्तु शास्त्रे प्रवर्तनीया जिज्ञासा विषयः । कर्तव्या न वेति सन्देहः । तत्र प्रमाणाभावेन जीवव्यतिरिक्तस्य ब्रह्मणोऽभावाज्जीवस्य स्वप्रकाशत्वाद् अहंवित्तौ प्रकाशमानत्वात् तस्यापि ज्ञायमानत्वेनानुभवान्तरान्वेषणेऽनवस्थाप्रसङ्गात क्वचिद् विश्रान्त्यङ्गीकारे आत्मन्येव तथात्वौचित्यात् । न च स्वप्रकाशसंविदाश्रयतयाऽऽत्मा भासत इति युक्तम् । औत्तरिकानुस्मृतिसिद्धसौषुप्तिकानुभ-

षाभावप्रसङ्गात् । तत्र संविदाश्रयत्वेनात्मप्रतीतेरभावात् । अतः स्वप्रकाशात्मानतिरिक्तस्य ब्रह्मणः सन्दिग्धत्वाभावेनाविषयतया तज्जिज्ञासाया अपि तथात्वान्न कर्तव्येति पूर्वः पक्षः ॥ सिद्धान्तस्तु, भवेदेतदेवं, यदि स्वप्रकाशजीवाभिन्नं ब्रह्म स्यात् । न त्वेवम् । जिज्ञास्ये ब्रह्मपदप्रयोगात्, तद्धि जिज्ञासस्व, तद् ब्रह्मेति । ब्रह्मशब्दश्च गुणपूर्णतां वक्ति । अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणा इति श्रुतेः। तथाच कथं तस्य जीवाभेदः । जीवस्याल्पगुणत्वेनानुभवात् । न च ब्रह्मणि गुणाध्यासः । परमार्थतोऽब्रह्मत्वप्रसङ्गात् । न च देशाद्यपरिच्छिन्नत्वं ब्रह्मत्वम् । उक्तश्रुतिविरोधात् । देशाद्यपरिच्छेदेनापि जीवभेदसिद्धेः । जीवाणुत्वस्य वक्ष्यमाणत्वात् । जीवस्य स्वप्रकाशत्वेऽपि तद्भिन्नब्रह्मणः सन्दिग्धत्वाद् विषयत्वम् । अतस्तज्जिज्ञासा कर्तव्येत्याहुः । ब्रह्मशब्दश्च विष्णावेव रूढः । यमन्तःसमुद्रे कवयो वयन्ति, यदक्षरे परमे प्रजाः, यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यवसर्ज भूम्यामित्युक्त्वा, तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतौ समुद्रान्तःस्थत्वलिङ्गिते जगत्कर्तरि परब्रह्मत्वविधानात् । यो देवानां नामधा एक एवेति श्रुतावेवकारेणैकस्य सर्वनामधारकत्वमुक्त्वाऽग्रे, अजस्य नाभावध्यकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुरिति विश्वाधारपद्मस्य नाभ्यर्पितत्वश्रावणात् । वेदे रामायणे चैव पुराणे भारते तथा, आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयत इति हरिवंशवाक्याच्चेत्यप्याहुः । तन्मतेऽपीज्यत्वेनैव वेदार्थत्वाङ्गीकारान्मां विधत्त इतिवाक्यविरोधः । यत्तु कर्मविधात्री श्रुतिर्मां प्रत्येव तद्विधत्ते, इन्द्राद्यभिधात्री च मामभिधत्ते, चत्वारि वागिति श्रुत्या अहं विविधरूपत्वेन कल्प्यो, न सुरां पिबेदित्यादिश्रुत्याहमेवापियादपोह्य इति व्याख्यानम् । तदध्याहारवृत्तिसङ्कोचलक्षणादोषसम्भवाच्चिन्त्यम् । प्रकृतमनुसरामः । एवञ्चात्र सूत्रे शेषषष्ठ्या ब्रह्मसम्बन्धितया जिज्ञास्यताबोधनेन साधारणाधिकारे ज्ञानकर्मसमुच्चय, उत्कृष्टाधिकारे च भक्तिमार्गीयः सर्वात्मभावः साधनमिति बोधितम् । इति प्रथमाधिकरणम् ।

एवं पूर्वाधिकरणे वेदार्थभूतब्रह्मणो जिज्ञास्यत्वे साधिते, कथं जिज्ञास्यमिति प्रकारविशेषाकाङ्क्षायां समन्वयाविरोधाभ्यां

किञ्च, तत्र किं लक्षणं किं प्रमाणकमिति जिज्ञासायामाह सूत्रकारः ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥

ननु कथमत्र सन्देहो, यावता, सत्यं ज्ञानमनन्तं ब्रह्मेत्याह श्रुतिरेव ।

लक्षणस्य वक्तव्यत्वात् तद्बोधकमग्रिमसूत्रमवतारयन्ति । *तत्रेत्यादि* । तेषु वक्तव्येषु तदुपजीव्यतया उक्तजिज्ञासायां लक्षणप्रमाणात्मकं प्रकारद्वयं पूर्वमाहेत्यर्थः । * जन्माद्यस्य यतः शास्त्रयोनित्वात् * । अत्र सर्वेऽपि योगविभागेन, शास्त्रयोनित्वादिति सूत्रं भिन्नमभ्युपगच्छन्ति । तन्न युक्तम् । अग्रिमसूत्रेषु साध्यहेतुनिर्देशपूर्वकमधिकरणरचनस्य दर्शनेनात्रापि तथैव युक्तत्वात्, साङ्ख्य ब्रह्मपदस्य प्रकृतौ प्रयुक्तत्वेन तद्वारणाय विवक्षितब्रह्मणि शास्त्रोक्तकर्तृत्वप्रतिपादनस्यावश्यकत्वाच्च । नच सूत्रभेदेऽप्यधिकरणस्य सूत्रद्वयात्मकत्वाङ्गीकारात् प्रथमसूत्रे विशेषतः प्रमाणानुक्तावप्यथशब्देन धर्मविचारानन्तर्ये ब्रह्मविचारस्य बोधिते ब्रह्मणो वेदान्तवेद्यतोपस्थितेः सुखेनोक्तदोषपरिहारात् सूत्रैक्यं न युक्तमिति वाच्यम् । अथशब्दस्यानेकार्थत्वेनानन्तर्यस्याप्यनेकविधत्वेन धर्मविचारानन्तर्यस्योपपादनसापेक्षत्वेन चाहत्य ब्रह्मणो वेदान्तवेद्यत्वानुपस्थित्या जन्माद्यधिकरणरचनावैयर्थ्यप्रसङ्गात् । अतः सूत्रैक्यमेव युक्तमिति । ये तु जन्माद्यधिकरणं, शास्त्रयोनित्वाधिकरणं च भिन्नमङ्गीकुर्वन्ति तेषां मते प्रथमस्य हेतुशून्यत्वाद् द्वितीयस्य च साध्यशून्यत्वात् साकाङ्क्षतयाऽतिक्लिष्टत्वेन तद्विवक्षितप्रमेयासाधकत्वं बोध्यम् ।

लक्षणं शङ्कते * नन्वित्यादि * यत् सन्दिग्धं तत् सम्यक् परिच्छेत्तुं लक्षणीयम् । अत्र ब्रह्मणि कथं सन्देहः । * यावतेत्यवधारणे हेत्वर्थे वा । तथाच ब्रह्मणः सत्ता स्वरूपलक्षणं च श्रुतित एव सिद्धम् । तदवधारणे ततो हेतोर्वा ब्रह्मणोऽखिलविशेषशून्यत्वेन सिद्ध्या सन्देहप्रयोजकप्रकाराभावात् सन्देह एव न घटत इत्यर्थः ।

प्रकारान्तरेणापि तदभावमाह ।

विरुद्धं चैतत् । स्वरूपलक्षणाकथने कार्यलक्षणस्य वक्तुमशक्यत्वात् । विवादाध्यासितत्वाच्च । न हि ब्रह्मणो जगत्कर्तृत्वं सर्वसम्मतम् । न चागमोदितमिति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते ।

किञ्च । व्यर्थश्चैवं विचारः । लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति । तच्च स्वरूपलक्षणेनैव भवतीति किमनेन । तस्मादयुक्तमुत्पश्याम इति ।

उच्यते ।

---

* विरुद्धमित्यादि * यद्धि लोकाप्रसिद्धं तदलौकिकया श्रुत्या निर्णेयम् । श्रुतिस्तु पूर्वं स्वरूपलक्षणमुक्त्वाऽग्रिमे प्रपाठके कार्यलक्षणं वक्ति । अतः प्रथममेव तत्कथनं श्रुतिविरुद्धम् । न च स्वरूपलक्षणं सन्देहाभावात् कार्यलक्षणमेवोच्यत इति युक्तम् । अन्नप्राणादिष्वपि तस्यातिप्रसङ्गदर्शनेन स्वरूपलक्षणाकथने केवलतत्कथनस्याप्रयोजकत्वात् । कैश्चिन्मायाशबलस्यान्यैः शुद्धसत्त्वात्मकशरीरविशिष्टस्येतरैः सत्त्वादिगुणत्रयात्मकस्य प्रधानस्यापरैर्नित्यज्ञानेच्छाप्रयत्नधर्मकस्य तथात्वाङ्गीकारेण तस्य विवादाध्यासितत्वाच्च । तदेव विशदयति * न हीत्यादि * ननु ब्रह्मणः कर्तृत्वस्य सर्वसम्मतत्वाभावेऽपि वेदस्य प्रमाणमूर्द्धन्यत्वात् तदुक्तकोटेरौत्कट्यात् सन्देहाभावाय लक्षणविचार उचित इति चेत् तत्राह * न चेत्यादि * चोऽवधारणे । कर्ता आगमेन वेदरूपेण मूलशास्त्रेणोदित इत्यंगीकारेण कृत्स्नस्य वेदस्यैव ब्रह्मणि प्रमाणत्वं न वक्तुं शक्यते । कल्पनोपदेशस्यापि तत्र शास्त्रवचनत्वाद् अनुमानस्यापि तत्र प्रमाणत्वाच्चेत्यर्थः । अत्र ब्रह्मप्रमाणत्वमिति पाठः प्रतिभाति । अथ वेदोक्त एवाग्रहस्तदा दूषणान्तरमाह * किञ्चेत्यादि * । * अयुक्तमिति * सूत्रोक्तं लक्षणमयुक्तमित्यर्थः । दोषमनिरोहितार्थम् ।

अत्र समाधातुं गृह्णते * उच्यत इत्यादि * प्रकारान्तरेणा*

सन्देहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती सन्दिह्येते परास्थिते ॥

न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः । किन्तु सन्देहं वारयितुम् । तत्र, सत्यं ज्ञानमनन्तं, नित्यशुद्धमुक्तस्वभावमिति-श्रुत्या कर्तृत्वादिप्रापञ्चिकधर्मराहित्य प्रतीयते । यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंवि-शन्तीति कर्तृत्वं च ।

तत्र सन्देहः । किं ब्रह्म कर्तृ, आहोस्विदकर्तृ? किं तावत् प्राप्तम् । अकर्तृ । कथम् । ब्रह्मविदाप्नोति परमिति प्रधानत्वा-

---

संशय उच्यते * वेदप्रामाण्यवादिनाम् * सर्वे वेदा यत् पदमामन-न्तीतिश्रुत्यनुसारेण ब्रह्मण्येव सर्वस्य वेदस्य प्रामाण्यमन्यत्र प्रमाणा-भासत्वमितिवादिनां वेदे यः सन्देहस्तद्वारकमिदं वैयासं शास्त्रम् । तत्र कः सन्देह इत्यपेक्षायां, *परास्थिते* ब्रह्मविदाप्नोति परमित्यत्राप्नो-तिकर्मभूतो यः पर उक्तस्तत्स्थिते क्रियाशक्तिज्ञानशक्ती स्वरूपलक्षण-विरुद्धत्वाद् ब्रह्मणि सन्दिह्येते, स्तो न स्तो वेत्येष सन्देह इत्यर्थः । गृहीतं विभजन्ते * न हीत्यादि * यदुक्तं स्वरूपलक्षणाकथन इत्या-दि, तदसङ्गतम् । यदि सूत्रकारः श्रुतिं व्याख्यातुं प्रवृत्तः स्याद् य-थाक्रमं प्रतिपदं च व्याकुर्यात । न तु तथा । किन्तु सन्देहं वारयि-तुम् । ततश्च यत् सन्दिग्धं तद्विवृणोति, व्याख्येयसमानार्थकैरन्यैश्च पदैर्विपक्षसपक्षबाधकसाधकतर्कोपन्यासेन सन्देहमपाकरोति । तत्र, सत्यमित्यादिके स्वरूपलक्षणे, यतो वेत्यादिकार्यलक्षणे च ब्रह्मपदा-देकस्यैव लक्षणद्वयमुभयत्र सामान्यशब्दप्रयोगेऽपि लक्ष्यस्वरूपभे-देन तदवच्छेदकभेदाद् ब्रह्मभेदः । तत्र यदि भेदस्तदा कस्य वेदार्थ-त्वं कस्य न, उतोभयोर्वेति पुनः सन्देहसम्भव इति तद्वारणार्थमेकं ब्रह्म वक्तव्यम् । तथा सत्युक्तरीतिकाद् विरोधात् सन्देह इति प्रका-रप्रश्नोत्तरत्वेन सन्देहबीजमुक्तम् । स्वरूपलक्षणस्य हृदि करणाद-कथनेऽन्यदोषश्च बोधितः । सन्देहाकारमाहुः * तत्रेत्यादि * तथाच

क्यम् । फलसम्बन्धात् । ऋचापि विवृतम् । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । फलार्थं च ब्रह्मज्ञानम् । फलं च फलवाक्योक्तधर्मज्ञानादेव, नान्यथा । कर्तृत्वं च परविवरणतयोक्तम् । परं किमित्युक्ते यः सर्वान्तर आनन्द इति । कथं सर्वान्तरमित्याकाङ्क्षायां परिचयार्थं भूतभौतिकसृष्टिमुक्त्वा गौणानन्तर्यं परिहृतम् । गौणोपासनाफलं च प्रधानशेषतयोक्तम् । तत्रान्यगतकर्तृत्वारोपानुवादोऽपि सम्भवति । ततश्च भृगुर्वै वारुणिरित्युपाख्यानेऽपि परिचायकत्वाद् गौणकर्तृत्वमेवानूद्यते, फलाश्रवणादिति पूर्वः पक्षः ।

परस्परविरुद्धार्थबोधकाभ्यां लक्षणाभ्यामेव सन्देहाल्लक्षणकरणं युक्तमित्यर्थः । पूर्वपक्षं विवृण्वन्ति * ब्रह्मेत्यादि * । अयमर्थः । शेषलक्षणे, कर्मफलार्थत्वादित्यनेनोपलक्षणविधया ज्ञानस्यापि फलशेषत्वे सिद्धे प्राधान्यं फलस्यैवेति तत्सम्बन्धाद्युक्तमेव प्रधानवाक्यं, न तु कार्यलक्षणवाक्यं तथा । नचैवं पूर्वकाण्डेऽस्तूत्तरकाण्डे तत् किमित्युपेयमिति वाच्यम् । ऋचापि विवृतम् । यदि तस्य प्राधान्यं न स्यात् किमिति विवृणुयादतोऽत्रापि तदादृतम् । तथा सति ज्ञानं फलार्थं, फलं च फलवाक्योक्तधर्मज्ञानात् परत्वज्ञानादेव । अतः परत्वज्ञानार्थं कर्तृत्वं परविवरणतयोक्तम् । स्वरूपलक्षणे प्रापञ्चिकधर्माहित्यप्रतीतेर्ब्रह्मणि कर्तृत्वस्याशक्यवचनत्वात् । तस्माद्वा एतस्मादित्यादिना यत् कर्तृत्वमुक्तं, तज्ज्ञयात् फलरूपं परं पृथक्कृत्य तं विवरीतुमुक्तम् । ततस्तत्स्वरूपजिज्ञासायां सर्वान्तरत्वकथनपूर्वकमानन्द इति स्वरूपमुक्तम् । अन्यथा तन्निरूपणमसङ्गतं स्यात् । सर्वान्तरत्वं च तस्य परत्वनिर्वाहकतयोक्तम् । तत्रापि कथम्भावाकाङ्क्षायां तन्निष्कर्षार्थमाकाशादीनां भूतानामोषध्यादीनां भौतिकानां च सृष्टिकथनेन कर्तृत्वं प्रतिपाद्य तस्य सर्वान्तरत्वकथनेन चरमत्वाद्

सिद्धान्तस्तु ।

उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ।
वेदेन बोधित तद्धि नान्यथा भवितुं क्षमम् ॥
न हि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते ।
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥

वेदेनैव तावज्जगत्कर्तृत्वं बोध्यते। वेदश्च परमाप्तोऽक्षरमात्रमप्यन्यथा न वदति । अन्यथा सर्वत्रैवाविश्वासप्रसङ्गात् । न च कर्तृत्वे विरोधोऽस्ति । सत्यत्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः । सर्वथा निर्द्धर्मकत्वे सामानाधिकरण्यविरोधः । सत्यज्ञानादिपदा-

---

गौणमपवर्गप्रसङ्गं प्राणादीनामिवानन्तर्यं निवारितम् । सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत इत्यादिनाऽन्नब्रह्माद्युपासनाफलं प्रधानशेषतया, अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरित्यादिनाऽनुवाकचतुष्टयेन कथितस्य परब्रह्मानन्दावाप्तिसर्वभयाभावरूपप्रधानफलस्य शेषतया सर्वोत्कृष्टत्वज्ञापनायोक्तमिति कर्तृत्वं परस्मिन् सिद्ध्यति । तथापि स्वरूपलक्षणविरोधात् पूर्वकाण्डोक्तप्रजापतिगतस्य प्रकृतिगतस्य वा कर्तृत्वस्यारोपेणानुवादोऽपि सम्भवतीति द्वितीयप्रपाठकेऽपि फलाश्रवणेनामुख्यत्वात् तत्राप्येवं नेतव्यम् । तथाच नास्य लक्षणत्वमिति पूर्वपक्षार्थः ।

सिद्धान्तमाहुः * उत्पत्तीत्यादि * । * तदिति * कर्तृत्वम् । *अन्यथेति* गौणम् । * कल्प इति * कल्पसूत्रम् । *सर्वभावः* सर्वभवनम् । तत्र समर्थत्वादकर्त्रपि कर्त्रित्यर्थः । गृहीतं विभजन्ते * वेदेनेत्यादि * स्यादन्यगतकर्तृत्वारोपानुवादः कार्यलक्षणं यदि स्वरूपलक्षणं विरुद्ध्येत । तदेव तु न । विवरणार्चि परस्य तृतीयान्तेन ब्रह्मपदेनैव विवृतत्वात् । नच तत्र वेदहिरण्यगर्भब्राह्मणजातिजीवा अर्थत्वेन ग्रहीतुं शक्याः। परपदविवरणात् सान्तत्वादिना ब्रह्मापकर्षोत्कर्षस्य तेष्वशक्यवचनत्वात् । परशब्दस्यान्यार्थकत्वोपगमेऽपि

नां धर्मभेदेनैव तदुपपत्तेः । नच कर्तृत्वं संसारिधर्मो, देहाद्यध्या-सकृतत्वादिति वाच्यम् । प्रापञ्चिके कर्तृत्वे तथैव । न त्वलौकिककर्तृत्वे । अत एवास्येत्याह। अस्येति पुरोवर्ती प्रपञ्च इदमा निर्दिश्यते । अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यरचनस्यानायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम् ।

विवरणोक्तब्रह्मशब्दानुरोधादेत एव परत्वेन ग्राह्याः । तत्प्राप्तिस्तु कर्मणाऽपीति साधनान्तरेण ज्ञानेन को वा विशेषः स्यात् । अत उत्कृष्टार्थकत्वमादरणीयम् । उत्कृष्टं च किमित्यपेक्षायां विवरणानुरोधाद् ब्रह्मान्तरं कल्प्यम् । तच्चाप्रसिद्धं, स्वरूपलक्षणहीनं च । न च प्रकृतिः । साङ्ख्यमतेऽपि ज्ञानात्मकपुरुषापेक्षया तस्या हीनत्वात् परार्थत्वाच्च । अश्रौतत्वस्य वक्ष्यमाणत्वाच्च । अतो ब्रह्मापेक्षयान्यस्य परत्वेन वक्तुमशक्यत्वादुक्तलक्षणविशिष्टस्यैव ब्रह्मणः कर्तृत्वं वेदेन बोध्यते । नच तदारोपितमिति शक्यवचनम् । निरङ्कुशस्य तस्याऽन्यथासिद्धताया अनुपदमेव वक्ष्यमाणत्वात् ।

किञ्च । वेदः परमाप्तत्वादक्षरमात्रमपि मिथ्या न वदति । यदि क्वापि तथा वदेत्, स्वर्गकामो यजेतेत्यादिविध्यंशे स्वरूपलक्षणाद्यंशे चाविश्वसनीयः स्यात् । ततश्च सन्मार्गमात्रमुच्छिद्येत । अतो यद्यद्यथा वदति तत्तथेति मन्तव्यम् । तेन कर्तृत्वं वेदोक्तत्वादपि वास्तवमित्येव सिद्ध्यति । नच कर्तृत्वाङ्गीकारे स्वरूपलक्षणविरोधोऽस्ति, येन तदनुरोधादवास्तवत्वं तस्य कल्प्येत । तदुक्तसत्यत्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः । नच ब्रह्म यावद्धर्मरहितमिति वक्तु शक्यम् । स्वरूपलक्षणविरोधात् । तत्र ब्रह्मणि सत्यत्वादिधर्माङ्गीकारात् । नचासत्यजडसान्तव्यावृत्तत्वेनैक एवार्थः सत्यादिपदैरुच्यत इति वक्तुं युक्तम् । व्यर्थपौनरुक्त्यापत्तेः । तत्तद्भेदधर्मकत्वासिद्ध्या घटकुड्ययोः प्रभाताच्च । अतः सत्यादिपदानां स्वार्थत्यागोऽपार्थ एव । तदेतदुक्तं * धर्मभेदेनैव तदुपपत्तेरिति । स्फुटमाश्रमम ।

नतु लक्षणद्वयस्यैकपरत्वे सर्वासु श्रुतिष्वेकमेव ब्रह्म प्रतिपा-

प्रतीतञ्च निषेध्यम्। नाप्रतीतं, न श्रुतिप्रतीतम्। सत्यत्वादयश्च लौकिकाः। ततः सर्वनिषेधे तदज्ञानमेव भवेत्। नच सत्यत्वादिकं लोके नास्त्येव व्यवहारमात्रत्वात्, कारणगतमेवसत्यत्वं प्रपञ्चे भासत इति वाच्यम्। तर्हि कर्तृत्वं तथा कुतो नाङ्गीक्रियते। स्मृतिश्च स्वीकृता भवति, कर्ता कारयिता हरिरिति।

नचारोपन्यायेन वक्तुं शक्यम्। तथा सत्यन्यस्य स्यात्। तत्र न प्रकृतेः। अग्रे स्वयमेव निषिध्यमानत्वात्। न जीवानामस्वातन्त्र्यात्। न चान्येषामुभयनिषेधादेव। तस्माद् ब्रह्मगतमेव कर्तृत्वम्। एवं भोक्तृत्वमपि। न वा काचिच्छ्रुतिः कर्तृत्वं निषेधति। विरोधभानात् कल्पा तु लौकिकपरा। फलवाक्येऽप्यश्रुतानां गुणोपसंहारः कर्तव्यः।

घम्। तदा, अस्थूलादिवाक्येष्वपि तदेव निरूप्यत इति निर्द्धर्मकत्वं बलादापतितमतः कर्तृत्वनिषेध एव युक्त इत्यत आहुः * प्रतीतमित्यादि *। युक्तः प्रतिषेधः। परन्त्वस्थूलादिवाक्ये लोकप्रतीता एव प्रतिषिद्ध्यन्त इत्यत्रापि प्रतीतमेव प्रतिषेध्यम्। अत एव नाप्रतीतम्। प्रसञ्जयितुमशक्यत्वेन प्रतिषेधानर्हत्वाच्च। न श्रुतिप्रतीतम्। तुल्यबलत्वात् प्रत्यायनवैयर्थ्यापाताच्च। श्रुत्युक्ताः सत्यत्वादयोऽपि यदि लौकिकत्वेनादृतास्ततो लोकश्रुतिप्रतीतसाधारण्येन सर्वनिषेधे ब्रह्माज्ञानमेव भवेत्। तथाच स्वरूपलक्षणवैयर्थ्यं सर्वनाशश्च स्यात्। नच तद्भावाय लोकस्य व्यवहारमात्रत्वात् तत्रापि कारणगतमेव सत्यत्वमतो न तत् प्रतिषेध्यं, किन्तु कर्तृत्वमेवेति वाच्यम्। तदा तु धर्मसङ्कोचस्य तौल्यात् कर्तृत्वमपि तथाङ्गीकार्यम्। तेन कल्पस्मृतिस्वीकाररूपगुणोऽपि भविष्यति। नन्वगत्या सत्यत्वं तथास्तु, न तु कर्तृत्वमपि। आरोपन्यायेन तस्य शक्यवचनत्वादित्यत आहुः * न चेत्यादि *। * अन्येषामिति * अभावकालस्वभावभूतग्रहलोकपालादीनाम्। ननु प्रकृते फलवाक्यविचारो भवतापि स्वीकृतस्तथा सति तद्विवरणोक्तं भोक्तृत्वं तत्रास्तु, कर्तृत्वं तु कथमङ्गीकर्तुं शक्यमित्यत आहुः * गुणोपसंहार इति * सूत्रकृताग्रे तथाङ्गीकाराच्च

तथाचायं सूत्रार्थः ।

जन्म आदिर्येषामित्यवयवसमासादतद्गुणसंविज्ञानो बहुव्रीहिः॥

तथेत्यर्थः । तस्माद् ब्रह्म कर्तृ इति सिद्धम् । एवं सिद्धान्तं व्याख्याय तस्य सूत्राविरोधित्वं बोधयितुं सूत्रं व्याकुर्वते *तथाचेत्यादि* एवं कर्तृत्वे सिद्धे वक्ष्यमाणरीतिकः सूत्रार्थ इत्यर्थः । अत्र सर्वेऽपि तद्गुणसंविज्ञानं बहुव्रीहिमङ्गीकुर्वन्ति । तत्रोपसर्जनत्वेन पूर्वप्रयोगार्हस्यादिशब्दस्य परत्वाय राजदन्ताद्याकृतिगणीयत्वं कल्पनीयमित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति । *जन्मेत्यादि *। जन्म आदिः प्रथमोऽवयवो येषां ते जन्मादि । सुपां सुलुगिति जसो लुगित्यवयवसमासादिति । भावप्रधानो निर्देशः । तथाचादिपदविशेष्यकावयवसमासत्वादतद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः । न च, अङ्गं प्रतीकोऽवयव इति कोशादवयवपदस्याङ्गवाचकत्वेनात्र च तदभावेन कथमवयवसमासत्वमिति शङ्क्यम् । एकदेशेऽप्यवयवपदप्रयोगात् । यथा पञ्चावयवमनुमानवाक्यमिति । कैयटेऽपि, एकाचो द्वे प्रथमस्येत्यत्र, एकोऽज् यस्य स एकाजिति विशिष्टावयवोपलक्षितस्यावयविन इत्यादिना, अज्झल्विशिष्टस्य शब्दस्यैकोऽजवयव इत्यङ्गीकाराच्च । तत्रैकस्याचो विशिष्टावयवत्ववदत्र आद्यादीनां समूहावयवत्वेन तद्वाचकपदानां समासेऽवयवसमासत्वस्य सुखेन सम्भवात् ।

एतस्यातद्गुणसंविज्ञानत्वं त्वेवम् । तथाहि । उक्तसूत्रे कैयटेन तद्गुणसंविज्ञानपदं द्वेधा व्याख्यातम् । तस्य अन्यपदार्थस्य गुणो विशेषणम् । तस्य संविज्ञानं येनेति । स वर्तिपदार्थो गुणो यस्यान्यपदार्थस्य तस्य संविज्ञानं येनेति च । तत्रोदाहरणं तु शुक्लवाससमानयेति । तत्र शुक्लवासःसंयुक्तपुरुषानयने पृथगचोदितान्यपि वासांसि सम्बन्धसामर्थ्यादानयनेन सम्बध्यन्त इत्युक्तम् । इदं च लम्बकर्णमानयेत्यादावपि तुल्यम् । एवं सत्यन्यपदार्थविशेषणस्य यत्र सम्बन्धसामर्थ्यात् कार्यसम्बन्धस्तत्र तद्गुणसंविज्ञानः । यत्र तस्य सम्बन्धसामर्थ्यात् कार्ये सम्बन्धाभावस्तत्रातद्गुणसंविज्ञानः । यथा चित्रगुमानयेत्यत्र । अत्र हि पुरुषानयने समासवर्तिपदार्थभूतानां चित्राणां गवां सन्निधानाभावान्न कार्येण सह सम्बन्ध इति । एवं

अथवा जन्मप्रभृति सर्वे भावविकारा आदिशब्देन गृह्यन्ते । तथाच जन्म च आदिश्चेत्येकवद्भावः । आदिशब्दश्च धर्मवाची । स च स्वसम्बन्धिनं लक्षयति । तस्योभयसापेक्षत्वादुत्पत्तेर्नियमानत्वादन्यानेव भावविकाराननुपलक्षयतीत्यादिशब्देनान्ये भावविकाराः ।

सति प्रकृतेऽन्यपदार्थभूतानां प्रधानानां स्थितिप्रलयाभिसंवेशानामेकदेशतया तद्विशेषणीभूतो य आदिस्तस्य प्रथमान्तरव्यावर्तकतया जन्म विशेषणम् । स्वयं तु वर्तिपदार्थे विशेष्यः । तस्य धर्मरूपं यत्प्राथम्यं तदपेक्षाबुद्धिजन्यम् । तस्य निरूप्यत्वमपि स्थित्यादिजन्यमतः सोऽत्र सूत्रेऽर्थादायातायां ब्रह्मकर्तृकभवनक्रियायां न सम्बद्ध्यते । तदसम्बन्धे तद्द्वारा जन्मनोऽपि न सम्बन्ध इत्यस्य समासस्यातद्गुणसंविज्ञानत्वम् । इदं च तद्गुणसंविज्ञानस्य प्रथमलक्षणादरे बोध्यम् । द्वितीयलक्षणादरे तु तद्गुणकस्य विशेष्यस्यान्यपदार्थस्य संविज्ञानं समायाति । तच्च चित्रगुरित्यत्रापि वर्तत इति तद्वारणाय विशेषणसम्बन्धपूर्वक एव तस्य क्रियासम्बन्धो वक्तव्यः । तदात्वत्र विशेष्यभूतानां स्थित्यादीनां विशेषणसम्बन्धपूर्वको न क्रियासम्बन्ध इति पूर्ववदेवातद्गुणसंविज्ञानत्वम् । यदि च संविज्ञानपदेन वर्तिपदार्थस्य तद्विशेष्यस्य वा प्रत्यक्षीभाव एवाद्रियते तदा तु विशेष्यविशेषणयोर्ज्ञातत्वेनास्माकं तत्प्रत्यक्षीभावाभावात् भाववृत्तसूक्ते, सो अङ्ग वेद यदि वा न वेदेति श्रावणाच्चातद्गुणसंविज्ञानत्वमिति न कोऽपि शङ्कालेशः । अतैतत्समासादरेण भाववृत्तसूक्ते, यदि वा नेतिवाक्यबोधितानाधानपक्षसूचनाज्जन्मस्थितिभङ्गादीनामाविर्भावादिरूपत्वबोधनेन भगवानेव तत्तद्रूपः क्रीडन्नाविर्स्तिरश्च भवतीति पुष्टिसृष्टिप्रकारो बोधितः । तथाच जन्म आविर्भाव आदिर्येषां प्रकाराणामित्यर्थो बोध्यः । प्रवाहसृष्टिबोधनाय प्रकारान्तरमाहुः *अथवेत्यादि* । प्रभृतिशब्दः पूर्वावधिवाचकः । *सर्वे इति * जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते नश्यतीतिप्रतीतिसिद्धा यास्कोक्ताः षट् । कथं गृह्यन्त इत्यपेक्षायामाहुः । * तथाचेत्यादि । *

अथवा जन्मनो नादित्वम् । तदाधारस्य पूर्वमविद्यमानत्वात् । अन्ये त्वादिमन्तः । तदाधारस्य पूर्वं विद्यमानत्वात् । अत आदिशब्दः स्वाधारसद्धर्मवाची तद्धर्माणामुपलक्षकः । अथवा गमनप्रवेशयोर्भेदाज्जन्म आदिर्येषामिति । जात्यपेक्षयैकवचनम् ।

सर्वोऽपि द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः । आदिशब्दश्च प्राथम्यरूपधर्मवाची । पूर्वतन्त्रे शब्दानां धर्मवाचकत्वस्य सिद्धत्वात् । स च स्वसम्बन्धिनं लक्षयति । तत्र कं लक्षयतीत्याकाङ्क्षायां तस्य यथोत्पत्तावाधारता तथाग्रिमेषु निरूपकता । प्राथम्यस्योभयसापेक्षत्वात् । अत उत्पत्तेरत्र कण्ठोक्तत्वेन विद्यमानत्वादन्यानेवोपलक्षयतीति तथेत्यर्थः । तेन विषयवाक्योदितौ स्थितिभङ्गौ प्रत्याहारन्यायेनान्येषामपि बोधकौ । कालादिगतमपि कर्तृत्वं भगवदीयमेव, न तु स्वतन्त्रमिति च बोधयितुमत्रादिपदोक्तिरिति तात्पर्यं सूचितम् । एवं व्याख्याने आदिपदस्य लाक्षणिकत्वम् । तथादिपदेन आदित्वधर्मवत्तया जन्मनोऽपि सङ्ग्रहीतुं शक्यत्वाज्जन्मपदवैयर्थ्यापत्तिरित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति * अथवा जन्मन इत्यादि * । यद्यविद्यमाने जन्माधारे पश्चाज्जन्म चेत्तदा जन्म प्रत्याधारस्य तद्गतधर्मस्य चादिता सम्भवति । प्रकृते तु तन्नास्तीति जन्मनो नादित्वम् । अन्येषां तु भावविकाराणामुक्तयुक्त्यादिमतो हेतोरादिशब्दः स्वाधारसद्धर्मवाची आदित्वाधारभूतोऽस्तिपदवाच्यो धर्मस्तस्यान्यापेक्षया प्राथम्यात् तत्पूर्वकमेव तं वदन्नादित्वस्य सापेक्षतया तद्धर्माणां विपरिणामादीनामुपलक्षक इति न स्वार्थत्यागदोषो, नापि जन्मपदवैयर्थ्यदोष इत्यर्थः । अस्मिन् पक्षे असत्कार्यवाद आपतति । तथापि; यदेतस्य कथनं तन्नृसिंहोत्तरतापिन्याद्युक्तमायिकसृष्टिं प्रत्यपि भगवत एव कारणत्वमिति बोधयितुं, न तु पूर्वोक्तं पक्षं निराकर्तुमिति बोध्यम् । अथ मर्यादाग्रिमसंग्रहाय तद्गुणसंविज्ञानपक्षमभिसन्धायाहुः * अथवा गमनेत्यादि * गमनप्रवेशयोः पूर्वोत्तरावधिभूतसञ्चरप्रतिसञ्चरयोर्मध्ये कार्यस्वरूपस्य कारणतो भेदाज्जन्मादयो भवन्तीति जन्म आ-

जन्म तु श्रुतत्वात् सिद्धम् ।

अथवा किमनया कुसृष्ट्या । जन्म अाद्यस्य आकाशस्य यत इति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्येव विचार्यते । फलसम्बन्धित्वात् । तेनैकत्र सिद्धः शास्त्रार्थः प्रकारान्तरेऽपि । यतो वा इमानि भूतानीत्यत्र विस्फुलिङ्गवत् सर्वोत्पत्तिः । अत्र तु क्रमेणेति विशेषः । एतेन सर्व एव प्रकाराः सूचिता वेदितव्याः ।

दिर्येषां तत्तज्जातीयं जन्मादि । जातिरत्र विकारत्वं क्रियात्वं वा । अत्र, ब्राह्मणो जन्मतः श्रेयान्, न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजमित्यादाविव जात्यपेक्षयैकवचनम् । तथाच यद्यपि, सुपां सुलुगिति जसो लोपे जन्मादीति सिद्ध्यति तथापि विकारान्तरसंग्रहत्वेन न भवत्यतस्तदुपेक्षितम् । नपुंसकं तु सामान्ये । एतत्पक्षसंग्रहे बीजमाहुः । जन्म तु श्रुतत्वात् सिद्धमिति । जन्म तु, यस्मिन्निदं सं च विचैति सर्वमिति तैत्तिरीये श्रुतत्वाद् व्ययनात्मकबहिर्गमनरूपं सिद्धम् । तच्च सजातीयसंवलनवियोगादि संगृह्णत् समयनरूपं प्रवेशं च स्मारयतीति तद्गुणसंविज्ञानोऽपि युक्त इत्यर्थः ।

एवं पक्षत्रयेण व्याख्यायैतेषामत्र बोधनस्यातिप्रयोजनत्वात् प्रतिपत्तिगौरवाच्चारुचिं सूचयन्तः प्रकारान्तरेण सूत्रं व्याकुर्वन्ति * अथवा किमित्यादि * । नन्वेवं सत्याकाशजनकत्वस्यैव लक्षणत्वमायाति, न तु सर्वभूतजनकत्वस्य नतिस्थित्यादिकर्तृत्वस्य च । तथा सति वाक्यान्तरे ब्रह्मभेदापत्तिरिति शङ्कायामाहुः * तेनेत्यादि * यदा, यतो वेति वाक्यं विषयत्वेनादरणीयं तदाऽप्ययं न्यायस्तु सर्वथाङ्गीकार्य एव । अन्यथा आकाशवाक्येऽपि ब्रह्मान्तरापत्तिः स्यात् । अतो जननप्रकारस्यैव भेदो न तु ब्रह्मण इति न कोऽपि दोष इत्यर्थः । यतो वेतिश्रुतौ, यत् प्रयन्त्यभिसंविशन्तीत्यस्य भागस्य यद् ब्रह्म प्रयन्ति प्रकर्षेणसृष्टिसामर्थ्यकदुःखराहित्येन प्रलये गच्छन्ति, अभितः संविशन्ति स्वपन्ति सुषुप्तानिव सत्सम्पन्ना भवन्तीत्यर्थो बोध्यः । एवं पक्षत्रयेण व्याख्याने बीजमाहुः * एतेने-

ब्रह्मविचारे ब्रह्मणोऽप्यधिकृतत्वाद् ब्रह्मेत्यायाति । न त्वध्याहारः ।

शास्त्रे योनिः शास्त्रयोनिः । शास्त्रोक्तकारणत्वादित्यर्थः । शास्तीति शास्त्रं वेदः । सामान्यग्रहणं पूर्वकाण्डे पूर्वसृष्टिवाक्यानां सङ्ग्रहार्थम् । यथाऽस्यैव कारणत्वं, नान्यस्य तथोपरिष्टाद् वक्ष्यामः । मतान्तरवज्जन्मादीनां न विकारित्वं किन्त्वा-

---

त्यादि * सूत्रे एवंश्लिष्टप्रयोगेण वेदोक्ताः सर्वे एव प्रकारा व्यासचरणैः संगृहीता ज्ञेयाः । तथाच क्वचित् साक्षात्, क्वचित् तटस्थत्वेन, क्वचित् किञ्चिद्द्वारा क्रमेणेति बोधनायास्माभिरपि तदाशयं स्फुटीकर्तुं पक्षत्रयेण व्याख्यानमित्यर्थः ।

नन्वत्र लक्ष्यानिर्देशात् प्रतिज्ञायां च सम्बन्धिविचारस्यैवाधिकृतत्वेन ब्रह्मणोऽनधिकृतत्वादत्र ब्रह्मानुवृत्तेरशक्यवचनत्वेन ब्रह्मपदं ब्रह्म वाऽध्याहार्यम् । कर्मषष्ठीपक्षे तु प्रकृतत्वादेव तत्प्राप्तेर्नायं दोष इत्यत आहुः * ब्रह्मेत्यादि * तथाचार्थादेव तत्प्राप्तेर्नोक्तदोष इत्यर्थः ।

एवं लक्षणबोधकं सूत्रांशं व्याख्याय प्रमाणबोधकमंशं व्याकुर्वन्ति * शास्त्रे इत्यादि * शास्त्रे इति सप्तम्या वैषयिकमधिकरणं बोध्यते । शास्त्रविषयो योनिः शास्त्रयोनिः । विषयत्वं प्रतिपाद्यत्वम् । तदेतदभिसंधायाहुः * शास्त्रोक्तेत्यादि * । * शास्तीति * राजवदाज्ञापयति । एतेन तद्विरोधेऽपराधोऽपि बोधितः । नन्वत्रोत्तरकाण्डार्थ एव विचार्यत इति शास्त्रशब्दस्य कुतः प्रयोग इत्यत आहुः * सामान्येत्यादि * । * पूर्वसृष्टिवाक्यानामिति * भावदृत्तसूक्तादीनाम् । एतेन वेदार्थतयैवात्र सूत्रकृतो ब्रह्म विवक्षितमिति स्वोक्ते बीजं प्रदर्शितम् । ननु योनिशब्दो निमित्तवाची प्रायो दृश्यते इति साधारणेन कारणपदेन कुतो व्याख्यायत इत्यत आहुः * यथेत्यादि * । * उपरिष्टादिति * अग्रिमसूत्रे, तथाचातो व्याख्यात इत्यर्थः । अत्र कश्चिज्जन्मादिसूत्रस्येन यत इति पदेनैव विषयश्रुतेः स्मारणात् सिद्धे शास्त्रप्रमाणकत्वे, शास्त्रयोनित्वसूत्रं व्यर्थमित्याह । तन्न । यत इत्य-

विभ्रान्तिराभावावेव तथोत्तरत्र वक्ष्यते, तदनन्यत्वाधिकरणे । नामलीलाया अपि न पृथङ्निरूपणं प्रपञ्चमध्यपातात् ।

केचित् पृथग्रूपनामप्रपञ्चकर्तृत्वं योगविभागेन प्रतिज्ञाय समन्वयादिसूत्रेष्वेव हेतून् वर्णयन्ति । अन्वयसिद्ध्यर्थं च अतति व्याप्नोतीसत् । शास्त्रे योनित्वं प्राप्तं तादृति । नैतत् सूत्रकारसम्मतमिति प्रतिभाति ।

स्य हेतुकोटौ प्रवेशे जन्माद्यस्येतिभागस्य प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेनासङ्गतत्वप्रसङ्गात् । नच लक्षणे प्रविष्टस्यैव यत शब्दस्योक्तश्रुतिस्मारकत्वमित्यपि युक्तम् । श्रुतौ भूतानीति बहुवचनेन लक्षणस्य तद्विरुद्धत्वापत्तेः । नच जात्यपेक्षयैकवचनान्न विरोध इति वाच्यम् । तथा सति वाक्यान्तरासङ्ग्रहेण ब्रह्मभेदापत्तेः । तस्माच्छास्त्रयोनित्वादित्यवश्यं प्रणेतव्यम् । ननु तथापि साधारणशब्देन व्याख्यानमयुक्तम् । जन्मादीनामादिमत्तया असत्त्वेनाग्रिमसूत्रेऽपि तटस्थकारणतायाः एव सिद्धेरित्यत आहुः । मतान्तरेत्यादि । न्यूनत्वरूपं प्रतिज्ञादोषं परिहरन्ति * नामेत्यादि *

शाङ्करमतमनुवदन्ति * केचिदित्यादि * तन्मते दशसूत्रं जन्माद्यधिकरणम् । तत्र द्वाभ्यां प्रतिज्ञा । तत्र द्वितीयसूत्रे पञ्चम्यन्तन्वयादन्वयसिद्ध्यर्थं तथा वर्णयन्तीत्यर्थः । तद् दूषयन्ति * नैतदित्यादि * शास्त्रयोनिरित्येतावतैव प्रतिज्ञासिद्धावपि त्वादित्यधिककथनाद् अग्रिमसूत्रे पुनः साध्यपरामर्शाच्च तथेत्यर्थः । यत्पुनः शास्त्रस्य योनिरिति षष्ठीतत्पुरुषमङ्गीकृत्य, महत ऋग्वेदादिशास्त्रस्य सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य सम्भवो, न सर्वज्ञादन्यतः सम्भवतीत्येवं ब्रह्मणः सर्वज्ञत्वं समर्थितम् । अस्य महतो भूतस्य निःश्वसितं यद् ऋग्वेद इत्यादिबृहदारण्यकीयश्रुतिमादाय पुरुषनिःश्वासवद् वेदसम्भवश्च तत उक्तः । तत्तु मध्वभाष्यव्याख्यात्रा जयतीर्थेनैव दूषितम् । इदं शास्त्रस्य निर्मितत्वं किमर्थमुपलभ्य रचितत्वं वा, निःसृतमात्रत्वं वा । नाद्यः । कणादाक्षचरणानुसरणप्रसङ्गात् ।

श्रुत्यादिविरोधाच्च । न द्वितीयः । शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गादिति । इदमपि युक्तम् । पूर्वविकल्पे वेदस्यानित्यत्वप्रसङ्गात् । द्वितीये निःश्वासस्याबुद्धिपूर्वकत्वेन तथात्वादिति । एतेन, विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याधारः । वेदोपादानत्वात् । दीपगतप्रकाशनशक्त्याधारदीपोपादानवह्निवदिति विवरणोक्तमनुमानं, निःश्वासात्मकवेदोपादानत्वेनाबुद्धिपूर्वकनिःश्वासोपादानपुरुषदृष्टान्तसनाथेन प्रतिसाधनेनापास्तम् ।

यत्तु भामतीनिबन्धे, वर्णनित्यत्वपक्षेऽपि पदानामानुपूर्वीविशिष्टवर्णात्मकत्वाद् वाक्यानां च तादृशपदात्मकत्वादानुपूर्व्याश्च व्यक्तिधर्मत्वादानुपूर्व्युपगृहीतानां नित्यानामपि वर्णानां पदत्ववाक्यत्वयोरनित्यत्वेन लोके वेदे च न तयोः पौरुषेयत्वे विवादः । किन्तु वेदवाक्ये पुरुषस्वातन्त्र्यास्वातन्त्र्ययोः । तत्र स्वातन्त्र्यकोटिः काणादादीनाम् । द्वितीयां तु जैमिनीया वेदाध्ययनं प्रति गुरुशिष्यपरम्परानादित्वेन समर्थयन्ति । वैयासास्तु, अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्य परमात्मनो वेदजनकत्वेऽपि पूर्वपूर्वसर्गानुसारितादृक्तादृगानुपूर्वीविरचनेन । अतः पुरुषास्वातन्त्र्यमात्रमेव वेदे अपौरुषेयत्वमित्युक्तम् । तदप्यसङ्गतम् । वर्णवद् वैदिकपदादीनामपि नित्यत्वात् । वाचा विरूपनित्ययेति, वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम, वेदस्य चेश्वरात्मत्वादित्यादिश्रुतिपुराणवाक्येषु वेदपदादानुपूर्वीवैशिष्ट्य एव वेदत्वेन तादृशस्यैवेश्वरात्मकत्वात् । ईश्वरस्याविद्योपधानेन सार्वज्ञलब्धेरभ्युपगमैकशरणत्वात् । तादृशानुपूर्वीरचनया अस्वातन्त्र्ये राजाज्ञानुवादकराजदूतवदानुपूर्वीरचनामात्रेणेश्वरसार्वज्ञासिद्ध्या व्याख्येयग्रन्थविरोधाच्च । अतः स्थितस्य गतिचिन्तनमात्रायायं प्रयासः । जगत्कर्तृत्वेनैवोभयविधतत्कर्तृत्वस्य, तेनैव सार्वज्ञस्यापि सिद्धौ भाष्यकारस्याप्यपार्थ एव प्रयास इति दिक् ।

अन्यैस्तु शास्त्रं योनिः कारणं प्रमाणमस्येति व्याचक्षाणैर्बहुव्रीहिरङ्गीकृतः । सोऽप्ययुक्तः । लक्षणाप्रसङ्गात् । स्वारसिकार्थत्यागाच्च ।

विज्ञानेन्द्रभिक्षुणा तु शास्त्रं योनिः मूलप्रमाणं यस्मिन्निति सप्तम्यर्थे बहुव्रीहिमङ्गीकृत्योक्तम् । अत्र शास्त्रादितिवक्तव्ये यच्छा-

तस्मात् सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्धं जगत्कर्तृत्वेन ।

ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानम् । तपोयज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वात् । न चावान्तरकारणत्वम् । परस्याश्रवणात् । उत्तरकाण्डे तु द्वयप्रतिपादनाद् विरोधः । सन्देहश्च ।

शास्त्रयोनित्वादित्युक्तं, तच्छास्त्राविरुद्धानुमानस्मृतियोगिप्रत्यक्षादिसंग्रहाय । अत एवाग्रे, उपपत्तेश्चेत्यादावनुमानम् । स्मृतेश्चेत्यादौ स्मृतिः । आचारदर्शनाच्चेत्यादावाचारदर्शनमुखेन योगिप्रत्यक्षादिकं च संगृहीतमिति । तदत्रैवाग्रे मया द्रष्टव्यम् ।

उक्तार्थं निगमयन्ति * तस्मादित्यादि * तथाचात्र निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वमिति लक्षणं सिद्धमित्यर्थः । तत्र धर्मादिवारणाय तृतीयान्तम् । प्रकृत्यादिवारणाय शेषम् । तेन लक्षणो विवादाध्यासितत्वदोषपरिहारः । प्रजापत्यादिवारणाय * निरङ्कुशेति ज्ञेयम् ।

अत्रानादिसृष्टित्वादिनो मीमांसका बीजाङ्कुरदृष्टान्तेन सृष्टिप्रवाहानादित्वं वदन्तस्तपोयज्ञाद्युपचितपुण्यविशेषलब्धशक्तीनां प्रजापतिप्रभृतीनां क्षेत्रज्ञानामेव तत्तत्कल्पेषु कारणत्वमभिमन्यमाना ब्रह्मणो निरङ्कुशं जगत्कर्तृत्वमसहमानाः प्रत्यवतिष्ठन्ते *ननु नेत्यादि* * तत्तदुपाख्यानेष्विति * प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । स सर्पानसृजतेति । आपो वा इदमग्रे सलिलमासीत् । तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरदित्यादिषु तथैव पौराणेष्वपीत्यर्थः । * परस्येति * प्रजापत्यादिव्यतिरिक्तस्य । तथाच न पूर्वकाण्डस्य तत्र प्रामाण्यम् । ननु यथोपक्रमस्य सन्दिग्धत्वेन निर्णय उपसंहारेण भवति, तथात्रोत्तरकाण्डेन निर्णय इति शङ्कायामाह *उत्तरेत्यादि* * द्वयप्रतिपादनादिति * यतो वा इमानीत्यादौ ब्रह्मणः कर्तृत्वस्य, नित्यशुद्धबुद्धेत्यादावकर्तृत्वस्य प्रतिपादनाद्विरोध, उभयत्रापि श्रौतत्वस्य साधारण्यादेकतरपक्षपातस्याशक्यत्वेन सन्देहश्चेति तस्याः प्राबल्यान्नोत्तरकाण्डेन तन्निर्णय इत्यर्थः । तर्हि तन्मीमांसया निर्ण-

मीमांसायाः सन्देहनिवारकत्वेऽप्येकांशस्याप्रामाण्यं स्यात् । उभयसमर्थने शास्त्रवैफल्यं वा । वेदप्रामाण्यादेव तत्सिद्धेः । बाधितार्थवचनं वेदे नास्तीत्यवोचाम ।

किञ्च । वेदान्ताः किं वेदशेषा, वेदा वा । नाद्यः । अनुपयोगात् । अनारभ्याधीतत्वेन तदुपयोगित्वे पूर्वकाण्डविचारेणैव गतार्थत्वम् । विद्याप्रवेशश्च । न द्वितीयः । यज्ञाप्रतिपादनात् । मन्त्रब्राह्मणत्वाभावाच्च । तस्माद् वेदोपरा वेदान्ता इति तेषां किं स्यादिति चेत् ।

योऽस्तीत्यत आह * मीमांसाया इत्यादि * तथाच मीमांसायाः कर्तृत्वाकर्तृत्वान्यतरप्रसाधकत्वे अप्रसाधितांशबोधकवेदान्ताप्रामाण्यापत्तिरुभयप्रसाधकत्वे मीमांसाया एव वैयर्थ्यमित्युभयथापि कौण्ठ्यान्न तस्या निर्णायकत्वमिति सर्वास्मिन्नपि वेदे निरङ्कुशं जगत्कर्तृत्वं कुत्रापि कस्यापि न सिद्ध्यतीत्यनादिसृष्टिवाद एवादरणीय इत्यर्थः ।

एवं ब्रह्मस्वरूपविस्तारेण जगत्कर्तृत्व आक्षिप्तेऽपि यदि तद्बोधकप्रमाणप्राबल्यं स्यात् तदानुपलब्धस्य धर्मस्येव तत्सिद्धिः स्यादिति वेदान्तानां प्रामाण्यमाक्षिपति * किञ्चेत्यादि * यदि वेदशेषाः स्युस्तदा द्रव्यदेवतादि प्रकाशयन्त इतिकर्तव्यतां वा बोधयन्तो वेदार्थे यागे कचिदुपयुक्ताः स्युः । तत्तु न दृश्यते । अथानारभ्याधीता अपि स्मृतयो गृह्यसूत्राणि च यथा, मानवी ऋचौ धाय्ये कुर्याद्, यद्वै किञ्च मनुरवदत्तद्भेषजमिति, अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यादिवाक्येनाग्निसमिन्धनाद्यनुपनयनादौ चोपयुज्यमानाः शेषभावं भजन्ते । तथैते वेदान्ता अपि, यदेव विद्यया करोतीत्यादिवाक्येन वेदोक्तकर्मसूपयुज्यमाना वेदशेषा इत्युच्यते तदा पूर्वमीमांसायां तृतीये शेषशेषिभावस्याद्ये स्मृतिपादे तत्प्रामाण्यस्य च विचारितत्वात् तयैव गतार्थत्वाद् व्यर्थैवोत्तरमीमांसा वेदान्तानां च स्मृतिवद् विद्यास्वेव प्रवेशो, न वेद इति । नापि धर्माद्यन्यतमपुरुषा-

नैवम् । अस्ति तावद् वेदत्वम् । अध्ययनादिभ्यः स्मरणाच्च । प्रमाणं स सर्वोऽपि वेदः स्वार्थे । स च न यज्ञश्चेद् ब्रह्म भवतु । नचैतावता अवेदत्वम् । अतिप्रसङ्गात् ।

र्थप्रकाशकत्वेन तत्र प्रवेशः । स्मृतावपि तौल्यात् । अत एव शिक्षोपनिषदि, वेदमनूच्याचार्योऽन्तेवासिनमनुशास्तीति वेदानुवचनानन्तरमुपनिषदनुशासनं पठितम् । पुराणेऽपि साङ्गोपनिषद इति वेदेभ्यः पृथक् तन्निर्देशश्चेति युज्यत इति, * विद्याप्रवेशश्चेति चकारेण समुच्चीयते । यदि वेदास्तदा, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति, तद्भूतानां क्रियार्थेन समाम्नाय इत्यादिपूर्वतन्त्रवाक्याद् वेदोऽखिलो धर्ममूलमित्यादिस्मृतिवाक्याच्च यागतच्छेषान्यतरप्रतिपादकाः स्युः । यथा, अग्निहोत्रं जुहोतीत्यादयः । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वारणो यज्ञावचर इत्यादयश्च । ब्रह्म तु ज्ञानशेष इति नोभयरूपमिति तत्प्रतिपादकानां कथं वेदत्वम् ।

किञ्च । वेदो हि मन्त्रब्राह्मणसमुदायात्मकः । तत्र मन्त्रा नाम प्रयोगकालेऽनुष्ठानौपयिकार्थस्मारका वाक्यानि । तद्भिन्नं च ब्राह्मणमिति, तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्दइतिसूत्राभ्यां तल्लक्षणं निर्णीतम् । वेदान्तेषु तु विध्यनङ्गीकारेण प्रयोगाद्यभावात् तद्वाक्येषु मन्त्रत्वाद्यभावः । अत आर्यप्रसिद्धिमात्रेण वक्तव्ये वेदत्वे तेषामूषरभूमिवद् वेदोषरत्वेनापार्थत्वात् तेषां विचारे किं फलं स्यात् । सर्वोऽपि प्रयोजनोद्देशेनैव प्रवर्तत इति फलाभावात् प्रवृत्तिविघाते तन्मीमांसाऽप्यपार्थेति तत्साधिते ब्रह्मणो जगत्कर्तृत्वेऽत्यन्ताभिनिवेशो न कार्य इत्यर्थः ।

अत्र समादधते । * नैवमित्यादि * । न वेदान्तेषु वेदोषरत्वं, किन्तु वेदत्वमेव । अध्ययनाध्यापनज्ञानविधिभिर्वेदं पठन्तः पाठयन्तोऽर्थं चावगच्छन्त आर्याः स्वरपूर्वकमनध्यायशूद्राऽश्रवणादिनियमान् पालयन्त एव तथा कुर्वन्तीत्याचारपरम्परया, 'स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः' इति पुराणोक्तस्य स्मरणस्यात्रापि तुल्यत्वेन च तन्निर्धारात् । किञ्चौत्पत्तिकसूत्रे बादरायणग्रहणं पूजार्थं कृत्वा अलौकिकेऽर्थे

शक्यते ह्यग्निहोत्रादीनामन्यतरदनन्तभागेन तथा वक्तुम् । तस्माद् ब्रह्मापि प्रतिपादयन्तो वेदान्ता वेदत्वं न व्यभिचरन्तीति ।

मन्त्रब्राह्मणरूपत्वं चोत्पश्यामः । ऋगत्र मन्त्रः । ब्रह्मप्रतिपादकं ब्राह्मणम् । तच्छेषाः सृष्ट्यादिप्रतिपादकाः ।

परानपेक्षं वेदस्य प्रामाण्यं जैमिनिना प्रतिपादितम् । ततश्च सोऽलौकिकोऽर्थः को वेत्यपेक्षायां यथा तन्मते यज्ञस्तथा व्यासमते ब्रह्म । अनुपलब्धार्थत्वस्योभयत्रापि तौल्यात् ।

किञ्च । यागप्रतिपादकत्वेन वेदत्वं मन्त्राणां भवतां नाम । किं यावद्यज्ञप्रतिपादकत्वं वेदत्वम्, उत यत्किञ्चित्तत्प्रतिपादकत्वम्, अथवा यथाकथञ्चित् तत्प्रतिपादकत्वमिति । नाद्यः । अग्निहोत्रादिप्रतिपादकस्य भागस्य तदितरयज्ञाप्रतिपादकत्वेनावेदत्वप्रसङ्गात् । न द्वितीयः । सर्वस्य तथात्वप्रसङ्गात् । मनुः पुत्रेभ्यो दायं व्यभजदित्याद्यर्थवादस्यापि तथात्वप्रसङ्गाच्च । तृतीयश्चेत् सिद्धं ब्रह्मप्रतिपादकत्वेऽपि वेदत्वम् । वक्ष्यमाणरीत्या तेषामपि यज्ञार्थत्वेन तथात्वादिति । तदेतदुक्तं *शक्यते हीत्यादिना* । अत्रान्यतममिति वक्तव्ये अन्यतरदिति प्रयोगस्तु, महाभाष्ये प्रत्ययः परश्चेत्यत्र निमित्तविचारं प्रकृत्य तदुदाहरणे तद्यथा बहुष्वासीनेषु कश्चित् कञ्चित् पृच्छति, कतरो देवदत्त इत्यत्रैवोपाध्यनङ्गीकाराद् बोध्यः ।

स्वरूपतः सन्देहं वारयन्ति । * मन्त्रेत्यादि * । तच्चोदकेत्यादिसूत्राणां विचारे ह्याम्नातत्वे सति कर्मसाधनत्वेन विधिबोधितोच्चारणकः शब्दो मन्त्रः । तथात्वे सति मन्त्रभिन्नः शब्दो ब्राह्मणमिति तयोर्लक्षणम् । तदुभयात्मकत्वं च वेदलक्षणं सिद्ध्यति । न तु विधेयार्थस्मारको मन्त्र इति लक्षणम् । तस्य, वसन्ताय कपिञ्जलानालभेतेत्यत्राऽव्याप्तेः । एवं मननहेतुर्मन्त्र इत्यस्य ब्राह्मणेऽतिव्याप्तेः । अस्यन्तस्त्वान्त उत्तमपुरुषान्त इत्यादीनां परस्परं प्रयोगकरणभूतः शब्द इत्यस्य प्रत्यगाशीर्मन्त्रे चाव्याप्तेः । किन्त्वभियुक्तानां यत्र मन्त्र इति समाख्यानं स मन्त्र इति लक्षणमङ्गीक्रियते । यदि तु चरणव्यूहानुरोधेन वसन्तायेत्यादीनां ब्राह्मणत्वमङ्गीकृत्य प्र-

यद्यपि न विधीयते, तथापि तादृशमेव ज्ञानं फलायेति युक्तमुत्पश्यामः । पूर्वत्रैलक्षण्यन्तु भूषणाय ।

काण्डद्वयस्यान्योन्योपकारित्वाय साधारणग्रहणम् । यदेव विद्यया करोतीत्यादिना पूर्वशेषत्वं सर्वस्य । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिना सर्वस्योत्तरशेषत्वम् । कर्मब्रह्मणोः क्रियाज्ञानयोर्धर्मिपरत्वेनैक्यात् कर्तृवाक्येषु सर्वत्र न विरोधः । तस्माच्छास्त्रयोनित्वं सिद्धम् ।

योगक्करणभूतः शब्दो मन्त्र इति सौत्रमेव लक्षणमाद्रियते, तदपि जपपासनादिप्रयोगं प्रत्यपि प्रत्यगाशीःप्रभृतिमन्त्राणां विषयत्वादिना करणत्वमस्त्येवेत्यदोषः । तच्चक्सामयजुष्वेव प्रसिद्धम् । निगदादीनामपि तत्रैव निवेशः । ब्राह्मणलक्षणमप्यत एव प्रसिद्धम । वेदान्तेषु च, सत्यं ज्ञानमित्यादीनाम ऋचाम, अच्युतमसीत्यादीनां यजुषां, हावु हावु हावु इत्यादीनां साम्नां च विद्यमानत्वात् नान्यैव मन्त्रः । ऋगित्युपलक्षणम । तद्भिन्नं ब्रह्मप्रतिपादकं ब्राह्मणम् । ब्रह्मप्रतिपादकभागशेषाः, सृष्ट्यादिप्रतिपादकभागा ब्राह्मण एव निविशन्ते । ततश्च मन्त्रब्राह्मणसमुदायरूपत्वात् सिद्धं वेदान्तानां वेदत्वमिति ।

तर्हि वेदोपरत्वं कथं निवर्ततामित्यत आहुः । * यद्यपीत्यादि * । तथाच वेदे बाधितार्थवचनस्याभावादविधीयमानमपि ज्ञानं यथोक्तं फल जनयिष्यत्येवेति नोपरत्वमित्यर्थः । ननु पूर्वमीमांसायां विहितस्यैव फलवत्त्वं साधितमिति कथ तथेत्यत आहु । * पूर्वेत्यादि * । तथाच, गुणे त्वन्यायकल्पनेति तत्रैवोक्तत्वाद् वेदगुणभूतस्य जैमिनीयस्यैव निर्णयस्य हीनाधिकारिपरत्व वेदविरोधे कल्पनीयमित्यर्थः ।

एवं भाट्टादिकृतं पूर्वपक्षं परिहृत्य काण्डद्वयस्यैकवाक्यत्वबोधनाय शास्त्रपदप्रयोग इति पर्यवसितं तदर्थमाहु । *काण्डेत्यादि* । एकवाक्यत्वप्रकारमाहु । * यदेवेत्यादि । * इदं चतुर्थाध्याये, यदेव विद्ययेति हीतिसूत्रे व्युत्पादयिष्यते । * ऐक्यादिति * । अभिधेयप्रयोजनयोरैक्यात् । तथाच, यज्ञो वै विष्णुरिति श्रुतेर्धर्मो यस्यां म-

केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्ति ।

ज्ञात्मकः, मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्, मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदतीत्येकादशस्कन्धे भगवद्वाक्याच्च ब्रह्मवादेन सर्वस्य ब्रह्मात्मत्वावगतिरूपनिषद्भ्यात्मनि भिदा बाध इति वाक्याद् भेदबुद्धिबाधो विद्यातत्पूर्वकं यज्ञादिकरणे कर्मपौष्कल्यम् । ते च वेदान्ताधीने इति पूर्वकाण्डस्य वेदान्तापेक्षित्वं, वेदानुवचनयागादिसाधनैर्भगवत्प्रसादाच्छुद्धे चेतसि विद्योदेतीति साधनावबोधकवेदभागापेक्षित्वं वेदान्तानाम् । यद्यप्युभयत्र पुरःस्फूर्त्या कर्म ज्ञानं च यथायथं प्रतीयते, तथापि पूर्वोक्तश्रुतिस्मृतीनां वक्ष्यमाणानां च तासां विचारे क्रियाज्ञानयोर्धर्म्यात्मकत्वेनाभिधेयस्यैक्यम् । समुच्चिताभ्यां ताभ्यां यथाधिकारं ब्रह्मभावः, परप्राप्तिश्च फलमिति प्रयोजनस्याप्यैक्यमित्येवं सिद्ध एकवाक्यत्वे सर्वत्र कर्तृत्वेनोच्यत इति न पूर्वोत्तरकाण्डयोर्विरोधः । शेषशेषिभावस्याविशिष्टत्वेऽपि पुरुषकर्मफलेषु यथा आशङ्कायाः फले पर्यवसानात् फलमेव पूर्वकाण्डे मुख्यं तथात्राऽपीति फलवाक्यवद् वेदान्तानामेव मुख्यत्वज्ञापनाय कौशीतकिब्राह्मणे ऋचां मूर्द्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमिति मूर्द्धत्वादि श्राव्यते । तस्माद् परत्वगन्धस्याप्यभावाद् ब्रह्मणः शास्त्रैककारणत्वं निष्प्रत्यूहमित्यर्थः ।

एवं सिद्धान्तमुक्त्वा आधुनिकानामन्येषां भाष्यकृतां ब्रह्मणः कर्तृत्वस्य शास्त्रैकप्रमाणकत्वांशे विप्रतिपत्त्यभावात् तन्मतानुवादमकृत्वा केषांचिद् वैशेषिकाद्यनुसारिणां मतमनुवदन्ति * केचिदित्यादि * । अत्रैवं बोध्यम् । वैशेषिकादिदर्शनाभिमानिनस्तावद् बाह्यानां मीमांसकानां कापिलानां च निरासाय निखिलजगदेककर्तारमीश्वरमनुमानेनैव साधयन्ति । तथाहि । जगत् कार्यं सावयवत्वाद्, महत्त्वे सति क्रियावत्त्वाद्, महत्त्वे सति मूर्तत्वाच्च घटादिवदिति जगतः कार्यत्वे सिद्धे, जगद् बुद्धिमत्कारणपूर्वकं कार्यत्वाद् घटादिवदितिसाधनेन जगतस्तथात्वे सिद्धे, स बुद्धिमान् को वेत्यपेक्षायामत्र

जगत्त्वेन क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां सङ्घातत् तादृशां तेषां जगत्त्वेन तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञः कश्चिदेकः पुरुष आस्थेयः। कार्यत्वस्य तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तत्वात् । एवञ्च क्षेत्रज्ञानां तादृशाभिज्ञत्वाभावेन प्रकृतेश्चेतनत्वाभावेन च जगत्कर्तृत्वनिवृत्तौ सुखेन जगत्कर्तुरीश्वरस्य सिद्धिरिति । एवं प्रमाणान्तरेणेश्वरस्य तज्जगत्कर्तृत्वस्य च सिद्धौ जन्मादिसूत्रस्यापि लक्षणत्वात् तदितरभेदसाधने पृथिवीत्ववदीश्वरश्चेतनान्तरव्यतिरिक्तः, जगज्जन्मादिकर्तृत्वाद् यन्नैवं तन्नैवमित्यनुमानरूपं सूत्रमित्येकं मतम् । तदसङ्गतम् । जगत्कर्तृसाधकस्य कार्यत्वस्य हेत्वाभासत्वात् । यथाहुर्भास्कराचार्याः । जगत् न बुद्धिमत्कारणपूर्वकं कार्यत्वाद् बीजोत्पन्नाङ्कुरवदिति साधारणो हेतुः । किञ्च जगता सहेश्वरसम्बन्धस्यात्यन्तापरिदृष्टत्वेन साध्यस्य पक्षधर्मत्वाभावादयं विरुद्धोऽपि । यस्य कस्यापि बुद्धिमतः साधने सिद्धसाधनत्वं च । तथा घटादिदृष्टान्तबलेन कार्यत्वसमानाधिकरणस्यानीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृकत्वस्य सिद्ध्या विवक्षितेश्वरासिद्धिश्च । तादृशजीवसिद्ध्याऽर्थान्तरत्वेनापि तदसिद्धिश्च । नचैवं घटादिदृष्टान्तेन शब्दे कृतकत्वादनित्यत्वसाधने दृष्टान्तीयानां पाक्यत्वादीनामापत्त्याऽनुमानोच्छेदप्रसङ्गः। लिङ्गिनः शब्दस्य प्रमाणान्तरगोचरत्वेन शब्दे पाक्यत्वादीनां निवृत्त्या तदनुच्छेदात् । अत्यन्तापरिदृष्टे ब्रह्मणि त्वन्वयव्यतिरेकपरिशुद्धानां तेषां निवर्तकस्याभावेन तादृशधर्मापत्तेरनिवार्यत्वात् । अतः शास्त्रैकसमधिगम्यं ब्रह्मेति ।

रामानुजाचार्यास्त्वेतेषु दूषणेषु शैथिल्यं प्रदर्श्य प्रकारान्तरेण शास्त्रैकसमधिगम्यत्वं साधयन्ति । तथाहि । सावयवत्वादिलिङ्गकैः पूर्वोक्तानुमानैः कृत्वा सिद्धत्वेन जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । नच जगदकार्यम् अशक्यक्रियत्वाद् अशक्योपादानादिविज्ञानत्वाच्च, आकाशवदितिप्रतिपक्षसद्भावात् प्रत्याख्यातुं शक्यमिति वाच्यम् । आकाशे निरवयवत्वस्यानुकूलतर्कस्य सत्त्वेन तस्याकार्यत्वेऽपि जगद्रूपेषु महीमहीधरादिषु वाय्वन्तेषु तदभावेन तयोरप्रयोजकतयाऽऽकाशदृष्टान्तेन तेष्वकार्यत्वस्य साधयितुमशक्यत्वात् । एवं निरवयवत्वेनोपाधिनैव क्षित्यादिवायुपर्यन्तानि अकार्याणि महाभूतशब्दवाच्यत्वाद् आकाशवदित्यपि प्रत्यनुमानं निरस्तम् । एवं सिद्धे

कार्यत्वे शक्यक्रियत्वशक्योपादानादिविज्ञानत्वयोरपि कार्यत्वेनैव सिद्ध्या तयोरपि प्रतिपन्नत्वमेव । तथाहि । घटमणिकादिषु कृतेषु कार्यदर्शनानुमितकर्तृगततन्निर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्य अवयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तुस्तज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तु भुवनादेः कार्यत्वे सिद्धं तावत्सर्वसाक्षात्कारतन्निर्माणादिनिपुणः कश्चित् सिद्ध्यत्येव । विवादाध्यासितं भूभूधरादिकं स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदिति प्रयोगात् । किञ्च सर्वचेतनानां सुखदुःखभोगस्य धर्माधर्मसाध्यत्वेऽपि धर्माधर्मयोरचेतनत्वाच्चेतनाधिष्ठानमन्तरेण तयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलदानचतुरः कश्चिदाश्रयः । वर्द्धकिनानधिष्ठितस्य वाश्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात् । तथाच प्रयोगः । धर्माधर्मौ चेतनाधिष्ठितत्वेनैव फलोपधायकौ अचेतनत्वाद् वाश्यादिवदिति । नच पूर्वानुमाने कार्यत्वस्य हेतोर्बीजोत्पन्नाङ्कुरदृष्टान्तेन साधारणत्वं शङ्क्यम् । अङ्कुरादौ सन्देहस्यानन्याहितत्वेन पक्षसमतया पक्ष एवान्तर्भावात् । एतेनैव सुखादिदृष्टान्तोऽपि प्रत्युक्तः । नच लाघवादुभयवादिप्रतिपन्नक्षेत्रज्ञानामेवाधिष्ठातृत्वमत्र कल्पयितुं शक्यम् । तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाशक्तिनिश्चयात् । कल्पनाया दर्शनानुसारित्वस्यैव युक्तत्वात् । नचेश्वरेऽप्येतादृगशक्त्यापत्तिः । तत्र तन्निश्चायकप्रमाणाभावात् । अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः । तथाचोक्तानुमानेन सिद्ध्यन् स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनसामर्थ्यसम्पन्न एव सेत्स्यतीति न तस्मिन्नन्वयव्यतिरेकपरिशुद्धमप्यनैश्वर्यमापादयितुं शक्यम् । समर्थकर्तृपूर्वकत्वनियतकार्यत्वरूपहेतुबलादेव तन्निवृत्तेः । तथाहि, केनचित् क्रियमाणं किञ्चित् स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणविज्ञानं च निर्वाहकत्वेनापेक्षते । न त्वन्यासामर्थ्यमन्याज्ञानं वा । हेत्वभावात् । उक्तसामर्थ्योक्तज्ञानाभ्यामेवोत्पत्तावुपपन्नायां सम्बन्धितया दृष्टानामकिञ्चित्कराणामन्येषां कल्पनायोगात् । अन्यथानुमानोच्छेदप्रसङ्गात् । अथ तदप्युपयोगीति चेत्, किं क्रियमाणवस्तुव्यतिरिक्ताज्ञानादिकं सर्वविषयं क्रियोपयोगि, उत कतिपयविषयम् । नाद्यः । कुलालादेरपि क्रि-

यमाणावस्तुव्यतिरिक्ताज्ञानाद्यदर्शनात् । नापरः । सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यनियमेन सर्वेषामज्ञानादीनां व्यभिचारात् । नच निर्वाहकापेक्षाङ्गीकारे ईश्वरेऽपि शरीरेन्द्रियाद्यापत्तिरिति शङ्क्यम् । सङ्कल्पमात्रेण परशरीरगतभूतवेतालगराद्यपगमदर्शनात् । नच कथमशरीरस्य प्रवर्तनरूपः सङ्कल्प इति शङ्क्यम् । सङ्कल्पस्य मनोजन्यत्वेन शरीरानपेक्षत्वात् । मनसस्त्वीश्वरेऽभ्युपगमात् । पूर्वोक्तहेतुनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात् । नच मानसोऽपि सङ्कल्पः सशरीरस्यैव, तस्यैव समनस्कत्वादिति वाच्यम् । मनसो नित्यत्वेन देहाद्यपगमेऽपि तत्सद्भावेनानैकान्तिकत्वात् । अत ईदृशस्य विचित्रस्य जगतो निर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न समर्थ इति तद्भिलक्षण ईश्वरः सङ्कल्पमात्रेण सर्वकरणसमर्थोऽनुमानेन सिद्ध्यति । प्रयोगान्तरेण च । जगद् एकचेतनाधीनम् अचेतनारब्धत्वादरोगस्वशरीरवदिति । तस्मान्न पूर्वोक्तप्रकारेण शास्त्रैकसमधिगम्यत्वं ब्रह्मणः सिद्ध्यति ।

कथं तर्हि तत्सिद्धिरितिचेद्, उच्यते । नाचेतनारब्धत्वेन हेतुना ईश्वरसिद्धिः । तथाहि । यदत्र साध्यतया निर्दिष्टं, किं तदेकचेतनाधीनत्वम् । तत्र तावदेकचेतनायत्तोत्पत्तिस्थितिकत्वम् । दृष्टान्ते साध्यवैकल्यात् । अरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतनभोग्यत्वात् तत्तददृष्टजन्यत्वेन तदुत्पत्तिस्थित्योस्तदधीनत्वेनैकचेतनाधीनत्वाभावात् । किञ्च । शरीरस्य स्थितिरपि, किं स्वावयवसमवेतता, उत प्राणनम् । आद्ये अवयवाधीनत्वान्न चेतनापेक्षा, घटादिवत् । द्वितीये क्षित्यादीनां शरीररूपत्वभावेन पक्षे असम्भव इति पक्षसपक्षानुगतस्थित्यनुपलम्भः । नाप्येकचेतनाधीनप्रवृत्तिकत्वं तत् । पक्षान्तर्भूतेषु गुरुतररथशिलामहीरुहादिष्वनेकचेतनसाध्यप्रवृत्तिकत्वेन व्यभिचारात् । नापि चेतनमात्राधीनत्वम् । सिद्धसाधनत्वात् । किञ्च उभयवादिसिद्धानां जीवानामेव नियामकत्वाभ्युपगमो युक्तः । लाघवात् । नच जीवानां पूर्वोक्तरीतिकोपादानादिविज्ञानतन्निर्माणशक्त्यभावः शङ्कनीयः । तपोयागादिभिस्तेष्वपि तादृशज्ञानसामर्थ्ययोरुपगमे बाधकाभावात् । एतदपेक्षयेश्वराख्यपुरुषकल्पनस्य तत्र सामर्थ्यविशेषकल्पनस्य चात्यन्तापरिदृष्टत्वेनातिगुरुत्वात् । अतोऽचेतनारब्धत्वलिङ्गकानुमानेन नेश्वरसिद्धिः ।

नापि कार्यत्वलिङ्गेन। महीमहार्णवादीनां सावयवत्वेन कार्यत्वेऽप्यनेकत्वात् ते सर्वे एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात्। न चैकघटवत् सर्वेषामेककार्यत्वं, येनैकदैवैकः कर्ता स्यात्। पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यस्य नियन्तुमशक्यत्वात्। नच जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यत्वबलेनैव तत्सिद्धिरिति वाच्यम्। पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात् तद्विशेषोपचयेनातिशयितादृष्टसम्भावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि सम्भवादित्युक्तम्। किञ्च। युगपत् सर्वोच्छित्तिः सर्वोत्पत्तिश्च न प्रमाणपदवीमधिरोहतः। अदर्शनात्। क्रमेणैवोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन तथा कल्पनायामपि विरोधाभावाच्च। अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्तिकत्वम्। सार्वभौमसदनदृष्टान्तेन तथाऽवगमात्। महाद्भूतसमूहनिष्ठत्वाच्च घटपटस्तम्भसमूहनिष्ठकार्यत्ववत्। साध्यतावच्छेदकराहित्येन दृष्टान्तस्य साध्यविकलत्वं च। सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः। पक्षस्याप्रसिद्धविशेषणत्वं च। तादृशसाध्याप्रसिद्ध्या विवादाध्यासाभावात्। बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाध्यत्वं च। किञ्च। सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्य चिदेकस्य साधकमिदं कार्यत्वं युगपदुत्पद्यमानसर्ववस्तुगतं वा, क्रमेणोत्पद्यमानसर्ववस्तुगतं वा। आद्ये, आश्रयासिद्धत्वम्। द्वितीयेऽनेककर्तृकत्वसाधनाद् विरुद्धत्वम्। अपिच। सर्वेषां कार्याणां शरीराणां सुखाद्यन्वयदर्शनेन तन्मूलभूतं सत्त्वादिकमवश्याश्रयणीयम्। पुरुषस्य तद्योगश्च कर्मभिरन्तःकरणविकारद्वारेण भवतीति विचित्रकार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्मसम्बन्धोऽप्यवश्याश्रयणीयः। ज्ञानशक्तिवैचित्र्यस्यापि कर्ममूलत्वाच्च। इच्छायाः कर्मारम्भहेतुत्वेऽपि विषयविशेषितायास्तस्याः सत्त्वादिमूलत्वेन कर्मसम्बन्धोऽवर्जनीयः। एवं सिद्धे कर्मसम्बन्धे क्षेत्रज्ञा एव कर्तारः सिद्ध्यन्ति, न तु तद्विलक्षणः कश्चिदनुमानात् सिद्ध्यति।

भवन्ति चात्र प्रयोगाः। तनुभवनादिकं क्षेत्रज्ञकर्तृकं, कार्यत्वाद् घटवत्। ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वाद् मुक्तात्मवत्। तथा, अशरीरत्वात् तद्वदेव। नच क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः। तत्राप्यनादेः सूक्ष्मशरीरस्य भावात्। विमति वि-

षयः कालो न लोकशून्यः कालत्वाद् वर्तमानकालवत् । किञ्च । ईश्वरः किमशरीरः सशरीरो वा कार्यं करोति । नाद्यः । मनसो नित्यत्वेऽपि अशरीरेषु मुक्तेषु मानसकार्यादर्शनादीश्वरेऽप्यकर्तृत्वापत्तेः । नेतरः । विकल्पासहत्वात् । तन्नित्यमनित्यं वा । न तावन्नित्यम । सावयवस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः । नाप्यनित्यम् । तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । नच स्वयमेव हेतुरिति युक्तम । अशरीरस्य तदयोगात् । नाप्यन्यशरीरेण शरीरवान् । अनवस्थानात । किञ्च । सव्यापारो निर्व्यापारो वा । नाद्यः । अशरीरस्य तदसम्भवात् । न द्वितीयः । मुक्तात्मवदकर्तृत्वापातात् । कार्यं जगद् इच्छामात्रव्यापारिकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम् । दृष्टान्तस्य साध्यहीनता च । अतो दर्शनाननुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परमेश्वरः परब्रह्मभूतः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणापरिदृष्टं समस्तविजातीयं सार्वज्ञसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितगुणोदारं निखिलहेयप्रत्यनीकं स्वरूपं प्रतिपादयतीति, न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषप्रसङ्ग इति ।

अत्रोदयनाचार्यैरीश्वरसाधने नवानुमानानि कुसुमाञ्जलौ दर्शितानि । 'कार्यायोजनधृत्यादेः पदात प्रत्ययतः श्रुतेः । वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः' इति । अत्र कार्यादिपदानि भावप्रधानानि । तानि चैवं व्याख्यातानि । आयोजनं सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म । धृतिर्धारणं गुरुत्ववतो ब्रह्माण्डादेः पतनाभावः । आदिपदाद् ब्रह्माण्डादेर्नाश. । पदं घटादिसम्प्रदायव्यवहारः । घटादिपदप्रयोगो वा । प्रत्ययो वेदजन्यं धर्मादिज्ञानम् । श्रुतिर्वेदः । वाक्यं पदसमूहः । सङ्ख्याविशेषः सर्गाद्यपरमाणुनिष्ठद्वित्वादिसङ्ख्याजन्यं परिमाणमित्यादि । प्रयोगास्तु क्षित्यादिकं कर्तृजन्यं कार्यत्वाद् घटवत् । अन्ये तु जन्यत्वादित्यपि प्रयुञ्जते । तथा, क्षितिः, उपादानगोचरापरोक्षज्ञानोपायेच्छातादृशकृतिजन्या, ज्ञानजन्या इच्छाजन्या, कृतिजन्या वा जन्यत्वाद् घटादिवदित्यपि । पूर्वोक्तं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वाद् अस्मदादिशरीरजन्यक्रियावत् । उक्ता धृतिः, चेतनप्रयत्नपूर्विका धृतित्वाद् वियति विहङ्गमधृतिवत् । ब्रह्मा-

ण्डादि प्रयत्नवच्छिनाश्यं विनाशित्वात् पाट्यमानपटवत् । उक्तव्यवहारः स्वतन्त्रप्रयोज्यः, व्यवहारत्वाद् आधुनिकलिप्यादिव्यवहारवत्। पूर्वोक्तं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् । वेदः पौरुषेयो वेदत्वाद् यन्नैवं तन्नैवम् आकाशवत् । वेदः पौरुषेयो वाक्यत्वाद् भारतादिवत् । द्व्यणुकपरिमाणं संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटपरिमाणवदिति । अत्र प्रथमे प्रयोगे कर्तृजन्यत्वं तु स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमददृष्टाद्वारकजन्यत्वम् । अत्रादृष्टाद्वारकेतिविशेषणान्न जीवात्मनिरूपितादृष्टद्वारकजन्यत्वेन सिद्धसाधनमर्थान्तरं वा । जीवानां क्षित्याद्युपादानीभूतपरमाण्वादिगोचरापरोक्षज्ञानाभावेन तज्जन्यत्वे बाधान्न तैरपि तथा । नच क्षितिघटादिसाधारणस्यैकस्य साध्यस्याभावेन स्वपदार्थाननुगमात् कथं व्याप्तिग्रह इति वाच्यम् । स्वपदार्थाननुगमस्यादोषत्वात् । अन्यथेच्छादिना ज्ञानाद्यनुमानं न स्यात् । स्वविशेष्यकस्वत्वप्रकारकज्ञानत्वादिनैव तत्र कार्यकारणभावात् । अत्र च सकर्तृकत्वादिसाध्यकानुमाने कर्तृत्वेनैव कारणता, ज्ञानजन्यादिसाधके च ज्ञानत्वादिना। एवं कार्यतापि कार्यत्वेन जन्यत्वेन च । नच शरीरगौरवेणाप्रयोजकत्वं शङ्क्यम् । अवच्छेदककोटौ घटत्वादीनां प्रवेशे आनन्त्यगौरवाद् ध्वंसस्य जन्यत्वेन तस्य च जन्याभावत्वेनावच्छेदकतया प्रवेशे शरीरगौरवाच्च । एवं तु विवक्षितविवेके जन्याभावत्वैकदेशस्य जन्यत्वस्यैव प्रवेश इति शरीरलाघवात् सामान्यलाघवादेकत्वलाघवात् कल्पनालाघवादुपस्थितिलाघवाच्च जन्यत्वेनैव कार्यता, न घटत्वादिना । कार्यत्वं च स्वसमवायिजन्यताख्येन परम्परासम्बन्धेन कृतित्वमेवेति, न तत्रापि गौरवम् । नच विशिष्यान्वयव्यतिरेकाभ्यां घटत्वकुलालत्वादिना विशिष्यकार्यकारणभावस्यावश्यकत्वात् सर्वमेतद्विरुद्धमिति वाच्यम् । कार्यमात्रवृत्तीनां जातीनां कार्यतावच्छेदकत्वमिति सिद्धान्तसमुद्घोषात् । नचाङ्कुरादौ हेतोर्विपक्षगामित्वेनानैकान्तिकत्वं शङ्क्यम् । तत्र साध्यसन्देहस्यानन्याहितत्वेन तस्य पक्षसमत्वात् । नच शरीरजन्यत्वस्योपाधेर्विद्यमानत्वाच्छरीराजन्यत्वस्य प्रतिसाधनस्य सत्त्वाच्च साध्यसन्देहस्यान्याहितत्वेनानैकान्तिकत्वं सिद्धमिति शङ्क्यम् । कर्त्रादिजन्यतायामपि गुरुभूतस्य

शरीरजन्यत्वस्यानवच्छेदकत्वाल्लघुभूतस्य जन्यत्वमात्रस्यैवावच्छेदकत्वेन तस्य च साधनव्यापकत्वेनानुपाधित्वे हेतोरदुष्टत्वात् । एवञ्च कर्त्रादिजन्यतायामिव शरीरजन्यतायामपि जन्यत्वस्यैवावच्छेदकत्वादीश्वरे नित्यज्ञानादिकमिव नित्यशरीरवत्त्वस्याप्यङ्गीकारेण प्रतिसाधनदोषस्याप्यभावात् । अनुमानं च, क्षित्यादिक शरीरजन्यं जन्यत्वाद् घटवत् । ईश्वरः शरीरी कर्तृत्वात् कुलालवदिति । अनुकूलतर्कश्चात्र कर्तृत्वजन्यत्वाभ्यामिव शरीरत्वजन्यत्वाभ्यामपि पूर्वोक्तयुक्तितुल्ययुक्तिकः कार्यकारणभाव एव । श्रुतिश्च, यतो वा इमानि भूतानि जायन्त इत्यादि, सहस्रशीर्षा पुरुष इत्यादि, आकाशशरीर ब्रह्मेत्यादि च । श्रुतीनां चानुकूलतर्कविधया स्वतन्त्रतया च ब्रह्मणि प्रामाण्यमिति नवीनमतम् ।

साम्प्रदायिकमते शरीरस्य कुलालशरीरत्वादिनैव कारणत्वं, नतु शरीरत्वेनेतीश्वरस्यानित्यं शरीरं लोकानुग्रहेण व्यवहारप्रवर्तनार्थम् । अतोऽस्मदाद्यदृष्टजनिते रामकृष्णादिनामके शरीरे भूतावेशन्यायेनावेशः । कार्यकरणानन्तरं च त्याग इति ।

अभिनवमते तु महेश्वरस्य विश्वमेव शरीरम् । तच्च नित्यानित्यपुञ्जघटितमित्यनित्यांशविरामेऽपि नित्यांशमादाय नित्यमेव । आकाशात्मकं च नित्यमेव । रामकृष्णादिनामकं त्वाविर्भावतिरोभावशालि भक्तानुग्रहेण कदाचित् क्वचिदाविर्भवति तिरोभवति च । अत एव तत्त्ववादिभिर्मूर्तमपि तन्नित्यं विभु वेत्यङ्गीक्रियते । सर्वत्र सर्वदा तथाभूतभक्तभावनया भक्तैः साक्षात्क्रियमाणत्वात् । तादृशसाक्षात्काराणां प्रमात्वे सम्भवति भ्रमत्वकल्पनस्यान्याय्यत्वात् । तदुक्तम्, औत्सर्गिकं धियां प्रमात्वमिति । विश्वात्मकं तु योगिप्रत्यक्षगम्यमपि विश्वरूपदर्शनादिषु श्रूयत एव सहस्रशःएवं श्रुत्यादिभिः शरीरेऽङ्गीकृते तदनुसारिसकर्तृकत्वानुमानं निर्दुष्टमेव। एवमेकेनेश्वरेण सकलक्षित्यादिकार्यसम्भवे सति प्रमाणाभावाद् गौरवाच्च नानेकेश्वरसिद्धिः । किञ्चानेकेश्वराङ्गीकारे तेषामैकमत्यं वैमत्यं वा स्यात् । तत्राद्ये स्वातन्त्र्याभावादैश्वर्यहानिः । द्वितीये तु कार्यासिद्धिरिति कार्यदर्शनाद्, एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिभ्यस्तादृशैः पुराणैश्चैकस्यैव सिद्धिरिति न पूर्वोक्तं किमपि दूषणम् । एवमेकेश्वरसिद्धौ कार्यत्वादिलिङ्गकान्यप्यनुमानानि तमेकमेव साधयन्तीति न कोऽपि

अन्ये पुनः श्रुत्यनुवादकमाहुः । सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानं च ब्रह्मणि प्रमाणमिति ।

तत्तु, तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यत्वाद्दुपेक्ष्यम् ।

क्वापि दोष इति मैथिलभवदेवमिश्राः ।

ज्ञानेन्द्रभिक्षुस्तु, बुद्धिप्रभृतिकार्यम् उपादानगोचरप्रत्यक्षजन्यं कार्यत्वाद् घटादिवत् । यदि चोपादानगोचरापरोक्षवृत्तेरेव कार्यहेतुत्वं लाघवात् । न तु चैतन्यस्य गौरवादिति । तदा तु बुद्ध्यादीनि सकारणकानि, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमज्जन्यत्वाद् घटादिवदित्येवं कारणीभूतसत्त्वस्य सिद्ध्यनन्तरं, तत्कारणसत्त्वं परस्य भोग्यम् इच्छादिमत्त्वाज्जीवोपाधिवदिति कारणसत्त्वभोक्तृतयेश्वरोऽनुमेय इत्याह ।

एवञ्चाभिनवोक्तरीत्याऽनुमानस्य श्रुत्यनुसारित्वेन प्रामाण्याद् व्यासचरणानां च श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात् सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकम् । अनुमानस्य ब्रह्मणि प्रामाण्येऽनङ्गीकृते, यतो वेत्यादिश्रुतौ केवलं कर्तृत्वस्योक्तत्वादुपादानादिगोचरापरोक्षज्ञानवत्त्वस्यासिद्धेः । अङ्गीकृते तु तस्मिन् कर्तृत्वस्योक्तज्ञानव्याप्तत्वात् सुखेन सर्वज्ञत्वस्य सिद्धेरिति ।

द्वितीयं मतमनुवदन्ति * अन्य इत्यादि * तदुभयमेकहेलया दूषयन्ति * तत्त्वित्यादि* । अयमर्थः । बृहदारण्यके शाकल्यब्राह्मणे उदानप्रतिष्ठोत्तरश्रवणानन्तरं तूष्णींभूते शाकल्ये तं प्रति याज्ञवल्क्येन, स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान् पुरुषान् व्युदुह्य प्रत्युह्यात्यक्रामीत् तं त्वौपनिषदं पुरुषं पृच्छामीति वाक्ये मूर्तामूर्तब्राह्मणवदेतावत्तादिनिषेधपूर्वकं करणाद्यग्राह्यो नित्योऽसङ्गो निर्दुःखः शारीराद्यानष्टौ पुरुषान् पृथिव्याद्यायतनेषु तत्तल्लोकेषु च विशेषेणोच्चैः स्थापयित्वा पुनस्तत उपसंहृत्य, योऽतिक्रान्तवानेतादृश उपनिषद्वेद्यः पुरुषः पृष्टः ।

तत्राग्राह्यपदे यदि केवलेन्द्रियाग्राह्यत्वं विवक्षितं भवेत् तदाऽनुमानादिनापि वद्यत्वादौपानषदपदमननिप्रयोजनं स्यादतस्तत्र यावत्प्रमाणागोचरत्वमेवास्थेयम । तथासत्यौपानिषदपदेन प्रतिप्रसव एवोपनिषदां सिद्ध्यतीति ब्रह्मणः केवलोपनिषद्वेद्यत्वमेव श्रुतिविवक्षितम् ।

यत्तु भैक्षवे, उपनिषन्मूलप्रमाणकम उपनिषन्महातात्पर्यविषयं वा औपनिषदं, सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्य इतिश्रुतिस्मृतिभ्यामित्युक्तम् । तस्मिन्नपि पक्षे अग्राह्यपदोक्तप्रतिषेधस्य तुल्यत्वान्नतः कोऽपि विशेषः सिद्ध्यति । किन्तूक्तश्रुतिस्मृत्योर्मध्ये वेदपदात् पूर्वकाण्डवेद्यत्वमात्रमधिकमायातीत्यग्राह्यपदविरोधः पूर्ववदेव । नचाधिकागमने केवलोपानिषद्वेद्यत्वहानिः शङ्क्या । सर्वे वेदा इति वाक्यस्याप्यौपनिषदत्वेन मनसैवानुद्रष्टव्य इत्युक्तमनावेद्यत्ववत् सर्ववेदवेद्यत्वस्याप्युपनिषन्मात्रसिद्धत्वात् । एवञ्च मनसोऽपि श्रुत्युक्तसाधनैः शुद्धत्व एव दर्शनकरणत्वं, वेदानामपि वेदान्तविज्ञानसुनिश्चितार्थानामेव वेदनकरणत्वमित्युपनिषद एव मूलप्रमाणत्वमिति, न केवलोपनिषद्वेद्यत्वहानिः । अतः प्रमाणान्तरावेद्यत्वात् सूत्रस्यानुमानत्वकथनमप्रयोजकम् । श्रुतिविचारार्थमेव सूत्रकृतः प्रवृत्तेरिति । एतदेवाभिप्रेत्य भट्टभास्करादिभिरनुमानानि दूषितानीति युक्त्या विचारे ईश्वरपक्षकं पूर्वोक्तमितरव्यतिरिक्तसाध्यकानुमानमप्याश्रयासिद्धमेव ।

अथ नव्याभिनवादिमतमालम्ब्य शरीरिण ईश्वरस्य कर्तृत्वमङ्गीक्रियते तदापि नानुमानस्य श्रुत्यनुसारित्वम । कर्तृत्वनिर्वाहकतया ज्ञानादिवच्छरीरस्यापि जगत्पूर्ववर्तिताया आवश्यकत्वेन तदानीन्तनस्य तस्य नित्यानित्यपुञ्जात्मकविश्वरूपरूपताया वक्तुमशक्यत्वात् । नच नित्यांशमादाय सिद्धिः । तेषां नानात्वेन तेषु शरीरत्वस्य प्रत्येकपर्याप्त्या तद्धर्मैः सूक्ष्मत्वानवयवत्वादिभिर्जगत्करणप्रतिबन्धापत्तेः । नच नित्यपुञ्जात्मकमेव तदङ्गीकार्यमिति वाच्यम् । यस्य पृथिवी शरीरमित्यादौ पृथिव्यादिगतैकत्वव्याकोपात् । सर्वतः पाणिपादं तदित्यादिविरोधापत्तेः । सृष्टिप्रकरणेषु सच्चिदानन्दातिरिक्ततदनुक्त्या तद्विरोधापत्तेश्च । अतो नव्यादिमतीयानुमानस्यापि न श्रुत्यनुसारित्वम् । एतेनैव भैक्षवमपि दत्तोत्तरम् । प्रथमानुमानस्य नैयायिकतुल्यकक्षत्वात् । द्वितीयेऽपि प्रयोगे यदालम्ब्य सत्त्वस्य का-

अनधिगतार्थगन्तृत्वात् प्रमाणस्य । मनननिदिध्यासनयोः श्रवणाङ्गत्वम् ।

रणत्वेन सिद्धिः क्रियते तेषु प्रकरणेषु सत्त्वस्य सर्वकारणतोया अनिश्चायितत्वेनानुमानस्याप्रयोजकत्वात् । नच स्मृत्या तत्परिहरणीयमिति वाच्यम् । श्रुतिविरुद्धायास्तस्या एवानादरणीयत्वात् । मैत्रायणीयश्रुतौ, तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपमित्येवं परप्रेरणेन रजसः सत्त्वस्य च भवनकथनात् । तृतीयेऽपि प्रयोगे सत्त्वस्य परभोग्यत्वेनोपाधित्वाङ्गीकारात् तदुत्पत्तेः पूर्वं परस्य निरुपाधिकत्वेनेच्छाद्यभावात् प्रेरणस्याप्यसम्भवापत्तेः । नैयायिकादिवन्नित्यज्ञानेच्छादीनामीश्वरसमवेतत्वाङ्गीकारे शशरीराभावप्रयुक्तदोषतादवस्थ्यात् सांख्यादिमतालम्बनाडम्बरवैयर्थ्याच्च । अतः श्रुत्यनुसारित्वाभावान्नानुमानं ब्रह्मप्रमितिजननायालम् । नापि योगिप्रत्यक्षम् । विदूरकाष्ठाय मुहुः कुयोगिनामिति द्वितीयस्कन्धवाक्यात् । यमेवैष वृणुत इति, धातुः प्रसादादिति श्रुतेश्च । नच गीतोक्तविश्वरूपदर्शनादिविरोधः । तस्य मूलरूपत्वाभावात् । कालोऽस्मीति तत्रैव निर्द्धारणात् । तत्रापि, रूपं परं दर्शितमात्मयोगादिति वाक्येन तस्यापि भगवद्बलेनैव दर्शनेन योगस्याप्रयोजकत्वाच्च । उपपत्तेश्चेत्यादौ यत्तूपपत्त्युपन्यसनं, तदपि न ब्रह्मस्वरूपज्ञापकतया, किन्तु हेत्वाभासैः परान्तरशङ्कानिरासकतयेति वक्ष्यते । आचारदर्शनादिति सूत्रन्तु कर्मविषये, न तु ब्रह्मविषय इति न किञ्चिदेतत् । अतस्तदुपेक्ष्यमेव ।

ननु श्रुत्युक्तं सच्चिदानन्दात्मकं शरीरमङ्गीकृत्यानुमाने दोषनिरासे दोषाभावात् कथमुपेक्ष्यत्वमित्यत आहुः * अनधीत्यादि * तथाच सिद्धसाधनत्वाच्छ्रुत्युक्तसकलविशेषविषयकप्रमित्यजनकत्वाच्चाप्रामाण्यमित्यर्थः । ननु मन्तव्य इति श्रुत्या मननं विहितम् । तच्च युक्तिभिरनुचिन्तनम् । युक्तयश्चानुमानरूपा इति श्रुत्यनुक्तानुमानस्य प्रामाण्यं श्रुत्यैव सूच्यत इति कथं पूर्वोक्तमतस्योपेक्ष्यत्वमुच्यत इत्याशङ्कायामाहुः * मननेत्यादि * तथाच मननादेरङ्ग-

सन्देहवारकत्वाच्छास्त्रस्यापि तदङ्गत्वमिति ॥ २ ॥

तत्रैतत् स्यात् । तत्र किं समवायि निमित्तं कर्तृ वा । किमतो यद्येवम् । एवमेतत् स्यात् । यद्येकमेव स्यात् तदा क्रिया-

---

स्वयोधनादनुमानादेः सहकारित्वं न निवार्यते, किन्तु करणत्वमतस्तदंशे उपेक्ष्यत्वम् । नच सर्वज्ञत्वासिद्धिः । विपश्चित्त्वश्रुतेर्यः सर्वज्ञः सर्वविदिति श्रुत्यन्तराच्च तत्सिद्धेरिति । उपपत्तेश्चेत्यादिसूत्रेष्वन्वयत एव तन्निर्देशो, न तु करणत्वेनेत्यर्थः । एतदेवोपकारकत्वं स्मृत्यादिष्वपीत्यतिदिशन्त्याहुः * सन्देहेत्यादि * । * तदङ्गत्वमिति * मननाङ्गत्वम् । अत एव, स्मृतेश्चेत्यादिसूत्राणि 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं चालयिष्यती'त्यादिवाक्यानि च । एतस्यैव निष्कर्षो निबन्ध उक्तः । 'वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि । समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् । उत्तरं पूर्वसन्देहवारकं परिकीर्तितम्' इति । तथाच सन्देहवारकतया कल्पसूत्रवद् व्याख्यानरूपत्वान्नानुवादकत्वमित्यर्थः । कारिकार्थस्तु तद्विवरणग्रन्थाद् बोध्यः ।

इति द्वितीयाधिकरणम् ।

एवं जिज्ञास्यब्रह्मणो लक्षणं तत्र प्रमाणं च निर्णीय तस्य किं ब्रह्मण कारणतामात्रे तात्पर्यमुत तत्तद्विशेषविशिष्टायां तस्यामिति संशयमपनेतुमग्रिममधिकरणमित्याशयेन तदवतारयन्ति * तत्रैतत् स्यादित्यादि * सन्देहवारकेऽस्मिञ्छास्त्रे वक्ष्यमाणं विचार्यं स्यात् । तदाहुः * तत्र किमित्यादि * तत्रेति श्रुतौ । मम तु तदिति प्रथमान्तपाठोऽत्र प्रतिभाति । चोदयन्ति *किमतो यद्येवमिति* कारणतामात्रादरेणैव जगत्कारणीभूतब्रह्मप्रमित्या प्रमाणसाफल्ये जाते पुनः संशयपङ्कं निपात्य तन्निरसनार्थकात् प्रयासात् किं फलान्तरं सम्पाद्यमित्यर्थः । तत्रोत्तरमाहुः * एवमेतत् स्यादिति * वक्ष्यमाणेन विचारेण वक्ष्यमाणदोषनिवृत्तिरूपं फलं स्यादित्यर्थः । तदुपपादयन्ति * यद्येकमित्यादि * यदि कारणतामात्रादरेण प्रमितेः पूर्तिरङ्गीकार्या तदैक निमित्तादिषु वक्तव्यम् । तत्र यदि दण्डादिवन्निमित्त, यदि वा

ज्ञानशक्त्योर्निरतिशयत्वं भज्येत । मृदादिसाधारण्यं च स्यात् ।

मतान्तरवत् कथमेवं सन्देहो यावता, यतो वा इमानीत्यादिभ्यो निःसन्देहश्रवणात् । एवं हि सः । पञ्चमी श्रूयते यत इति । पञ्चम्यास्तसिरिति । आत्मन इत्यपि पञ्चमी, निमित्तत्वे न सन्देहः । पञ्चम्या निमित्तत्वकथनात् । उपादानत्वे कर्तृत्वे च सन्देहः । तद्वाचकाश्रवणात् कल्पनायां प्रमाणाभावात् । समवायित्वे पुनः सुतरां सन्देहः । एवं प्राप्त आह ।

तत्तु समन्वयात् ॥ ३ ॥

प्रयोज्यवत् कर्तृ तदा यथायथं क्रियाशक्तेर्ज्ञानशक्तेश्च निरतिशयत्वभङ्गः । दण्डाद्यपेक्षया कर्तरि क्रियाशक्तेः प्रयोज्यापेक्षया प्रयोजके ज्ञानशक्तेराधिक्यदर्शनात् । यदि मृद्वत् समवायित्वं, यदि वा कुलालादिवत् कर्तृत्वं तदा तत्साधारण्यं, विकृतत्वमनाप्तकामत्वं चेति । तथाचैतद्दोषनिरासः फलमित्यर्थः । अत्र चोदयति * मतान्तरवदित्यादि * साङ्ख्यन्यायादिरूपस्य मतान्तरस्य स्मृतिरूपत्वात् तज्जनकानुभवे दुष्टत्वस्य सम्भावितत्वात् तत्रोचितः सन्देहः । अत्र तु तदभावान्न तस्य सम्भावनेत्यर्थः । सन्देहोत्पत्तिप्रकारमाहुः * एवमित्यादि * । * निमित्तत्वकथनादिति * विभाषागुणेऽस्त्रियामित्यत्राकारप्रश्लेषे अगुणादपि हेतोः पञ्चम्यङ्गीकृता । यथा धूमाद् वन्हिमानित्यादौ । एवं प्रकृतेऽपि तत्कथनात् । तथाच तावन्मात्राङ्गीकारे उक्तरीत्या क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गप्रसङ्गः । तन्निवृत्त्यर्थमुपादानत्वकर्तृत्वयोरप्यङ्गीकारे प्रमाणाभावात् सन्देहः । समवायस्याग्रे दूषितत्वात् समवायित्वे विकृतत्वस्यापत्तेश्च तत्र सुतरां तथेत्येवं समवायित्वेऽत्यन्तं सन्दिग्धे सूत्रमाहेत्यर्थः । एतेनास्याधिकरणस्य पूर्वेण सह सामान्यविशेषभावः सङ्गतिरपि दर्शिता । * तत्तु समन्वयात् * । एवं पक्षत्रयेऽपि दोषा इति तान् विहाय श्रुत्युपपत्त्यर्थं केवलं तटस्थकारणत्वमादरणीयमित्याशयेन पूर्वपक्षयुक्तिमाहुः

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । निमित्तत्वस्य श्रुतिसिद्धत्वात् मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते । तद् ब्रह्मैव समवायिकारणम् । कुतः । समन्वयात् सम्यगनुवृत्तत्वात् । अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् । नामरूपयोः कार्य्यरूपत्वात् ।

निमित्तत्वस्येत्यादि ननु तुशब्दो विशेषावधारणपूजाव्यावृत्तिपादपूरणाद्यर्थहेतुषु दृष्टस्तत् कथं व्यावृत्त्यर्थ एवात्र गृह्यत इत्यत आहुः *मतान्तरेत्यादि* शास्त्रदृष्ट्यातूपदेशो वामदेववदित्यादौ तथा दर्शनादत्रापि तथेत्यर्थः। *तद् ब्रह्मैव समवायिकारणमिति* तद् अनुभूतं प्रसिद्धं वा समवायिकारणं ब्रह्मैवेत्यन्वयः। ननु सम्यगनुवृत्त-वमनारोपितानागन्तुकरूपेण सर्वं लक्ष्यीकृत्य वर्तमानत्वम् । तज्जगति ब्रह्मणः कथम् । न हि जगति ब्रह्मणोऽनारोपितानागन्तुकेन ब्रह्मत्वेन रूपेणान्वयोऽवगम्यते, यथा पटे तन्तोर्घटे वा मृद इत्याकाङ्क्षायां तत्राहुः *अस्तीत्यादि* तेषु तेषु वस्तुषु तत्तत्पुरुषप्रतीतिविषयेणास्तित्वादिधर्मेणावगम्यमानात् सदादिरूपेणान्वयात् । यो हि यदन्वितः स स्वस्मिंस्तद्विषयां प्रतीतिमाधत्ते, यथा घटादिः पृथिवीत्यादिप्रतीतम् । तथाच सर्वमस्तीत्यादिप्रतीतिजनकत्वात् सदाद्यन्वितम् । ततश्च सदाद्यात्मकं सच्चिदानन्दात्मकं च ब्रह्मेति तेन रूपेण ब्रह्मान्वयोऽवगम्यत एवेत्यर्थः । ननु जगत्यस्त्यादिसमन्वयो न ब्रह्मणः समवायित्वगमकः । नामरूपयोरपि समन्वयात् । नच तयोर्नानात्वान्नान्वय इति शङ्क्यम् । तयोः प्रतिनियतरूपेणानन्वयेऽप्यवच्छेदकावच्छेदेनान्वयस्य निराबाधानुभवात् । नच रूपस्य व्यभिचारः शङ्क्यः । तस्य व्यवहार्यत्वपरत्वात् । अवकाशादिरूपेण व्यवहार्यत्वस्याकाशादावपि सत्त्वादिति चेत् तत्राहुः *नामरूपयोः कार्यरूपत्वादिति* नामरूपे कर्मणोऽप्युपलक्षणे । त्रयं वा इदं नाम रूपं कर्मेति श्रुतेः प्रपञ्चस्यैतत्त्रयात्मकत्वात् । तथाच, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेर्नाम्नां रूपेषु नियमने कृत एव जगतः कार्यत्वेन प्रतीतेस्ते एव कार्यस्य कार्यताव्यञ्ज-

कस्वरूपभूते । यदा हि पृथुबुध्नोदराकारोऽर्थो भवति तदा तस्य तादृशं रूपं घट इति नाम च भवति । तदपि न स्वतः किन्तु व्याकरणश्रुतेस्तत्करणोत्तरम् । यथा हि बालके जाते तदवयवानालोक्य व्यक्तौ निश्चितायां नाम नियमयति, एतन्नामाऽयमिति । तद्वत् । अतः कर्मापि मूलवस्तूत्तरकालीनं कार्यस्वरूप एव प्रविशतीत्यागन्तुकत्वान्न तत्समन्वयः, किन्त्वन्वयमात्रं तेषामतो न ब्रह्मणः समवायित्वबाधकमित्यर्थः ।

ननु तथाप्यस्त्यादिसमन्वयस्य न ब्रह्मसमवायिनागमकत्वम् । कार्यमात्रे प्रकृत्यात्मकानां सत्त्वरजस्तमसामनुवृत्तिदर्शनात् । यथाहुः सांख्याः । 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' इति गुणानां स्वरूपं वृत्तौ श्लोकोक्त्वा 'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिरिति' । एतदर्थस्तु सत्त्वादयो गुणाः सुखदुःखमोहस्वरूपाः प्रकाशप्रवृत्तिनिग्रहफलका यथाक्रमं बोध्याः । ते पुनरन्योन्याभिभवनाऽन्योन्याधारत्वान्योन्यजननान्योन्यमिथुनक्रियावृत्तयः स्वत एव सन्तो यथा वर्तितैले अग्निविरोधिनी सहाग्निना रूपप्रकाशनं कार्यं कुरुतो, यथा वा वातपित्तकफा दोषाः परस्परविरुद्धा अपि शरीरधारणलक्षणं कार्यं कुर्वन्ति, तथैते परस्परविरुद्धा अप्यनुवर्तन्ते, कार्यं च कुर्वन्तीति । तथाच प्रयोगः । महदादिकार्यं सुखदुःखमोहगुणकद्रव्यजन्यं कार्यत्वे सति सुखदुःखमोहगुणकद्रव्यत्वात् । यथैका रूपयौवनशीलवती स्त्री भर्तुः सुखदा सपत्नीनां दुःखदा पुरुषान्तरस्य मोहदेति तद्वदिति । नच सुखादीनामान्तरत्वेनानुभवात् स्त्र्यादीनां सुखादिगुणकत्वे मानाभावः शङ्कनीयः । स्त्रीचन्दनादिजन्यस्य सुखस्य तत्तदवयवेषु बहिर्देशानुभवेन तज्जनकेषु स्त्र्यादिष्वपि तस्य बहिरेव सत्तानिश्चयात् । नच तस्यानुभवस्य भ्रान्तत्वं शक्यवचनम् । तथा सति देहे मे सुखं, शिरसि मे वेदनेत्याद्यनुभवान्तरस्यापि बाधप्रसङ्गात् । एवं तु स्त्रीसुखं चन्दनसुखमित्याद्यभिलापोऽपि युज्यते । आन्तरत्वेनानुभवस्तु मानसस्यैव । एवं सिद्धे तेषां बाह्यत्वे स्त्र्यादिसंसर्गेण बहिरेव तेऽभिव्यज्यन्ते । घृतद्रवत्वादिवत् । तथाच प्रयोगः । विमताः सुखादयो न साक्षादात्मधर्माः । बाह्यत्वे सत्यात्मनि प्रतीयमानत्वात् ।

प्रकृतेरपि स्वमते तदंशत्वात्। अज्ञानात् परिच्छेदाभिगत्वे।

गौरत्वादिवदिति। तथा, रूप्यादयः सुखादिगुणकाः सुखादिजनकत्वात्। यद् यज्जनकं तत् तद्गुणकं, प्रकाशशैत्यादिजनकवन्हिचन्दनादिवदिति च। एवं सिद्धे तेषां तद्गुणकत्वे तेषां द्रव्याणां तद्गुणात्मकत्वमप्यनुमेयम्। तथाच प्रयोगः। विमताः सुखाद्यात्मकाः, सुखाद्यविनाभूतत्वात्। तन्मात्राविनाभूतमहाभूतवत्। तथा, सुखादयो द्रव्यसूक्ष्मावस्थारूपाः। तदविनाभूतत्वे सति तज्जनकत्वात्। महाभूताविनाभूततज्जनकतन्मात्रवदिति। नच प्रथमे क्षणे द्रव्यं यावद् गुणशून्यमेवोत्पद्यत इति वाच्यम्। प्रत्यक्षबाधितत्वात्। अपाकजस्य रूपादेरुत्पत्तिदशायामप्यनुभवात्। एवं सुखादावपि बोद्धव्यम्। पुत्राद्युत्पत्तिकाल एव पुरुषभेदेन सुखदुःखाद्युत्पत्तिदर्शनतस्तस्य बालादेस्तदानीमपि तज्जनकतया तद्गुणकत्वतदविनाभावयोर्निश्चयादिति। एवं मैत्रायणीये, तमो वा इदमेकमेवाग्र आसीत् तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयातीति। श्वेताश्वतरेऽपि, प्रधानक्षेत्रज्ञपतिर्गुणेश इति तमःशब्दवाच्यायाः प्रकृतेर्गुणानां च सृष्ट्यादौ सत्ताश्रवणात् पुराणेषु मन्वादिषु तथा स्मरणात् सिद्धे प्रकृतेः सत्त्वे सर्वस्य त्रिगुणत्वेन गुणमय्याः प्रकृतेरेव समन्वयस्य सिद्धत्वान्न ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः * प्रकृतेरित्यादि *। 'आसीज्ज्ञानमयो ह्यर्थ एकमेवाविकल्पितम्। यदा विवेकनिपुणा आदौ कृतयुगे युगे। तन्मायाफलरूपेण केवलं निर्विकल्पितम्। वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत्। तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका। ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तस्या अंशत्वे जन्यत्वे च निश्चिते तद्रूपस्याप्यागन्तुकत्वेन तदन्वयस्यापि समन्वयत्वाभावान्न तेन ब्रह्मणः समवायित्वभङ्ग इत्यर्थः। ननु भवत्वेवं, तथापि तदन्वयस्य सांख्यैः साधितत्वात् तेनैव रूपेण ब्रह्मान्वयोऽस्तु, किमस्त्यादिरूपान्वयाग्रहणेत्याशङ्कायामाहुः * अज्ञानादित्यादि *। अयमर्थः। प्राकृती या प्रीतिः सा आज्ञानिकी, न तु

ज्ञानेन बाधदर्शनात् । नानात्वं त्वैच्छिकमेव । जडजीवान्तर्यामिष्वेकैकांशप्राकट्यात् । कथमेवमिति चेत् । न । सद्रूपे घटरूपक्रियास्विव तारतम्येनाविर्भाववज्जडेऽपि भानत्वादिप्रतीतेस्तारतम्येनाविर्भावोऽङ्गीकर्त्तव्यः । भगवदिच्छाया नियामकत्वात् ।

वास्तवी । तत्र गमको देशतः कालतश्च परिच्छेदः । यथा कस्यचित् किञ्चित् प्रियं किञ्चिन्न । तदपि कदाचित् प्रियं, कदाचिन्न । तथा सति तस्या औपाधिकत्वम् । मैत्रेयीब्राह्मणे तथैव सिद्धत्वात् । वास्तवस्य नैसर्गिकतायां वस्तुसद्भावे ज्ञानेन तद्बाधायोगाच्च । अतो वास्तवं प्रियत्वमात्मन्येवेत्यात्मन एव दर्शनादिकमावश्यकमिति बोधयित्वा इदं सर्वं यदयमात्मेत्यनेन सर्वस्यात्माभिन्नत्वं श्रावयति । तथा तैत्तिरीये, आनन्दं ब्रह्मणो विद्वानित्युपक्रम्य, एतꣳह वाव न तपति किमहꣳ साधु नाकरवं किमहं पापमकरवमिति स य एवं विद्वानेते आत्मानꣳ स्पृणुत इत्यात्मत्वानुसन्धानेन तत्कृततापाभावं च श्रावयति । अत एवमात्मानन्दज्ञानेन प्राकृतिकप्रियत्वादौ बाधदर्शनान्न तद्रूपेणान्वय आद्रियते । किन्त्वात्मत्वेन सर्वस्मान्निरुपाधिप्रियत्वस्य बोधनादबाधितेनैवरूपेण श्रुत्यविरोध इति तदन्वय एवाद्रियत इत्यर्थः । ननु यद्येवं तदा नानात्वमपि नादरणीयम् । तस्यापि प्राकृतिकत्वादित्यत आहुः * नानात्वमित्यादि * बहु स्यामिति श्रावणात् तन्न प्राकृतिकमित्यर्थः । ननु यदीदमप्राकृतं स्यात्तदास्याद्यंशत्रयानुवृत्तिरनुभूयेत, सा तु न दृश्यतेऽतो न तथेत्यत आहुः *जडेत्यादि* जडे सदंश , जीवे 'ज्ञानं त्वन्यतमो भाव' इति वाक्याज्ज्ञानांशस्यान्तर्यामिण्यानन्दांशस्य प्राकट्यात् । तथाच प्राकट्याभावहेतुकमदर्शनं नानुवृत्तिबाधकमित्यर्थः । अत्र चोदयन्ति * कथमित्यादि * सर्वत्र त्रिनयसद्भावेऽपि तत्र तत्रैकैकांशप्राकट्यं कयोपपत्त्याङ्गीक्रियत इत्यर्थः । अत्र समादधते * नेत्यादि * एवमाक्षेपो न युक्तः । यतोऽस्तीति प्रत्ययगोचरं सद्रूपं एकस्मिन्नेवार्थे घट इति गुणित्वेन, रूपमिति तदुपसर्जनतया गुणत्वेन, क्रियेति क्षिक्षणावस्थायितयाऽऽशुतरविना-

शित्वेन यथा सदंशस्य तारतम्येनाविर्भावस्तथा जडेऽपि आनन्दप्रिय-त्वयोस्तारतम्येनाविर्भावोऽङ्गीकार्य । नन्वेवमङ्गीकारे का वा युक्ति-रितिचेदुच्यते । श्रीभागवते कंसस्यारिष्टदर्शनस्थले, अदर्शन स्व-शिरसः प्रतिरूपेषु सत्स्वपीत्यासन्नमृत्योः शिरःप्रतिबिम्बादर्शनमु-क्तम् । तथा द्वितीयस्कन्धे, घ्राणं च गन्ध इत्यादिवाक्यैरिन्द्रियाणां सजातीयग्राहकत्वं च बोधितम् । एवं सत्युक्तस्थले यच्छिरसोऽग्रहणं तत्र हेतुत्वेन विषयस्य चक्षुषो वा आवरणं वक्तव्यम् । तत्र न शिर-सः । तस्यान्येन दर्शनात् । नापि चक्षुषः । तदानीं तेन विषयान्तरद-र्शनात् । अत उभयोपपत्त्यर्थं विषयनिष्ठज्ञानांशस्य चक्षुः प्रत्येवावर-णमिति वक्तव्यम् । एवं लोकाञ्जनस्थले वैषयिकज्ञानांशावरणम् । सर्वांशावरणे तु स्पार्शनमपि तस्य न स्यादिति । एवमेकत्र ज्ञानांश-सिद्धावन्यत्रापि तथा सिद्ध्यति । एवं प्रियत्वांशेऽपि बोध्यम् । यद्वा पदार्थमात्रस्य ज्ञानेनैव प्रकाशाज्ज्ञानजनकत्वाच्च साङ्ख्योक्तप्रकारे-णैव ज्ञानाविनाभावसिद्धौ ज्ञानात्मकत्वस्यापि सिद्धिः । परन्तु तत्र जडे सदंशवत् प्रकटम् । सन् घटः, सन् पट इतिवज्ज्ञानं घट इति सामानाधिकरण्याप्रतीतेः । प्रियत्वं तु ततोऽप्यप्रकटम् । तत्सदसाधा-रणात्वात् । जीवे तु चिदंशस्यापि प्राकट्यम् । चेतनत्वेनैव सदा प्र-तीयमानत्वात् । सदंशस्तु न्यग्भूतः । विशेषणतयैव प्रतीयमानत्वात् । प्रियत्वं तु ततो न्यग्भूतम् । उक्तयुक्तेः । अन्तर्यामिणि तु प्रियत्वमेव मुख्यमन्यदुभयं न्यग्भूतम् । तद्द्रष्टॄणां प्रियत्वेनैवानुभवगोचरत्वा-दिति । अत्र नियामिका तु, प्रजायेयेति भगवदिच्छैव । अन्यथा पूर्वो-क्ताकारेणैव नानाभावात् सृष्टिसिद्धावेतदाकारान्तरकथनस्य वैय-र्थ्यापत्तेः । उच्चनीचभावादिनाऽऽविर्भावस्यैव प्रकर्षपदार्थत्वेन विव-क्षितत्वादिति । एतेन दुष्टत्वादिप्रतीतावपि भगवदिच्छैव हेतुरिति न तयापि समवायित्वे दोषप्रसक्तिः । क्रीडार्थं तथैव बुद्ध्युत्पादनात् । एतदप्येकादशस्कन्धीयविंशैकविंशाध्यायस्थैर्गुणदोषदर्शनस्य कर्मनियमार्थत्वबोधकवाक्यैरवसीयत इति नात्रापि शङ्कालेशः । अत एव न कश्चिदपि कुत्सितत्वं ब्रह्मविदां भासते । अत एवैकादश एवोक्तम्, 'किं वर्णितेन बहुना लक्षणं गुणदोषयोः । गुणदोषदृशिर्दोषो गुण-स्तूभयवर्जित' इति । नचैवं ब्रह्मणः समवायित्वे, सैषा विद्या जगत् सर्वमित्यादितापनीयश्रुतिविरोधः । तस्याग्रे, न विलक्षणत्वाधिकरणे

नच साधारण्येन सर्वजगत् प्रति परमाण्वादीनामन्वयः सम्भवति । एकस्मिन्ननुस्यूते सम्भवत्यनेककल्पनाया अन्याय्यत्वात् । लोके कर्तृविशेषवद् उपादानविशेषग्रहणेऽपि न ब्रह्मणि व्यभिचारः ।

समाधेयत्वात् । तत्रापि तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपीति वक्ष्यमाणत्वादिति । अत एव श्रीभागवतारम्भश्लोकेऽपि ब्रह्मणः समवायित्वं ग्राहयितुं, जन्माद्यस्य यतोऽन्वयादित्यनेनान्वय एव हेतुत्वेनोक्तः । नच तत्रेतरत इत्यनेन व्यतिरेकस्याप्युक्तत्वात् तस्यात्र कुतो नोक्तिरिति शङ्क्यम् । ब्रह्मणो व्यापकत्वेनाभावरूपस्य व्यतिरेकस्याभावाद्विशेषेणातिरिक्तत्वरूपो व्यतिरेकः कृत्स्नप्रसक्तिवारणाय तत्र विवक्षितः । स त्वनारोपितानागन्तुकरूपबोधकेन समुपसर्गेणैव बोधित इत्यतः पृथगनुक्तेः । एवं चतुःश्लोक्यामप्यन्वयव्यतिरेकाभ्यामित्यत्रापि बोध्यम् । एतदेवैकादशस्कन्धीये, 'यथा हिरण्यं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वद्' इति वाक्येऽपि निष्कृष्य दृष्टान्तेन बोधितं ज्ञेयम् । प्रकृतमनुसरामः । नन्वेतादृशोपपादनसापेक्षब्रह्मान्वयोपगमापेक्षया तदनपेक्षः परमाणूनां भूतानां वान्वयो ज्यायान् प्रतिपत्तिसौकर्यात् । तदर्थमेव सर्वेषां प्रयत्नादित्याशङ्कायामाहुः *नचेत्यादि* परमाण्वादीनामित्यादिपदेन, कालः स्वभावो नियतिर्यदृच्छेति श्रुत्युक्तानां कालादीनां संग्रहः । जगदन्तःपातिषु दिगाकाशादिषु परमाणूनामन्वयाभावात् । तेषां नित्यत्वाभ्युपगमेऽपि स्वभावान्वयस्त्ववश्यं वाच्यः । एवं मतान्तरे कालस्य प्रकृतेश्च वाच्यः । तथा सति विप्रतिपन्नानामनेकेषां परमाणूनां चानेकेषामन्वयकल्पनस्य न्यायविरुद्धत्वम् । प्रतिपत्त्यसौकर्यात् । किन्त्वेकस्मिन् ब्रह्मणोऽन्वये सम्भवति तस्यैवानुस्यूतस्य समवायित्वं युक्तमित्यर्थः । एकस्मिन् समवायिनीति वार्थः । नन्वनेकसमवायिकल्पनस्यान्याय्यत्वे मृत्तन्त्वादेरपि समवायित्वं न स्यात् । तथाच प्रत्यक्षविरोध इत्यत आहुः * लोक इत्यादि* तथाच यथा लोके कुलालादीनां चतुर्मुखान्तानां कर्तृत्वेऽपि

अलीकप्रतीतेऽस्तित्वादिप्रतीतावपि सम्यगन्वयाभावाच्च कार्य्यत्वव्यभिचारौ । तस्माद् ब्रह्मण एव समवायित्वम् । एतत् सर्व्वं श्रुतिरेवाह । स आत्मानं स्वयमकुरुतेति । निमित्तत्वन्तु स्पष्टमेव सर्व्ववादिसम्मतम् ।

तत्तन्मते प्रकृतेरीश्वरस्य च सर्व्वनियामकत्वाच्च कर्तृत्वं हीयते । एवं लोके तन्त्वादीनां परमाण्वन्तानां प्रकृत्यन्तानां चोपादानत्वेन ग्रहणेऽप्यस्मन्मते ब्रह्मणो मूलकारणत्वाच्च समवायित्वहानिरित्यर्थः । ननु शुक्तिरजतादौ स्वाप्निकेषु चास्तित्वं प्रतीयत इति तेषु सदन्वयो वक्तव्यस्तथा सति तस्यापि ब्रह्मकार्य्यत्वे जगत्तुल्यतया सत्यत्वं स्यात् । तत्तु विशेषदर्शनबाधितत्वादशक्यवचनम् । ततश्च न तस्य ब्रह्मकार्य्यत्वमपि । अतोऽकार्य्येऽपि सदन्वयाच्च तेन ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः * अलीकेत्यादि * तथाचान्वयस्य न गमकत्वमपि तु समन्वयस्य । समन्वयस्त्वनारोपितानागन्तुकरूपेणान्वयः । अलीकप्रतीतरजतादौ तु सत्ता आरोपितेति सत आरोपितरूपेणान्वयाच्च तस्य ब्रह्मकार्य्यतागमकत्वम् । तस्यैवाभावाच्च न ब्रह्मणोऽपि समवायित्वव्यभिचार इत्यर्थः । सिद्धमाहुः * तस्मादित्यादि * नामरूपयोः कर्मणः सुखदुःखमोहानां चागन्तुकत्वेन, परवादवादीनां चासाधारणत्वेन, कालादेस्तथात्वे विप्रतिपन्नत्वेन, अलीकप्रतीते सत्त्वस्यारोपितत्वेन तेषामन्वयस्यासम्यक्तया प्रकटाप्रकटानां वास्तविकानां सच्चिदानन्दानामेव समन्वयाद् ब्रह्मण एव समवायित्वं निश्चयमित्यर्थः । नन्वेवं वादिविसंमताग्रहे किं बीजमत आहुः * एतदित्यादि * पूर्वाधिकरणोक्तं कर्तृत्वं शास्त्रप्रमाणकत्वम्, एतदधिकरणोक्तं समवायित्वं च कर्तृकर्मत्वबोधकविभक्तिभ्यामेकस्यैव श्रुतिर्वदतीत्येतदेव बीजमित्यर्थः । अन्यथा श्रुतावुपचारापत्तेः । एवञ्च, यत इत्यत्र हेतौ या पञ्चमी सा, जनिकर्तुः प्रकृतिरित्यत्र प्रकृतिपदेन समवायिरूपं कारणं परामृश्य विहितेति निमित्तवदुपादानमपि सैव वक्तीति वाचकशब्दश्रवणमप्रत्यूहम् । तथाचैवं विचारे ब्रह्मणः सर्व्व-

विधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धम् । तत्र स्वस्यैव समवायित्वेन कर्तृदोषभूतमनासकामत्वं, क्रियाज्ञानयोः सातिशयत्वं च वारितम् । कर्मणि आत्मपदेनाविकृतत्वबोधनाद् विकृतत्वं च वारितम् । तेन दोषराहिता ब्रह्मणः सर्वविधा कारणतेत्यनेनाधिकरणेन निर्णीतम् । समन्वयपदव्याख्यानेनात्र समवायस्वरूपमपि बोधितम् । अनारोपितानागन्तुकरूपेणानुवृत्तिरेव समवाय इति । इदमेव च तादात्म्यम् । आगन्तुकरूपेण भेदसहिष्णुत्वेऽप्यनागन्तुकरूपेणाभेदादिति । न तु वैशेषिकप्रतिपन्न इति न कोऽपि विरोधः । एतस्य सम्बन्धत्वमैच्छिकभेदोत्तरं द्विनिष्ठत्वे विशिष्टबुद्धिनियामकत्वाज्ज्ञेयम् ।

विज्ञानेन्द्रभिक्षुस्तु जन्मादिसूत्रे अधिष्ठानकारणमतिरिक्तमङ्गीकृत्य, यत्राविभक्तं येनोपष्टब्धं च सद् उपादानकारणं कार्याकारेण परिणमते तदधिष्ठानकारणम् । यथा सर्गादौ जलाविभक्ताः पार्थिवसूक्ष्मांशास्तन्मात्राख्या जलेनैवोपष्टम्भात् पृथिव्याकारेण परिणमन्त इत्यतो जलं पृथिव्या अधिष्ठानकारणमिति । अत्र प्रमाणं तु, 'आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च । एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति कैवल्योपनिषद्वाक्यम् । 'यस्य यत् कारणं प्रोक्तं तस्य साक्षान्महेश्वरः । अधिष्ठानतया स्थित्वा सदैवोपकरोति च' इति पुराणान्तरवाक्यं च । एतादृशकारणत्वमेवाधिष्ठानकारणत्वमिति मूलकारणत्वमिति चोच्यते । ब्रह्मणश्च स्वाविभक्तप्रकृत्याद्युपष्टम्भकत्वं साक्षितामात्रेणेति जगत्कारणत्वेऽपि ब्रह्मणो न विकारित्वम् । न वा प्रकृतिपुरुषादिष्वतिप्रसङ्गः । सर्गात् पूर्वमन्येषां साक्षित्वासम्भवात् । अत एवाविकारिचिन्मात्रत्वेऽपि ब्रह्मणो जगदुपादानत्वं, जगदभेदश्चोपपद्यते । विकारिकारणवदधिष्ठानकारणस्याप्युपादानत्वव्यवहारात् । कार्याविभागाधारत्वस्यैवोपादानसामान्यलक्षणत्वात् । अविभागश्चाधारतावत् स्वरूपसम्बन्धविशेषोऽत्यन्तसम्मिश्रणरूपो दुग्धजलाद्येकताप्रत्ययनियामकः । तत्र समवायसम्बन्धेन यत्राविभागस्तद्धि विकारिकारणम् । यत्र कार्यस्य कारणाविभागेनाविभागस्तदधिष्ठानकारणम् । यथा जलं पृथिव्या इति । न हि जलस्य पृथिवी साक्षादेव विकारः । तन्मात्राणां भूतप्रकृतित्वश्रुतिस्मृतिविरोधात् । नच द्वयोरेवोपादानत्वम् । विजातीयानामनारम्भकत्वा-

त । एवमाकाशादीनां वाय्वाद्युपादानत्वमप्यधिष्ठानतयैव द्रष्टव्यम् । सम्भवत्यविरोधे सृष्टिप्रक्रियायां वैशेषिकसाङ्ख्ययोरुभयोरप्यत्र विरोधानौचित्यादिति । वैशेषिकादिभिरपीदृशं ब्रह्मण. कारणत्वमिष्यत एव । परन्तु तैरिदमपि निमित्तकारणत्वमिति परिभाष्यते । अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति। ब्रह्मणश्च जगत्कर्तृत्वं स्वोपाधिमायोपाधिकम् । परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्याद्योपाधिकमित्याह ।

तदसङ्गतम् । आत्मैवेदमग्र आसीदित्यादिश्रुतिषु दृश्यमानस्य जगतः पूर्वमात्मरूपत्वादिबोधनेनेतराभावसिद्धावविभागाख्यस्य स्वरूपसम्बन्धस्य तदानीं वक्तुमशक्यत्वेन लक्षणेऽव्याप्तेः । गार्गीब्राह्मणे भूतभव्यस्याकाशे आकाशस्य चाक्षरे ओतप्रोतत्वकथनेन तादृशत्वस्य च, ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पट इत्यादावुपादानतागमकत्वेन, आथर्वणानां गोपथब्राह्मणारम्भे ' ब्रह्म ह वा इदमग्र आसीत् स्वयं त्वेकमेव तदैक्षत महद् वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम इति द्वितीयस्य ब्रह्ममात्रस्वभावणपूर्वकं सृष्टिकथनेन ' विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया । यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् इति तृतीयस्कन्धे विश्वस्य ब्रह्मतन्मात्रत्वकथनेन च द्वितीयस्य विश्वस्य च साक्षादुपादेयत्वे ब्रह्मण उपादानत्वस्यादण्डवारितत्वाच्च । नचोक्तकैवल्यश्रुतिविरोधः । तस्या अवान्तरसृष्टिविषयकत्वात् । एवकाराग्रपदाद्यभावेन पुरत्रयलयलिङ्गेन च तथा निश्चयात् । नापि स्मार्तसदापदविरोधः । प्राथमिकसृष्ट्यनन्तरं तथात्वेऽप्यविरोधात् । उक्तश्रुताविवहापि प्राथमिकसृष्ट्यारम्भकालगमकस्याभावात् । उक्तदृष्टान्तोऽप्यसङ्गतः । पृथिव्यादितन्मात्रस्यैव साक्षाज्जलादिजन्यत्वात् । ' रसमात्राद् विकुर्वाणादम्भसो दैवनोदितात् । गन्धमात्रमभूत् तस्मात् पृथ्वी घ्राणस्तु गन्धग इत्यादितृतीयस्कन्धवाक्यैस्तथा निश्चयात् । विजातीयारम्भस्यात्रापि तादवस्थ्यात् । नच विजातीयानामनारम्भकत्वम् । तन्तुत्वपटत्वयोर्भेदेन तत्रैव विजातीयारम्भदर्शनात् । द्रव्यत्वादिना साजात्यस्य भवदनभिमतेऽपि सत्त्वात् । नच द्रव्यत्वव्याप्यजातिभिदेव साजात्यं विवक्षितमिति वाच्यम् । अप्रयोजकत्वात् । गोमयादि-

ष्यो वृश्चिकाद्युत्पत्तिदर्शनात् । चलत्यनिले सूक्ष्मानलेनापि यत्र महान् दावानलस्तत्रानलावयवानां स्वल्पत्वेन ततो महानलस्याशक्यवचनतयाऽनिलेनैव तदुत्पत्तेः सार्वजनीनत्वाच्च । यत्र क्वचन स्विद्यति शोचते वा पुरुषस्तेजस एव तदध्यापो जायन्त इत्यादिश्रुतिभिरपि तथा निश्चयाच्च । साङ्ख्यवैशेषिकादीनां परस्पराविरोधाग्रहस्य प्रकृतानुपयोगित्वेन तथायासस्यापार्थत्वाच्च । एवं ब्रह्मणो मायोपाधिकं कर्तृत्वं प्रकृतितत्कार्योपाधिकं परिणाम्युपादानत्वमप्यवान्तरसृष्टिविषयकमेव । आनन्दरूपममृतं यद् विभाति, सच्चिदानन्दरूपायेत्यादिश्रुतिभिरानन्दमात्रकरपादमुखोदरादिरित्यादिस्मृतिभिश्च ब्रह्मण आनन्दाकारत्वे सिद्धे मूलरूपस्यौपाधिकत्वकल्पनाया असङ्गतत्वात् । न च विकारित्वादि शङ्क्यम् । तस्याग्रे तदनन्यत्वाधिकरणे परिहरणीयत्वात् । एवमन्यदपि यद्यद् विरुद्धमविरुद्धं वा तत्सर्वं प्रसङ्गे व्यवस्थापयिष्याम. ।

भट्टभास्कराचार्यास्तु ब्रह्मण एवोपादानत्वमङ्गीकृत्य कार्यस्य जगतः कारणाद् भेदाभेदौ प्रतीत्या व्यवस्थापयन्ति । तथाह्याहुः ।

एकस्यैकत्वमस्तीति प्रमाणादवगम्यते ।
नानात्वं तस्य तत्पूर्वं कस्माद् भेदोऽपि नेष्यते ॥
यत्प्रमाणैः परिच्छिन्नमविरुद्धं हि तत् तथा ।
वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीयते ॥

नह्यभिन्नं भिन्नमेव वा क्वचिद् दर्शयितुं शक्यते । सत्ताज्ञेयत्वद्रव्यत्वादिसामान्यात्मना सर्वमभिन्नं, व्यक्त्यात्मना तु परस्परवैलक्षण्याद् भिन्नम् । तथाहि ।

प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ।
विरोधे चाविरोधे च प्रमाणं कारणं मतम् ॥
एकरूपं प्रतीतत्वाद् द्विरूपं तत् तथेष्यताम् ।
एकरूपं भवेदेकमिति नेश्वरभाषितम् ॥

ननु शीतोष्णयोर्यथा परस्परं विरोधस्तथा भेदाभेदयोः, किमिदमुच्यते नास्ति विरोध इति । अत्रोच्यते । भवतः प्रज्ञापराधोऽयं, न वस्तुविरोधः । कथम् । सहानवस्थानं, छायातपवद्भिन्नदेशवर्तित्वं वा शीतोष्णवद्विरोधो नाम । एतदुभयमिह कार्यकारणयोर्ब्रह्मप्रपञ्चयोर्नास्ति । तत उत्पत्तेस्तत्रैवावस्थितेस्तत्रैव प्रलयात् । विरोधे हि सय·

मेतन्नोपपद्यते । नहि कृशानुनाङ्कुरोत्पत्त्यादिलक्षणः सम्बन्धो दृश्यते । कारणेन हि मृत्सुवर्णादिना कार्यं सर्वदानुस्यूतं दृश्यते । तत्राक्षिणी निमील्य परस्परासङ्गतिलक्षणो विरोधो वैयात्याद् वक्तव्यो भवेत्, प्राथमिकश्रोत्रियश्रोत्रप्रतारणार्थं वा । शीतोष्णयोर्भिन्नाधारवर्तिनोर्न कदाचिदुत्पाद्योत्पादकलक्षणः सम्बन्धो, नाधाराधेयलक्षण इति युक्तस्तयोः परस्परविरोधः । तस्माच्छीतोष्णवदित्ययुक्तं दृष्टान्ताभिधानम् । अत्र प्रागल्भ्यात् कश्चिदाह । यथा संशयज्ञानं स्थाणुर्वा पुरुषो वेत्यप्रमाणं, तथा भेदाभेदज्ञानमिति । तदसत् ।

परस्परोपमर्देन न कदाचित् सह स्थितिः ।
प्रमेयानिश्चयाच्चैव संशयस्याप्रमाणता ॥

अत्र पुनः कारणं पूर्वसिद्धं मृत्सुवर्णादिलक्षणम् । ततः कार्यं पश्चाज्जायमानं तदाश्रितमेव जायते । कारणसमानार्थतया हि कार्यबुद्धिः । न कारणस्वरूपोपमर्देन देशतः कालतो वा पृथग्भूतं कार्यं दृश्यते । तस्मान्न किञ्चिदेतत् । तदर्थं सङ्ग्रहश्लोकः ।

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥ इति ।

अत्र वाचस्पतिमिश्रा उक्तां कारिकामुपन्यस्याहुः । कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् । परस्पराभाव इति चेत् । किमयं कार्यकारणयोः कटकहाटकयोरस्ति, न वा । न चेद् एकत्वमेव वास्तवं न भेदः । अस्ति चेद् भेद एव, नाभेदः । नच भावाभावयोरविरोधः । सहासम्भवात् । सम्भवे वा कटकवर्द्धमानकयोरपि तत्त्वेनाऽभेदप्रसङ्गः । भेदस्याभेदाविरोधात् । अपिच । कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते, एवं कटकात्मना न भिद्येरन् । कटकस्य हाटकादभेदात् । तथाच हाटकत्वमेव वस्तु सन्न कटकादयोऽभेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवाभेदो, न कटकत्वेन । तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते । नानुवर्तते चेत् कथं हाटकादभिन्नः । ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव । यथा सूत्रात् कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः । तस्मात् तेऽपि हाटकाद्भिन्ना एवेति । सहानुवृत्त्या च सर्ववस्त्वनुगमे, इदमिह नेदस्मादिदमिदानीं

भेदमिदमेव नेदमेवमिति विभागो न स्यात् । कस्य चित् कदाचित् कथञ्चिद् विवेकहेतोरभावात् । अपि च । दूरात् कनकमित्यवगते, न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन् । कनकादभेदात् तेषाम् । तस्य च ज्ञातत्वात् । अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽपि अज्ञातास्ते । नन्वभेदोऽप्यस्तीति, किं न ज्ञाताः ? । प्रत्युत ज्ञानमेव तेषां युक्तम् । कारणाभावे हि कार्याभाव औत्सर्गिकः । स च कारणसत्तयाऽपोद्यते । अस्ति चाभेदे कारणसत्तेति । कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः । तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिद्यते । यथा करभे गृह्यमाणे अगृह्यमाणो रासभः करभात् । गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः । तस्मात् ते हेम्नो भिद्यन्ते । कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यमिति चेद् । नन्वाधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम् । अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम् । न खल्वभेद एकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते यत इत्युक्तम् । तस्माद् भेदाभेदयोरन्यतरस्मिन्न हेये । अभेदोपादानैव भेदकल्पना, न भेदोपादाना अभेदकल्पनेति युक्तम् । भिद्यमानतन्त्रत्वाद् भेदस्य भिद्यमानानां च प्रत्येकमेकत्वात् । एकाभावेनानाश्रयस्य भेदस्यायोगात् । एकस्य च भेदानधीनत्वात् । नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानैवानिर्वचनीयकल्पनेति साम्प्रतम् । तथा च श्रुतिः, मृत्तिकेत्येव सत्यमिति । तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धमिति ॥ तदनवधानविजृम्भितमेव ॥ उक्ते मते भेदाभेदयोर्नानात्वैकत्वरूपतया भेदस्यान्योन्याभावरूपत्वानङ्गीकारेण तदादाय तन्मतदूषणस्य गगनकुसुमसौरभ्यकल्पत्वात् । परस्पराभावरूपत्वेऽपि घटतदत्यन्ताभावयोर्घटतद्भेदयोश्च भूतल एव सहावस्थानदर्शनेन भेदस्य तदभावेनाभेदेन सह न विरोधः । अत्यन्ताभावस्य नित्यव्यापकत्वेन सर्वत्र सत्त्वात् प्रतियोग्यानयनोत्तरं तदभावबुद्धिप्रतिबन्धमात्रपरम् । एवं सति यत्र भेदस्तत्राप्यभेदो वर्तत एवेति तयोः सहासम्भवाद्विरोधकथनस्यापि तथात्वम् । एवं, सम्भवे वेत्यादिना कटकवर्द्धमानकयोरभेदप्रसञ्जनस्यापि तथात्वम् । अविरोध-

स्यैकयापाद्कतायाः काण्ठदृष्टत्वात् । यदपि, कटकस्य हाटकादित्यादिना कटकादीनां हाटकाद् भेदव्युत्पादनं, तदपि तथा । तेषां तदवस्थारूपत्वात् । अवस्थानां चावस्थावतः सकाशतो भिन्नाभिन्नत्वात् । षट्पद्यां समुद्रतरङ्गयोस्तथात्वस्य शङ्कराचार्यैरत्रोक्तत्वात् । अतः परं सहानुवृत्त्यादिनोक्तो दूषणत्वेन प्रतीतिविरोधो वक्तव्यः । स चेद् विद्यमानेऽपि कुण्डलादिना भेदे कनकत्वेनाभेदः प्रतीयते तदा न प्रतीतिविरोधोऽपि । प्रमाणेनाधिगमात् । प्रमिते च तस्मिन्, दूरात् कनकमित्यादिनोक्तानां विकल्पानामनवसरपराहतत्वादिति, प्रतीयते चेदुभयमितिकारिकयैवोक्तं व्युत्पादितं च । अतो मुकुटकटकादीनामवस्थात्वेन हेमसामानाधिकरण्यस्य सामयिकत्वेन च व्यावृत्तिव्यवस्थाजिज्ञासाजनकत्वयोरुपपत्तेर्भेदस्यागन्तुकत्वमेव, न त्वनिर्वचनीयत्वम् । नच श्रुतिविरोधः । उक्तश्रुतौ परिणामिनो मृदादीनेव दृष्टान्तीकृत्य, एवं सोम्य स आदेशो भवतीति दार्ष्टान्तिकेऽनिर्देशेन परिणामिनित्यताया एव श्रुत्यभिप्रेतत्वात् । नचात्र कारणे सत्यत्वस्य कार्ये वाचारम्भणत्वस्य चोक्तत्वेन कार्यमिथ्यात्वसिद्धौ कूटस्थानित्यत्वमेव सेत्स्यतीति वाच्यम् । घटः पट इत्यादिवाचारम्भणरूपस्य श्रुत्यनभिप्रेतत्वात् । यदि कार्यस्वरूपस्यापि वाङ्मात्रतामभिप्रेयाद्, वाचारम्भणं नामधेयमिति पदद्वयं न ब्रूयात् । एकेनैव चारितार्थ्यात् । इदं यथा तथा तदनन्यत्वाधिकरणे प्रपञ्चयिष्यते । सिद्धान्ते यो विशेषः सोऽपि तत्रैव व्युत्पादयिष्यते । तस्मादस्मिन्नंशे भास्कराचार्यमतमदुष्टमेव ।

रामानुजाचार्यास्तु, 'अस्मान्मायी सृजते विश्वमेतत् । तस्मिंश्चान्यो मायया सन्निरुद्ध' । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुतिभ्यश्चिद्वस्तुचिद्वस्त्वीश्वराणां यथायथं भोग्यत्वभोक्तृत्वनियन्तृत्वैः स्वरूपविवेकात् त्रयोऽपि भिन्नाः । तथा, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृत इत्यारभ्याऽऽपोऽग्निरन्तरिक्षं वायुर्द्यौरादित्यो दिशश्चन्द्रतारकमाकाशस्तमस्तेजः सर्वाणि भूतानि प्राणा वाक् चक्षुः श्रोत्रं मनस्त्वग् विज्ञानं रेत इत्येतानि काण्वपाठेन, विज्ञानस्थाने, आत्मा लोकयज्ञवेदाश्चाधिका माध्यन्दिनपाठेन, वाजसनेयके बृहदारण्यकेऽन्तर्यामिब्राह्मणे ब्रह्मशरीर-

त्वेनोक्ता ब्रह्मण आत्मत्वं चोक्तम् । सुबालोपनिषदि तु वाजसनेयक उक्ताः पृथिव्यादयस्तत्रानुक्ताश्च बुद्धिचित्ताव्यक्ताक्षरमृत्यवश्च शरीरत्वेनोक्ताः । यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद एष सर्वभूतान्तरात्मा ।दव्यो देव एको नारायण इत्यारभ्य यस्य मृत्युः शरीरमित्यन्तेन तथोक्तम । तेन पृथिव्यादीनां स्थूलानाम् अव्यक्तादीनां सूक्ष्माणां च शरीरत्वश्रावणात् स्थूलसूक्ष्मभेदेन द्विविधस्यापिचिदचिद्वस्तुनो ब्रह्मशरीरम् । अव्यक्तादीनि त्वव्यक्ताऽक्षरतमांसि गुणत्रयसाम्यावस्थारूपायाः प्रकृतेरेव सूक्ष्मपरिणामविशिष्टानि रूपान्तराणि तेषु मूलभूतरूपं तमः । सुबालोपनिषद्येव प्रलयप्रकरणे, पृथिवी अप्सु लीयते आपस्तेजसि तेजो वायौ वायुराकाशे आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ भूतादिर्महति महान् अव्यक्ते अव्यक्तमक्षरे अक्षरं तमसि लीयते तमः परे देव एकीभवतीत्यविभागापत्तिदशायां विभागव्यपदेशानर्हरूपेण तस्यैवावस्थानात् । शरीरकथनप्रस्तावे च तमःस्थाने मृत्योः श्रावणान्मृत्युशब्देनात्र तम उच्यत इति निश्चीयत इति तस्यापि शरीरत्वं निर्बाधम् । एवं काण्वोक्तविज्ञानस्थाने आत्मनः श्रावणाच्चिद्वस्तुनोऽपि ब्रह्मशरीरत्वमसन्दिग्धम् । एवं सर्वावस्थावस्थितचिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एवेति सदेव सोम्येदमग्र आसीत् सत्यं चानृतं च सत्यमभवदित्यादौ जगतो ब्रह्मत्ववादः । प्रपञ्चरूपे शरीरे प्रलयदशायां तमःशब्दवाच्यातिसूक्ष्मचिदचिद्वस्त्वेकरूपे सति तमसि च स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतापन्ने सति तथाभूततमःशरीरं ब्रह्म पूर्ववद्, विभक्तनामरूपविचित्रचिन्मिश्रप्रपञ्चरूपः स्यामिति सङ्कल्प्याप्ययक्रमेण जगच्छरीरतयाऽऽत्मानं परिणामयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः । अत स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति जगतो ब्रह्मोपादानकत्वेऽपि सूक्ष्मचिदचिदीश्वरसङ्घातस्यैवोपादानत्वेन चिदचितोर्ब्रह्मणश्च भोक्तृत्वभोग्यत्वनियामकत्वरूपस्वभावासङ्करोऽप्युपपन्नतरः । शुक्लकृष्णरक्ततन्तुसङ्घातोपादानके चित्रपटे तत्तत्तन्तुप्रदेश एव शौक्ल्यादिवत् तत्र तत्र भोक्तृत्वादीनां शक्यवचनत्वात् । एतावान् परं विशेषः । तन्तूनां पृथक्स्थितियोग्यत्वात् पुरुषेच्छया कदाचित् सङ्घातात् कारणत्वं, कार्यत्वं च कादाचित्कम् । इह तु चिदचितो-

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देयं इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अङ्गरेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ४ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड १)	४	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि ६	६	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० ४	४	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता ।	१	०
दैवज्ञकामधेनु. अर्थात् प्राचीनज्योतिषग्रन्थः ।	१	०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या सहितम् ।	१	०

ब्रजभूषण दास और कम्पनी
ढुनीचौक के उत्तर नई सड़क बनारस

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A.,C. I. E.
AND
G. THIBAUT, PH. D.
No. 100.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY SRÎ VALLABHÂCHÂRYA,
With the Commentary called Bhâshya Prakâsa,
By Goswami Srî Purushottamjee Mahârâj.
EDITED BY RATNA GOPÂL BHATTA.

Fasciculus II.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H D GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
BENARES.
1905.

Registered under Act XXV of 1867. (All Rights Reserved.)

	०	४	
	२	८	०
	०	६	०
	०	४	०
	०	१२	०
	०	१	०
	०	१	६
	०	८	०
	०	१	६
	०	२	०
	०	२	०
	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
भट्टिकाव्य ५ सर्ग	०	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	५	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	५
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	८
शब्दरूपावली	०	१	[illegible]
शृङ्गार सप्तशती	१	८	[illegible]
समासचक्रम्	०	[illegible]	
समासचन्द्रिका	०	[illegible]	
सरस्वतीकण्ठाभरणम्	[illegible]	[illegible]	
साङ्ख्यचन्द्रिका टिप्पणीसहिता	[illegible]	[illegible]	
साङ्ख्यतत्त्वकौमुदी	[illegible]	[illegible]	०
सिद्धान्तकौमुदी	[illegible]	[illegible]	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	[illegible]	०	०
उपसर्गवृत्ति	[illegible]	१	०

सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् सर्वदा सर्वैः शब्दैस्तत्प्रकारः परमपुरुष एव वाच्य इति । अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीत्यत्र तिस्रो देवता इत्यनेन सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिना शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तमिति विशिष्टाद्वैतवादमङ्गीकृत्य चिदचिद्विशिष्टस्यैवोपादानत्वं रोचयन्ते ।

तदपि चिन्त्यम् । आदिसृष्टिप्राक्काले सूक्ष्मचिदचिच्छरीरवैशिष्ट्यस्य वक्तुमशक्यत्वात् । सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयमित्यत्रैवैकारादिभिरितरव्यवच्छेदात् । नच तैः शरीर्यन्तरं मुख्यान्तरं मिषदन्तरं च व्यवच्छेद्यते, न तु शरीरममुख्यममिषद्वेति वाच्यम् । पुरुषविधब्राह्मणे, आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाया अन्यदर्शननिषेधस्य च विरोधापत्तेः । नच तत्राप्यन्यपदेन शरीर्यैव विशिष्ट एव वा परामृश्यतेऽतो न विरोध इति वाच्यम् । तत्र तादृशपरामर्शस्याशक्यवचनत्वात् । तथाहि । तत्रात्मा किं स्वशरीरं विशेषणत्वेन शरीरत्वेन वा अमिषत्त्वेन वा परामृशत्यात्मत्वेन वा । नाद्यः । तस्य पार्थक्ये सत्यात्मानुवीक्षणस्य तदन्यादर्शनस्य च यथायथं भ्रमत्वाज्ञतापादकत्वयोरापत्तेः । तमस एकीभावस्य स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापन्नरूपताङ्गीकारेण तदानीं पार्थक्यस्य शरीरत्वस्य वानभिमतत्वाच्च । न तुरीयः । आत्मत्वेन परामर्शे तेन प्रमाणज्ञानेनैवाभेदसिद्धौ भेदापादकप्रमाणाभावेन वैशिष्ट्याभावे केवलब्रह्माद्वैतवादस्यैव सिद्धेः । नच सुबालोपनिषद्यन्येषां प्रलयकथनात् तमसस्तदनुक्तवैकीभावकथनादन्येभ्यः कश्चिद्विशेषो वक्तव्यः । स च स्वरूपातिरोभावपूर्वकाविभागापत्तिरूप एव युक्तः । अन्यथा शब्दान्तरवैयर्थ्यप्रसङ्गात् । सिद्धे चैवं तमःस्वरूपानिरोभावे तदानीं वैशिष्ट्यस्याविलोपादुत्पत्तौ च, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति प्रतिसृष्टि पूर्वतुल्यताश्रवणेन सर्वदा सृष्टिप्रलयक्रमस्यैकरूप्यसत्त्वादिति शरीरत्वेन वैशिष्ट्याद् विशिष्टाद्वैतवादस्यैव सिद्धिर्न केवलब्रह्माद्वैतवादस्येति तदानीं विशिष्टेतरादर्शनमेव तदर्थ इति वाच्यम् । तर्हि

त्योरवान्तरयोः किञ्चित्प्रलयसृष्टिविषयत्वेनाप्युपपत्तौ सर्वैकरूप्यस्य नियन्तुमशक्यत्वात् । 'यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति विस्फुलिङ्गन्यायेन सहोत्पत्तिप्रलयश्रावणात् । सूर्याचन्द्रमसाविति लिङ्गेनास्या अवान्तरविषयत्वावगमात् । अनुवीक्षणादिश्रुत्यनुरोधेन सौबालवाक्येऽपि तथात्वस्य वक्तुं युक्तत्वाच्च । अस्तु वा सौबालवाक्यस्यादिसृष्टिविषयत्वं, तथापि न तदानीं वैशिष्ट्यसिद्धिः । पृथिव्यादीनां नादेयसामुद्रसलिलैक्यवद् विभागापत्तिरूपप्रलयस्य तमसश्च करकाणां जलैक्यवत् पूर्वभावापत्तिरूपस्य ब्रह्मैक्यस्य शक्यवचनत्वात् । आत्मपदस्य केवलात्मवाचित्वेन विशेषणान्तरसङ्ग्रहाक्षमत्वात् । अन्यथा देहविशिष्टात्मप्रत्ययस्यापि प्रामाण्यापत्तेः । नच निर्विशेषत्वापत्तिः । सच्चिदानन्दरूपाकारस्य, कृत्स्नः प्रज्ञानघनः, आनन्दरूपममृतं यद् विभातीत्यादिश्रुतिभिस्तत्सिद्धेः । तस्मात् सदेव सोम्येत्यत्र सच्छब्देन केवलं ब्रह्मैव परामृश्यत इति मन्तव्यम् । आत्मपदवत् सत्पदस्यापि केवलब्रह्माभिधायित्वात् । ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति गीतावाक्येन तथा निर्णयात् । एवं तैत्तिरीयेऽपि सत्यज्ञानादिलक्षणं ब्रह्म प्रकृत्य तत एव सर्वज्ञादाकाशादिक्रमेण सृष्टिमुक्त्वा, उपादानतां च, सोऽकामयत बहु स्यां प्रजायेयेति स्थिरीकृत्य केवलस्यैवोपादानत्वाय, तदात्मानं स्वयमकुरुतेत्यात्मन एव कर्मत्वं कर्तृत्वं च श्राव्यते । सत्यं चानृतं च सत्यमभवदिति केवलब्रह्मवाचकसत्यपदेन प्रपञ्चस्यापि ब्रह्मता विधीयत इति तत्रापि पूर्वोक्त एवार्थ इति प्रथमसृष्टौ शुद्धं ब्रह्मैवोपादानम् ।

किञ्च श्रुतौ हि प्रकारद्वयेन निरूपणम् आत्मत्वेन ब्रह्मत्वेन च । आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वमिति । इदं च पदद्वयं व्याप्तिं बृहणत्वं चापेक्ष्य । यद्यप्युभयोः स्वरूपमानन्दस्तथापि सप्रकार आत्मा निष्प्रकारं ब्रह्मेति भेदः । नन्वयमात्मा ब्रह्म विज्ञानमय इत्यात्मनोऽपि ब्रह्मत्वाभिधानाद् व्याप्तेनापि ब्रह्मजिज्ञासाया एव प्रतिज्ञानाच्च निष्प्रकारमेव मुख्यम् । तस्यैव चाग्रे कारणत्वविचारणमित्यत्राऽपि तादृशमेवोपादानम् ।

किञ्च । अन्तर्यामिब्राह्मणे सुबालोपनिषदि च, यं पृथिवी न

केचिदत्र शास्त्रयोनित्वपूर्वपक्षनिराकरणाय, तत्तु समन्वयादिति योजयन्ति । तत् पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसङ्गतत्वादुपेक्ष्यम् ।

वेद, यं मृत्युर्न वेदेत्येवं सर्वावस्थावस्थितस्याचिद्वस्तुनोऽचेतनत्वं श्राविंतम् । तच्च वेदनयोग्यत्व एव घटते, यमात्मा न वेदेतिवत् । न त्वयोग्यत्वे । घटो न वेदेत्यादिप्रयोगादर्शनात् । अतः सर्वत्र चिदन्वयोऽवश्यमुपेयः । सदन्वयस्तु प्रत्यक्षसिद्ध आनन्दान्वयश्चेत्यतोऽपि ब्रह्मैवोपादानम् । नच मृदब्रवीदित्यादावेवाभिमानिनमादाय तथोक्तिरिति वक्तुं शक्यम् । जीवानुप्रवेशकृततद्वैशिष्ट्यस्य पाश्चात्यत्वेन पूर्वं युष्माभिस्तथा वक्तुमशक्यत्वात् । अनुप्रवेशश्रुतिविरोधेन सर्वदा वैशिष्ट्यस्याशक्यवचनत्वात् । सदैवाविनाभावे चिदचिदविवेकप्रसङ्गात् । आत्मा न वेदेति पृथङ्निर्देशवैयर्थ्यप्रसङ्गाच्च । अत उक्तलिङ्गेनापि ब्रह्मण एव केवलस्य परिणामनिश्चयादुपादानत्वम् । नच स्वभावसाङ्कर्यप्रसङ्गः । प्रजायेयेतीच्छयैवोच्चनीचादिभावसिद्धौ साङ्कर्याभावात् । सृष्टिप्राक्काले त्वितराशङ्कानुत्थानात् । अतो विशिष्टाद्वैतवादस्यार्वाचीनत्वात् सर्ववस्तूनां ब्रह्मपरिणामत्वेन ब्रह्माभिन्नतयैव पदार्थत्वात् सर्वैः शब्दैस्तत्तद्रूपं ब्रह्मैवोच्यत इति कारणावस्थब्रह्मवाचिना शब्देन कार्यवाचिनां शब्दानां सामानाधिकरण्यमुपपादनमन्तरेणापि मुख्यवृत्तमिति राद्धान्तपन्थाः ।

प्रकृतमनुसरामः । अस्मिन् सूत्रे रामानुजाचार्यादिमतमुपक्षिपन्ति * केचिदित्यादि * । ते हि पूर्वपक्षसिद्धान्तावेवमाहुः । तथाहि । यद्यपि शास्त्रयोनित्वसूत्रे ब्रह्मणः शास्त्रमात्रप्रमाणकत्वं साधितं तथापि तन्नोपपद्यते । चोदनालक्षणोऽर्थो धर्मः, तस्य ज्ञानमुपदेशः, तद्भूतानां क्रियार्थेन समाम्नायः, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति जैमिनिना तन्त्र तत्र वेदस्य प्रवृत्तिनिवृत्तिजनकक्रियापरताया एवानुक्रान्तत्वाद् ब्रह्मरूपसिद्धार्थपरत्वे प्रयोजनशून्यत्वप्रसङ्गात् । नच प्रत्यक्षादीनां वस्तुयाथात्म्यावबोधपर्यवसानदर्शनाच्छास्त्रेऽपि तथात्वमस्त्विति शङ्क्यम् । लोके वेदे च प्रयोजनरहितवाक्यप्रयोगस्यादर्शनात् । प्रयोजनं च प्रवृत्तिनिवृत्तिसाध्येष्टानि-

ष्टप्राप्तिपरिहारात्मकमेवोपलब्धम् । तदनुद्दिश्य न केनापि किञ्चिद्वाक्यं प्रयुज्यते श्रूयते वा । अतो वेदेऽपि तथात्वं युक्तम् । नच पुत्रस्ते जातो, नायं सर्पो रज्जुरेषेत्यादिषु लौकिकवाक्येषु हर्षभयनिवृत्त्यादिरूपपुरुषार्थान्वयदर्शनात् सिद्धार्थपराणामपि वाक्यानां प्रयोजनवत्त्वं शङ्कनीयम् । तत्रापि वाक्यार्थज्ञानादेव तत्प्राप्तेर्वाक्यस्य प्रतारणया प्रयोगेऽपि तत्सम्भवाद् वाक्यस्यार्थपरतया निश्चेतुमशक्यत्वाच्च । किञ्च । पचति गच्छतीत्यादिप्रयोगस्य प्रमाणान्तरेणावगमोत्तरमेव दर्शनात् सिद्धार्थवाक्यानां गृहीतग्राहित्वात् प्रामाण्यमपि न । साध्यार्थपराणान्तु गामानयेत्यादीनां प्रयोजनवत्त्वमगृहीतग्राहित्वं चाविवादम् । अतो लोकवद् वेदेऽपि वाक्यानां प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजन एव पर्यवसानमिति परिनिष्पन्ने ब्रह्मणि तात्पर्याभावान्न वेदान्तानां ब्रह्मणि तात्पर्यमित्येकः पूर्वपक्षः ।

तथाऽन्योऽपि । तथाहि । वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । अद्वितीयं ज्ञानैकरसं परिनिष्पन्नमपि ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलापनद्वारेण विधिविषयत्वात् । स च विधिः, 'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथा' इत्येवमादिर्बोध्यः । तत्र द्रष्टृदृश्यभेदशून्यं ब्रह्म कुर्यादित्येवमर्थसिद्धेः । अतः स्वनिबन्धनाया उपाधिनिबन्धनाया वा कर्तव्यतायाः प्रामाण्ये विशेषाभावात् सिद्धस्यापि ब्रह्मणोऽनिष्पन्नतारूपेण साध्यत्वाविरोधाद् वेदान्तानां ब्रह्मणि कार्यपरतयैव प्रामाण्यं, न स्वातन्त्र्येणेति द्वितीयः पूर्वपक्षः ।

तथाऽपरोऽपि । यद्यपि वेदान्तवाक्यानां स्वातन्त्र्येण सिद्धरूपब्रह्मस्वरूपपरतया न प्रामाण्यं, तथाऽप्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मेत्येवोपासीत, आत्मानमेव लोकमुपासीतेत्यादिध्यानविषयो नियोगः स्वविषयभूतध्यानस्य ध्येयैकनिरूपणीयतया ध्येयमाक्षिपन्, सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सोम्येदमग्र आसीत्, इदं सर्वं यदयमात्मा, अयमात्मा ब्रह्म सर्वानुभूरित्यादिस्वरूपतद्विशेषपरवाक्यनिर्दिष्टस्वरूपमेवात्मानमाक्षिपतीत्येषां वाक्यानां ध्यानविधिशेषतयैव प्रामाण्यात् तद्विधिविषयीभूतध्यानशरीरानुप्रविष्टब्रह्मस्वरूपेऽपि तात्पर्याद् ब्रह्मस्वरूपमपि सिद्ध्यत्येवेति

येन । प्रवृत्तिनिवृत्तिप्रयोजनविधुराणां वेदान्तवाक्यानां ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात् तत्र स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्यवज्ज्ञानमात्रेणैव पुरुषार्थतासिद्धेः परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद् ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवतीति तृतीयः पूर्वपक्षः ।

सिद्धान्तस्तु, समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वयः । तथाच, यतो वा इमानि भूतानि जायन्ते, सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत, ब्रह्म वा इदमेकमेवाग्र आसीत्, आत्मा वा इदमेकमेवाग्र आसीत्, तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, एको ह वै नारायण आसीत् सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयाच्छास्त्रप्रमाणकत्वं ब्रह्मण सिद्ध्यत्येवेत्यर्थः । अन्यथा सर्वप्रमाणानां यत् स्वविषयावबोधपर्यवसायित्वं, तच्छास्त्रान्निवर्तमानं शास्त्रस्याबोधकत्वरूपमप्रामाण्यमादध्यात् । नच प्रवृत्तिनिवृत्त्यन्यतरविरहिणः प्रयोजनशून्यत्वं, पुरुषार्थान्वयप्रतीतेः । स्वरूपपरस्यापि पुत्रस्ते जातः, नायं सर्पो रज्जुरेषेत्यादिवाक्यस्य हर्षभयनिवृत्त्यादिरूपप्रयोजनदर्शनाच्च । अयमर्थः । अनादिकर्मरूपाविद्यावृतस्वस्वरूपज्ञानानां देवादिदूर्वान्तानां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसम्भवे स्वरूपगुणविभवचेष्टितैर्निरवद्यानन्दजननं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि । प्रवृत्त्यादिनिष्ठन्तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवम्भूतं कथं लभ्यत इत्यपेक्षायां तत्प्राप्त्युपायतया, ब्रह्मविदाप्नोति परम्, आत्मानमेव लोकमुपासीतेति वेदनादिशब्दैरुपासनं विधीयते । यथा वेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा पश्चात् तदुपादाने प्रयतते । यथाच कश्चिद् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गभ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्द्विजवर्द्धितोऽधिगतशास्त्रः षोडशवर्षो गुणसम्पन्नस्तिष्ठन् केनचिदभियुक्तेन प्रयुक्तं पिता ते सर्वलोकाधिपतिः प्रशस्तगुणः पुरवरे त्वामेव नष्टं पुत्रं दिदृक्षुस्तिष्ठतीति वाक्यं शृणोति चेत्तदानीमेवाहं तावज्जीवतः पुत्रोऽस्मत्पिता च सर्वसम्पत्समृद्ध इति महाहर्षान्वितो भवति । राजा च

स्वपुत्रं जीवन्तं सकलगुणसम्पन्नं श्रुत्वाऽवाप्तसर्वार्थो भवति । प-श्चात्तावुभौ सङ्गच्छेते च । यत्तु परिनिष्पन्नवस्तुगोचरवाक्यार्थज्ञान-मात्रेणापि पुरुषार्थपर्यवसानाद् बालातुराद्युपच्छन्दनवाक्यवन्नार्थस-द्भावे प्रामाण्यमित्युक्तम् । तदसत् । निश्चितेऽर्थाभावे पूर्वं ज्ञानस्या-प्यर्थस्य पुरुषार्थानुपयोगात् । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या पूर्वं हर्षाद्युत्पत्तावपि पश्चात् तदभावनिश्चये हर्षादिनिवृत्तिदर्शनात् । एवमौपनिषदेष्वपि वाक्येषु ब्रह्मसत्तायां तात्पर्याभावे निश्चिते पूर्व-मुत्पन्नमपि ब्रह्मज्ञानं न पुरुषार्थपर्यवसायि स्यात् । तस्माद्, यतो वा इमानीत्यादिवाक्यं स्वोक्तप्रकारकब्रह्मास्तित्वं बोधयदेव प्रमाणं भव-तीति सिद्धमिति रामानुजाचार्याः ।

भास्कराचार्यास्तु प्रपञ्चप्रविलायनद्वारेण ब्रह्मणः शास्त्रप्रमा-णकत्वं न स्यात् इति पूर्वपक्षे एवं प्रत्युत्तरमाहुः । तथाहि । ब्रह्मण आत्मत्वेन नित्यत्वेन चाभ्युपगतस्य कथं कार्यत्वम् । नित्यत्वकार्य-त्वयोर्विरोधात् । नचोपाधेर्विद्यमानत्वात् तद्विलायनेनोपधाननिवृत्ते-स्तद्वारा कार्यत्वमिति वाच्यम् । तथा सति घटे कृते नभसोऽपि का-र्यत्वापत्तेः । नचोक्तदूषणभयात् प्रपञ्चप्रविलायनं कुर्यादिति वाक्यं कल्पनीयमिति वाच्यम् । पुरुषमात्रेण महादीनां महाभूतानां विला-यनस्य कर्तुमशक्यत्वेन विधेर्वैयर्थ्यात् । समाधौ सुषुप्तौ च सर्वतिरो-धानेऽपि व्युत्थानदशायां सर्वस्य पुरोवस्थानात् प्रपञ्चप्रविलायने उपायाभावाच्च । प्रपञ्चेनैव प्रपञ्चविलायनेऽनवस्थाप्रसङ्गाच्च । प्रपञ्च-स्य साधारणत्वेन तत्प्रविलायने सर्वमुक्तिप्रसङ्गादिदानीं जगदप्रती-तिप्रसङ्गाच्च । अथात्मीयबन्धकारणस्याविद्याकामकर्मलक्षणस्य ना-शनमेव प्रपञ्चप्रविलायनमिति मन्यसे तत्र न विसंवादः । किञ्च । नियोगस्य नियोज्यसापेक्षत्वेन तदाकाङ्क्षायां यदि तादृशप्रपञ्चकर्ता नियोगकर्ता वा नियोज्यः स्यात् तर्हीदानीं नियोज्याभावान्नियोगो न क्रियेत । किञ्चात्र प्रतीतिवेलायां प्रपञ्चविलयोऽभ्युपगम्यते । अग्निहो-त्रादौ तु प्रतीतिकालोऽनुष्ठानकालश्च भिन्नः । तदप्यसङ्गतम् । अत्रेव तत्रापि प्रतीतिमात्रेणैव नियोगसिद्धावनुष्ठानलोपप्रसङ्गात् । किञ्च प्रविलायनं व्यापारो वा अभावो वा । नाद्यः । तस्य सत्त्वेन प्रपञ्च-तादवस्थ्यात् । न द्वितीयः । तस्यावस्तुत्वेन प्रतिभानाच्छशविषाणतु-ल्यत्वेन तद्विषयकनियोगानुपपत्तेः । अथात्मज्ञानविषयो नियोगः प-

रिकल्प्यते, आत्मज्ञानं कुर्यादिति। तदप्यसङ्गतम्। ज्ञानस्य प्रमाणप्रमेयाधानत्वेन क्रियावत् पुरुषेच्छानधीनतया नियोगविषयत्वस्य तन्नाशक्यवचनत्वात्। नच द्रष्टव्यादिविधिविरोधः। तस्योपायपरत्वात्। श्रोतव्यादिपदैस्तस्यैव विवरणात्। नचाध्ययनविधिनाऽर्थज्ञानं विधीयत इति शङ्क्यम्। तत्रार्थज्ञानरूपफलायाक्षरग्रहणरूपाध्ययनस्य विधानात् फलस्याविधेयत्वात्। किञ्च। नियोगविषयभूतमात्मज्ञानं यद्यनुत्पन्नं तदा यागवत् साध्यत्वाभावाद् विषयत्वासिद्ध्या तद्विषयकनियोगस्यासिद्धिः। यदि च श्रवणाद्युत्पन्नं तदा श्रवणादिनैवात्मज्ञानसिद्धेः किमन्तर्गडुना नियोगेन। नच फलार्थं तदपेक्षा। तमेव विदित्वेति श्रुतौ नियोगनिरपेक्षाज्ज्ञानादेवमुक्तेरुक्तत्वात्। किञ्च। ज्ञाननियोगयोः परस्परमसबन्धे वाक्यानर्थक्यात सम्बन्धोऽवश्यं वक्तव्यः। स च गुणप्रधानभावेनैव दृष्ट इत्येकस्यावश्यं प्राधान्यं वक्तव्यम्। तद्यदि ज्ञानस्येत्युच्यते तदा नियोगस्य वाक्यार्थतया प्राधान्यं सर्वत्र यत्प्रतिज्ञानं तद्धीयेत। यदि नियोगस्यैव तदुच्यते तदा ज्ञानस्य नियोगार्थत्वान्मुक्त्यर्थत्वं न स्यात् तस्योभयार्थत्वे प्रमाणाभावात्। नच नियोगो मुक्त्यर्थं। अश्रुतत्वात्। तमेव विदित्वेति ज्ञानस्यैव साक्षात्तदुद्देशेन श्रुतत्वादिति। एतदग्रे च, यो रामानुजमतोपन्यासेऽस्माभि. प्रथमः पूर्वपक्ष उक्तो, यद्यपि शास्त्रयोनित्वेत्यादिना, यश्च तृतीय उक्तो, यद्यपि वेदान्तवाक्यानामित्यादिना, तदुभयमुपन्यस्य तत. पूर्ववदेव सृष्टिवाक्यप्रभृतीनां सम्यगन्वयः समन्वय इति समन्वयपदार्थमुक्त्वा युक्तीरेवमाहु.। नच तेषां ब्रह्मपराणामर्थान्तरकल्पना युक्ता। श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। नच कार्य एव प्रामाण्यं प्रतिपत्तुं युक्तम्। स्वरूपावबोधेऽपि प्रामाण्यस्याविशिष्टत्वात्। अपौरुषेयत्वस्यैव प्रामाण्ये तन्त्रत्वात्। नचाग्निहोत्रादिवाक्येषु कार्यावगतिः प्रामाण्ये तन्त्रमिति शङ्क्यम्। तस्य चैत्यवन्दनादिवाक्येऽपि तुल्यत्वात्। अथापौरुषेयत्वे सत्यनपेक्षत्वं तन्त्रमिति विभाव्यते। तदा तु वेदान्तेऽपि तस्य तुल्यत्वात् स्वरूपपरत्वेऽपि प्रामाण्यमक्षुण्णमेव। किञ्च। पदानां स्वार्थप्रत्यायनेऽनपेक्षत्वं लोकवेदसाधारणम्। वाक्यानां तु लोके परापेक्षमेव प्रामाण्यम्। अन्यथा खपुष्पं तिष्ठति पश्येत्यादीनामपि तत् स्यात्। वेदे तु तेषामप्यपौरुषेयत्वात् प्रमाणान्तरानधिगतमूलकारणगमकत्वे तदनपेक्षमेव।

तथाहि । जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय तत्प्रतिपादकस्य पूर्वकाण्डस्य समन्वयमाह ।

मीमांसकमते प्रमाणान्तरानधिगतार्थगन्तृत्वस्यैव प्रामाण्ये तन्त्रत्वाङ्गीकारात् । श्रौतानां तथैवेष्टत्वाच्च । अतः प्रत्यक्षवत् सृष्टिवाक्यस्यापि प्रामाण्यं तुल्यमेवेत्यादिभिर्बहुधा नियोगपरत्वं वाक्यानां दूषयित्वा शरीरेन्द्रियमनसामात्माधिष्ठितानां चेष्टाविशेषः प्रयत्नः सर्वथा स्वर्गसाधारणः । स एव च साध्यत्वाद् वाक्यार्थो लोकवेदयोः । नियोगस्तु न वाक्यार्थः । पूर्वमीमांसाभाष्ये पूर्वोत्तरतन्त्रयोश्च तत्सूचकाक्षराभावात् । किन्तु प्रवृत्तौ निमित्तमात्रं सः । रागादिवत् । भावना तु भवति वाक्यार्थः । ये प्राहुः किमपि भावयेदिति स्वर्गकामपदसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भावार्थाधिकरणभाष्ये स्पष्टत्वात् । कृतप्रयत्नापेक्षस्त्विति व्याससूत्रेऽपि स्पष्टत्वाच्चेति वाक्यार्थविषये भावनामाहतवन्तः । यत् पुनर्वेदान्तानां कर्तृप्रतिपादनपरत्वं वा जपार्थत्वं वेति नियोगवादिभिरुक्तं, तत्तु सर्वजगत्कारणस्य ब्रह्मणो नियोज्यत्वाभावान्नियोज्यस्य जीवस्य सत्ताया अहमिति प्रत्यक्षेणैव सिद्धेरात्मवादे साधितत्वाच्च न वेदान्तस्य तत्परत्वं, प्रकरणाद्यभावाच्च न कर्मशेषजपार्थत्वमित्येवं नियोगवादिनं दूषयित्वा ततो भेदाभेदवादं स्थापयित्वा ततो मायावादिमतं दूषयित्वा ज्ञानकर्मसमुच्चयं स्थापितवन्तः । एवमुक्ते मतद्वये त्रिसूत्र्या जन्माद्यधिकरणसमाप्तिः ।

शङ्कराचार्यमतेऽप्येन एव पूर्वपक्षः । सिद्धान्तस्तु मायावादेन निर्विशेषब्रह्मजीवैक्यप्रतिपादनपरः । अधिकरणसमाप्तिस्तु श्रुतत्वाच्चेति दशमे सूत्रे ।

शैवमतेऽप्येत एव पूर्वपक्षाः । सिद्धान्ते तु समन्वयो नामोपक्रमादिभिर्लिङ्गैस्तात्पर्यनिर्णय इत्युक्त्वा तैः शिवपरत्वं वेदान्तवाक्यानामित्युक्तम् ।

तत्र सिद्धान्तानामसङ्गतिः पश्चाद् व्युत्पाद्या । पूर्वं तु सर्वो वेदः क्रियापर इति पूर्वपक्षस्यासङ्गतिं व्युत्पादयन्ति * तथाहीत्यादिना * । * समन्वयमिति * धर्मे सर्ववाक्यानां तात्पर्यलिङ्गैः स-

अवान्तरवाक्यानां प्रकारशेषत्वात् । नच सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः । तद्‌गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात् ।

न्देहनिरसनपूर्वकं सम्बन्धम् । * अवान्तरवाक्यानामिति * अर्थवादमन्त्रादिरूपाणाम् । * साधकत्वमिति * प्रमितिजनकत्वम् । अयमर्थः । पूर्वकाण्डे ह्यग्निहोत्रादीनि कर्माणि प्रतिपाद्यन्ते । तेषां च न तेन रूपेण तदभिधेयत्वम् । शास्त्रभेदप्रसङ्गात् । किन्तु धर्मत्वेने- त्येतद्‌बोधनाय जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय धर्मप्रतिपादकस्य पूर्वकाण्डस्य धर्मे समन्वयम्, आम्नायस्य क्रियार्थत्वादित्यादिभिः सूत्रैराह । तत्र मन्त्रार्थवादादीनां कथं क्रियार्थत्वमित्याकाङ्क्षायां तेषामवान्तरवाक्यानां धर्मप्रकारभूतद्रव्यदेवताकर्मस्तुत्यादिप्रकाशकत्वेन धर्मशेषत्वात् सर्वस्य पूर्वकाण्डस्य तत्रैव समन्वयः । नच तेष्वाम्नायादिपदात् सर्वस्मिन् वेदे धर्म एव जिज्ञास्य इति शङ्क्यम् । तद्‌गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात् । नच व्यासस्य तद्‌गुरुत्वे सन्देहः । मार्कण्डेयपुराणारम्भ एव, 'व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत । यस्याग्रे भारताख्यानं व्यासेनोक्तं महात्मना' इति । श्रीभागवतेऽपि द्वादशस्कन्धे व्यासशिष्यान् प्रस्तुत्य, साम्नां जैमिनये प्राह तथा छन्दोगसंहितामिति कथनात् । नच सोऽन्य एवेति शङ्क्यम् । औत्पत्तिकसूत्रे, बादरायणस्यानपेक्षत्वादिति पूजार्थं बादरायणग्रहणेनापि तथावगतेः । नच ब्रह्मजिज्ञासायाः क्रत्वर्थपुरुषार्थजिज्ञासावदवान्तरशेषविषयत्वं शङ्क्यम् । तथा सति जैमिनिरेव क्रत्वर्थादिजिज्ञासावत् तामपि प्रतिजानीयात् । तस्या अपि शास्त्रपूर्त्यर्थमवश्यमपेक्षितत्वात् । अतः कर्तृभेदाद् भिन्ने एवोभे अपि जिज्ञासे इति च पूर्वोत्तरकाण्डाभ्यां प्रमिते धर्मे ब्रह्मणि च मन्दमध्यमयोर्बुद्धिदोषात् सन्देहसम्भवमालोच्यैव कृते, न त्वन्योऽन्यमतदूषणाय । जैमिन्युक्तानामभ्यासादीनां व्यासपादैरुपन्यासाद् व्यासाभिप्रेतस्यानपेक्षत्वस्य जैमिनिनोपन्यासात् । नापि धर्मब्रह्मप्रमितिजननाय । यदि तथा स्यात् तदा मीमांसाऽधीने वेदस्य प्रमितिजनकत्वे उभावपि वेदस्य प्रामाण्येऽनपेक्षत्वं न ब्रूयाताम् । अत

सन्देहमात्रवारकत्वाज्जिज्ञासयोः। न त्वलौकिकार्थसाधकत्वम्। तथा सति वेदानामन्याधीनत्वेनाप्रामाण्यं स्यात्। वेदजिज्ञासेत्येवोक्तं स्यात्।

किञ्च।

साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम्।
न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि॥
प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि।
यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये॥

इदमपि सर्वस्य वेदस्याक्रियार्थत्वगमकम्। तदेतदुक्तम् * सन्देहेत्यादि, अप्रामाण्यं स्याद् * इत्यन्तेन। अथ यदि कर्मार्थतैव वेदस्य जैमिन्यभिप्रेता स्यात् तदा बादरायणमतं जानानेन तदनादराय वेदजिज्ञासेत्येव प्रतिज्ञावाक्यमुक्तं स्यात्। अत उक्तहेतुत्रयात् सर्वस्य वेदस्य क्रियार्थत्वं न जैमिन्यभिप्रेतम्। किञ्चाम्नायस्येति तु पूर्वपक्षसूत्रं, तद्भूतसूत्रस्थं क्रियार्थपदं तु तिङन्तवाचकं, न तु साध्यार्थपरम्। तेन तदर्थे जैमिनिसूत्रानुसरणमपार्थमेवेति।

ननु तथापि पूर्वकाण्डस्य क्रियार्थत्वे तु न विवादः। तथा सत्यैकशास्त्र्यानुरोधादुत्तरकाण्डस्यापि पूर्वशेषतैव येन केनापि प्रकारेणादरणीया। नच विपरीतमाशङ्कनीयम्। सिद्धे ब्रह्मणि साध्यार्थानां वाक्यानामन्वयायोगात्। नच प्रापकत्वेनान्वयः। तत्तद्वाक्यगतफलोक्तिबाधप्रसङ्गात्। अतो वेदस्य साध्यार्थपरतां निश्चित्य तच्छेषतैवोत्तरकाण्डार्थस्यादरणीया। यदि चोपासनाशेषत्वं ज्ञानशेषत्वं वाङ्गीक्रियते तदापि तयोर्विधेयत्वेन धर्मत्वादुत्तरार्थस्य ब्रह्मणः प्रवर्तकश्रुतिवाक्यशेषता दुर्वारैवेति सर्वस्य वेदस्य धर्मार्थत्वमर्थादेव सिद्धमित्यत आहुः * किञ्चेत्यादि *। चकारद्वयं व्यापारस्य स्वरूपस्य च समुच्चायकम्। * सर्वस्येति * कर्मणः। सर्वस्यैव स्फुटमाहेत्यन्वयः। * सर्वत्रेति * विहिते निषिद्धे च। * सर्वात्मेति * स आत्मानꣳ स्वयमकुरुतेति श्रुतेः सर्ववस्तुस्वरूपोऽ-

न्तर्यामिब्राह्मणात् सौबालश्रुतेश्च सर्वान्तर्यामी । अयमर्थ । वेदस्य या साध्यार्थपरता त्वयाङ्गीकृता सा श्रुतेः प्रवर्तकत्वानुरोधात् । तत्र श्रुतेर्यत् प्रवर्तकत्वं तत् किं यावदधिकारिणं प्रति साधारणं, किं वा असाधारणम् । आद्ये कस्यापि त्रैवर्णिकस्य नरको न स्यात् । तथा राजदण्डादेरपि लोके कोऽपि विषयो न स्यात् । रोगी च नोपलभ्येत । अविहिताविषिद्धाच्च निवृत्तेरपि तत एव सम्भवात् । तदभावे नरकादेरप्यसम्भवात् । अथ पूर्वकर्मजन्यदुरदृष्टवशादविहितादौ प्रवृत्तिः । तर्हि तादृशेन शुभादृष्टेन विहितेऽपि प्रवृत्तिसम्भवान्न श्रुतेः प्रवर्तकत्वसिद्धिः । अथासाधारणम् तर्हि तदसाधारण्यं स्वभावतो वक्तुमशक्यं, हेत्वन्तरसाहाय्येन साधनीयम् । तत्र कालादेः साधारणत्वात् तत्तज्जीवादृष्टस्य तथात्वं कल्पनीयम् । तथा सति तेनैव प्रवृत्तिसम्भवान्न श्रुतौ प्रवर्तकत्वनिर्द्धारः कर्तुं शक्यः । अथ प्रवृत्तेः शब्दश्रवणानन्तरभावित्वदर्शनाददृष्टादेः सहकारित्वेनैव प्रवेशो, न करणत्वेनेति विभाव्यते, तर्ह्यदृष्टसम्पादितदृष्टसामग्रीसत्तायां प्रवृत्तिरकुण्ठितैव स्यात् । अवतमसे चाक्षुषदर्शनेन सहकारिदौर्बल्येऽपि कार्योत्पत्तिनिर्द्धारात् । अतः कौण्ठ्यदर्शनात् फलमुखप्रवर्तकत्वं न श्रुतेः शक्यवचनम् । तेन साधनव्यापारफलस्वरूपाणि कर्मणां श्रुतिर्बोधयतीत्येतावन्मात्रमङ्गीकार्यम् । नच प्रवृत्त्याद्यनुपपत्तिः । ईश्वरस्यैव प्रवर्तकस्य निवर्तकस्य सत्त्वात् । नचात्र कल्पना । एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कारयति तं यमधो निनीषतीत्यादिश्रुतेः । नच वैषम्यनैर्घृण्यापातः । आत्मसृष्टेरेव श्रुत्याभिप्रेतत्वेन भेदाभावादिति, वैषम्यनैर्घृण्यसूत्रे व्युत्पादयिष्यामः । अतः श्रुतेः प्रवर्तकत्वाभावेन साध्यार्थपरतैवासङ्गता । नच तर्हि पूर्वकाण्डे यज्ञबोधनं व्यर्थमिति शङ्क्यम् । तस्य स्वर्गसिद्ध्यर्थत्वात् । विध्यादीनां क्रीडेच्छाव्यापारत्वान्न तद्वैयर्थ्यमिति, कृतप्रयत्नापेक्षसूत्रे व्युत्पादयिष्यामः । एवं सिद्धे विध्यादीनां क्रीडेच्छाव्यापारत्वे तदर्थानां च क्रीडाशेषत्वेनेति तत्प्रतिपादकत्वेनैवोभयोरैकशास्त्र्यं, न कर्मप्रतिपादकतयेति मन्तव्यम् । पुरःस्फूर्तिकमादाय क्रियापरत्वाङ्गीकारेऽपि तेन पूर्वकाण्डस्यैव धर्मार्थत्वसिद्धिर्न सर्वस्य वेदस्येति तावन्मात्रस्य साध्यार्थतोपगमेन पूर्वमीमांसकमतं द्वाभ्यां दूषितम् ।

सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम्।
मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ।
कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च सम्मतः।

प्रजापतिरकामयत प्रजायेयेति। स एतदग्निहोत्रं मिथुनमपश्यत्। प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोम इत्यादि। न ह्युपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोक्तं युक्तं वा। तथा सति वेदानामप्रामाण्यमेव स्यात्। मिथ्योपाख्यानप्रतिपादकलोकवत्।

अतः परं पूर्वकाण्डस्यापि साध्यार्थत्वमनुपगम्य दूषयन्ति स्वार्द्धेन* सिद्ध एवेत्यादि *। *सर्वत्रेति * काण्डद्वये। पूर्वत्रेतिपाठे अपेरध्याहारः। * वेदवादिनामिति * सर्ववेदप्रामाण्यज्ञानपूर्वकं तदनुसारिणाम। * चैवेति चकारोऽपश्यत् पुरोडाशं कूर्मं भूतं सर्पन्तमिति श्रुत्यादीनां दर्शनस्य समुच्चायकः। मन्त्राणां दर्शनं तु, स एतं कसर्णिः काद्रवेयो मन्त्रमपश्यत्, स एतं दीक्षितवादमपश्यदित्यादिषु बोध्यम्। *स्वार्थे चेति*चोऽप्यर्थे। अत. स्तुतिं समुच्चिनोति। उक्तं विभजन्तो दर्शनस्य श्रुती आहुः * प्रजापतिरित्यादि *। अन्नाद्या तैत्तिरीयब्राह्मणस्था। अस्याम् अपश्यदित्यस्य ज्ञानार्थताया अपि शक्यवचनत्वात् सिद्धार्थत्वं न निःसन्दिग्धं स्यादित्यतो द्वितीयस्या उपन्यासः। सा च संहिता प्रथमाष्टकस्था। तत्रोक्तस्योन्मानस्य कर्मणामसिद्धत्वेऽशक्यवचनत्वादिति। * न ह्वीत्यादिकं विभागभाष्यम। तेनायमर्थः। व्यासादधीतवेद. श्रुतभारत. स्वयम् ऋषिर्जैमिनिर्यदि धर्मरूपायाः क्रियायाः सिद्धत्वं नाभिप्रेयात् तदा भावार्थाधिकरणे, भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतेत्यनेन सिद्धावस्थापन्नधात्वर्थाभिधायकानां नामपदानां क्रियाप्रत्यायकत्वं न वदेत्। नच तत्र भावार्थपदेन भावनार्था इत्येवोच्यत इति वाच्यम्। तथा सति कर्मशब्दपदवैयर्थ्यापत्तेः। भावार्थः

क्रिया प्रतीयेतैनावतैव चारितार्थ्यात् । तथा सर्वेषां भावोऽर्थ इति चेदित्यग्रिमसूत्रं च न वदेत् । क्रियाबोधकाख्यातपदानां भावनार्थत्वस्य सर्वजनीनत्वेन सर्वेषां भावोऽर्थ इति सन्देहस्यैवानुदयात् । तथा अग्रिमसूत्रद्वये क्रमेण नाम्नां पुरुषानपेक्षक्रियाप्रतिपादकत्वमाख्यातानां तु पुरुषापेक्षक्रियाप्रतिपादकत्वमिति विभागं च न कुर्यात् । साध्यैकस्वभावक्रियावादे पुरुषानपेक्षक्रियाया एवाभावात् ।

किञ्च । यागादिधर्मरूपा क्रिया यदि सर्वदा साध्यावस्थैव स्यान्न कदापि सिद्धावस्था, तदा तन्निष्पत्ते कदाप्यभावाच्चोदनापि नोच्येत । चोदना पुनरारम्भ इति लक्षणमपि तस्या न क्रियेत । अतो जैमिनेरपि वेदस्य सिद्धार्थपरतैवाभिप्रेता । इदं यथा तथा भावार्थाधिकरणभाष्ये व्युत्पादितमाचार्यचरणैः । मयापि तद्विवरणे निपुणतरं प्रपञ्चितमिति नात्र लिख्यते ।

किञ्चार्थवादाधिकरणेऽर्थवादानां विधेयस्तावकत्वेन प्रामाण्यकथनादपि तथा । यदि हि बालातुराद्युपच्छन्दनवदर्थवादानां स्तावकत्वमभिप्रेयात्, प्रामाण्यं तेषां न ब्रूयात् । तदुपच्छन्दनस्य प्रतारणरूपत्वात् । ननूपच्छन्दनवाक्यस्य फलांश एव प्रतारणरूपत्वं, न प्रवर्तनांश इति, न तत्रेवात्रापि दोष इति चेन्न । स्वर्गादिरूपस्य फलस्याप्रत्यक्षत्वेन विधिवाक्योक्तफलांशेऽपि तथात्वप्रसङ्गात् । अत उपाख्यानानां मिथ्यार्थप्रतिपादकत्वकथनं, तथागतवासनावलम्बनमेव । तच्च 'परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा' इति, 'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम । श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनमिति-पुराणवाक्यादुपच्छन्दनन्यायेन मिथ्यात्वमाद्रियत इति वाच्यम । तत्रैवमर्थाभावात् । सर्वथा सन्मार्गविमुखानां नानाकामानां सहसा कामानिवृत्तिमालोच्य तांस्ततो निवर्तयितुं स्वर्गादिरूपं तदभीष्टं सदेव नश्वरं फलं प्रदर्श्य तेन तेषां सन्मार्गवर्तित्वविधानेन कर्ममोक्षेऽधिकारिणः कर्तुं कुसुमरूपं तदिति तत्र मिथ्यात्वगन्धस्यापि वक्तुमशक्यत्वात् । 'फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि । पुष्पेषु फलबुद्ध्य' इत्यादिवाक्यैस्तथा निश्चयात् । अतस्तत्र विश्रान्त्या सायनादिना ये भ्रान्तास्तेषामेव वेदार्थे तथा भान, न वेदवादि-

तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि वेदस्य

नामित्यर्थवादा अपि स्वार्थप्रमितिं जनयन्त एव स्तावका इति निश्चेयम् ।

किञ्चाग्निहोत्रमिथुनदर्शनोत्तरं पठ्यते । तदुदिते सूर्ये जुहोत, यस्यैवं विदुष उदिते सूर्येऽग्निहोत्रं जुह्वति प्रैव जायत इति । उन्मानानन्तरं च पठ्यते, य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोतीति । एताभ्यां च विद्वद्वाक्याभ्यामर्थवादश्राविनार्थविषयकज्ञानस्य फलाङ्गता बोध्यते । यदि स उपच्छन्दनाय मिथ्या श्रावितः स्यात् ततो विद्वद्वाक्यमपि मुधा स्यात् । एवमन्यत्रापि । ततश्च सर्वस्य वेदस्य प्रामाण्यमपि विलुप्येत । अतस्तदभावाय सत्यार्थकथनेनैवोपच्छन्दनमुपगन्तव्यम् । तेन श्रुतिपुराणयोरुभयोरपि सामञ्जस्यात् । ततः कर्मादिदर्शनश्रुतीनां स्वार्थे प्रामाण्यमकलङ्कमिति पूर्वकाण्डस्यापि सिद्धार्थपरत्वमेव । नच जुहुयाद् यजेतेत्यादीनां साध्यकृतिबोधकपदानां व्याकोपः । सिद्धस्य कर्मणः प्रकारज्ञानपूर्वकं करणं फलसम्बन्धं बोधयता विद्वद्वाक्येनातिदेशसिद्ध्या कृतेः सिद्धतुल्यत्वेन साध्यकृतिव्यङ्ग्यस्य सिद्धस्यैव धर्मस्य तत्र विवक्षिततया बालोपच्छन्दनायोक्ते साध्यार्थे तात्पर्याभावनिश्चयात् । एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन विद्वद्वाक्यशून्यस्थलेऽपि तथाऽवगमाच्च । अतः पूर्वकाण्डस्य साध्यार्थपरत्वमयुक्तमेव । उत्तरकाण्डस्य तु ज्ञानादिप्रतिपादकत्वेऽपि ज्ञानोपासनादीनां विषयभूतब्रह्मणैव स्वरूपलाभेन ज्ञानादिभिर्ब्रह्मण एव प्राप्यतया फलत्वेन च तस्यैव शेषित्वम् । पूर्वकाण्डोक्तफलस्याप्येतस्यैवानन्दस्यान्यानीतिश्रुतेस्तदंशत्वाच्च । कर्मफलार्थत्वादिति न्यायात् । इदं फलत्वमप्युपाख्यानगर्भ्यामिति । तदेतदुक्तम् * नहीत्यादिना । सिद्धमाहुः * तस्मादित्यादि * यस्मादुक्तरीत्या विचारे न सर्वस्याम्नायस्य क्रियार्थत्वं, न वा पूर्वकाण्डस्य साध्यार्थपरत्वं तस्मात् ते तथेति तद्वाक्येन शास्त्रयोनित्वव्याकुलीभावाभावात् पूर्वपक्षोऽसङ्गत इत्यर्थः । एवं पूर्वपक्षासङ्गतिमुद्घाट्य सिद्धान्तासङ्ग-

वदन्तो मूर्खा एव। उत्तरवादिनोऽपि पूर्वाज्ञानमङ्गीकृत्य पूर्वानुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञाः।

यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीत्युपनिषज्ज्ञानस्य श्रुतिसिद्धैव कारणता।

तिमुद्घाटयन्तः पूर्वं शङ्करमतस्यासङ्गतत्वमाहु. * उत्तरेत्यादि * अनभिज्ञा * इत्यन्तं ग्रहणकभाष्यम्। तत्रायमर्थः। सर्वस्य वेदस्य क्रियापरत्वमभिसन्धाय शुद्धबुद्धोदासीनभूतब्रह्माभिधायके वेदान्तभागे प्रयोजनशून्यतयाऽऽनर्थक्यं प्रत्यक्षादिसमानविषयतया लौकिकवाक्यवदनुवादकतायामनपेक्षप्रामाण्यभङ्गं च दर्शयतां स्वाध्यायविधिगृहीतत्वेन तत्सार्थक्याय दूरतरयज्ञादिकर्मापेक्षितकर्तृदेवतादिप्रतिपादकत्वेन क्रियार्थत्वं वा, सन्निहितोपासनादिक्रियापेक्षितविषयप्रतिपादकत्वेन तादर्थ्यं वाऽभिमन्यमानानां पूर्वेषां वादिनां तदनुसारिणां च वेदान्ताज्ञानमङ्गीकृत्य शुद्धबुद्धोदासीनस्य ब्रह्मणः प्रमाणान्तरानधिगतत्वादितरनैरपेक्ष्येण तद्बोधकतया प्रामाण्यं हेयोपादेयशून्यब्रह्मात्मावगमादेवावस्तुभूताविद्यासमारोपितसकलक्लेशनिवर्तकतया सार्थक्यं च वेदान्तेषु प्रदर्श्य तत्सिद्धस्य ब्रह्मज्ञानस्य यज्ञानुपयोगित्वं वदन्तो वेदज्ञानरहिता इत्यर्थः। नन्वेवंयुक्तियुक्तमर्थं वदन्तः कथं तथेत्याकाङ्क्षायां छान्दोग्यारम्भदेशस्थश्रुत्युपन्यासेन तदुक्तं दूषयन्तो विभजन्ते * यदेवेत्यादि, प्रवृत्तिरित्यन्तम्। * कारणतेति * सहकारिकारणता। अस्यां श्रुतौ विद्यापदेनात्मभिदाबाधकं ज्ञानम्। श्रद्धापदेन वेदोक्ते आस्तिक्यबुद्धिः। उपनिषत्पदेन परमात्मस्वरूपविषयकं रहस्यज्ञानमुच्यते। तेन तत्तद्युक्तो यत् कर्म वेदोक्तं करोति तदेव कर्म वीर्यवत्तरमनश्वरफलं मोक्षपर्यन्तस्थायि भवतीत्यर्थः यत्तु कैश्चिद् विद्या विज्ञानं, श्रद्धा कर्मश्रद्धा, उपनिषद् योग इति व्याख्यानम्। तन्न। विद्यापदस्य विज्ञाने, उपनिषत्पदस्य योगे च शक्त्यदर्शनात्। विद्याऽऽत्मनि भिदाबाध इत्येकादशस्कन्धवाक्येन, उपनिषद् रहस्यविद्येति शङ्कराचार्यविद्यारण्यादिव्याख्यानेन चोक्तार्थ एव शक्तिनिश्चयाच्च। तथाच पर-

नैच बाधितत्वात् त्यज्यत इति वाच्यम् । ब्रह्मात्मज्ञानवत एव वशिष्ठादेर्यज्ञाधिकारात् । नचैवं किमनेनेति वाच्यम् । इत्थंभूतत्वान्मन्त्रस्य ।

मात्मरतत्वस्यज्ञानात्मकब्रह्मज्ञानस्य श्रुतिसिद्धकारणताया अज्ञानाद् वेदान् मग्ना इत्यर्थः । ननु सिद्धे फले साधनान्तरस्यानुपयोगेन, उत्कृष्टस्य निकृष्टशेषतायाश्चासङ्गतत्वेन तस्याः श्रुतिसिद्धाया अनादरात् ज्ञानिभिर्कर्मातिसमाधिं दूषयन्ति * नचेत्यादि * । * त्यज्यत इति * नाद्रियते । अधिकारपदेनात्र मुख्याधिकारो विवक्षितः । तथाच यदि ज्ञानमात्रेणाविद्यानिवृत्त्यादि स्यात् । वशिष्ठादिर्ज्ञानी यागादिकं न कुर्यात । यदि स ज्ञानित्वेन भवदभिमतो न स्यात् तद्वचनानि नाद्रियेरन् । अतः पुराणादिप्रसिद्धैर्भवदादृतैरपि यागादिकरणेन तत्तादरसूचनात् तद्विरोधेन ज्ञानस्य सहकारितानादरे सुतरामनभिज्ञतेत्यर्थः । ननु रतिपदात्मकज्ञानपूर्वकेण वशिष्ठाद्यधिकारेण वेदान्तविचारे किं सिद्ध्यति, येनैवमाग्रहः क्रियत इत्याकाङ्क्षायामाहुः * नचैवमित्यादि * । अयमाशयः । यज्ञो वै विष्णुरिति श्रुतेर्यज्ञोऽप्येकं ब्रह्मण एव क्रियात्मकं रूपम् । नच तत्राधिष्ठातृत्वमेव बोध्यते, न तु क्रियात्मकत्वमिति शङ्क्यम । धर्मो यस्यां मदात्मकः मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थ इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तथात्वस्यापि निश्चयात् । स च द्रव्यदेवतायजमानयज्ञाध्वरादिभिरभिव्यज्यते । स चेल्लौकिकैरेवाभिव्यज्येत तदा प्रोक्षणादिसंस्कारा अवहननादीनां च नियमा मुधैव स्युः । अतो वेदोक्तफलसिद्ध्यर्थं यथा ते तथा मोक्षफलार्थमुपनिषदप्युपयुज्यते । तदभावे तु साङ्गस्य यज्ञस्य लौकिकेष्वर्थेष्वध्यस्यमानत्वात् तदङ्गानां लौकिकत्वे तैराधिदैविकयज्ञस्वरूपानाविर्भावात् । उपनिषदा त्ववगते सर्वस्य ब्रह्मत्वे ब्रह्मभूतैरङ्गैराधिदैविकयज्ञाविर्भावः । तथा तादृशे यज्ञे यज्ञाधिष्ठातुर्भगवतोऽप्याविर्भावः । यथा विश्वसृजां सहस्रसमे हिरण्मयशकुनिरूपस्य ब्रह्मणस्तथैव पृथुनाभिप्रभृतीनां यागेषु रूपान्तरेण । तदभावादेव नेतरेषां यागेषु तदाविर्भावः । तथा यागस्य विद्योपयोग आचार्य-

किञ्च कर्मफलवद् ब्रह्मफलस्यापि लौकिकत्वात्। य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्येति। अत्यन्ताविद्यावतो यज्ञानधिकारात् तन्निषेधार्थं ज्ञानमुपयुज्यते। नच देहाध्यासस्य कारणत्वम्। ब्रह्मार्पणं ब्रह्महविरित्यादिस्मृतेः।

स्यापि सम्मत इति तु, सर्वापेक्षा च यज्ञादिश्रुतेरित्यादिसूत्रप्रणयनादेवावगम्यते। नच मोक्षस्य जन्यत्वम्। ब्रह्मण आप्यत्वस्य वक्ष्यमाणत्वात्। अतो मुमुक्षूणां यज्ञस्यावश्यकत्वात् तत्रेत्थम्भूतमधिकारं बोधयितुमथमाग्रह इति। तदेतदुक्तम्। ननु मुमुक्षूणां यज्ञा नावश्यकाः। कर्मफलस्य लौकिकत्वात्। अधिकारिभेदेऽपि मनुष्यादिब्रह्मान्तानां शरीरवतामेव तद्भोगकथनेन तथा निश्चयात्। नच किं तेनेति वाच्यम्। न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्या दुःखसम्भेदकथनेन तस्य संसाररूपत्वबोधनात्। अतो मुमुक्षूणां शरीरसम्बन्धस्यानाकाङ्क्षितत्वाद् यज्ञानां कारणता श्रुतिसिद्धापि नाद्रियत इत्याशङ्कायामाहुः * किञ्च, कर्मेत्यादि *। * ब्रह्मफलस्येति * ब्रह्मज्ञानफलस्य। श्रुतिस्तु तैत्तिरीयाणां भृगूपनिषदि भार्गव्या विद्यायाः समाप्तिस्था। तत्र, सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता य एवं वेद प्रतितिष्ठतीति। अत्र परमे व्योम्नि प्रतिष्ठाकथनेनास्या विद्याया अत्युत्कृष्टत्वं दुर्लभत्वं च बोध्यते। विद्यापदोक्त्या फलेपूपासनाफलत्वभ्रमो निवार्यते। तत्तत्फलकथनमुखेन गृहस्थाद्यधिकारश्च बोध्यते। तेनायमर्थः। कर्मणां विद्यायाश्च फलस्येतरेतरवैलक्षण्यं प्रदर्श्य कर्मफलस्य शरीरिभोग्यतया संसारात्मकत्वात् तादृशफलजनकत्वेन तस्य विद्याजनकत्वमनादृत्य यदि कर्म त्यज्यते, तदा तस्य दोषस्य ब्रह्मविद्यायामपि तौल्यात् तस्या अपि त्याज्यत्वापत्तिः। अथ यद्यधिकारजाघन्यात् त्यज्यते, तदा तूक्तश्रुत्या विद्यासाहित्यबोधनेन जाघन्यस्य निवारितत्वान्न कर्मणस्त्याग उचितः। यदिच्च

तस्मादन्योन्योपयोगित्वे न कोऽपि दोषः ।

क्रियाज्ञानयोः स्वातन्त्र्येण पुरुषार्थसिद्ध्यर्थं भिन्नतया शास्त्रप्रवृत्तिः ।

किञ्च, वेदान्तवाक्यानामस्मिञ्छास्त्रे समन्वय एव प्रतिपाद्यते सन्देहनिराकरणद्वारा । तत् कथं सिद्धवद्धेतुत्वेन निर्देशः । अग्रिमवैयर्थ्यं च स्यात् ।

विद्यावत्त्वेऽपि देहाध्यासस्यानिवृत्तत्वात् तस्यैव कर्मकारणत्वमिति विभाव्यते, तदा तु ब्रह्मार्पणमित्यादिस्मृत्या, य एवास्मि स सन् यज इति श्रुत्या चाध्यासस्य कारणतानिवारणात् तासामेव विरोध इति वेदानभिज्ञत्वमनिवार्यमेवेत्यर्थः । एवं विद्यास्वातन्त्र्यवादिशाङ्करमतमपास्यान्येषामेकदेशिनां संग्रहायाहुः ✻ तस्मादित्यादि ✻ । वेदानभिज्ञत्वस्य विद्यास्वातन्त्र्यवादिन्येव पर्यवसानात् कर्मणां विद्याकारणत्वस्योपनिषद्भिः कर्मसहकारित्वस्य श्रुत्यैव बोधनान्मूर्खोद्भावित इतरेतराश्रयदोषोऽपि व्यक्तिभेदादेव निवृत्तः । नच छान्दोग्य औषस्त्य अविदुषामपि यजमानादीनां श्रावणात् कर्मणामविद्वदधिकारकत्वमेवेति शङ्क्यम् । तत्राप्यविद्वत्तायां मूर्द्धनिपातश्रावणेनात्यन्ताविदुषामनधिकारस्यैव बोधनात् । अतः पूर्वसूत्रभाष्य उक्ते ज्ञानकर्मसमुच्चये न कोऽपि दोष । तेन मायावादिव्यतिरिक्ता अस्मिन्नंशे सर्वेऽप्येकदेशिनो वेदाविरुद्धवादिन इत्यर्थः । नन्वेवं परस्परसाकाङ्क्षत्वे ऐकशास्त्र्यमेव स्यान्न तु शास्त्रभेदः । ततश्च वेदमनूच्येत्यादिपृथक्समाम्नानस्याकोप इति शङ्कायामाहुः ✻ क्रियेत्यादि ✻ तथाच त्रिवर्गसाधने उभयोरपि स्वातन्त्र्यात् सिद्धे शास्त्रभेदे पूर्वोक्तदोषस्य न लेश इत्यर्थः ।

एवं वेदानभिज्ञत्वं शाङ्कराणां बोधयित्वा सूत्रार्थानभिज्ञत्वं सर्वेषामेव बोधयन्ति ✻ किञ्च, वेदान्तेत्यादि ✻ । अयमर्थः । शङ्कराचार्यैर्हि सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं ब्रह्म वेदान्तशास्त्रादवगम्यत इति प्रतिज्ञाय, समन्वयादिति हेतुः सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगता-

नच प्रतिज्ञागर्भितहेतुत्वम् । अनुपयोगात् । गौणमुख्यभावे परं विवादः । नच येन रूपेण समन्वयो मतान्तरस्थैर्विचारितस्तथाग्रे सूत्रेषु निर्णयोऽस्ति ।

नीत्येवं व्याख्यातः । तत्रोक्तधर्मवत्त्वसाध्यकं ब्रह्मपक्षकं वाक्यसमनुगतत्वहेतुकमनुमानमभिसंहितं प्रतीयते ।

भास्कराचार्यैस्तु ब्रह्मस्वरूपं शास्त्रमवबोधयति, न केवलं कार्यमेव । कुतः । समन्वयात् । समन्वितानि हि ब्रह्मस्वरूपप्रतिपादनपरत्वेन सृष्टिप्रकरणगतानि वाक्यानीत्येवं हेतुर्व्याख्यातः । तेन तन्मते शास्त्रपक्षकम् । तथैव शैवस्य च मते ।

रामानुजाचार्यास्तु समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वय इति हेतोरर्थमुक्त्वा परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयाच्छास्त्रप्रमाणकत्वं सिद्ध्यत्येवेति व्याचक्षुः ।

तत्र शाङ्करे व्याख्याने यथावस्थिते हेतोः स्वरूपासिद्धत्वम् । अतस्तत्रापि शास्त्रपक्षकमेवानुमानं वक्तव्यम् । ततश्च वेदान्तशास्त्रं ब्रह्मस्वरूपस्य प्रतिपादकं, तद्वाक्यानामेतदर्थप्रतिपादने समनुगतत्वात् । यदीयं वाक्यं यदर्थप्रतिपादने तात्पर्येण समनुगतम्, तच्छास्त्रं तस्यार्थस्य प्रतिपादकम् । क्रियार्थप्रतिपादकपूर्वकाण्डवदित्यनुमानं मतत्रयेऽपि कर्मत्वादिवारणाय प्रयुक्तमिति फलति । तत्रेदं विवेचनीयम् । किमयं हेतुरविप्रतिपन्नः सिद्ध उत साध्यः । तत्राऽविप्रतिपन्न इति तु न वक्तुं शक्यम् । तथा सति पूर्वपक्षस्यैवानुत्थानप्रसङ्गात् । नापि सिद्धः । अस्मिञ्छास्त्रे सन्देहनिराकरणद्वारा तस्यैव प्रतिपाद्यत्वात् । सिद्धत्वेऽग्रिमसमन्वयसाधकग्रन्थस्य वैयर्थ्यप्रसङ्गाच्च । अतस्तस्य सिद्धवन्निर्देशो न युक्त इति । अथ बुद्धिस्थं यथा प्रतिज्ञायते, तथा बुद्धिस्थमत्र हेतूक्रियत इति समन्वयसाधनप्रतिज्ञागर्भितस्य हेतोः सिद्धवन्निर्देशेऽपि न दोष इति विभाव्यते तदाप्ययुक्तमित्याहुः * नचेत्यादि * भवद्भिर्हि भाट्टप्राभाकरयोस्तदनुसारिण एकदेशिनश्च निराकरणायायं हेतुरेव व्याख्यायते । तत्र

प्रतिज्ञाया बुद्धिस्थत्वेन वादिनिग्रहवेलायां साधनस्याभावेन हेतोः साध्यसमतया तद्ग्राहकत्वादनुपयोगः । किञ्च । तैरपि वेदान्तानां ब्रह्मप्रतिपादकता न स्वीक्रियते इति तु न । किन्तु गौणत्वेन । तथा सति गौणमुख्यभाव एव विवादो, न तु प्रतिपादकत्व इति विवक्षितासाधकत्वादप्यनुपयोगः । अथ सम्यक्त्वकुक्षौ मुख्यतां निवेश्य ब्रह्मणो मुख्यतया प्रतिपादनेऽनुगतत्वादित्येवं विभाव्यते, तदापि शाङ्कराणां शैवानां च मतमयुक्तमित्याहुः * नच येनेत्यादि * । शाङ्करैर्हि जगत्कारणरूपे वाक्यानां समनुगतत्वं व्याख्यायाग्रे उच्यते । नच तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते, तत् केन कं पश्येदिति क्रियाकारकफलनिराकरणश्रुतेरिति । ततश्च तन्मते यावद्धर्मशून्ये रूपे समन्वयो विचारितो भवति । तेन रूपेण समन्वयविचारस्त्वाध्यायसमाप्त्याशास्त्रे नास्ति वाचकोऽपि सूत्रेषु न दृश्यते । सर्वत्र तत्तद्धर्मपुरःसरं कर्त्रादिरूपेणैव तेषां तेषां वाक्यानां ब्रह्मप्रतिपादकताया निर्णीतत्वात् । अतोऽपि व्याख्यानाकारस्य हेतोरनुपयोगः । एवञ्चानुपयोगादिति गृहीतो हेतुरस्तीत्यन्तेन विभक्तो बोध्यः । एवं शैवमतस्याप्यसङ्गतिर्बोध्या । शिवरूपेणापि निर्णयस्य सूत्राक्षरेष्वनुपलम्भात् । तन्मतमर्वाचीनमित्याचार्यैर्न तदर्थं किमप्युक्तम् । मया तु प्रह्लादाख्ये भिन्दिपालाख्ये च वादे शिवतत्त्वविवेकादिग्रन्थदूषणेन निपुणतरं दूषितमिति न तदर्थमिह संरम्भः क्रियते । तथापि तत्र तत्र प्रसङ्गेन दूषयिष्यामि । तत्र तावत्, सदेव सोम्येदमग्र आसीदित्युपक्रमतत्त्वमसीत्युपसंहारः शिवरूपगमक इति यत् तदसङ्गतम् । ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति गीतायां ब्रह्मवाचकत्वस्यैवोक्तत्वेन तयोः शिवाकारगमकत्वाभावात् । नापि, धातुः प्रसादान्महिमानमीशमिति, यः परः स महेश्वर इत्यनयोरुपक्रमोपसंहारयोः । उपक्रमे 'अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोक' इति पादत्रयोत्तरं, 'धातुः प्रसादादिति' तुरीयपादः । तत्र तमित्यनेन पूर्वोक्तं महतो महीयांसमात्मानं दर्शनकर्मतया परामृश्य तद्विभूतिरूपमीशं पश्यतीत्याह । अन्यथा पौनरुक्त्यापत्तेः । महिमपदस्य विभूतिवाचकत्वं च, गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यमिति छान्दोग्यश्रुतौ सिद्धम् । किञ्चेशमहेश्वरशब्दौ रूढौ शिवे ।

शास्त्रारम्भस्तु प्रथमसूत्र एव समर्थितः ।

वैयासे तु दर्शने लिङ्गादिभिर्निर्णयस्याभिप्रेतत्वं, तल्लिङ्गाद्यधिकरणेषु दृश्यत इतिरूढिरप्रयोजिका । किञ्च, 'नारायणः शिवो विष्णुः शंकरः परमेश्वरः । एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इति वाराहपुराणवाक्ये रुद्रादिशब्दानां परब्रह्मनामत्वेनैव व्यवस्थापनात् त्रिलोचनादिविशिष्टरूपस्य ततोऽप्यसिद्धेः । नृसिंहतापनीये नृकेसरिशक्तिगणनायां श्रियं लक्ष्मीमौपलामम्बिकां गामिनिश्रावणात् । वाराहे, ॐमित्येकाक्षरीभूताया उमाया नारायणदारत्वेन कथनाच्च नाम्बिकापत्युमापतिपदाभ्यामपि तत्सिद्धिः । नापि यो वै रुद्रः स भगवानित्यथर्वशिरोवाक्येन । अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्सममिति पूर्वतापनीये नृसिंहमन्त्रराजजापकस्योत्कर्षश्रावणाद् विद्यावदुत्कर्षस्य च विद्योत्कर्षाधीनत्वाद् विद्योत्कर्षस्य च वेद्योत्कर्षाधीनत्वान्मन्त्रराजवेद्ये नृकेसरिण्येवोत्कर्षविश्रान्तेरथर्वशिरःशिखावेद्यस्य ब्रह्मरूपत्वेऽपि तत्र परत्वस्यापर्यवसानात् । एवमन्यत्रापि द्रष्टव्यम् । ब्रह्मरूपत्वं सर्वविद्येशानत्वं सर्वदेहीश्वरत्वं गुरुत्वोपाधिना मोक्षदातृत्वं तु तत्तच्छ्रुतिपुराणानुसारेणानुमन्यामह इति दिक् ।

प्रकृतमनुसरामः । ननु भवन्मते सर्वस्य वेदस्य सिद्धार्थपरत्वेन सिद्धस्वरूपब्रह्मप्रतिपादकत्वे सन्देहाभावान्न तदर्थं शास्त्रारम्भो वक्तुं शक्यः । ज्ञानकर्मसमुच्चयस्याप्यङ्गीकारेण कर्मण्यपि गौणतात्पर्यस्य विद्यमानत्वान्न तदर्थमपि । ब्रह्मणः कारणतायास्तेषु तेषु रूपेषु पर्यायेणाङ्गीकरिष्यमाणत्वाच्च न विष्णुशिवादिव्यतिरिक्तस्य ब्रह्मत्वनिरासार्थम् । अभिन्ननिमित्तोपादानवादिनो यावन्तस्तैः सर्वैरपि जन्मादिसूत्रविषयवाक्यविचारेणैव सर्वविधकारणतायाः समर्थनान्न तद्विशेषनिर्द्धारार्थमपीति भवन्मते शास्त्रारम्भवैयर्थ्यम् । नैवमन्यमते । तत्तदन्यस्मिन् वेदान्ततात्पर्याभावसमर्थकतया सार्थक्यादिति शङ्कायामाहुः * शास्त्रेत्यादि * । * प्रथमसूत्र इति * तत्र शेषषष्ठीसमर्थनस्थले, नच गौणतापत्तिरजिज्ञास्यत्वं चेत्यादिना । तन्मया विवृतं, केन प्रकारेणेत्यारभ्य दर्शनादितीत्यन्तेनेति ततो बोध्यम् ।

तस्मात् समवायिकारणत्वमेवानेन सूत्रेण सिद्धम् ।

ननु कारणत्वमेवास्तु ब्रह्मणः । किं समवायिकारणत्वेन । विकृतत्वं च स्यात् । अनर्थरूपत्वेन कार्यस्यायुक्तता च । तस्मादनारम्भणीयमेवैतत् सूत्रमिति चेन्मैवम् । सर्वोपनिषत्समाधानार्थं प्रवृत्तः सूत्रकारः । तद्यदि ब्रह्मणः समवायित्वं न ब्रू-

---

सिद्धमाहुः *तस्मादित्यादि* । शास्त्रारम्भस्य प्रथमसूत्र एव समर्थितत्वाद् द्वितीयसूत्रविषयवाक्ये, यतो वेत्यादेः कारणतामात्रबोधनेऽपि चारितार्थ्येन, यत्र प्रयन्त्यभिसंविशन्तीत्यस्याधारतामात्रबोधनेऽपि चारितार्थ्येन, सदेव सौम्येदमग्र आसीदित्यत्रापि, तत्तेजोऽसृजतेत्यादिना कर्तृत्वस्यैवासन्दिग्धतया उपादानत्वं केवलस्य वा शरीरद्वारा वेति सन्देहानपायात् । सौत्रस्य योनिशब्दस्यापि कारणमात्रवाचकत्वेन प्रमाणाबोधकत्वादुपादानत्वनिर्द्धारणासमर्थत्वाच्चैतः पूर्वसूत्रयोरुपादानत्वस्यासिद्धत्वादनेनैव सूत्रेण युक्तिनिर्देशात् तत्सिद्धमित्यर्थः । नन्वत्रोपादानपदं परित्यज्य समवायिपदेन कुतो व्यवहार इति चेदुच्यते । लोके उपादानपदेन कर्तृक्रियया व्याप्तस्य परिच्छिन्नस्यैवाभिधानदर्शनात् । प्रकृतिर्ह्यस्योपादानमिति, पुरुषस्तदुपादानमात्मानं लीलयाऽसृजदिति श्रीभागवतेऽपि भगवता मैत्रेयेण च तादृश एवोपादानपदस्य प्रयुक्तत्वाच्चेति जानीहि ।

अत्र ब्रह्मस्वरूपस्य समवायित्वममन्वानाः प्रत्यवतिष्ठन्ते *नन्वित्यादि* । अयमर्थः । समन्वयसूत्रे ब्रह्मस्वरूपस्य समवायित्वाग्रहो यः क्रियते, स न पूर्वसूत्रोक्तकारणतासमर्थनार्थः । शास्त्रयोनित्वेनैव समर्थितत्वात् । नापि शास्त्रयोनित्वसमर्थनार्थः । त्वया तथाऽनङ्गीकारात् । किन्तु कारणत्वे विशेषान्तरस्यापि बोधनार्थः । स न युक्तो विकृतत्वादिदोषापादकत्वात् । अतः शरीरस्य वोपाधेर्वा भिन्नाया एव प्रकृतेर्वा तथात्वं वक्तव्यम् । तथा सति स्वरूपसमन्वयस्याभावादनारम्भणीयमेवैतत् सूत्रं तव मते स्यादिति । अत्र समादधते *मैवमित्यादि* । व्यर्थः स्यादित्यत्र हेतुः *बाधितानि

याद् भूयानुपनिषद्भागो व्यर्थः स्यात्। इदं सर्वं यदयमात्मा, आत्मैवेदꣳ सर्वम्। स सर्वं भवति, ब्रह्म तं परादादित्यादि, स आत्मानꣳ स्वयमकुरुत, एकमेवाद्वितीयम्, वाचारम्भणं विकार इत्यादि। एवमादीनि वाक्यानि स्वार्थे बाधितानि भवेयुः।

भवेयुरिति। अयमर्थः। समवायित्वं यन्निषिद्ध्यते, तत् किं पूर्वसूत्रस्य निराकाङ्क्षत्वादुत दोषोत्पादकत्वात्। नाद्य। व्यासस्य सर्वोपनिषदां यथावस्थितार्थबोधनार्थं प्रवृत्तत्वेन भूयस उपनिषद्भागस्य वैयर्थ्ये जन्मादिसूत्रस्यविशेषाकाङ्क्षाया अनिवृत्तेः। नेतरः। तदभावस्यानुपदं व्युत्पाद्यत्वात्। स भागस्त्विदं सर्वमित्यादिरूपः। अत्राद्यवाक्यं मैत्रेयीब्राह्मणस्थम्। तत्र ह्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विदितमित्यनेनात्मज्ञानादिभिः सर्वज्ञानरूपं फलं दर्शयित्वा, तज्ज्ञानं किम्प्रकारकमित्याकाङ्क्षायां, ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेदेत्यादिना योऽन्यत्रात्मनः सर्वं वेदेत्यन्तेन ब्रह्मादिसर्वान्तेष्वात्मभिन्नत्ववेत्तुः कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवं प्रदर्श्येदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे यज्ञा इमानि भूतानीदं सर्वं यदयमात्मेत्युपसंहारे ज्ञानप्रकारदर्शनेन सर्वस्यात्माभेदं दर्शयति। तस्मिन्नभेदे सर्वस्यात्मोपादेयत्वमन्तरेणाघटमाने वाक्यमेव बाधितार्थं भवेत्। एवं द्वितीयवाक्यमपि, छान्दोग्ये सनत्कुमारसंवादे। तत्राप्यग्रे, आत्मनः प्राण आत्मन आशेत्यादि श्रूयते। तदप्यात्मनः समवायित्वं विना नोपपद्यते। तदतिरिक्तस्योपादानस्याश्रवणात्। तृतीयं तु पुरुषविधब्राह्मणस्थम्। तत्राप्यात्मैवेदमग्र आसीदिति सृष्टेपूर्वकाले केवलात्मसत्तामुक्त्वा, ततः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनेन सृष्ट्यनन्तरमन्यदर्शनमुपकम्यैव निषेधति। मध्ये च, किमु तद्ब्रह्मावेद् यस्मात् तत्सर्वमभवदिति प्रश्ने, तदात्मानमेवावेदहंब्रह्मास्मीति तस्मात् तत्सर्वमभवदित्युत्तरमुक्त्वा तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति सर्वात्मभावरूपं फलमाह। समवायित्वानङ्गीकारे तदपि सर्वं बाधितं भवेत्। तुरीयं तु तद्भिन्न-

किञ्च । अन्यपक्षार्थसृष्टौ वैषम्यनैर्घृण्ये स्याताम् । कर्माधीनत्वे त्वनीशिता । ततः कर्तृत्वमपि भज्येत । ततः सर्वमाहात्म्यनाश एव स्यात् ।

नन्वेवमेवास्तु, अपवादार्थत्वात् । रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । सर्वं समाप्नोषि ततोऽसि सर्व इति स्मृतेश्चेति चेत् । मैवम् । तथा सति पाषण्डित्वं स्यात् । एतादृशशास्त्रार्था-

---

सर्वस्य यथाधिकारं ब्रह्मणि सर्वकर्तृत्वं सर्वेश्वरत्वादिकं चानुसन्दधानस्य सेत्स्यत्येव। नच समवायित्वानुसन्धानस्यावश्यकत्वम्। शरीरद्वारापि तदङ्गीकारे पूर्वोक्तमाहात्म्यानपायेन तथानुसन्धानस्यानावश्यकत्वात् । अतोऽपार्थप्रयासात् तव मते एतत्सूत्रवैयर्थ्यमेवापद्येतेत्यत आहुः * किञ्चेत्यादि * । * तत इति * अनीशत्वे । * तत इति * कर्तृत्वभङ्गे । तथाच वैषम्यादिवारणेन कर्तृत्वादिसमर्थनार्थमप्यावश्यकत्वान्न वैयर्थ्यमतस्तवापि निर्दोषनिखिलगुणगणालङ्कृतब्रह्माङ्गीकर्तुरावश्यकमित्यर्थः ।

अत्र विरुद्धधर्माश्रयत्वमसहमानो निर्विशेषमात्रवादी पुनः शङ्कते * नन्वित्यादि * अयमर्थः । अस्तु कर्तृत्वादिभङ्गः । अस्थूलादिवाक्यैः स्वरूपस्य निर्विशेषत्वे निश्चिते तेषां कर्तृत्वादीनामविद्याकल्पितत्वेनापवादार्थत्वात् । नचैवं मिथ्यार्थकथने वाक्यप्रामाण्यभङ्गः । यथा ह्यतिचपले बाले तस्य भीत्युत्पादनाय रज्जुः सर्प इति प्रदर्श्यते, ततो विनीते तस्मिन् रज्जुरियमिति स्वरूपं कथ्यते । तथा संसारासक्तेषु भीत्यर्थं माहात्म्यं कर्तृत्वफलदातृत्वनियामकत्वादिरूपमुच्यते । ततो वैराग्याद्युत्पत्तौ स्वरूपं बोध्यत इति रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । तत्र तात्पर्याभावात् । अथेदं सर्वं यदयमात्मेत्यादीनां स्वार्थत्यागादस्यासङ्गतत्वं विभाव्यते । तदबोधात् । गीतायां विश्वरूपं पश्यता पार्थेनैव सर्वव्याप्त्या सर्वत्वकथनेन तदर्थनिश्चयादसङ्गत्यभावादिति ।

अत्र समादधते * मैवमित्यादि * । * तथा सतीति * सर्वधर्मापवादे कृते सति ।* पाषण्डित्वमिति * पापलिङ्गवत्त्वम् । तानि

ङ्गीकर्तुरासुरेषु भगवता गणितत्वात्। 'असत्यमप्रतिष्ठं ते जगदाहुर-
नीश्वरम् । अपरस्परसम्भूतं किमन्यत् कामहैतुकम्' इति।शास्त्रा-
नर्थक्यं च।सर्वं समाप्नोषीत्यप्यसङ्गतं स्यात् । वस्तुपरिच्छेदात् ।

पापस्य षण्डानि लिङ्गं षण्डमिहोच्यत इति श्रीभागवतवाक्यात् ।
गीतावाक्यार्थस्तु, ते असुरा असत्यं नास्ति सत्यं वेदपुराणादिप्रमाणं
यस्मिंस्तदसत्यम् । वेदादिस्वरूपसत्त्वेऽपि तत्प्रामाण्यानभ्युपगमादु
विशिष्टाभावः । अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा हेतुव्यवस्था य-
स्येत्यप्रतिष्ठम् । तथा नास्ति शुभाशुभफलदातेश्वरो नियन्ता यस्येत्य-
नीश्वरं जगदाहुरिति । यद्वा सत्यं सत्यशब्दनिर्दिष्टं ब्रह्म,तदुपादेयत्वेन
तदात्मकत्वे जगदपि सत्यं भवति, तद्विरुद्धमसत्यम् । न विद्यते ब्रह्मणि
प्रतिष्ठा यस्येत्यप्रतिष्ठम् । न विद्यते नियामकः सत्यसङ्कल्प ईश्वरो
यस्येत्यनीश्वरमिति । किञ्च, सर्वं पशुमनुष्यादिकं योषित्पुरुषयोः
परस्परसम्बन्धेन जातमुपलभ्यते । अनेवम्भूतमपरस्परसम्भूतं तादृ-
शमन्यत् किं, न किमपि।अत इदं सर्वं कामहैतुकमिति । यद्वा । यतः
सर्वमेवमतोऽदृष्टं कारणं किमपि नास्ति। अदृष्टाङ्गीकारेऽपि क्वचिद्गत्वाऽ-
न्ततः स्वभाव एव पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु ।
दृष्टे सम्भवत्यदृष्टकल्पनानवकाशात् । अतः काम एव प्राणिनां का-
रणं, नान्यददृष्टेश्वरादीत्याहुरिति । इयं च लौकायतिकदृष्टिरिति ।
ततश्चायमर्थः । धर्माणामपवादमातिष्ठतस्तद्विशिष्टस्येश्वरस्य काल्प-
निकत्वेन वस्तुतस्तदभावात् प्रच्छन्नानीश्वरवादितया स्वभाववाद
एव विश्रान्त्या लौकायतिककल्पत्वात् पाषण्डित्वस्य गीतोक्तलक्षण-
कत्वादासुरत्वस्य चापत्तिर्वेदस्यापि कल्पितत्वापत्त्या तस्यानर्थक्य-
म् । कथञ्चित्प्रामाण्याङ्गीकारेऽपि संसारभ्रमस्यौत्पत्तिकत्वात् तद्भ्र-
मनिवारणाय स्वरूपमात्रस्यैव वक्तव्यत्वेन शेषशास्त्रस्य प्रक्षालनपङ्क-
न्यायादानर्थक्यम् । स्वस्वमतकल्पितरूपस्य चेतनविशेषस्येश्वरस्य स-
र्वैरेवाङ्गीकारेण तत्सत्तासाधनायाप्यनुपयोगात् । अपवादार्थमेवारो-
पितमेव सर्वमुच्यत इत्यङ्गीकारे, सर्वं समाप्नोषीत्यस्याप्यसङ्गतिः ।
पदार्थान्तरस्य व्याप्यस्याभावेनावस्तुनश्चाव्याप्यत्वेनास्य वस्तुपरिच्छे-
दबोधकस्यार्थबाधापत्तेः । असङ्गतत्वं विभजन्त एव तदुपपादकमा-

नहि वेदो निष्प्रपञ्चरूपकथनमुक्त्वा स्वोक्तं जगत्कर्तृत्वं निषेध-ति । तस्मादध्यारोपापवादपरत्वेन व्याख्यातृभिर्वेदान्तास्तिला-पः कृता इति मन्यामहे । सर्ववाक्यार्थबाधात् ।

यथा निर्दोषपूर्णगुणविग्रहता भवति तथोपरिष्टाद् वक्ष्यामः ।

ननु पुरुषार्थार्थानि शास्त्राणि । इदं च शास्त्रं मोक्षरूपपुरुषा-र्थसाधकम् । मोक्षश्चाविद्यानिवृत्तिरूप इति युक्तम् । अविद्या

हुः * न हीत्यादि * यदि हि निष्प्रपञ्चकथनं मुक्त्वा जगत्कर्तृत्वं ब्रह्मणि निषेधेत्, तदा कर्त्रन्तरादिसत्तया जगदपि सर्वं स्यात् । तदा व्याप्यसिद्धौ सर्वं समाप्नोषीति वाक्यं सङ्गतं स्यात् । यथा तात्त्विक-भेदवादिनां मते । तव मते तु निष्प्रपञ्चत्वकथनपूर्वक एव कर्तृत्वा-दिनिषेध इति त्वन्मते इदं वाक्यमसङ्गतमेवेत्यर्थः । एवं तन्मतमपास्य तमुपहसन्ति * तस्मादित्यादि * । * तस्मादिति * युक्तिप्रमाणविरुद्ध-त्वात् । तथाचैवंविधव्याख्यानरोगेण स्वयंनिवृत्तदैवभावैरासुरत्वरू-पमरणप्राप्त्या अस्पृश्यैर्वेदान्ता अपि शवतिलापो यथा अमङ्गला अ-स्पृश्यास्तथा कृता इत्यर्थः । अत एव प्रबोधचन्द्रोदयनाटकेऽपि बौ-द्धोक्तिः । 'प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते' इति । असद्वा इदमग्र आसीत्, ततो वै सदजायतेति श्रुतिच्छायायास्तैरप्यालम्बनात् । अत एव पाद्मोत्त-रखण्डेऽप्युक्तम् 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणेत्यादि' । ननु ब्रह्मणः प्रपञ्चसमवा-यित्वमयुक्तम् । कार्यस्य कारणसाजात्यनियमेन प्रपञ्चगतदोषाणां ब्र-ह्मण्यापातादित्याकाङ्क्षायामाहुः * यथा निर्दोषेत्यादि * । * उप-रिष्टादिति * अन्तस्तद्धर्माधिकरणे ।

अपवादार्थत्वे उक्तान् दोषानसहमानो निर्विशेषवादी पुनः प्र-त्यवतिष्ठते * नन्वित्यादि * । * युक्तमिति * दुःखजन्मप्रवृत्तिदो-षमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति गौतम-सूत्रे मिथ्याज्ञानापायस्य मोक्षसाधकत्वेन कथनाद्युक्तम् । * अविद्या

चाज्ञानं ज्ञानेनैव नश्यति । ततो ज्ञानोपयोगित्वेन व्याख्यातव्ये वेदान्तेऽध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तम् । अतो यथाकथञ्चिद् व्याख्यानेऽपि पुरुषार्थसिद्धेर्न कोऽपि दोष इति चेत् ।

चाज्ञानमिति * । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति पतञ्जलिसूत्र उक्तं भावरूपमज्ञानं, न तु ज्ञानाभावः । योगभाष्ये, अमित्रो न मित्रं, न वा मित्राभावः, किन्तु मित्रविरुद्धमपरमिति दृष्टान्तेन व्यासपादैरेव भावरूपताया उक्तत्वादिति । तत-श्चायमर्थः । शास्त्रस्य स्वार्थबाधने य आग्रहः क्रियते स शास्त्रस्वरूपं विचार्य कार्यः । न हि शास्त्रत्वेन शास्त्राणामुपादेयता येन स युक्तः स्यात् । किन्तु पुरुषार्थत्वेन । पुरुषाश्च नानास्वभावाः स्वस्वोपयोगिशास्त्रमाद्रियन्ते । तत्रेदं शास्त्रं मोक्षसाधकं मुमुक्षूपयोगि । मोक्षस्त्वभियुक्तैरविद्यानिवृत्तिसाध्यतयोक्तत्वादविद्यानिवृत्तिरूप एवात्र वक्तव्यो, न तु स्वरूपात्मकः । तस्याजन्यत्वात् । तत्र च साधनानामनुपयोगेन तदुपदेशवैयर्थ्यप्रसङ्गाच्च । नचाविद्यानिवृत्तेर्जन्यत्वे कदाचित् तन्नाशः शङ्क्यः । ध्वंसरूपत्वात् । अत एव जन्यभावत्वेन नश्वरत्वेन व्याप्तिराद्रियते, न तु केवलं जन्यत्वेन । ततश्च साधनसाध्यो मोक्षोऽविद्यानिवृत्तिरूप एवेत्यविवादम् । तत्र साधनविचारे यद्यपि दर्शनान्तराभिमानिभिः साधनान्तराणि कर्मसमुच्चितत्तद्विधज्ञानरूपाण्युक्तानि । श्रौतेऽस्मिन् वेदान्तदर्शने केवलं ज्ञानमेव साधनम् । अविद्याया अज्ञानरूपत्वस्य साधितत्वात् । विवक्षितज्ञानमात्रेणैव तन्निवृत्तिसिद्धौ साधनान्तराणां समुच्चयस्य चापार्थत्वात् । ततो ज्ञानोपयोगित्वेनैव वेदान्तव्याख्याने कर्तव्ये ऽध्यारोपापवादपक्षमपहाय स्वार्थपरत्वेन व्याख्यानं नाभियुक्तजनरुचिरम् । अतो यथाकथञ्चिद्व्याख्यानेऽपि ज्ञानोत्पत्त्या अज्ञाननिवृत्तौ, ब्रह्म वेद ब्रह्मैव भवतीति निरूपस्वरूपावस्थात्मकपुरुषार्थसिद्धेरप्रत्यूहत्वात् पाषण्डित्वासुरत्वशास्त्रानर्थक्यादिरूपाणां दोषाणां लेशस्याप्यभावादनुचितोऽयमुपहास इति । एवं तेन स्वोपहासे विनि-

न। पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यं, न स्वबुद्धिपरिकल्पितम्। अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः।

पुरुषार्थः पुनर्यथा वेदान्तेष्ववगतः। ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मविदाप्नोति परम्, न स पुनरावर्तते, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्, अनावृत्तिः शब्दादनावृत्तिः श-

---

वारिते तस्यापत्रपत्वं बोधयन्तः स्वोक्तं स्थिरीकर्तुं तदुक्तं निषेधन्तः प्रामाणिकप्राचीनरीतिमाहुः * नेत्यादि *। अयमर्थः। यदुक्तं, पुरुषार्थार्थानि शास्त्राणीत्यादिना, तदङ्गीकुर्मः। परन्तु पुरुषार्थः शास्त्रार्थश्च कीदृशो विवक्षित इति विचारणीयम्। किं स्मार्त उत श्रौतः?। तत्र नाद्यः। विरुद्धानां शास्त्राणां व्यासेनैव निराकरणात्। वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ति। तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त इति भवद्भाष्यकृतापि तन्निराकरणाङ्गीकारात्। अतो द्वितीय एवादरणीयः। तथा सति पुरुषार्थस्य शास्त्रार्थस्य च स्वरूपं श्रुत्येकसमधिगम्यं, न तु दर्शनान्तरवाक्यादरणेन स्वबुद्धिकल्पितमिति सिद्धम्। एवं सति पदवाक्यप्रमाणनिष्णातेनाचार्येण कार्यलक्षणस्यैव पूर्वं विचारितत्वादग्रे तत्तद्धर्मादिविचाराच्च धर्मविशिष्टब्रह्मज्ञानमेव शास्त्रार्थो, न त्वध्यारोपापवादेन यावद्धर्मशून्यब्रह्मावगतिः। अतः स्वबुद्ध्या तथा शास्त्रार्थं कल्पयित्वा तत्र वेदस्यैकवाक्यत्वं बोधयन्तो लोकान्तरीयभयराहित्येन महासाहसकर्तृत्वात सद्भिर्वेदानुसारिभिरसम्भाष्या इति। मोक्षस्याविद्यानिवृत्तिरूपत्वन्युदासायाहुः * पुरुषार्थ इत्यादि *। तथाचाविद्यानिवृत्तिरूपो मोक्षः कुत्रापि नोक्त इति त्वन्मतीयः पुरुषार्थोऽपि काल्पनिक इत्यर्थः। एतदेव बोधयितुं वाक्यान्युदाहरन्ति * ब्रह्म वेदेत्यादि *। अत्र प्रथमे ब्रह्मभावो, द्वितीये परब्रह्मप्राप्तिरेव च फलत्वेनोच्यते। तृतीये च संसारावृत्त्यभावः। चतुर्थे गीतावाक्ये आप्तिस्वरूपं निरूप्यते। पञ्चमे च

न्वादित्येवमादिभिः श्रुतिस्मृतिन्यायैर्ब्रह्मप्राप्तेरेव पुरुषार्थत्वम्। ब्रह्म च पुनर्न जीवस्यात्ममात्रम्। अज्ञानबद्धा। 'एकस्यैव-

---

वैयासे सूत्रे तृतीयवाक्यार्थनिर्द्धारणेन जन्यभावत्वनश्वरत्वयोर्व्याप्तिर्निराक्रियते। अत्रायमाशयः। भवद्भाष्ये न्यायसूत्रोपन्यासेनाविद्यानिवृत्तेर्ध्वंसरूपत्वादनश्वरत्वं यदसूचि, तद् आश्रमवासिके भारतीये पर्वणि महता प्रबन्धेन, त्यक्तदेहानां कुरुपाण्डवसैन्यानां व्यासेन पुनर्दर्शितानां स्वस्वपत्नीभिः सहैकरात्रिकृतविहारामन्त्रणादिकथनाद् ध्वंसस्याप्यनश्वरत्वं प्रायिकमेव, न तु नियमतस्तद्वद्विद्याकृताविद्यानिवृत्तेरपि स्वप्नप्रबोधन्यायेन च निवृत्तिसम्भवान्नानश्वरत्वं, गुणानामन्योन्याभिभवजननमिथुनवृत्तितया सत्त्वेन रजस्तमसोरिव ताभ्यां सत्त्वस्याप्यभिभवे पुनरप्यविद्योत्पत्तिसम्भवाद्सङ्गतम्। अतस्तद्विहाय श्रौत एव ब्रह्मप्राप्तिरूपः पुरुषार्थ आदर्त्तव्यः। नच तस्य नश्वरत्वं शङ्क्यम्। न स पुनरावर्तत इति ब्रह्मप्राप्तस्यानावृत्तिबोधनेन तस्यानश्वरत्वनिश्चयात्। जन्यभावत्वेन नश्वरत्वेन व्याप्तेर्लौकिकत्वबोधनायैव सूत्रे शब्दादित्यस्य हेतोरुपन्यासात्। नच ब्रह्मणः सर्वगतत्वेन नित्याप्तस्वरूपत्वादनाप्यत्व शङ्क्यम्। आप्तस्वरूपत्वेऽप्युक्तगीतावाक्ये आप्तिस्वरूपविवरणेनेदानीं तस्याभावादाप्यत्वस्यापि सत्त्वात्। एतदर्थापत्त्यैवान्तस्त्वबहिष्ट्वयोरपि तत्र मन्तव्यत्वात्। नच श्वेताश्वतरोपनिषदि, भूयश्चान्ते विश्वमायानिवृत्तिरितिमायानिवृत्तेर्मोक्षरूपत्वश्रावणादविद्यानिवृत्तेरप्यनश्वरत्वं श्रौतत्वं च शङ्क्यम्। मायाऽविद्ययोर्भेदात्। 'विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते' इति भगवता तयोः कार्यकारणभावबोधनात्। माया चाविद्या च स्वयमेव भवतीति तापनीयश्रावितद्वैरूप्यपक्षेऽपि तयोर्भेदेन तन्नाशयोरपि भिन्नत्वान्मायानिवृत्तेरेव मोक्षत्वं, नाविद्यानिवृत्तेः। मायानिवृत्तिश्च मोक्षस्य पूर्वा कक्षेति परममोक्षत्वं ब्रह्मप्राप्तेरेव निश्चेयम्। तदेतदुक्तं * ब्रह्मप्राप्तेरेव पुरुषार्थत्वमिति *। यदपि मोक्षस्य स्वात्मस्वरूपत्वेनानाप्यत्वमुक्तं. यच्च ब्रह्मणोऽविद्याशाबल्यादज्ञानबत्त्वं तदप्यसङ्गतमिति ज्ञापनायाहुः * ब्रह्म चेत्यादि *। *आत्ममात्रमिति * मात्रं कार्त्स्न्येऽवधारणे। कृत्स्नमात्मस्वरूपम्। तथाचा-

ममांशस्य जीवस्यैव महामते । बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतर' इति भगवता जीवस्यैवाविद्यावत्त्वप्रतिपादनात् ।

तस्मान्न्यायोपबृंहितसर्ववेदान्तप्रतिपादितसर्वधर्मवद् ब्रह्म । तस्य श्रवणमनननिदिध्यासनैरन्तरङ्गैः शमदमादिभिश्च बाहिरङ्गैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः । तस्मात् सर्वे वेदान्ताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वाद् ब्रह्मणः समवायित्वाय समन्वयसूत्रं वक्तव्यम् ॥ ३ ॥

एवं ब्रह्मजिज्ञासां प्रतिज्ञाय किंलक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकं जगत्कर्तृ समवायि चेत्युक्तम् ।

ऽस्मिन् वाक्ये जीवस्यांशत्वकथनेन स्वस्यांशित्वं बोधयता भगवता ब्रह्मणो जीवात्ममात्रत्वे निवारिते मोक्षस्यात्मरूपत्वेनानाप्यत्वं निवारितम् । जीवस्याविद्यया बन्धकथनेन ब्रह्मणोऽविद्यावत्त्वमपि निवारितमतस्तद्द्वयमङ्गतमित्यर्थः । सिद्धमाहुः ＊ तस्मादित्यादि ＊ । तस्मादिति ＊ एकदेशिमतस्योपबृंहणविरुद्धत्वात् । ＊ तस्येति ＊ सर्ववेदान्तप्रतिपादितधर्मविशिष्टस्य ब्रह्मणः । ＊ स्वयमाविर्भूतस्येति ＊ नायमात्मेतिश्रुत्या साधनाधीनत्वे ब्रह्माविर्भावस्य वारिते आविर्भावः स्वीकरणेन प्रसादादेव भवतीति तेन स्वयमाविर्भूतस्य । तथाच श्रौतानां स्मार्तानां च ब्रह्मविषयाणां साधनानां चित्तकषायशोषण एव पर्यवसानात् तैरतिशुद्धे चित्ते परमव्योमात्मके सति तत्राविर्भूतस्य ब्रह्मणः, सोऽश्नुत इतिश्रुत्युक्तं सायुज्यमेव सर्वोत्कृष्टः पुरुषार्थो ध्वंसाप्रतियोगित्वात् । न तु ब्रह्मात्मावगतिमात्रम् । अतस्तादर्थ्येन यथाकथञ्चिद् वेदान्तव्याख्यानमयुक्तमित्यर्थः । एवमेकदेशिमतानि व्युदस्य पूर्वोक्तं सूत्रप्रयोजनं निगमयन्ति ＊ तस्मादित्यादि ＊ ॥

इति तृतीयाधिकरणम् ॥ ३ ॥

अतः परं प्रस्तोष्यमाणग्रन्थावतरणाय पूर्वोक्तस्य शास्त्रार्थसंग्रहरूपत्वं बोधयन्तस्तदर्थमनुवदन्ति ＊ एवं ब्रह्मेत्यादि ＊ । तेन सि-

एवं त्रिसूत्र्या जिज्ञासालक्षणविचारकर्तव्यता सिद्धा ।

तत्र ब्रह्मणि चतुर्द्धा विचारः । स्वरूपसाधनफलप्रतिपादकानि सर्ववेदान्तवाक्यानि त्रिविधानि मतान्तरनिराकरणं च । तत्र स्वरूपे विचारिते मतान्तरनिरासव्यतिरेकेण साधनफलयोरनुपयोगात् । अतः प्रथमं स्वरूपनिर्णयः । तदनु मतान्तरनिरासः । तदनु साधनानि फलं चेति । तत्र प्रथमेऽध्याये स्वरूपवाक्यानि विचार्यन्ते तानि द्विविधानि । सन्दिग्धानि, निःसन्दिग्धानि च । तत्र निःसन्दिग्धानां निर्णयो न वक्तव्यः । सन्दिग्धानि पुनश्चतुर्विधानि । कार्यप्रतिपादकान्यन्तर्यामिप्रति-

---

त्वमाहुः * एवं त्रिसूत्र्येत्यादि * कर्तव्यतापदस्य जिज्ञासादिपदैः प्रत्येकं सम्बन्धः । * सिद्धेति * सूचिता । तथाच पूर्वसूत्रे जिज्ञासापदमहिम्ना ज्ञानेच्छास्मारणेन, अविज्ञातं विजानतां विज्ञातमविजानतामिति ब्रह्मस्वरूपमर्यादाबोधनाद् ब्रह्मज्ञानोत्तरमपि तस्याः करणावश्यकता सूचिता । द्वितीये स्वरूपलक्षणमनुक्त्वैव कार्यलक्षणकथनेन तस्य गौणत्वनिवारणात् तत्करणावश्यकता सूचिता । तृतीये समवायित्वनिर्णायकहेतुकथनेन विरुद्धधर्माश्रयत्वबोधनाद् विचारकरणावश्यकता च सूचितेति त्रिसूत्र्युक्त पदार्थोऽग्रे विशेषाकारेण बोधनीय इत्यर्थः । तमेव वैशेषिकं बोधयितुं प्रकारमाहुः *तत्र ब्रह्मणीत्यादि* । अत्राध्यायार्थक्रमनियमे तत्तदुपजीव्योपजीवकभावं हेतुत्वेनाहुः * तत्र स्वरूप इत्यादि * । तथाचैवं चतुर्द्धा विचारः शास्त्रार्थः । तत्तद्विधविचारस्तत्तदध्यायार्थ इत्यर्थः । प्रथमाध्यायस्य विशेषाकारेणार्थमाहुः * तत्र प्रथम इति * । * निःसन्दिग्धानीति * सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादीनि । * न वक्तव्य इति * निर्णयस्य सन्देहनिरासार्थत्वात् तेषु च तस्याभावान्न वक्तव्यः । तथाच स्वरूपनिरूपकत्वेऽपि सन्देहाजनकत्वादेव तद्विचारो व्यासेन न क्रियत इत्यर्थः । पादसंख्यायां हेतुभूतां विधामाहुः * सन्दिग्धानीत्यादि* । प्रथमपादार्थमाहुः * तत्रेत्यादि * । निर्णेतव्यानां वाक्यानां विधां वदन्ति ।

पादकान्युपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेति । तत्र प्रथमपादे कार्यवाक्यानां निर्णय उच्यते । सच्चिदानन्दरूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयन्ते । अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति ।

सच्चिदित्यादि सच्चिदानन्दरूपेण कारणं निर्दिश्य कार्यप्रतिपादकानि, आकाशवायुतेजोवाचकशब्देन कारणं निर्दिश्य कार्यप्रतिपादकानीत्येवं षड्विधान्याद्ये पादे निर्णीयन्त इत्यर्थः । नन्वन्यवाचकैः शब्दैः कुतो निर्देश इतिशङ्कानिरासायाहुः *अन्यत्रेत्यादि* तथाच तेषां नैसर्गिकशक्तिबोधनेन भूताकाशादिषु ब्रह्मलक्षणस्यातिव्याप्तिपरिहारायैवं निर्देश इति बोधयितुमयं निर्णय इत्यर्थः। एवमुपोद्घातेनार्थकथनादि बोधितम् । विचारस्य शास्त्रार्थत्वाज्जिज्ञासासूत्रस्य सर्वत्र विषयिविषयभावः सङ्गतिः। शास्त्रस्याध्यायेषु तेषां स्वपादादिषु पादानां स्वावयवेषु सामान्यविशेषभावः । अधिकरणानां परस्परमन्यान्या एव सङ्गतय उन्नेया इति । सङ्गतिस्त्वनन्तराभिधानप्रयोजकाकाङ्क्षाजनकज्ञानविषयोऽर्थः । इदं वाक्यमेतद्वाक्यानन्तरं कस्मादुक्तमीदृशी या जिज्ञासा सा अनन्तराभिधानप्रयोजकाकाङ्क्षा । तज्जनकं तत्स्वरूपयोगि यज्ज्ञानं तत्र विषयत्वेन योऽर्थः प्रकाशते सोऽर्थः सङ्गतिशब्दवाच्यः। तद्भेदाश्च षट्। 'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यत' इत्यभियुक्तोक्तेः। तत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः । प्रकृतार्थसाधकत्वमुपोद्घातः । उपजीव्योपजीवकभावो हेतुता। सा सापेक्षत्वादुभयसंग्राहिका । अप्रतिबन्धकीभूतजिज्ञासानिवृत्ताववश्यवक्तव्यत्वमवसरः । निर्वाहप्रयोजकता निर्वाहकत्वम्। एकजातीयकार्यजनकत्वमेककार्यत्वम् । इदं च सङ्गत्यभिधानमात्रोपयोगित्वात् स्वरूपकथनमात्रम्। लक्षणं तु प्रसङ्गाद्यन्यतमत्वमेव । तेन पूर्वस्येष्टसाधनत्वाधाराधेयभावादावव्याप्तावपि न दोष इति नैयायिका आहुः ॥ वयं तु, सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेन

तत्र लक्षणविचार एव सद्रूपाणां वाचकता निर्णीता । चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थमीक्षत्यधिकरणमारभ्यते सप्तभिः सूत्रैः । सप्तद्वारत्वाज्ज्ञानस्य । तत्रैवं सन्देहः । ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वाद् यतो वाचो निवर्तन्त इति श्रुतेश्च विचारः कर्तुं न शक्यते । स्वप्रकाशत्वविरोधात् । श्रुतिविरोधाच्च । आहोस्विद् विरोधपरिहारेण शक्यत इति ।

किं तावत् प्राप्तम् । न शक्यत इति । कुतः ।

स्मृतस्योपेक्षानर्हत्वमेव सङ्गतिः । हेतुतादयः सर्वे उपेक्षानर्हत्वस्यैव प्रयोजका धर्मास्ते तद्बोधकतया सङ्गतित्वेनोच्यन्ते । तत्रैयत्तानियामकस्यास्मद्दर्शनेऽनुक्तत्वादन्येषामपि संग्रहो न दुष्ट इति रोचयामहे । तत्र जन्माद्यधिकरणे जगदुत्पत्त्यादिरूपसदात्मककार्यनिरूपणेन सामान्यतः कारणतया विशेषतः कर्तृतया च स्वरूपं निरूपितम् । समन्वयाधिकरणे च सर्वत्र ब्रह्मणः समनुगतत्वादुपादानतया विशेषतस्तन्निरूपितम् । तत्र यत् सामान्यतः सिद्धं तदनुवदन्ति * तत्रेत्यादि * उक्तविधेषु वाक्येषु पूर्वसूत्राभ्यां कृते लक्षणविचार एव सद् रूप्यते यैस्तेषां सदेव सौम्येदमग्र आसीदित्यादिवाक्यगतानां पदानां ब्रह्मवाचकता निर्णीता । कार्यस्य सदात्मकत्वेन तत्कारणभूतं ब्रह्मैव सच्छब्दैर्वाक्येषूच्यत इति निर्णयः कृत इत्यर्थः । अतः परमग्रिमाधिकरणप्रयोजनमाहुः * चिद्रूपस्येत्यादि * । निर्णयप्रयोजनमग्रिमसूत्रे स्फुटीभविष्यति । * सप्तद्वारत्वादिति * पञ्च चक्षुरादीनि मनो जीवश्चेत्येवं सप्तद्वारत्वात् । तथाचान्यत्र गुणवाचका अपि ज्ञानादिशब्दा वेदान्तवाक्यविशेषेषु ब्रह्मवाचका इति बोधनाय सप्तसूत्राणीत्यर्थः । संशयस्याकारमाहुः * तत्रैवमित्यादि * । * स्वप्रकाशत्वेनेति * तमेव भान्तमनुभाति विश्वमितिश्रुत्या स्वप्रकाशत्वेन । *स्वप्रकाशत्वविरोधादिति* प्रमाणविषयत्वे तज्ज्ञानस्य प्रमाणतन्त्रत्वेन स्वप्रकाशत्वाभावेन तद्विरोधात् । *श्रुतिविरोधादिति * विचारस्य मनोवाग्विषयत्व एव सम्भवेनोक्तश्रुतिविरोधात् ।

ज्ञापनार्थं प्रमाणानि सन्निकर्षादिमार्गतः ।
सर्वथाऽविषयेऽवाच्येऽव्यवहार्ये कुतः प्रमा ॥

ऐहिकामुष्मिकव्यवहारयोग्ये हि पुरुषप्रवृत्तिः । प्रवृत्त्यर्थं हि प्रमाणानि । ब्रह्म पुनः सर्वव्यवहारातीतमिति । नन्वेतदपि वेदादेवावगम्यत इति चेत् तर्हि बाधितार्थप्रतिपादकत्वान्न वेदान्ता विचारयितव्या इति प्राप्ते । उच्यते ।

विधिकोटिस्तु स्फुटैव । पूर्वपक्षयुक्तिं गृह्णन्ति *ज्ञापनार्थमित्यादि* । *सन्निकर्षादिमार्गत इति* आदिपदेन सहकारीणि । मार्ग उपायः । *सर्वथाऽविषय इति* स्वप्रकाशत्वेन मनोनिवृत्तिश्रुत्या च सर्वप्रमाणाविषये । *अवाच्य इति* वाङ्निवृत्तिश्रुत्या सत्यज्ञानादिपदैरपि लक्ष्यत्वादवाच्ये । अव्यवहार्यत्वं विभजन्ते । *ऐहिकेत्यादि* व्यवहारो नाम मनोमात्रेन्द्रियप्राणजन्यपुरुषप्रवृत्तिरूपो व्यापारः । *सर्वव्यवहारातीतमिति* लौकिकवैदिकव्यापारानर्हम्* । *एतदिति* अविषयत्वादिकम् । *वेदादिति* न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात् । अन्यदेव तद्विदितादथो अविदितादधीत्यादिरूपात् । अयमर्थः । प्रमाणैर्हि द्रव्यगुणक्रियादिरूपाः पदार्था लौकिकालौकिकसन्निकर्षेण यथार्हं प्रमीयन्ते । ब्रह्म त्वस्थूलादिवाक्यैरतद्रूपत्वादसङ्गत्वेनासन्निकृष्टत्वाच्च सर्वप्रमाणाविषयम् । अतद्रूपत्वादेव च नामाख्यातनिपातोपसर्गरूपचतुर्विधपदजातप्रतिपाद्यतया अवाच्यम् । अवाच्यत्वादेव वैदिकव्यवहाराद्व्यतीतम् । तदेतत्सर्वमभिप्रेत्य, यतो वाच इत्यादयस्ततो वागादीनां निवृत्तिं तस्य विदिताविदितान्यत्वं च श्रावयन्तीत्यतस्तदविचार्यम् । तस्याविचार्यत्वादेव तत्प्रमितिफला वेदान्ता अप्यविचार्याः । अथ ब्रह्मण एवंरूपतापि वेदादेवावगम्यत इति तस्याप्रमेयत्वज्ञानायैव विचार्या वेदान्ता इति विभाव्यते, तदा तु स्वव्यापारेण तत्समर्पयन्तस्तस्य तथात्वं बोधयन्तीति, मम माता वन्ध्येतिवाक्यवद् बाधितार्थप्रतिपादकत्वादेवाविचार्या इति । एवं पू-

ईक्षतेर्नाशब्दम् ॥ ४ ॥

न विद्यते शब्दो यत्रेत्यशब्दं सर्ववेदान्ताद्यप्रतिपाद्यं ब्रह्म न भवति । कुतः । ईक्षतेः । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत । तथाऽन्यत्र । आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् । स ऐक्षत लोकान्नुसृजा इति । स इमाँल्लोकानसृजतेति । स ईक्षाञ्चक्रे । स प्राणमसृजतेत्येवमादिषु सृष्टिवाक्येषु ब्रह्मण ईक्षा प्रतीयते ।

पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं पठन्ति ।

* ईक्षतेर्नाशब्दम् * ।

व्याकुर्वन्ति * नेत्यादि * । ननु ब्रह्मणो वेदान्ताद्यात्मकशब्दप्रतिपाद्यत्वे ईक्षतिधातुनिर्देशस्य कथं हेतुत्वमित्याकाङ्क्षायां विषयवाक्यान्युदाहरन्ति * सदेवेत्यादि * । अत्र प्रथमं वाक्यं छान्दोग्यस्थम् । द्वितीयमाश्वलायनानामैतरेयोपनिषत्स्थम् । तृतीयं प्रश्नोपनिषदः षष्ठप्रश्नस्थम् । * मिषदिति * व्यापारं कुर्वत् । आदिपदेनादिसृष्टिविषयकेक्षणघटितानां, ब्रह्म वा इदमग्र आसीत् स्वयम्भ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम इत्यादीनां संग्रहः । तथाच, न केवलमीक्षतिर्ब्रह्मणो वेदान्तशब्दप्रतिपाद्यत्वे हेतुभूतः, किन्तु वाक्यगतः । तेन च स्वार्थप्रत्यायने वाक्येषु ब्रह्मकर्तृकेक्षा प्रतीयते । ईक्षा च पर्यालोचनम् एवं करिष्यामीत्यध्यवसायः । सोऽत्रैतादृश इति कार्यबलादुन्नीयते । अत एतादृशेक्षाबोधकेनेक्षातिना यत्रैवं पूर्वमव्यवहार्यत्वेऽपि पश्चाद् व्यवहार्यत्वेन प्रतिपाद्यत्वाभावस्तत्र तत्रैवमीक्षणकर्तृत्वेन प्रतिपाद्यत्वाभाव इति व्याप्तिर्बोध्यत इतीक्षतेर्हेतुत्वमित्यर्थः । एवं सर्वत्र हेतुशोधनप्रकारो बोध्यः । ननु प्रतीयता-

किमतो यद्येवम् । एवमेतत् स्यात् । सर्वव्यवहारप्रमाणातीतोऽपि इमांश्चक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति । अतो यथा यथा कृतवांस्तथा तथा स्वयमेवोक्तवान् । पूर्वरूपं फलरूपं च सृष्टवांशपुरुषार्थत्वाय । ततश्च प्रमाणबलेनाविषयः, स्वेच्छया विषयश्चेत्युक्तम् ।

ननु सर्वप्रमाणाविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धान्तीक्रियते । उच्यते । चक्षुरादीनां प्रामाण्यमन्यमुखनिरीक्षकत्वेन, न स्वतः । भ्रमाद्युत्पत्तिप्रसङ्गात् । सत्त्वसहितानामेव

मीक्षा, तावता पूर्वोक्तविरोधस्य कथं परिहार इति पृच्छति * किमतो यद्येवमिति *। *समादधते *एवमित्यादि* तथाच ब्रह्मणः पूर्वोक्तरूपत्वस्येक्षायाश्च श्रुतिसिद्धत्वाच्छ्रौतत्वेनैकतरबाधस्याप्यनुचितत्वाद् विरुद्धधर्माधारत्वस्य ब्रह्मणि भूषणत्वात् तस्याप्यन्यदेव तद्विदितादथो अविदितात्, तदेजति तन्नैजतीत्यादिश्रुतिसिद्धत्वादभिन्ननिमित्तोपादानवादमुपगच्छता तस्याप्यङ्गीकाराच्चैवमीक्षाकार्यसिद्धौ सुखेन सिद्ध्यति विरोधपरिहारे ब्रह्मणो विचार्यत्वस्यापि सिद्धिमाहुः शब्दब्रह्मकृतिबोधकत्वेन वेदान्तानामप्यबाधितार्थत्वात् तेषामपि विचार्यत्वसिद्धिरित्यर्थः । एवं करणकथनयोः प्रयोजनमाहुः *पूर्वमित्यादि*। स्वांशा जीवास्तदुपयोगिपुरुषार्थत्वं तेजःप्रभृतीनां भवत्विनीच्छया पूर्वं प्रथमतो रूपं प्रजादिशब्दवाच्यं शरीरं फलरूपं लोकादिकं च सृष्टम् । तथाचैतेषां पुरुषार्थत्वेन जीवाशास्यत्वायैवं कृत्वा तत्कर्तृतया फलदातृतया च स्वस्य व्यवहार्यत्वं च कृतवानिति तत्सम्पादनं प्रयोजनमित्यर्थः । तेन सिद्धमाहुः * तत इत्यादि * ।

अत्र प्रत्यवतिष्ठते * नन्वित्यादि *। * केवलवेदविषयत्वं कथमिति * सर्वप्रमाणानां तुल्यत्वेनाविशेषात् केवलवेदवेद्यत्वं ब्रह्मणः कथोपपत्त्येत्यर्थः । अत्र समाधातुमुपपत्तिमाहुः * उच्यत इत्यादि *। न हि प्रमाणानां प्रामाण्यं तुल्यम् । तथा सति शुक्तिरज-

चक्षुरादीनां प्रामाण्यात् । अतो निरपेक्षा एव भगवन्निःश्वासरूपवेदा एव प्रमाणम् । सङ्केतग्रहस्तु वैदिक एव वेदविद्भिः कृतः ।

तद्विषयकश्चाक्षुषभ्रमो न स्यात् । हेतुषु चाभासना न स्यात् । शब्देषु च वाक्यप्रामाण्यविभागो न स्यात् । अतश्चक्षुरादिमनोऽन्तानां तदुपजीविनां च प्रामाण्यं न स्वतः, किन्तु परमुखनिरीक्षकत्वेनान्याधीनम् । यदधीनं तत् सत् । सत्त्वगुण एव प्रकाशकत्वात् । तत्सहितानामेव तेषां प्रमाणत्वात् । तस्य यदा गुणान्तरेणोपमर्दस्तदानुग्राहकाभावेन तेषां नैर्बल्यादप्रामाण्यमेव । सत्त्वशुद्धिस्तु वेदोदितयथावस्थितसाधनैरेवेति तेषां सर्वेषां सुदूरवर्तिनोऽपि वेदस्यैव स्वसार्थकत्वार्थमपेक्षा । वेदस्य तु न कथमपि तदपेक्षा । जैमिनीयादिनये तस्यापौरुषेयत्वात् । काणादादिनये चेश्वरजन्यत्वात् । अतोऽन्यनिरपेक्षा वेदान्तनये भगवन्निःश्वासरूपत्वेनैवसिद्धा आस्तिकमात्रमते अविप्रतिपन्ना वेदा एव प्रमाणम् । अतः सर्वप्रमाणाविषयत्वेऽपि सर्वनिरपेक्षत्वाद्भगवन्निःश्वासरूपत्वात् सर्वास्तिकोपजीव्यत्वाच्च वेदैकविषयत्वं सिद्धान्तीक्रियते । तथाचैषा युक्तिरित्यर्थः । नन्वेवंरूपत्वेऽपि वेदस्य न सर्वनिरपेक्षत्वम् । शब्दत्वात् । शब्दस्य बोधकतायाः पदपदार्थसम्बन्धग्रहाधीनत्वात् तद्ग्रहस्य च प्रयोजकप्रयोज्यव्यवहाराधीनत्वाद्, वस्तुनस्तु ब्रह्मणोऽव्यवहार्यत्वेन तत्र सम्बन्धग्रहस्य दौर्घट्याद् बोधकताया अभावेन वेदविषयत्वसाधनमप्यनर्थकमेवेत्याशङ्कायामाहुः *सङ्केतेत्यादि*। नैवमबोधकत्वं सापेक्षत्वं वा शङ्कनीयम् । यतः सदेवेत्यादिसन्दर्भ एव तेजःप्रभृतिसृष्ट्युत्तरमेव श्राव्यते । तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति । नहि तदानीं वैदिक्या इतरा कापि सृष्टिर्न वा वेदविद्भ्य इतरे पुरुषा, न वा भगवतोऽन्यः कश्चिच्छिक्षक इति प्रथमतः सङ्केतग्रहो वैदिक एव प्रपञ्चे वेदविद्भिर्भगवच्छिक्षया वा भगवद्दत्तस्वमनीषया वा भगवदिच्छामात्रेणैव वा कृत इति तथा गृ-

आकृतिमात्रार्थं लोकापेक्षा । अनधिगतार्थगन्तृ च प्रमाणं, लोकानधिगत इत्यर्थः । यज्ञब्रह्मणोरलौकिकत्वं सिद्धमेव ।

ज्ञातसम्बन्धस्य वेदस्य नावोधकत्वं, न वा लौकिकसापेक्षत्वमित्यर्थः । एवमेव पुरुषसूक्तेऽपि सहस्रशीर्षो महापुरुषाद्विराजस्तन्मध्यगानां च सृष्ट्यादिकं श्रावयित्वा, 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते' इत्यादि मन्त्रत्रयं पठ्यते । तत्रास्मिन् मन्त्रे हेतुः पूर्वपक्षनिरासे । अस्मिन् प्रपञ्चेऽनादित्वपरमाणुजन्यत्वगुणजन्यत्वादिशङ्का महति पुरुषे च शबलत्वादिशङ्का न कार्या । तत्र हेतुः, 'तमसः पारे' इति । अस्य पदद्वयस्य महापुरुषे सर्वेषु रूपेषु च देहलीदीपन्यायेन सम्बन्धः । यदास्ते इति यत्पदं हेतुबोधकम् । तेनास्मिन् मन्त्रे छान्दोग्यवदेव सर्वं सृष्टिस्वरूपमभिवदितृत्वेन भगवत एव शिक्षकत्वं च बोधितम् । ततो द्वितीये, 'धाता पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' इति मन्त्रे धातुः प्रथमं तद्बोदधृतया तद्वक्तृत्वं शक्रस्य दिशां देवतानां श्रोतृत्वं चोक्त्वा उत्तरार्द्धे केवलस्यैव सर्वकर्तृत्वेन सर्वात्मकत्वेन यद्वेदनं तस्य फलमाह । ततस्तृतीये, 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवा' इतिमन्त्रे तादृशे यज्ञे सिद्धानामेव धर्माणां प्राथम्यं तत्फलं चाह । तेनापि पूर्वोक्त एवार्थः सिद्धः । एतदेव श्रीभागवतद्वितीयस्कन्ध उपबृंहितम् । 'यदास्य नाभ्यान्नलिनादहमासं महात्मनः । नाविदं यज्ञसम्भारान् पुरुषावयवादृते । तेषु यज्ञस्य पशवः सवनस्पतयः कुशा' इत्यारभ्य, 'तमेव यज्ञपुरुषं तेनैवायजमीश्वरम्' इत्यन्तेन । अतो वेदैकसमधिगम्यत्वसाधनं नानर्थकमिति । ननु भवत्वेवं तदानीन्तनानां, तावतेदानीन्तनानां कथं मङ्कग्रह उपायाभावात् । तथा सतीदानीं तु स दोषस्तदवस्थ इत्यत आहुः * आकृतीत्यादि * । * आकृतिमात्रार्थमिति * आकृत्यवधारणार्थम् * सिद्धमेवेति * तवमतेऽपि सिद्धमेव । तथाच यथा दा-

लौकिको व्यवहारः सन्निपातरूपत्वात् पुरुषार्थासाधक एव। तर्हि

एवमार्तिकाद्युपकरणे गृहीतसङ्केताः सौवर्णोऽपि तस्मिंस्तया आकृत्या सङ्केतमवधारयन्ति, तथाप्तवाक्याद् यादृशो लौकिकस्तादृशे वैदिकेऽपि प्रपञ्चे सङ्केतमवधारयिष्यन्तीतिबोधनार्थं, यथा सौम्यैकेन मृत्पिण्डेनेत्यादीनां लौकिकदृष्टान्तानां श्रुतावप्यादरणादिति लौकिकानां पुरुषाणामेव परापेक्षत्वं, न वेदस्य। यदि चैवमपि सापेक्षत्वमेवेति विभाव्यते तर्हि तु धर्मब्रह्मणोरपि बोधने लोकप्रसिद्धपदादिसमभिव्याहारसापेक्षत्वादनपेक्षतायै तिलाञ्जलिरेव प्रदीयताम्। तथाऽनधिगतार्थगन्तृत्वस्यापि प्रसिद्धपदसमभिव्याहारशून्यतायामबोधकताया एवापत्तेर्धर्मोऽपि न बुद्ध्येतैव। तथा निषेधावधिभूतब्रह्मस्वरूपमपि लोकप्रसिद्धमर्थमेव निषिद्ध्य बोध्यत इत्यस्ति तद्बोधनेऽपि लोकापेक्षेति तदभावे तदपि न बुद्ध्येत। अथ तत्र प्रसिद्धान्यपि पदादीनि वैदिकान्येवेति न दोष इति चेत् तर्ह्यत्रापि व्यवहारं वैदिकमेवानुसन्धत्स्व। इदानीं विप्लूयमानेऽपि तस्मिन् भगवता, 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्। एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्। मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदतीति' श्रीभागवते कथनात्। अतो धर्मब्रह्मबोधन इव वैदिकप्रपञ्चबोधने आकृतिमात्रार्थे लोकापेक्षायामपि न दोष इत्यर्थः। तदेतदुक्तं, * सिद्धमेवेत्यन्तेन। नन्वेवं लौकिकव्यवहारादरे को दोष इत्यत आहुः * लौकिक इत्यादि * एकादशस्कन्धे, 'सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः। व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिरिति भगवता प्राकृतगुणान् प्रकृत्य मनआदिव्यवहारस्य सन्निपातत्वकथनाल्लौकिकव्यवहारस्य सन्निपातकार्यत्वेनाऽप्रामाणिकत्वात् पुरुषार्थासाधक इत्यतो नाद्रियत इत्यर्थः। एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमसहमानश्चोदयति * तर्हीत्यादि * यदि सूत्रकृत एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमभिप्रेतं स्यात् तर्हि शब्दमात्रस्य नाशब्दमित्यनेन कथं ग्रहणं कुर्यात्। नावेदं, नावेदान्तमित्येव वदेत्। अतो नायं सूत्रार्थ इत्यर्थः। अत्र समादध-

शब्दमात्रस्य कथं ग्रहणम्। वेदव्याख्यातृवाग्विषयत्वादिति ब्रूमः।

ते * वेदेत्यादि * अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानीति मैत्रेयीब्राह्मणे श्रवणाद् वेदव्याख्यातृवाचामपि तथात्वेन ब्रह्मणस्तद्विषयत्वमपि सूत्रकृतोऽभिप्रेतमित्यतः शब्दशब्दग्रहणमिति ब्रूमः। तथाचैवमभिप्रेतत्वादयमेव सूत्रार्थो, नान्यः। सांख्यनिराकरणस्याग्रे आनुमानिकाधिकरणे करिष्यमाणत्वेनात्र तत्प्रयोजनाभावात्। अतो गृहप्रविष्टचौरतुल्यस्य मिथ्यावादिन एव निराकरणायेदं सूत्रमित्यर्थः। नन्वेवं सति सूत्रत्वव्याख्यानत्वादीनां सूत्रान्तरादिष्वपि सत्त्वाद् व्याख्यानादिकमपि कुतो न संगृह्यत इति चेद्, उच्यते। 'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चनेत्येकादशस्कन्धे वेदान्तकृद्वेदविदेव चाहमिति गीतायां च भगवद्वाक्याद् यथावस्थितवेदवेत्ता भगवानेव। स तु, मां विधत्त इत्यादि, वेदैश्च सर्वैरहमेव वेद्य इति च वक्ति। यथा 'वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः। तेषां विकल्पप्राधान्यमुताहो एकमुख्यता' इत्युद्धवप्रश्ने, 'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता। मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः। तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा। ततो भृग्वादयोऽगृह्णन् सप्तब्रह्ममहर्षयः। तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः। मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः। किन्देवाः किन्नरा नागा रक्षःकिंपुरुषादयः। बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः। याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा। यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि। एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम्। पारम्पर्येण केषाञ्चित् पाषण्डमतयोऽपरे। मन्मायामोहितधियः पुरुषाः पुरुषर्षभ। श्रेयो वदन्त्यनेकान्त्याद् यथाकर्म यथारुचि' इत्याद्याह। अत्राऽगृह्णन्नित्यस्य किम्पुरुषादय इत्यन्तं पृथक्सम्बन्धः। बह्वीनां प्रकृतीनां विप्रवाङ्निर्गमहेतुत्वम्।

एतेन मनसैवानुद्रष्टव्यमित्यपि समर्थितम् । तस्मात् सृष्ट्यादिप्रतिपादका अपि वेदान्ताः साक्षाद् ब्रह्मप्रतिपादका इति सिद्धम् ॥ ४ ॥

स्यादेतत् । कर्तृत्वमकर्तृत्वं च वेदे प्रतीयते ब्रह्मणः । यतो वा इमानि भूतानि जायन्ते, स आत्मानं स्वयमकुरुत, निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, असङ्गो ह्ययं पुरुष इत्येवमादिवाक्येषु । तत्र द्वेधा निर्णयः सम्भवति । सर्वभवनसमर्थत्वाद्विरुद्धसर्वधर्माश्रयत्वेन, अन्यतरबाधाद्वा । अलौकिकापेक्षया लौकिकस्य जघन्यत्वात् कर्तृत्वादेर्लोकसिद्धत्वात् कर्तृत्वबाध एव युक्तः । ईक्षणादिकं तु प्रकृतिगुणासम्बन्धादपि ब्रह्मणो युज्यते । तस्मादलौकिकसर्वभवनसमर्थत्वादिकल्पनापेक्षया

शेषन्तु स्फुटमेव । तेन भगवदुक्तिविरुद्धस्य वेदव्याख्यानत्वप्रतीतावपि तस्य व्याख्यानत्वाभाव एव सिद्ध इति तन्न संगृह्यत इत्यवधेहि । एवं शब्दशब्दोक्ति साधयित्वा तेन सिद्धमाहुः * एतेनेत्यादि * एवं वैदिकशब्दप्रतिपाद्यत्वसमर्थनेन मनसैवानुद्रष्टव्यमिति सिद्धं कामविवर्जितातिशुद्धमनसानुद्रष्टव्यमिति समर्थितम् । अपिशब्दात्, कश्चिद्धीरः प्रत्यगात्मानमैक्षदित्यादीनामपि संग्रहः । एवं व्यवस्थया विरोधपरिहारेण ब्रह्मणः सर्वप्रमाणाविषयत्वतद्विषयत्वयोः समर्थनेन यत् सिद्धं तन्निगमयन्ति * तस्मादित्यादि * एवं ब्रह्मणोऽलौकिकप्रमाणगम्यत्वाद्वेदान्तानां ब्रह्मप्रतिपादकत्वेन विचारणीयत्वं सिद्धमित्यर्थः ॥ ४ ॥

अतः परं, गौणश्चेन्नात्मशब्दादिति द्वितीयं सूत्रमवतारयन्ति * स्यादेतदित्यादि * । *कर्तृत्वमकर्तृत्वं चेति* चकारादुपादानत्वमनुपादानत्वं च । अत्र पूर्वश्रुतौ हेतुत्वमात्रं प्रतीयते । तत्प्रकारान्तरेणापि सम्भवतीत्यतो द्वितीयश्रुत्युपन्यासः । तत्र कर्तृत्वं स्फुटमिति तद्विरुद्धं निष्क्रियत्वं शान्तत्वं च । तृतीयश्रुतौ । तथैवो-

लौकिक एवान्यतरबाधो युक्तः । ततश्च सत्यस्वरूपादन्यदेवैतदिति स्वयमेवाशङ्क्य परिहरति सूत्रकारः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥

ईक्षत्यादिगुणयुक्तः परमात्मा गौणः प्रकृतिगुणसत्त्वसम्बन्धवानिति चेन्न तथात्वं वक्तुं शक्यते । कुतः । आत्मशब्दात् । आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ऐक्षतेत्युक्तम् । आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः । तस्यैव जगत्कर्तृत्वं श्रुतिराह । ननु चोक्तमन्यतरबाधो युक्त इति । न युक्तः । स्वातन्त्र्याभावेन सगुणस्य कर्तृत्वायोगात् । वेदाश्च प्रमाणभूताः । ततः सर्वभवनसामर्थ्यमेव श्रुतिबललभ्यमङ्गीकर्तव्यम् ।

पादनत्वविरुद्धं निष्कलत्वं निरवयत्वं च । चतुर्थ्यामसङ्ग इत्यनेनासक्ते· संसर्गस्य च निषेधः क्रियां विकारित्वं च विरुणद्धि । * युक्त इति * उत्पत्तिशिष्टोत्पन्नशिष्टन्यायेनोपजीव्योपजीवकभावेन च बुद्धावारो ह्ययुक्तः । * एतदिति * शबलं स्वरूपम् ।

अयुक्तत्वे हेतुमाहुः * स्वातन्त्र्याभावेनेत्यादि * कारकमात्रस्य स्वव्यापारं प्रति स्वातन्त्र्ये सत्यपि यत कर्तृलक्षणतया स्वातन्त्र्यस्य कीर्तनं तत् कारकान्तरनियामकतयैवातो गुणानामुपादानत्वे वा करणत्वे वाऽवश्यं कर्तृनियम्यतैव युक्ता, न तु प्रयोजकता । तथा सति तेषामेव सृष्ट्यादिकार्ये स्वातन्त्र्येण ब्रह्मनियामकतया सगुणस्य स्वातन्त्र्याभावेन कर्तृत्वायोगादित्यर्थः । ननु गुणानां जडत्वेन चेतनाधीनत्वान्न सगुणस्य स्वातन्त्र्यहानिस्ततो गुणसम्बन्धिन्येव कर्तृत्वं युक्तमित्यत आहुः * वेदाश्चेत्यादि * अनपेक्षत्वान्निःश्वासरूपत्वाच्च वेदाः स्वतः प्रमाणभूताः । ते च, सदेव सोम्येदमग्र आसीद्, आत्मा वा इदमेक एवाग्र आसीदित्यादिषु

किञ्च। अस्तिभातिप्रियत्वादिधर्मवद् ब्रह्मगतकर्तृत्वं लोके प्रतीयते। कार्यत्वात्। तस्मादात्मशब्दप्रयोगाद् गुणातीतमेव कर्तृ ॥ ५ ॥

विशेष्यान्वितेनैवकारेणेतरयोगं व्यवच्छिन्दन्तस्तदानीं केवलस्य शुद्धस्यैवात्मनः कर्तृत्वमावेदयन्ति। नच कालवाचकाग्रपदेन तत्सत्ताया अपि बोधनादेवकारो नान्ययोगव्यवच्छेदक इति शङ्क्यम। बोधनार्थमेव तथोक्तेः। कथमेतदितिचेदित्थम्। इयं हि श्रुतिः सर्वापेक्षया प्राथमिकं वृत्तान्तं वक्ति। तत्रैवकारेण सदितरयावदूव्यवच्छेदे भिन्नविधप्रमाणान्तरस्यापि व्यवच्छिन्नत्वात् तस्याप्यभावेनाग्रपदे प्रमाणान्तरसिद्धकालानुवादकतया वक्तुमशक्यत्वेन, एतस्यैव वाक्यस्य कालसत्ताबोधकत्वे चात्मासीत् कालोऽप्यासीदित्येवं वाक्यभेदप्रसङ्गेन कालसत्तायाः अशक्यवचनत्वे केवलस्यात्मनोऽपि निरूपणमशक्यमिति वाक्यस्याबोधकत्वे प्रसक्ते सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीयमानो यः कालस्तदुपरञ्जनेन पूर्ववृत्तान्तं वक्तीत्येवं बोधनार्थत्वं जानीहि। अत एव सृष्ट्युत्तरमपि केवलं ब्रह्मैवेति बोधनाय सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्येवं श्रुत्यन्तरेऽप्युच्यते। एवं तदानीमितराभावे गुणानां सत्ता तदानीं वक्तुं न शक्यत इति न सगुणः कर्ता। नचोत्पत्तिशिष्टन्यायस्योपजीव्यन्यायस्य वा प्रवृत्तिरत्र शङ्कनीया। विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावात्। ततः श्रुतिबललभ्यं, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपेषु षट्सु प्रमाणेषु श्रुतिबलसिद्धं ब्रह्मणः सर्वभवनसामर्थ्यमेवाङ्गीकर्तव्यमित्यर्थः।

ननु मास्त्वेवं कर्तृत्वादिबाधस्तथापि कर्तृत्वस्य लौकिकत्वं नापैतीति तत एव तद्बाधोऽस्त्वित्यत आहुः *किञ्चेत्यादि*। *प्रियत्वादी*त्यादिपदेनाऽपहतपाप्मत्वसङ्ग्रहः। तथाच ब्रह्मधर्मस्य कर्तृत्वस्य लोके प्रत्ययेन तस्य कार्यासाधारण्याभावान्न लौकिकत्वमिति न तत्प्रयुक्तोऽपि बाध इत्यर्थः। सिद्धमाहुः *तस्मादित्यादि* केनापि प्रकारेण बाधस्य वक्तुमशक्यत्वादात्मशब्दश्रुतिरूपमुख्यप्रमाणप्रमितत्वाच्च तथेत्यर्थः ॥ ५ ॥

नन्वात्मशब्दोऽपि लोकवद् गौणोऽस्तु । लोके हि केनचित् पृष्टो विष्णुमित्र आह, यज्ञदत्तो ममात्मेति । अत्र गौणत्वमुपचार इत्येवं माप्तेऽभिधीयते ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥

एवं हि श्रूयते । असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानं स्वयमकुरुतेत्युपक्रम्य, यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवतीति । प्रापञ्चिकधर्मरहिते ब्रह्मणि एतस्मिन् पूर्वोक्तजगत्कर्तरि परिनिष्ठितो मुक्तो भवतीत्यर्थः । तत्र यदि जगत्कर्ता गौणः स्यात् तन्निष्ठस्य संसार एव स्यान्न मोक्षः ॥६॥

एवं द्वितीयसूत्रं व्याख्याय, तन्निष्ठस्य मोक्षोपदेशादिति तृतीयसूत्रमवतारयन्ति * नन्वात्मेत्यादि * लोकवत्पदं विभजन्ते * लोके हीत्यादि * । तथाच मास्तु गुणसम्बन्धाद् गौणत्वमात्मनस्तथाप्यात्मपदश्रुतेर्मुख्यौपचारिकसाधारण्येन सन्दिग्धत्वान्नानया निर्णय इति पूर्वपक्षाशयः । अत्र सूत्रं पठित्वा समादधते *एवं हीत्यादि* । * असदिति * लौकिकविलक्षणमव्याकृतम् । * यदा ह्येवेत्यस्यार्थस्तु, यदा यस्मिन् काले, ह्येव निश्चयेनैव, एष साधक, एतस्मिन् पूर्वोक्ते ब्रह्मणि, अदृश्ये नामरूपशून्ये, अनात्म्ये आत्मन इदमात्म्यं शरीरं तद्रहिते, अनिरुक्ते विकारो हि विशेषवशान्निरुच्यते नत्वविकार इति विकारशून्यत्वाद् विदिताविदितात् परत्वेन निर्वक्तुमशक्यत्वाद्वा अनिरुक्ते, एवम्भूते ब्रह्मणि अभयं यथा स्यात् तथा प्रतिष्ठां स्थितिं विन्दते यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानातीत्येवंरूपां प्राप्नोति, अथ तदनन्तरमेव स साधकः, अभयं गतो मुक्तिं प्राप्तो भवतीति । तदाहुः * प्रापञ्चिकेत्यादि * सूत्रसिद्धं निर्णयमाहुः * तत्रेत्यादि * तथाचास्यां श्रुतावुपक्रमगतं कर्तृभूतं प्र-

किञ्च ।

हेयत्वावचनाच्च ॥ ७ ॥

इतोऽपि निर्गुण एव जगत्कर्ता । वेदान्तेषु सर्वत्र साधनोपदेशे पुत्रादिवज्जगत्कर्ता हेयत्वेन नोपदिश्यते । यदि सगुणः स्यात् प्राकृतगुणपरिहारार्थं मुमुक्षुभिर्जगत्कर्ता नोपास्यः स्यात् । पुत्रादिवत् । अत ईक्षणादयो न सगुणधर्माः । सूत्रत्रयस्य ईक्षतिहेतुसाधकत्वाच्चकारः । एवं सूत्रचतुष्टयेन ईक्षतिहेतुना जगत्कर्तृत्वोपपत्त्या सृष्टिवाक्यानां ब्रह्मपरत्वमुपपादितम् ॥ ७ ॥

अतः परं स्वतन्त्रहेतूनाह, स्वाप्ययाद्, गतिसामान्यात्, श्रुतत्वाच्चेति सूत्रत्रयेण ।

ननु किमर्थं हेत्वन्तराणि । साधकत्वे एकेनापि तत्सिद्धेः ।

स्वेवेति तस्मिन्नित्यनेन परामृश्य तस्यैव प्रापञ्चिकधर्मराहित्यबोधनेन विरुद्धधर्माधारत्वं निगमयित्वा तादृशे तस्मिन् परिनिष्ठितस्य मुक्तिं वदन्ति । तथाऽन्यत्रापि, सदेव सौम्येदमित्यादिना कर्तृत्वादिविशिष्टं ब्रह्मोक्त्वा, आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति । अतस्तादृशब्रह्मनिष्ठस्य मोक्ष उपदिश्यत इति सृष्टिप्रकरणोक्तं फलमेव तत्रत्यात्मशब्दस्यौपचारिकत्वनिवर्तकं तात्पर्यलिङ्गत्वादिति सूत्राशय इत्यर्थः ॥ ६ ॥

आत्मशब्दस्यात्र गुणातीत एव कर्तरि तात्पर्यमिति बोधयन्तश्चतुर्थसूत्रमाहुः * किञ्च * । * हेयत्वावचनाच्चेत्यादि * । अर्थस्तु निगदव्याख्यातः । तथाचात्रोपपत्तिरूपात् तात्पर्यलिङ्गादप्यात्मशब्दस्य गुणातीतवाचकत्वेन निर्णयादीक्षत्यादयो न सगुणधर्मा इत्यर्थः । शेषं स्फुटम् ॥ ७ ॥

अग्रिमसूत्राण्यवतारयन्ति * अतः परमित्यादि * । * स्वतन्त्रहेतूनिति * वेदान्तवाक्यानां ब्रह्मपरत्वप्रतिपादने प्रत्येकं समर्थान् हेतून् । एतेषां हेतूनां वैयर्थ्यमाशङ्कते *नन्वित्यादि* । समादधते ।

असाधकत्वे शतेनाप्यसिद्धेरितिचेत् । मैवम् । रूपभेदार्थं हेत्व-न्तराणि । नानाविधान्नभोजनतृप्तिवत् । तद्यथा आत्मशब्दात्, तन्निष्ठस्य मोक्षोपदेशाद्, हेयत्वावचनाच्चेति निर्गुणस्य स्वरू-पपरतया कार्यपरतया च । कार्यस्य पुनर्विधिनिषेधभेदाद् द्वि-रूपतेति । एवमुत्तरत्रापि प्रपञ्चिष्यते ।

तत्र सृष्टिवाक्यानामीक्षतिहेतुना भगवत्परत्वमुक्तम् । इदा-नीं प्रलयवाक्यानामाह ।

स्वाप्ययात् ॥ ८ ॥

ब्रह्मणो न सर्वव्यवहारातीतत्वम् । कुतः स्वाप्ययात् । स्वस्मिन्नप्ययात् । तत्र चित्प्रकरणत्वाज्जीवस्य चोच्यते । एवं हि श्रूयते । यत्रैतत् पुरुषः स्वपिति नाम सता सौम्य तदा सम्प-न्नो भवति तस्मादेनं स्वपितीत्याचक्षते । स्वं ह्यपीतो भवतीति ।

---

* मैवमित्यादि । रूपभेदार्थमिति * ब्रह्मणो व्यवहार्यत्वे केवलं सृ-ष्टिरेव न द्वारं, किन्तु द्वारान्तराण्यपि सन्ति तानि तत्तद्रूपनियतानी-ति तेषां रूपाणां विशेषस्य ज्ञापनार्थम् । एवं तात्पर्योक्तौ गमकमाहुः * तद्यथेत्यादि * तथाच चतुःसूत्र्यामाद्येनेक्षतिं सामान्यत उक्त्वा द्वितीयो हेतुः स्वरूपपरतया ततोऽग्रिमौ द्वौ कार्यपरतया चेति हेतु-त्रयमुक्तम् । तथाग्रे त्रिसूत्र्यामपि कार्यपरतयेत्यर्थः । कथं कार्यान्त-रपरतेत्यत आहुः * कार्यस्येत्यादि * । * द्विरूपतेति * इति अ-स्मा द्धेतोर्हेत्वन्तराण्युच्यन्त इत्यर्थः । एवमेवात्र तात्पर्यमित्यत्र गम-कमाहुः * एवमित्यादि *

एवं सूत्रत्रयप्रयोजनमुक्त्वा पूर्वसङ्गतिज्ञापनाय तत्रो-क्तमनुवदन्तः स्वाप्ययसूत्रमवतारयन्ति * तत्रेत्यादि * व्या-कुर्वन्ति । * तत्र चिदित्यादि * । * उच्यत इति * लय उच्यते । *श्रूयत इति* छान्दोग्ये श्वेतकेतूपाख्याने श्रूयते । श्रुतिं व्याकुर्वन्ति

स्वपितीति न क्रियापदं, किन्तु जीवस्य नाम । तदेव स्वपितीतिनामत्वं, यदा सता सम्पद्यते । सति स्वशब्दवाच्ये अपीतिं लयं प्राप्नोतीत्यर्थः । अहरहर्जीवो ब्रह्म सम्पद्य ततो बलाद्यधिष्ठानं प्राप्य पुनर्नव इव समायाति । वासनाशेषात् । स्वशब्देन चाभेदः । अर्थतः सच्छब्दसामानाधिकरण्यान्निर्गुणत्वम् ।

ननु प्रलये वक्तव्ये कथं सुषुप्तिः । मोक्षातिरिक्तदशायां

स्वपितीति नेत्यादि तथाच सत्सम्पत्तिरहितस्वापदशायां तु स्वपितीति यत्र प्रयोगस्तत्रास्य क्रियापदत्वमेव । सत्सम्पत्तिदशायान्तु स्वशब्दस्यात्मवाचकत्वेन सति स्वशब्दवाच्य आत्मनि अपीतिं लयं प्राप्नोति । तदा तस्मिन् पितिर्लयो यस्यासौ स्वपितिः । पृषोदरादित्वादकारनाश ईकारस्य विकृतौ च सत्यां स्वपितिनाम्नः सिद्धिः । वस्तुतस्तु केवलयौगिकत्वे नामत्वाभावाद् योगरूढोऽयं शब्द इत्यर्थः । एवम्प्रकारेण हेतुकथनस्य प्रयोजनमाहुः *अहरहरित्यादि* । अयमर्थः । सुषुप्तिस्तावद् द्विधेति, तदभावो नाडीष्वित्यत्र वक्तव्यम् । तथा छान्दोग्य एव श्रूयते । तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोऽपि न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दत्यनृतेन प्रत्यूढा इति । तत्र नाड्यां दुःखाभावमात्रम् । ब्रह्मणि सुप्तौ तु तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयं रूपमशोकान्तरमिति बृहदारण्यके श्रावणाद् ब्रह्मसम्पत्त्या बलादिरूपं यदधिष्ठानं, करणे ल्युट्, देहनियमनसाधनं तत् प्राप्य तथा समायातीति बोधनमेकम् । च पुनः स्वशब्द आत्मवाचकोऽत्र प्रयुक्तस्तेन पूर्वोपक्रान्तस्य सत आत्माऽभेदबोधनपरम् । किञ्चात्र विभक्त्यन्तरप्रयोगेण शब्दतः सामानाधिकरण्याभावेऽप्युपक्रमे सत एव निर्दिष्टत्वेनार्थतः सच्छब्दसामानाधिकरण्यात् सतो निर्गुणत्वबोधनं चेति तृतीयं प्रयोजनमिति । तथाचैवंप्रकारेण गुणाऽतीतस्य प्रलयकारणतां बोधयितुमयं हेतुनिर्देश इति हृदयम् । अत्र सूत्रस्य विषयवाक्यस्य च विरोधमाशङ्कते *नन्वित्यादि* । समादधते *मोक्षेत्यादि* मोक्षातिरिक्तदशायां कर्मसम्बन्धे स-

तथा कर्मसम्बन्धाभावादिति ब्रूमः ॥ ८ ॥

मुक्तिवाक्यानामाह ।

गतिसामान्यात् ॥ ९ ॥

गतौ समान्यात् । गतिर्मोक्षः । समानस्य भावः सामान्यम् । मोक्षे सर्वस्यापि भगवता तुल्यत्वात् । एवं हि श्रूयते । यथा सर्वासामपाऽ समुद्र एकायनमित्युपक्रम्य वागेकायनमिति दृष्टान्तार्थं निरूप्य, स यथा सैन्धवखिल्य उदके प्रास्त इत्यादिना लयदृष्टान्तं निरूप्य, न प्रेत्य संज्ञास्तीति प्रतिपाद्य

स्यपि यथा जाग्रत्स्वप्नयोः कर्मसम्बन्धस्तथा सुषुप्तौ प्रलये च नास्ति, किन्तु वासनामात्र इति प्रलयसाम्यात् तत्कथनमिति ब्रूम इत्यर्थः । अत्रश्चात्र ब्रह्म न सर्वव्यवहारातीतं, सुषुप्तिप्रलययोर्जीवाधारत्वेन श्रुतत्वाद्, यद् यदा यदाधारत्वेन श्रुतं तत् तदा तत्प्रयुक्तव्यवहारविषयमित्येवमनुमानं बोध्यम् । ततश्च यस्मिल्लयं याति पुरत्रयं चेत्यादौ जडलयाधारत्वेन श्रावणात् तत्प्रयुक्तव्यवहारविषयत्वादपि सर्वव्यवहारातीतत्वाभावः सेत्स्यति । तेनायं हेतुर्लक्षणवाक्यस्थस्य यत्प्रयन्तीति भागस्य समर्थनार्थं इतिबोधितम् । प्रलयवाक्यानां ब्रह्मणि समन्वये वक्तव्ये सुषुप्तिवाक्योदाहरणं सूत्रे स्वाप्ययपदसूचितव्यासाशयज्ञापनार्थम् । अग्रिमसूत्रे मुक्तिवाक्यविचारात् पूर्वस्मिन् प्रलयोऽपि सूच्यत इति ज्ञायते । अन्यथा न्यूनता स्यादिति ॥ ८ ॥

गतिसामान्यादिति षष्ठं सूत्रमवतारयन्ति * मुक्तीत्यादि * तेषां ब्रह्मपरत्वमाहेत्यर्थः । * गतिर्मोक्षः * गतिशब्दः फले रूढः । अन्ते या मतिः सा गतिः, सा काष्ठा सा परा गतिरित्यादौ तथा दृष्टत्वात् । अत चाप्ययोत्तरमभिसंवेशस्यैव समर्थनीयत्वात् तथेत्यर्थः । श्रूयत इति । बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते । *दृष्टान्तार्थमिति * लयाधिकरणदृष्टान्तार्थम् । * इत्यादिनेति * प्रास्तमुदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीतेति ग्रन्थेन* न प्रेत्य संज्ञास्तीति प्रतिपाद्येति* विमुक्त्यनन्तरं भोक्तृभाव-

तन्निरूपणार्थं यत्र हि द्वैतमिव भवति तदितर इतरमित्यादिना सर्वस्य शुद्धब्रह्मत्वं प्रदर्शितम् ।

दिनिवृत्त्या जीवादिसंज्ञाराहित्यं प्रतिपाद्य । * तन्निरूपणार्थमिति * संज्ञाभावनिरूपणार्थम् । *सर्वस्येति*जडस्य जीवस्य च । अत्रायमर्थः यथाऽब्बादीनामशानां कार्याणामबाद्यात्मकाः समुद्रादयो लयाधिकरणभूतास्तथा सदात्मकस्य सर्वस्य सदात्मकं कारणभूतं ब्रह्मैव लयाधिकरणभूतम् । नच स्पर्शादीनां त्वगाद्यंशत्वस्य प्रत्यक्षबाधितत्वात् केवलं लयस्थानत्वमेव विवक्षितं, न तु तस्य कारणत्ववैशिष्ट्यमपीति शङ्कम् । 'त्वगस्य स्पर्शोवायोश्चेति । मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते । ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते' इत्यादिश्रीभागवतद्वितीयस्कन्धवाक्येषु तथा दर्शनेनात्र वैराजानामेव तेषां दृष्टान्तत्वेन विवक्षितत्वात् । यथा सदंशानां कार्याणां लयस्थानं ब्रह्म तथा चिदंशानां जीवानामपि लयस्थानं ब्रह्मैवेति वक्तुं, स यथा सैन्धवेत्यादिना यथा सामुद्रलवणशकल उदके प्रक्षिप्त उदकमेव लक्ष्यीकृत्य विलीयते, न तु खिल्यत्वेन ग्रहणाय कोऽपि समर्थः सम्भाव्यते, किन्तु यस्माद्यस्माद्देशादादीयते तत्र तत्र लवणरस एवास्वाद्यत इति तत्र तत्सत्ता निश्चीयत इत्येवं लयदृष्टान्तं निरूप्य, एवं वा अरे इदं महद्भूतमनन्तपारम्, अरे मैत्रेयि, इदं जीवात्मत्वेनानुभूयमानं, महत् पूर्वोक्तेभ्योऽब्बादिभ्य उत्कृष्टम्, अनन्तम् अविनाशि, अपारम् अनादि तत्त्वं विज्ञाने घने चिदेकस्वरूपे ब्रह्मण्येवैतेभ्यः स्थूलसूक्ष्मशरीरात्मकेभ्योऽवुपलक्षितेभ्यो भूतेभ्यः समुत्थाय पृथग्भूय तान्येव भूतान्यनु तल्लयोत्तरं विनश्यति विशेषेणादर्शनं प्राप्नोति ब्रह्मणः पृथङ् न ज्ञायते । तत्र हेतुः । न प्रेत्यसंज्ञाऽस्तीति । लयोत्तरं जीवसंज्ञैव निवर्तते, ब्रह्मैव भवतीति । ततो लवणरसस्य सर्वत्रोदकेऽनुभवाल्लवणत्वेन वर्तत एवाद्ग्रहणमिति, कुतो निषिद्ध्यते संज्ञेत्येव मैत्रेय्या मोहे पुनः संज्ञाभावनिरूपणार्थं, यत्र हि द्वैतमित्यादिना भेदकधर्मसत्तायां द्वैतदर्शनपूर्वकं, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येज्जिघ्रेदभिवदेच्छृणुयान्मन्वीत

आदिमध्यावसानेषु शुद्धब्रह्मण एवोपादानात् । सर्वेषां वेदान्तानां ब्रह्मसमन्वय उचित इति ॥ ९ ॥

किञ्च ।

श्रुतत्वाच्च ॥ १० ॥

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुत्यैवासन्दिग्धं सर्वकार्यत्वं प्रतिपादितम् ।

विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयादित्यन्तेन, यत्र तु यस्मिन्नधिकरणे अस्य सम्बन्धि सर्वं स्थूलं सूक्ष्मं चात्मैवाभूद् आत्मरूपमेवाभूत् तत्र तदा करणस्य विषयस्य च लयादैकरूप्ये करणविषयभावापगमात् केन कं पश्येदित्यादि । ननु यद्यप्यन्यल्लीनं, तथापि विज्ञाता तु तिष्ठति स यथा स्वप्ने स्वयंज्योतिः पश्यत्येवं स्वयं कुतो न विजानातीत्याकाङ्क्षायां विज्ञातुः स्वरूपस्यापिसमुद्रे लवणस्येवात्मत्वं स्मारयति, विज्ञातारमित्यादिना । तथाच तदा विज्ञातापि न विज्ञातृरूपेणास्ति, किन्तु गुणातीतेनात्मरूपेणैवातो न विजानातीत्युत्तरमुखेन सर्वस्य ब्रह्मतौल्यं च निरूपितम् । एवञ्च ब्रह्म न सर्वदा सर्वव्यवहारातीतं, मोक्षे तथात्वेन श्रावितत्वाद् यदेवं तदेवं मैत्रेयीब्राह्मणश्रावितसर्ववदित्येवमत्रानुमानसिद्धेरस्य हेतुत्वं बोधितम् । तेनात्र, यतो वेतिश्रुतिस्थोऽभिसंविशन्तीति भागः समर्थितः । किञ्चैतेनैव सर्वस्य शुद्धब्रह्मत्वमपि दर्शितमिति । तेन फलितमाहुः । * आदीत्यादि * आदावमृतत्वलिङ्गेन, मध्ये आत्मदर्शनादिना सर्ववेदनप्रतिज्ञामारभ्य, वागेकायनमित्यन्तेनावसाने सर्वस्यात्मभावकथनेन च तेषु शुद्धब्रह्मण एव कथनेन च तेषु शुद्धब्रह्मण एव सर्वरूपत्वेन सर्वकर्तृत्वेन चोपपादनाद् ये केऽपि वेदान्तास्ते सर्वे येन चिद्रूपेण ब्रह्मैव वदन्तीति सर्वेषां वेदान्तानां ब्रह्मणि तात्पर्येणान्वय उचित इत्यर्थः ॥ ९ ॥

सप्तमं सूत्रं पठित्वा तद्विषयवाक्योपन्यासेनैव व्याकुर्वन्ति * पूर्णमित्यादि * अयं बृहदारण्यके द्वितीयवंशब्राह्मणानन्तरं परिशि-

सर्वे वेदा यत्पदमामनन्तीति च ।

ष्टलक्षणखिलकाण्डारम्भे वर्तते । अस्मिन् मन्त्रे तु सर्वस्य ब्रह्मात्मैकत्वनिर्णयार्थम् आत्मैवेदमग्र आसीत् पुरुषविध सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यादिश्रुत्यर्थ एवोपसंह्रियते । व्याख्या तु, पूर्णमदः, अदः परोक्षं ब्रह्म पूर्णम् आकाशवद् व्यापि निरन्तरं निरुपाधिकम् । पूर्णमिदम इदं नामरूपाभ्यां व्यवह्रियमाणम अवतारादिरूपमपि पूर्णं पूर्वोक्तरूपमेव । एवं व्यवहार्याव्यवहार्यस्वरूपयोर्निरुपाधिकत्वमुक्त्वा कार्यरूपेऽपि तथात्वमाह । पूर्णात् पूर्णमुदच्यते । पूर्णात् कारणात्मनः सकाशात् पूर्णमुत पूर्णानन्दं सद् अच्यते, पूर्णं सद् उदच्यते वा । अञ्चु गतिपूजनयोः, अच इत्येक इति पाणिनिः । पूज्यते उद्गच्छति वा । एवं स्थितिदशायां कार्यस्य ब्रह्मरूपतामुक्त्वा प्रलयदशायां तथात्वमाह । पूर्णस्य ब्रह्मणः पूर्णं निरुपाधिकमेकरसत्वलक्षणं स्वभावं प्रलयदशायामादाय पूर्णं ब्रह्मैव सदवशिष्यते । अव्यवहार्यत्वेन रूपेण तिष्ठतीति । तथाचानया श्रुत्याऽसन्दिग्धं यथा स्यात् तथा सर्वकार्यरूपत्वं ब्रह्मणः प्रतिपादितम । तेन पूर्णज्ञानिनां व्यवहारदशायामपि कार्यं गुणातीतं ब्रह्माभिन्नमेव । व्यवहारस्तु भगवतः सत्यसङ्कल्पत्वाद् बहु स्यां प्रजायेयेत्यादिरूपया इच्छयैव । नचात्र सर्वत्र पूर्णपदादुद्गतस्य कार्यस्यांशस्य च पूर्णैश्वर्यादिमत्त्वं शङ्क्यम । ऐश्वर्यप्रकरणाभावात् । पूर्णैश्वर्यादिबोधकस्य भगवच्छब्दस्य भगवत्येवानौपचारिकत्वमिति विष्णुपुराणे सिद्धत्वात् । नच परममोक्षदशायां ब्रह्मैक्ये तत्र तथात्वं शङ्क्यम् । दशमस्कन्धे श्रीवासुदेवं प्रत्यखण्डाद्वैतोपदेशे, खं वायुरितिश्लोके भगवता सच्चिदानन्दधर्मतास्तम्भ्यादिकृतनानात्वाविरुद्धैकत्वस्यैव प्रतिपादनेन पूर्णैश्वर्यादीनां स्वस्मिन्नेव नियतत्वाच्च । अतः सर्वव्यवहारातीतत्वमनपहायैव सर्वव्यवहारविषयं ब्रह्मेत्यर्थः । एतेन फलितमाहु *सर्वे वेदा इत्यादि * तथाचाभिधया वृत्त्यापि सर्वे शब्दा ब्रह्मवाचका इति सर्वेषां वेदान्तानामभिधया तात्पर्येण च ब्रह्मण्येव समन्वय इत्यर्थः । अत्रेदं बोध्यम । इयं श्रुतिः काठके द्वितीयवल्लीस्था, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्

चकारोऽधिकरणसंपूर्णत्वद्योतनाय ।

पश्यसि तद्वद' इति प्रश्ने मृत्युनोक्ता । सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतदिति । पदं पदनीयं प्राप्तव्यमिति यावत् । आमनन्ति प्रतिपादयन्ति । यद्वदन्ति यत्प्राप्त्यर्थानि । सङ्ग्रहेण सङ्क्षेपतः । तदेव सङ्क्षेपत आह, ओमित्येतदिति । तथाचोङ्कारेण यत् सङ्क्षेपत उच्यते तदेव सर्वैर्वेदैर्विस्तरेणोच्यत इत्यर्थः । एतदेव द्वादशस्कन्ध उपबृंहितं, समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिन इत्यारभ्य 'ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् । स्वधाम्नो ब्रह्मणः साक्षाद् वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्' इत्यादिभिः । तथाच बीजशक्तिरेव सर्ववृक्षे प्रसरतीत्योङ्कारस्य या परमात्मवाचकता सैव सर्वस्मिन् वेदतरौ प्रसृतेति सर्वे वेदा अभिधया प्रतिपादयन्तीति युक्तम् । किञ्च । जैमिनीये नये सर्वे शब्दाः प्रायेण धर्मवाचका एव । धर्मश्च घटत्वादिरूपः । त्वप्रत्ययश्च भावे । भाव इति भूधातोर्घञिरूपम् । भूधातुश्च सत्तायां व्याप्तौ वा । उभयथापि सतो व्यापकस्य वा धर्मो घटत्वादिरिति सिद्ध्यति । तादृशश्च धर्मी भगवानेति धर्मद्वारा भगवद्वाचका एव सर्वे शब्दाः । वैयाकरणमतेऽप्येवम् । 'सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः । तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादय' इति वाक्यपदीयात् । नैयायिकादिमतेन विशिष्टवाचकत्वपक्षेऽप्येवैव व्यवस्था । घञ् चात्र स्वार्थे । अन्यथाऽनवस्था स्यादिति । एवं पदवर्णा अपि स्वभावतो भगवद्वाचका एव । 'वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि कीर्तितानि न संशय' इति शिष्टवैदिकप्रसिद्धवाक्यात् । वाक्यानि तात्पर्येण बोधयन्तीति सर्वस्य वेदस्य भगवद्वाचकत्वमप्रत्यूहमिति । सौत्रस्य चस्य प्रयोजनमाहुः । * चकार इत्यादि * एवमत्र त्रिसूत्र्यां सुषुप्तिविचारेण दैनन्दिनप्रलयकर्तृत्व, द्विती-

ये मोक्षविचारेणात्यन्तिकतत्कर्तृत्वं, तृतीये सर्वकार्यकर्तृत्वप्रतिपादनेन नैमित्तिकादितत्कर्तृत्वं, बोधितमिति प्रतिभाति ।

अत्रैकदेशिन इमानि सूत्राणि सांख्यनिरासकतया व्याकुर्वते । तथाहि । सांख्यपरिकल्पितं प्रधानं जगत्कारणत्वेन नाश्रयितुं शक्यम् । अशब्दं हि तत् । कथमशब्दम् । ईक्षतेः । सदेव सौम्येदमग्र आसीदित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति जगत्कारणस्येक्षणकर्तृत्वश्रावणात् । तथाऽन्यत्रापि । आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ऐक्षत लोकान्नुसृजा इति । क्वचिच्च षोडशकलं प्रस्तुत्य, स ईक्षाञ्चक्रे स प्राणमसृजतेति । ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया । विषयिणा विषयलक्षणात् । यथा यजतेः । तेन यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः, तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत इत्यादीनां सर्वज्ञेश्वरकारणपराणामपि वाक्यानां सग्रहः । नच सत्त्वधर्मेण ज्ञानेन प्रधानस्यापि सर्वज्ञतया ईक्षितृत्वस्य च शक्यवचनत्वाज्ज्ञानेन प्रधानवारणमिति वाच्यम् । तस्य प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मस्य ज्ञानस्य तदानीमशक्यवचनत्वात् । तदा तदादरे रजस्तमोधर्मस्याप्यवर्जनीयत्वेन ज्ञानप्रतिबन्धस्यापि सम्भवेन किञ्चिज्ज्ञत्वस्याप्यापत्तेश्च । किंञ्चासाक्षिकाऽस्मत्त्वृत्तिर्न क्वापि जानाति, नाभिधीयत इत्यचेतनस्य प्रधानस्य सार्वज्ञ्यमनुपपन्नम् । नच योगिवदिति वाच्यम् । तेषां चेतनत्वेनादृष्टान्तत्वात् । यदि च तप्तायःपिण्डस्य दग्धृत्ववत् साक्ष्यधिष्ठितस्य प्रधानस्येक्षितृत्वं कल्प्यते, तदा तु यन्निमित्तं प्रधानस्येक्षितृत्वं तस्यैव सर्वज्ञत्वाज्जगत्कारणत्वं वक्तव्यम् । तद्धेतोरेवेति न्यायात् । नच ब्रह्मणो नित्यज्ञानत्वेन विवक्षितत्वादीक्षणात्मकज्ञानक्रियां प्रति स्वातन्त्र्यासम्भवात् कथं सर्वज्ञत्वमिति वाच्यम् । प्रततौष्ण्यप्रकाशेऽपि सूर्ये सविता दहति प्रकाशत इति प्रयोगदर्शनादिहापि तद्वत् सत्यसति च ज्ञानकर्मभूते विषये नित्यज्ञानतया तादृशप्रयोगोपपत्तेः । नच प्राक् सृष्टेः पदार्थान्तराभावादीक्षणात्मकस्येश्वरज्ञानस्य निर्विषयत्वं शङ्क्यम् । तत्त्वान्यत्वाभ्यामनिर्वाच्ययोर्नामरूपयोर्व्याचिकीर्षितत्वेन तयोरेव विषयत्वात् । नच तयोरनागतत्वेनाविषयत्वं शङ्क्यम् । अतीतानागतविषयकज्ञानस्य योगिषु दर्शनात् तद्ध्येये ईश्वरे तादृशाशङ्काया एवासङ्गतत्वात् । नच

प्राक् सृष्टेर्ब्रह्मणोऽशरीरित्वादीक्षितृत्वमनुपपन्नमिति शङ्क्यम्। सवित्प्रकाशवद् ब्रह्मणो नित्यज्ञानस्वरूपत्वेन साधनानपेक्षत्वाद्। न तस्य कार्यं करणं च विद्यत इति, अपाणिपादो जवनो ग्रहीतेतिमन्त्राभ्यामपि तथा निश्चयात्। नच चैतन्यैक्यवादिनो जीवेश्वरभेदाभावात् संसारिणो जीवस्यापि तथात्वापत्तिरिति शङ्क्यम्। घटगिरिगुहाद्युपाधिभेदेन द्वयोरैक्य इव ब्रह्मचैतन्यस्याप्युपाधिभेदेन भेदस्याप्यङ्गीकारेणोक्तदूषणाभावादित्यादि। तज्जयतीर्थेन माध्वेनैवं दूष्यते। साङ्ख्यप्रतिपन्नं प्रधानं न श्रौतं जगत्कारणं, तदैक्षतेतीक्षतिश्रवणादशब्दं तदिति यद् व्याख्यातम्। तदयुक्तम्। तथाहि। अत्राशब्दमित्यनेनोक्तमश्रौतत्वं न साङ्ख्यस्य प्रतिवादिनः सिद्धम्। तेन वैदिकत्वाभ्युपगतेः। नापि स्वन्यायेन तदुक्तिः। अजामेकामित्यादौ प्रधानस्य श्रुतत्वात्। नच तत्रान्यत् कल्प्यम्। नाममात्रे विवादादर्थान्तरस्य चाभावात्। किञ्च ब्रह्मणोऽपि श्रौतत्वं न युक्तम् अवाच्यत्वात्। अवाच्ये वृत्त्यन्तरायोगात्। नापि तस्येक्षितृत्वम्। तस्येक्षतिस्वरूपत्वात्। नच मायावच्छिन्नस्य जगत्कारणस्येक्षितृत्वं सम्भवतीति वाच्यम्। जिज्ञास्यस्यैव जगत्कारणताया उक्तत्वात्। नहि जिज्ञास्यं मायावच्छिन्नम्। तज्जिज्ञासाया अप्रयोजकत्वात्। किञ्च माययेक्षितृत्वं भवत्युपचर्यते वा। आद्ये दृश्यत्वाद्यपि किं न स्यात्। द्वितीये प्रधानेऽपि तत्सम्भवादिति।

मम त्वन्यदपि स्फुरति। सूत्रव्याख्याने यदुक्तम्, ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया विषयिणा विषयलक्षणाद् यथा यजतेरिति। तदपि फल्गिवति। सूत्राणां वेदान्तवाक्यकुसुमग्रथनार्थत्वस्य पूर्वं स्वयमेव कथनादत्रापि पूर्वं विषयवाक्योपन्यासाद्वाक्यविशेषगतत्वेन स्वार्थप्रत्यायकस्यैव धातोर्निर्देशस्य सूत्रकाराशयगोचरतया लक्षणाया अत्राविवक्षितत्वात्। किञ्च पञ्चशिखवृत्तौ ब्रह्मपदस्य प्रधानवाचकताङ्गीकारात् तेन चेत् तत् स्मरेत् तदा प्रसङ्गे जात आनुमानिकादिसूत्राण्यप्यत्रैव वदेत्। जन्मादिसूत्रविषयश्रुत्या तु न वक्तुं शक्यम्। तत्र तत्प्रसङ्गाभावात्। श्रुत्यन्तराणां त्वानुमानिकपाद एव विचारादिति। सूत्रान्तरव्याख्यानं तु नातिविरुद्धमित्युपरम्यते। हेयत्वावचनसूत्रे चकारं प्रतिज्ञाविरोधाभ्युच्चयार्थमाहुः। श्रुतत्वाच्चेति चकारप्रयोजनं न किमप्याहुः।

भास्कराचार्या अप्येतदधिकरणं प्रधानकारणतानिरासायैवेति व्याचक्षुः ।

रामानुजाचार्यास्तु, मुख्यतया प्रधानकारणवादनिरासं व्याख्याय निर्विशेषचिन्मात्रब्रह्मवादोऽप्येताभिर्युक्तिभिः सूत्रकारेण निरस्यते । पारमार्थिकमुख्येक्षणादिगुणयोगिजिज्ञास्यं ब्रह्मेतिस्थापनात् । निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम । वेदान्तवेद्यं ब्रह्म च जिज्ञास्यतया प्रतिज्ञाय तच्चेक्षतेर्नाऽशब्दमित्यादिसूत्रैश्चेतनमिति प्रतिपाद्यते । चेतनत्वं नाम चैतन्यगुणयोगः । अत ईक्षणगुणविरहिणः प्रधानतौल्यमेव । किञ्च निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम् । प्रकाशोऽपि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः । निर्विशेषवस्तुनस्तदुभयरूपत्वाभावाद् घटादिवदचित्त्वमेवेति । अथ तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेन्न । तत्क्षमत्वं हि तत्सामर्थ्यवत्त्वम । तत्सत्त्वे निर्विशेषत्वहानिः । अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यते, हन्त तर्हि सर्वशक्तित्वाद्ययोऽन्येऽपि तथेति निर्विशेषवाद एव त्यक्तः स्यादित्याद्याहुः ।

शैवस्तु रामानुजमतस्यैव चौरो मध्वमतस्य च क्वचित् क्वचित् तद्विरुद्धां शैवश्रुतिमुदाहरन् भिन्नं प्रस्थानमभिमन्यते । तन्मते ईक्षत्यधिकरणं जन्माद्यधिकरणोक्तलक्षणस्य प्रधानेऽतिव्याप्तिवारणाय । आनन्दमयाधिकरणं च जीवेऽतिव्याप्तिवारणायेति ।

मध्वाचार्यास्तु, यतो वाचः, अशब्दमस्पर्शमरूपमव्ययम, अवचनेनैव प्रोवाच, यद्वाचानभ्युदितमित्यादिषु श्रुतिषु वाच्यत्वनिषेधाद् ब्रह्मणः शास्त्रयोनित्वसूत्रोक्तं शास्त्रप्रमाणकत्वं न युज्यत इति पूर्वपक्षनिवृत्त्यर्थमीक्षत्यधिकरणम । तत्र विषयवाक्यं तु, स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते, आत्मन्येवात्मानं पश्येत्, विज्ञाय प्रज्ञां कुर्वीतेत्यादि । एतेष्वीक्षणीयत्वश्रावणाद् वाच्यमेव ब्रह्म । नचेक्षणस्य दर्शनात्मकत्वात् कथं तेन वाच्यत्वसिद्धिरिति शङ्क्यम् । तं त्वौपनिषदं पुरुषं पृच्छामीति वाक्यान्तरे उपनिषदेकगम्यत्वश्रावणेन प्रत्यक्षाद्यवेद्यत्वे सिद्धे वचनेनैवेक्षणस्य विवक्षितत्वात् । नचाऽवचनेनोवाचेत्यादिश्रुतिविरोधः । तत्र साकल्येनावचनस्य विवक्षितत्वात् । 'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः । अत-

र्यं तर्क्यमज्ञेयं ज्ञेयमेवं परं स्मृतम्' इति गारुडेन तथा निश्चयादिति व्याख्यायाञ्च प्रधानस्याश्रौतत्वं न साङ्ख्यमतासिद्धमतस्तस्याशब्दत्वव्यवस्थापनमसङ्गतमिति सूचयन्ति । ततो, गौणश्चेत्यादिसूत्रेषु जीवात्मनीक्षणीयत्ववाच्यत्वादिश्रौतगुणयोगं नानाश्रुतिरमृत्युपन्यासेन निराकुर्वन्ति । समाप्तौ च पुनरपि सिंहावलोकनन्यायेन ब्रह्मणोऽवाच्यत्वमेव युक्त्यन्तरैर्दूषयन्ति ।

तत्रेदमवधेयम् । तथाहि । द्विविधं कपिलसूत्रसिद्धं सांख्यम् । समासरूपमष्टाविंशतिसूत्रम् । तदुपरि पञ्चशिखैर्वृत्तिः । प्रवचनसूत्रात्मकं च षडध्याययुक्तम् । तत्राद्ये तु शास्त्रप्रतिपाद्यानामर्थानामुद्देशमात्रं नान्यत् । द्वितीये तु, सत्त्वरजस्तमःसाम्यावस्था प्रकृतिः, प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगण इत्येकस्मिन् सूत्रे सर्वानुद्दिश्य ततोऽग्रे स्थूलात् पञ्चतन्मात्रस्य बाह्याभ्यान्तराभ्यां तैरहङ्कारस्य तेनान्तःकरणस्य ततः प्रकृतेः, सङ्घातपरार्थत्वात् पुरुषस्येति पञ्चसूत्र्या स्थूलभूतानि प्रत्यक्षसिद्धान्यादाय तेभ्यः कार्येभ्य उपरितनानामानुमानिकत्वमेव कपिलाचार्यैरादृतम् । ततोऽग्रे यद्यपि प्रधानाज्जगज्जायत इति श्रुतिं सूत्राकारेण पठन्ति त्रिविधं प्रमाणं चाङ्गीकुर्वन्ति, तदप्युक्तोपष्टम्भायैव, न तु शब्दस्य प्राधान्याय । अत एव व्यासचरणैरप्यानुमानिकसूत्रे तथैव तन्मतं सूचयित्वा दूष्यते । तेन सांख्यमते प्रकृतेर्मुख्यतया शब्दगम्यत्वाभावेनाशब्दत्वमेव सिद्ध्यति । शब्दगम्यत्वस्यानुमानिकपादे निराकरणेन तस्याभिमानिकत्व एव पर्यवसानादिति । अत एतद्व्यतिरिक्तं सर्वं सम्यगेव । अत एव भाष्यान्तरेऽपि प्रकृतेस्तथात्वस्यैवादरणमिति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु, ननु यदि प्रलये प्रधानादिसमन्वयो ब्रह्मण्युपगतस्तर्हि तस्यैव श्रुत्युक्तं जगत्कारणत्वमस्तु । भवदभिमतब्रह्मकल्पने तस्य जगदधिष्ठानकारणत्वकल्पने च गौरवात् । सांख्यसूत्रेष्वीश्वरस्य निराकृतत्वात् । ब्रह्मशब्दश्च व्यापकत्वात् प्रधानजीवयोरुपपद्यत एव । अधिष्ठानकारणत्वं च जीवानामेवास्तु । समस्तकार्याणामदृष्टद्वारा जीवकार्यत्वस्य अदृष्टवदात्मसंयोगजन्यतया जीवाधेयत्वस्य च सर्वास्तिकसम्मतत्वात् । सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति, सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि, येन भू-

तान्यशेषेण प्रक्ष्यस्यात्मन्यथो मयीति जीवप्रकरणस्थश्रुतिस्मृतिभ्यामपि तथावसायाच्च। अतः शास्त्रस्य नित्येश्वरपरत्वे शास्त्रयोनित्वादितिहेतुराश्रयासिद्धः। कार्येश्वरपरत्वे च पृथक् शास्त्रारम्भवैफल्यम्। सांख्यादिभिरेव तथाविधब्रह्मनिरूपणादिति शङ्कायामिदं सूत्रं प्रवर्त्तते। ईक्षतेर्नाशब्दमिति। विवादास्पदप्रधानादिभ्योऽतिरिक्तं ब्रह्म न अशब्दं, न अशास्त्रयोनि, न जगत्कारणश्रुत्यप्रतिपाद्यमिति यावत्। कुतः। ईक्षतेः। इतरावृत्तिश्रुत्युक्तेक्षतिधर्मकत्वात्। तथाच कारणश्रुतिः पराभिमतप्रधानाद्यविषया, तदवृत्तिधर्मप्रकारेण बोधकत्वात्। आकाशाद् वायुरित्यादिश्रुतिवदिति। अथवा तज्जगज्जन्मादिकारणं ब्रह्म चेतनमचेतनं वा। चेतनत्वेऽपि स्वयम्भूस्तदतिरिक्तो वेति विशेषाकाङ्क्षायां प्रवर्त्तते। ईक्षतेर्नाशब्दमिति। जगत्कारणं ब्रह्म न पुरुष एव। कुतः। ईक्षतेः। ईक्षणश्रुतिगोचरत्वाद्। अत एवेक्षणात् तद्ब्रह्म अशब्दं शब्दब्रह्मणो हिरण्यगर्भादतिरिक्तं च भवति, सुतरां पुरुषान्तरेभ्य इत्यर्थः। हिरण्यगर्भस्य वेदमयत्वेन वेदगर्भत्ववच्छब्दब्रह्मत्वमपि स्मर्यते 'पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत्। कल्पो यत्राऽभवद् ब्रह्मा शब्दब्रह्मेति यं विदुरिति' भागवतादिष्विति। एवं द्विधा सूत्रं व्याख्याय, तदैक्षत बहुस्यामितिवाक्यं दर्शयित्वा 'सर्गकाले तु सम्प्राप्ते ज्ञात्वा तं कालरूपकम्। अन्तर्लीनविकारं च तत्र स्रष्टुमुपचक्रमे। तस्मादव्यक्तमुत्पन्नं ततश्चापि महानभूद्' इति स्मृतिं च दर्शयित्वाह। नहीदमीक्षणं प्रधानादीनामचेतनानां सम्भवति। ईक्षणध्यानचिन्तनादिशब्देषु चैतन्यस्य विशेष्यत्वात्। ईक्षणादिशब्दस्योपाधिवृत्तिवाचकत्वेऽपि प्रकृतिस्वातन्त्र्यवादिभिरपि प्रधाने तत्पूर्विकायां वृत्तेरनङ्गीकाराच्च। नापि जीवानां, महदादिसृष्टेः पूर्वं करणाभावेन तेषां चैतन्यफलोपधानाभावात्। नचेयमीक्षणपूर्विका सृष्टिर्महत्तत्त्वसृष्टेः पश्चादिति वक्तुं शक्यम्। तथा सतीक्षणात् पूर्वमपि द्वैतापत्त्या, सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमितीक्षणाव्यवहितपूर्वश्रुत्यनुपपत्तेः। ततश्चापि महानभूदिति स्मृतिविरोधाच्च। नच तत् पूर्वसर्गीयमिति वक्तुं शक्यम्। सर्गकाले तु सम्प्राप्ते ज्ञात्वेति सर्गक्रमकालीनज्ञानावगमादित्यादि। ततः शाङ्करमतीयं सूत्रव्याख्यानं, मायां तु प्रकृतिं विद्यादितिश्रुतिव्याख्यानं च दूषयित्वा ततः साङ्ख्ययोग-

योर्वेदाविरुद्धत्वं च साधयित्वा रजस्तमःसम्भिन्नतया मलिनं कार्यसत्त्वं परमेश्वरस्य नोपाधिः, किन्तु केवलं नित्यज्ञानेच्छानन्दादिमत् सदैकरूपं कारणसत्त्वमेव तस्योपाधिः । न स्थानतोऽपि परस्योभयलिङ्गमित्यागामिसूत्रात् । ब्रह्मविष्णुमहेश्वरास्तु सृष्टिस्थितिसंहाराधिकारिणः कार्यसत्त्वाद्युपाधिका महदाख्या अवान्तरेश्वरा एव । तेषां च कार्योपाधित्वम् । 'गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे । एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः । सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्' इति मात्स्यादिभ्यः । बुद्ध्याख्यसमष्टिमहत्त्वं हि त्रिगुणात्मकरज्जुवत् त्रिगुणात्मकमेकमेव । सत्त्वाद्यंशभेदेन त्रयाणां देवानां च शरीरं भवत्येका मूर्तिरित्युच्यते हरिहरात्मकदेहवत् । अत एव चैतत्सूक्ष्मशरीराधारभूतं विराड्रूपं स्थूलशरीरमेकमेवेति त्रयाणामेव विश्वरूपत्वमुपपद्यते । त्रयश्च देवाश्चेतनरूपा भिन्ना एव । अत एव त्रयाणामेकपिण्डतया वातपित्तकफवत् परस्परसापेक्षत्वाद् ' अन्योन्यमनुरक्तास्ते ह्यन्योन्यमनुजीविनः । अन्योन्यं प्रणताश्चैव लीलया परमेश्वरा इति मत्स्यादिवाक्यमभ्युपपन्नम् । एतेन त्रयाणां भेदाभेदावपि व्याख्यातौ वेदितव्यौ। ननु तेषां कार्योपाधिकत्वेऽपि, त्रिधा कृत्वाऽऽत्मनो देहं सोऽन्तर्यामीश्वरः स्थित इति स्मृतेर्योगिकायव्यूहवल्लीलावतारत्वमेवाऽस्तु, किमर्थं विष्ण्वादीनां चेतनान्तरत्वं कल्प्यत इति चेन्न । कौर्मे 'प्रधानं पुरुषं चैव प्रविश्याशु महेश्वरः । क्षोभयामास योगेन परेण परमेश्वरः । प्रधानात् क्षोभ्यमाणाच्च तथा पुंसः पुरातनात् । प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकम्' इत्यनेन, तथा विष्णुपुराणादिषु च पुरुषान्तरेण सह प्रकृतिं संयोज्यैव परमेश्वरस्तदुभयात्मकं देवतात्रयरूपं महान्तं सृजतीत्यवगमात् । 'ब्रह्मादीनां त्रयाणां तु स्वहेतौ प्रकृतौ लयः । प्रोच्यते कालयोगेन पुनरेव समुद्भव' इति मात्स्यादिभ्यस्तेषामुत्पत्तिलयसिद्धेश्च । अस्मिन् कूर्मवाक्ये ईश्वरप्रवेशो जीवस्य ज्ञानेच्छाप्रयत्नव्यापनरूपः । क्षोभश्च गुणद्वारा योगश्चैकाग्र्यम् । अयं च क्षोभसंयोगविशेषद्वारा महतो हेतुः । एवं पुराणान्तरेभ्योऽपि न तेषां साक्षादवतारत्वम् । किञ्च । मनुना 'यत् तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते' इत्यनेनाऽव्यक्तब्रह्मकार्यस्यापि लौकिकब्रह्मत्वमुक्त्वा, आपो नारा इति

प्रोक्ता इत्यादिना योगेन तस्यैव नारायणत्वमुक्तमतो नारायणादव्यतिरिक्त एव परमेश्वर इति। नच नारायणादिशब्दानामुपाधिमात्रपरत्वमिति वाच्यम्। तथा सति लक्षणापत्तेरिति। अत एव विष्ण्वादिदेवताया: कृष्णाद्यवतारेषु न पुरुषान्तरप्रवेशः श्रूयते, फलवान् वा भवतीत्यतोऽशावतारत्वमेव। अत एव भागवते ऋष्यादीन् प्रकृत्य स्मर्यते, 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्। इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे' इति। अत्र कृष्णो विष्णुः स्वयं परमेश्वरः, तस्य पुत्रवत् साक्षादंश इत्यर्थः। ऋष्यादीनामंशांशिवचनादिति। नचैवं सति, मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जयेति गीतावाक्यविरोध इति वाच्यम्। तथाविधवाक्यानां व्यक्तपरत्वात्। ईश्वरस्य चाव्यक्ततया व्यवहार्यत्वाभावात्। एतेनापि विष्ण्वादीनां परमेश्वरत्वादिकं व्यक्तापेक्षया बोध्यम्। नित्यत्वं चाऽऽभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति स्मृतेर्बोध्यम्। अथवा, यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवदिति श्रुतेर्विष्णुदेवताया औत्पत्तिकब्रह्मात्मभावान्मत्तः परतरं नास्तीत्यादिवचनोपपत्तिः। वक्ष्यति चाऽऽचार्यः, शास्त्रदृष्ट्या तूपदेशो वामदेववदिति। अत एवानुगीतायां, परं हि ब्रह्म कथितं योगयुक्तेन तन्मयेति श्रीकृष्णवचनाद् भगवद्गीतायां ब्रह्मैव कार्यब्रह्मणा श्रीकृष्णेनाहमित्युपदिष्टमिति निर्णीतम्। किञ्च। अन्येषामपि ज्ञानिनां ब्रह्मभावेऽपि विष्णावेव मुख्यतो ब्रह्मभावान्मत्तः परतरं नास्तीति वचनमुक्तं, नान्यस्य। तस्य सर्वज्ञानिमुख्यत्वमुक्तं मोक्षधर्मे, 'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः। एकस्तद्वेद भगवान् धाता नारायणो विभुः। नारायणादृषिगण' इत्यादिना। तथा शिवस्यापि मत्तः परतरं नास्तीति वचनं बोद्धव्यम्। किञ्च। योगयुक्ता ये जीवाः पूर्वपूर्वेषु सर्गेषु करणवर्गेण सह च सायुज्यमुक्त्या परमेश्वरतां गतास्ते वासुदेवव्यूहेऽन्तर्भवन्ति। तत्र च व्यूह एक एव वासुदेवो नित्येश्वर इतरे तदंशा वासुदेवाः। तथा सङ्कर्षणप्रद्युम्नोऽनिरुद्धाख्यव्यूहरूपिणो विभूतिगणाः पूर्वसिद्धाः। त एते यथायोग्यं महदादिविराडन्तरूपेण ब्रह्मविष्णुरुद्ररूपेण चांशावताराः परमेश्वरस्य भवन्ति। आगच्छन्ति यथाकालं गुरोः सन्देशकारिण इति मोक्षधर्मात्। तथाच ये हरिहरादयः परमेश्वरकोटयस्तेषां, मत्तः परतरं नास्तीति वचनमुपपद्यत एव। यद्यपि तेषां ज-

गदुत्पत्त्याधारत्ववर्जमैश्वर्यं तथापि परमेश्वरात्मकतया सर्वस्रष्टृत्वसर्वाधारत्वाद्युपदेशोऽपि तेषु युज्यत एव । ननु यद्येवं तदा गीतादिषु विष्ण्वादिदेवतैश्वर्यमेव कुत उक्तं, न परमेश्वरस्तदैश्वर्यं चेतिचेन्न । 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' इति प्रश्नप्रतिवचनाभ्यां विष्णुदेवाद् भेदेन परमेश्वरकथनात् । अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते इत्यादिना च परमेश्वरस्यैश्वर्यादिकथनात् । ये त्वीश्वरस्यान्तर्याम्यतिरिक्तविग्रहमपि योगिनामिव लीलाशरीरमिच्छन्ति, तेषां मते, न तस्य कार्यं करणं च विद्यते, अप्राणो ह्यमनाः शुभ्रः, अक्षरात् परतः पर इत्यादिश्रुतीनाम, अरूपवदेव हि तत्प्रधानत्वादित्यागामिसूत्रस्य च विरोधः । कार्यं शरीरम् । करणं बुद्ध्यादि । बुद्ध्यादिना हि शरीरं प्रेर्यत इति । 'अशरीरः शरीरेषु सर्वेषु निवसत्यसाविति, देहद्वयस्थितो नित्यः सर्वदेहविवर्जित' इति भारतादिष्वीश्वरस्य देहद्वयप्रतिषेधात् । अतो विष्ण्वादिदेवानामेव स्थित्यादिलक्षणस्वाधिकारपालनाय मत्स्यादयो लीलावताराः । ते च परब्रह्मणः प्रकृष्टशक्तितया आवेशावतारतया वा परमेश्वरत्वेनोपास्या इति । तथा च श्रुतिः । यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यस्यामतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातमविजानतामिति । नन्वेवं परब्रह्मणः सकाशाद् विष्ण्वादिदेवानां भिन्नत्वे विष्णुशिवप्रकरणस्थानि सृष्ट्यादिवाक्यानि ब्रह्मनिरूपणे साधनतया विचारकैः किमित्युपन्यस्यन्त इति चेत् । तयोरीश्वरकोटितया परमेश्वरेण सह व्यवहारसाम्यादिति गृहाण । अत एव, त्रयाणामेकभावानां यो न पश्यति वै भिदामित्यादिभिस्त्रयाणामेव देवानां स्वाभाविकब्रह्मात्मभावसाम्यात् सर्वोपनिषत्सु त एवोपासनार्थं ब्रह्मतयोपदिश्यन्त इति । परब्रह्मणश्च स्वतो नामरूपाद्यभावः । 'न सन्ति यत्र सर्वेशनामजात्यादिकल्पनाः । सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे । नामरूपे न यस्यैको योऽस्तित्वेनोपलभ्यत' इत्यादिरूपविष्णुपुराणादिवाक्यात् । आत्मनः पर इति जीवादतिरिक्ते । अतः परब्रह्मणो नामरूपाद्यभावान्मुख्यविकारयोर्हरिहरयोर्नामरूपाभ्यामेव शास्त्रेषु प्रायशो व्यपदेशः । अत एव वैष्णवाः शैवाश्च विष्ण्वाद्यतिरिक्तं परमेश्वरमविद्वांसो ब्रह्ममीमांसाशास्त्रं विष्ण्वादि-

परतया व्याचक्षाणा अविवेकिन एवेति मन्तव्यम् । एवं प-ञ्चसूत्र्यां सङ्क्षेपतः प्रदर्शितः शास्त्रार्थ इतः परं प्रपञ्च्यत इत्याह ।

तद्व्यविचारमणीयमेव । सदेव सौम्येदमग्र आसीदित्यनेन निरूपिताया आदिसृष्टेः पूर्वं केवलं ब्रह्मैव, नान्यदित्यस्यार्थस्य साधने तदभिमताविभागलक्षणाद्वैतस्याऽवान्तरसृष्टिप्राक्कालविषयत्वव्युत्पादनेन तदानीं तदभिमतप्रकारेण प्रधानादिसमन्वयस्याशक्यवचनतया जीवादृष्टस्याप्यभावेन प्रथमव्याख्यानगतपूर्वपक्षस्यैवासङ्गगनत्वेन तदपाकरणाय सूत्रप्रवृत्तेर्वक्तुमशक्यत्वात् । द्वितीयव्याख्यानं तु न दुष्टम् । सांख्ययोगयोः सर्वांशेन श्रुत्यविरुद्धत्वोपपादनं त्वसङ्गतमेव । 'अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽंशः श्रुत्येकशरणैर्नृभिः । जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' इति पराशरोपपुराणीयवाक्यविरोधात् । नच योऽभ्युपगमवादत्वेनोक्तो नित्येश्वरदूषणादिः स एव त्याज्योऽस्त्विति वाच्यम् । तदुक्तषडध्याय्यां तस्याभ्युपगमवादत्वगमकानुपलम्भात् । नित्यानित्यवस्तुविवेकव्यतिरिक्तांशान्तरेऽपि तथात्वात् । कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमिति श्रुत्या तथा निश्चयात् । एवं योगेऽपि द्रष्टव्यम् । जीवात्मज्ञानमात्रेण मोक्षाङ्गीकारस्यापि तथात्वात् । 'येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रय' इति श्रीभागवते विविक्तजीवात्मज्ञानाद्विमुक्तमानिनां पातकथनेन तथा निश्चयादिति । तथा परमेश्वरस्य ब्रह्मविष्णुमहेश्वरातिरिक्तस्य कारणसत्त्वोपाधिकत्वस्थापनमप्यसङ्गतमम् । शिवतत्त्वविवेकस्थापितस्योङ्कारवाच्यस्य गुणसाम्योपाधिकस्य सर्वेश्वरस्यैव कारणसत्त्वोपाधिकस्यापि निरुपाधिकपरमेश्वरप्रतिनिधित्वेनैव ब्रह्मोपनिषन्नृसिंहतापनीयमैत्रायणीयाथर्वशिखासु सिद्धत्वात् । इदं यथा तथा ब्रह्मस्ताख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । नच निरुपाधिकस्य निराकारत्व शङ्क्यम् । आनन्दरूपममृतं यद्विभातीति मुण्डके, अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओंकारं सर्वेश्वरं द्वादशान्ते आनन्दाऽमृतरूपं प्रपावं षोडशान्त 'इति तापनीये, आ-

नन्दमात्रकरपादमुखोदरादिरिति पञ्चरात्रस्मृतौ, अथवा परमात्मानं परमानन्दविग्रहमिति योगियाज्ञवल्क्यस्मृतौ चानन्दाकारस्यैव सिद्धत्वात् । नच, न तस्य कार्यं करणं च विद्यत इत्यस्य विरोधः । तस्य तत्सम्बन्धि यत् तत् कार्यं जन्यं न, किन्त्वजन्यमेव । किञ्च, तस्येति षष्ठ्या भेदो निरूप्यते । तथाच जीववत् स्वरूपातिरिक्तं ज्ञानक्रियादिषु करणमिन्द्रियादिकं च तस्य नास्ति । अथवा नित्यत्वादाकारस्य तद्धेतुभूतं करणं क्रिया, सापि नास्ति । अत एव, न तत्सम इत्यादीति तदर्थात् । एतेनैव अप्राणो ह्यमनाः शुभ्र इत्यस्याप्यविरोधः सिद्धः । नाप्यरूपवत्सूत्रस्य विरोधः । तत्रापि रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वं तद्युक्तं रूपवद्विश्वम् । ब्रह्म तु तद्विलक्षणम् । यद्वा रूप्यते व्यवह्रियतेऽनेनेति रूपं करचरणादि तद्वत् तद्युक्तं ब्रह्म न, किन्तु तद्विलक्षणम् । करादेरपि ब्रह्माभेदाद्रूपरूपं ब्रह्मैव, नतु रूपवदिति । ननु कुत एतदवगम्यत इत्याकाङ्क्षायां तद्विनिगमकं सूत्रशेषेणाह । तत्प्रधानत्वादिति । सर्वेषां वेदान्तानां प्राधान्येन ब्रह्मप्रतिपादकत्वात् । तथाच ब्रह्मप्रकरणे निरूपित आकारो ब्रह्माभिन्न एवेति । नचाऽऽकारनिरूपकाणां ब्रह्मपरिचायनार्थत्वात् तेषां ब्रह्मभिन्नकराद्याकारनिरूपकत्वेऽपि न प्राधान्येन ब्रह्मप्रतिपादकत्वप्रतिरोध इति शङ्क्यम् । स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेतिश्रुतौ बाह्याभ्यन्तरभेदराहित्यबोधने ज्ञानाकारत्वस्यैव सिद्धत्वात् । आकारभूतकरादिराहित्येन केवलज्ञानात्मकतायां बाह्याभ्यन्तरत्वराहित्येन तन्निषेधानुपपत्तेः । अकृत्स्नादिप्रतीतिराहित्येन कृत्स्नघनपदयोर्वैयर्थ्यापत्तेश्च । अतः केवलसच्चिदानन्दात्मकब्रह्माभिन्नकरचरणाद्याकाराङ्गीकारे न कस्यापि विरोधः । यत् पुनस्तलवकारादिश्रुत्या परमेश्वरस्य साक्षादुपास्यत्वाभाव उक्तः । स तु तामेव श्रुतिं विरुणद्धि । पूर्वार्द्धे मनःप्रवृत्तिरहितं तत्प्रेरकं यदुक्तं, तदेव ब्रह्म त्वं विद्धि, नेदं प्रेर्यत्वेनानुभूयमानं जीवात्मरूपं न विद्धि । यत् प्रेरकं तत् किमित्यत आह । यदिदं सच्चिदानन्दाकारमुपासते वैदिकोपासका इति तत्रार्थात् । अनुपास्यत्वेऽभिप्रेते तु द्वितीयेदङ्कारं न वदेदेव । नेदं यदुपासत इत्येतावतैव चारितार्थ्यात् । यस्यामतं तस्य मतमित्यत्रापि, यमेवैष वृ-

णुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामिति वरणहेतुकतनु-विवरणस्य श्रुत्यन्तरे श्रावणाद् वरणाभावे यस्यामतमविदितं तस्य मतं, यस्य पुनस्तदभावेऽपि मतं स न वेदेति । यद्वा, अनिरुक्तश्रुतौ ब्रह्मणो वाक्यपरिच्छेद्यत्ववारणाद् यस्यामतमनिरुक्तत्वात् सम्यक्तया अज्ञातं तस्य मतम् । यस्य पुनस्तद्विपरीतं स न वेदेति । अविज्ञातं करचरणादिविशिष्टतया जानतां, विज्ञातं तदभिन्नतया जानतामित्यर्थादिति । अतो न परब्रह्मणोऽनुपास्यत्वाज्ञेयत्वादिकं युक्तम् । यदपि परब्रह्मणः स्वतो नामाद्यभावसाधनाय विष्णुपुराणादिवाक्यमुपन्यस्तं, तत्रापि कल्पनापदात् काल्पनिकनामादिनिवृत्तिरेवाभिप्रेता, न यावन्नामादिनिवृत्तिः । ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः । ॐकारं प्रकृत्य स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः । तस्य वाचकः प्रणव इति गीताश्रीभागवतपातञ्जलसूत्राणां विरोधात् । वाचकस्यैव नामत्वात् । एवं सिद्धे सदादिनामकत्वे, 'नारायणः शिवो विष्णुः शङ्करः परमेश्वरः । एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इतिवाराहपुराणवाक्यात्, 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इत्यादिश्रुतिभ्यश्च नामान्तरस्वीकारेऽप्यदोषात् । अनादिमत्परं ब्रह्मेति स्वलिखितगीतावाक्याग्रिमगीतावाक्य एव सर्वतःपाणिपादान्तमित्यादिना परमेश्वररूपस्याप्युक्तत्वेन तस्याप्यङ्गीकार्यत्वात् । ज्ञेयं प्रस्तुत्यैव तस्य कथनेनोपासनागन्धस्याप्यभावात् । अतो नामरूपे न यस्येति द्वितीयवाक्येऽपि काल्पनिकनामाद्यभाव एवास्येय इति परमेश्वरस्य लीलाविग्रहाङ्गीकारे दोषाभावान्मत्स्यादीनां परमेश्वरलीलावतारत्वेऽपि न दोषः । द्वितीयस्कन्धे, लीलावतारान् पुरुषस्य भूम्न इति प्रतिज्ञाय ब्रह्मणा मत्स्यादीनां कथनात् । नचैते चांशकलाः पुंस इति प्रथमस्कन्धविरोधः । तेषामेतद्भिन्नत्वात् । त्वदुपगतनित्यकार्यवासुदेववन्नामरूपादिसाम्येऽपि भेदस्योपक्रमोपसंहाराभ्यां यथायथमवगन्तुं शक्यत्वात् । गीतायां श्रीभागवते च विभूतिमध्ये वासुदेवस्य गणनाच्च । यत्पुन', 'कृष्णस्तु भगवान् स्वयमित्यतःस्वयं पदस्य पुत्रवत् साक्षात् परमेश्वरांशः । कृष्यादीनामशांशिवचनाद्' इत्युक्तम् । तदप्यसङ्गतम् । भूभारहारकं कृष्णमंशेषूक्त्वा तदंशित्वेन पुमांसं चोक्त्वा ब्रह्माण्डात्मकपुंरूपताभ्रमवारणाय तुशब्दोक्तिपूर्वकं

स्वयंभगवत्त्वविधानस्यावोधात् । कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामिति, वसुदेवगृहे साक्षाद् भगवान् पुरुषः पर इत्यादिवाक्यानामप्यविचाराच्च । गीतायां तु 'परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् । आहुस्त्वाम् ऋषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे' इति वाक्यमपि प्रायो नावलोकितं, येन, मत्तः परतरमितिवाक्यस्य वामदेववच्छास्त्रदृष्ट्या ज्ञानिमुख्यवाक्यत्वेन गतिश्चिन्तिता । नहि परब्रह्मत्ववकार ऋषयः सर्वे भ्रान्ता येनैवं भगवदुक्ते गौणीं वृत्तिं ब्रह्मदृष्टिं च नावगच्छन्ति । तथाऽव्यक्तपरत्वेन गतिरप्यसङ्गतैव । अव्यक्तस्याक्षरत्वेन भगवद्धामतयैव सिद्धया भगवतस्ततोऽपि परत्वात् । नच व्यवहार्यत्वान्नेश्वरत्वमिति युक्तम् । तस्य सूत्रव्याख्यान एवोपपादितत्वात् । यदपि मोक्षधर्मवाक्येन नारायणाद्भिन्नत्वं परमेश्वरस्योक्तं, तत्र तु नारायणपदं यौगिकमेव । धातुपदविशेषितत्वात् । न तु रूढम् । अतो यत्र नारायणपदेन परमेश्वर उच्यते तत्र रूढ्यैवोच्यते । यथा महोपनिषदि । तत्र ह्येको ह वै नारायण आसीन्न ब्रह्मा न ईशानो नापो नाग्नीषोमावित्यादिना ब्रह्मादिसर्वनिषेधेऽपामपि निषेधात् । स एकाकी नर एवेत्यनेन पुरुषाकारस्योक्ततया निराकारत्वस्यापि वारणात् । तस्य ध्यानान्तस्थस्य यत्र स्तोममुच्यते, तस्मिन् पुरुषाश्चतुर्दशाऽजायन्तैका कन्येति प्रस्तुत्य, दशेन्द्रियाणि मन एकादशं तेजो द्वादशमहङ्कारस्त्रयोदशः प्राणाश्चतुर्दश आत्मा पञ्चदशी बुद्धिरिति तेषां स्वरूपकथनं तेजःपदेन महत्तत्त्वस्य गणितत्वात् । 'विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तम' इति पुराणे तस्य तेजोरूपत्वावगमात् । अतो यत्किञ्चिदेकदेशमालम्ब्य सकलशास्त्रविप्लावनं न सतां मार्ग इति बोध्यम् । एवं शिवरूपेऽपि ज्ञेयम् । 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् । तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतेरनन्तरूपः परमेश्वरः कदाचिच्छिवाकारेणैव सर्वं जगत् करोतीति । अतो विचारकाणां विष्णुशिवप्रकरणीयवाक्यलिखनमस्मदुक्ताभिप्रायेण, न तु त्वदुक्तेनेति गृहाण । एतावान् परं विशेषो यन्नृसिंहतापनीये, अनुपनीतशतमेकमेकेनोपनीतेन तत्समित्यादिना गृहस्थवानप्रस्थयतिरुद्रजापकाथर्वशिरःशिखाध्यायिपर्यन्तमुक्त्वा

एवं चिद्रूपस्य कारणतानिरूपणेन वेदान्तानां ब्रह्मपरत्वं निरूपितम् ॥ १० ॥

अतः परमानन्दरूपस्य कारणत्वोपपादनेन तद्वाक्यानां ब्रह्मपरत्वमुपपाद्यते, आनन्दमयाद्यष्टभिः सूत्रैः। तत्र तैत्तिरीयशाखायां ब्रह्मभृगुप्रपाठकद्वयेन ॥

अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्सममिति नृसिंहमन्त्रराजजापके उत्कर्षविश्रान्तिबोधनात् तद्विद्यावेद्यरूप एवोत्कर्षविश्रान्तिः। एतदपि प्रहस्ताख्यवादादेवावगन्तव्यमिति दिक्। अतः परं प्रकृतमनुसरामः।

ईक्षत्यधिकरणप्रयोजनमाहुः * एवमित्यादि * वेदान्तवाक्येष्वव्यवहार्यत्वादिना बोधितस्य चिद्रूपस्य कारणतासमर्थनेन सर्वेषां वेदान्तानां कार्यद्वारा ब्रह्मस्वरूपनिरूपकत्वाद् ब्रह्मपरत्वं ब्रह्मणि तात्पर्येण समन्वितत्वं निरूपितम्। तथाचेदमधिकरणप्रयोजनमित्यर्थः॥

इति चतुर्थाधिकरणम्।

नन्वीक्षत्यधिकरणे सर्वेषां वेदान्तानां ब्रह्मपरत्वं सिद्धमेवेत्यग्रिमाधिकरणस्य किं प्रयोजनमित्याकाङ्क्षायां तद्वदन्तस्तदवतारयन्ति * अतः परमित्यादि *। * तद्वाक्यानामिति * आनन्दप्रतिपादकवाक्यानाम्। तथाच लक्षणगताव्याप्त्यादिदोषपरिहारायेदमधिकरणम्। अत्रापि सामान्यविशेषभावगर्भोऽवसर एवाधिकरणसङ्गतिरित्यर्थः। तानि कानीत्याकाङ्क्षायां विषयवाक्यानां बाहुल्याद्वाक्रमेव प्रदर्शयन्ति * तत्रेत्यादि *। आनन्दकार्ये प्रतिपाद्यन्त इति शेषः। तानि विषयवाक्यानीत्यर्थः। नन्वेतद्द्वये ब्रह्मणः कार्यमुच्यते। सत्यज्ञानानन्तलक्षणकं ब्रह्म प्रस्तुत्य तस्माद्वा एतस्मादात्मन आकाशः सभूत इत्यादिना कार्यकथनात्। तथाग्रिमेऽपि, यतो वा इमानीति ब्रह्म लक्षयित्वा, आनन्दाद्ध्येव खल्विमानि भूतानीत्यादिना ब्रह्मण एव निष्कर्षाच्चानन्दकार्ये सन्देह

तत्रानन्दमय इति मयट्प्रत्ययान्तस्याब्रह्मत्वेनाजगत्कर्तृत्वे ब्रह्मप्रपाठकस्याब्रह्मपरत्वं स्यादिति तन्निराकरणार्थमानन्दमयाधिकरणम् । षडिन्द्रियस्वरूपद्वयानन्दभेदेनानन्दस्याष्टविधत्वादष्टसूत्राणि ।

ननु कथं सन्देहः, कथं वास्याब्रह्मत्वे प्रपाठकासङ्गतिरिति। उच्यते । ब्रह्मविदः परप्राप्तिं प्रतिज्ञाय ज्ञेयांशे कारणत्वायानन्दांशमप्रवेश्य जडत्वपरिहाराय सर्वज्ञानन्दरूपं फलमुपपाद्य तन्निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः । तत्र साधनशेषब्रह्मणो वाक्यादेव निःसन्दिग्धप्रतीतेः फलस्य ब्रह्मत्वं प्रतिपादनीयम् ।

एव न भविष्यतीति व्यर्थोऽधिकरणारम्भ इत्यत आहुः * तत्रानन्दमय इत्यादि * । * तत्रेति * ब्रह्मप्रपाठके । *मयट्प्रत्ययान्तस्येति* मयट्प्रत्ययान्तप्रतिपाद्यस्य । तथाचानन्दरूपेणात्र जगत्कर्तृत्वस्य प्रतिपिपादयिषितत्वान्मध्ये च सन्दिग्धशब्दनिवेशात् तन्निवृत्त्यर्थमयमारम्भ इत्यर्थः । नन्वानन्दरूपेणैवात्र कारणताप्रतिपिपादयिषितेत्यत्र किं गमकमित्याकाङ्क्षायामधिकरणसूत्रसङ्ख्यैव गमिकेत्याशयेनाहुः । * षडित्यादि * षडिन्द्रियात्मपरमात्मभिर्हि लोके कार्यं क्रियते । ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियत इति तत्तदात्मक आनन्द एवेत्यानन्दस्यैवाष्टविधत्वात् तावन्ति सूत्राणीति सैव तथेत्यर्थः । एवमधिकरणारम्भे साधिते आनन्दमयस्याब्रह्मत्वेनापि प्रपाठकस्य ब्रह्मपरत्वं मन्वान एकदेशी चोदयति *ननु कथमित्यादि* । एवं प्रश्ने सन्देहादिकं व्युत्पादयन्ति । * उच्यते * । * ब्रह्मविद इत्यादि * ब्रह्मविदाप्नोति परमिति वाक्ये ब्रह्मविदः परप्राप्तिं प्रतिज्ञायैतद्वाक्यविवरणभूतायामृचि आनन्दांशस्य कारणत्वबोधनाय सत्यं ज्ञानमनन्तं ब्रह्म यो वेदेति लक्षणवाक्योक्तज्ञेयांशस्य साधनशेषत्वेन तदपेक्षया फलस्योत्कृष्टत्वात् फलभूतमानन्दांशं तत्राप्रवेश्य कारणस्य प्रकृत्यादेर्लोके जडत्वदर्शनात् तद्विलक्षणत्वमानन्दांशे बोधयितुं तस्य जडत्वपरिहाराय विपश्चिद्ब्रह्मपदाभ्यां सर्वज्ञानन्दरूपं फ-

तत्राब्रह्मान्नमयादितुल्यवचनात् सुखवाचकशब्दानामेव वचनाच्च सन्देहः। आनन्दांशस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे प्रपाठकवैयर्थ्यं च।

फलस्य नैकव्यप्रतिपादनायात्मपदप्रयोगेण फलरूपेण जगत्कारणतामुक्त्वा तस्यैव मध्ये सर्वान्तरत्वमुपपादितम्। तस्माद् वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय इति। अन्ते च, एतमानन्दमयमात्मानमुपसंक्रामतीति। आदिमध्यरूपे अनूद्य फलत्वेनोपपादितम्। तन्निरूपकस्यापि तत्तुल्यफलत्वं वक्तुमन्नमयादीनामपि ब्रह्मत्वेनोपासनमुक्तम्।

लम् ऋगुत्तरार्द्धे, सोऽश्नुते सर्वान् कामान् सहेत्यनेनोपपाद्य तस्य सर्वज्ञानन्दरूपस्य फलस्य निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः। तत्रापि साधनशेषस्य ज्ञेयब्रह्मणो लक्षणवाक्यादेव निःसन्दिग्धं स्वरूपावगमात् फलस्य ब्रह्मत्वं प्रतिपादनीयम्। प्रतिज्ञावाक्ये परपदात् तस्य चर्गुत्तरार्द्धेन विवरणे भिन्नविभक्तेर्भिन्नपदवचनयोश्च कथनेन परपदार्थानिश्चयाद् ऋग्व्याख्यानरूपे प्रपाठकेऽवश्यं कारणत्वादिना ब्रह्मत्वमुपपादनीयमित्यर्थः। एवं प्रपाठकार्थमुक्त्वा सन्देहबीजमाहुः * तत्राऽब्रह्मेत्यादि *। * अब्रह्मान्नमयादीति * अब्रह्मरूपं यदन्नमयादीत्यर्थः। एवं सन्देहमुपपाद्य प्रपाठकासङ्गतिमुपपादयन्ति * आनन्दांशस्यैवेत्यादि * सदेव सोम्येति, स ऐक्षत लोकानुसृजा इत्यादिश्रुत्यन्तरे सच्चिदंशयोः कारणत्वस्य प्रतिपादितत्वेन तत्सहचरितस्यानन्दांशस्यापि तथात्वेन तस्यान्यत्र कारणत्वाकथनात् तदभावे कार्यानुसारिलक्षणस्याव्यापकत्वप्रसक्तेरत्र तस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे तद्वैयर्थ्यमित्येवमसङ्गतिरित्यर्थः।

ननु कारणतावाक्ये तस्माद्वा एतस्मादात्मन इत्यात्मपदादात्मा वा इदमेक एवेत्यादाविवात्रापि चिदंशकारणताप्रतिपादनस्य सम्भवद्युक्तिकत्वात् कथमत्रानन्दांशकारणताप्रतिपादनविनिगमनेच्छायामात्मपदोक्तिनात्पर्यं वदन्तस्तद्विनिगमकयुक्तिमाहुः * फलस्येत्यादि * यथा मलयजस्याभीष्टत्वेऽपि दूरत्वात् तदर्थं न

तत्र पूर्वपक्षेऽन्नमयादेरिवानन्दमयस्यापि न ब्रह्मत्वम् । अन्नमयादितुल्यवचनात् तथैव फलसिद्धेरिति । एवं प्राप्तेऽभिधीयते ।

आनन्दमयोऽभ्यासात् ॥ ११ ॥

आनन्दमयः परमात्मा, नान्नमयादिवत् पदार्थान्तरम् । कुतः । अभ्यासात् । अभ्यस्यते पुनः पुनः कीर्त्यत इत्यभ्यासः । तस्मात् । अभ्यासस्य भेदकत्वं पूर्वतन्त्रसिद्धम् ।

पुरुषप्रवृत्तिस्तथा माऽभूदिति तदर्थं फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण तदनन्तरदाभ्यां सन्निहितपरामर्शात् फलरूपेण जगत्कारणतामुक्त्वा तस्यैवानन्दस्य मध्ये सर्वान्तरत्वफलत्वमन्ते फलत्वं चानन्दमयपदाभ्यामुक्तम् । तेनादिमध्यावसानेषु कारणत्वसर्वान्तरत्वफलत्वानि तत्रैव साधितानि । तथान्नमयादीनां ब्रह्मत्वेनोपासनकथनात् तदान्तरत्वनिरूपकाणां यदा तत्तुल्यं फलत्वं, तदाऽऽनन्दमयस्य सर्वान्तरस्य फलत्वं किं वाच्यमित्याशयेन फलत्वमेव दृढीकृतम् । तथाच यदि केवलमात्मपदमेव कारणताप्रतिपादकवाक्ये स्यात् तदा त्वदुक्तं स्यादपि । न त्विह तथा । किन्तु तदेतत्पदसमभिव्याहृतम् । तथा सत्यात्मपदं नैकट्यमेव बोधयति, नतु तेन रूपेण कारणताम् । सा च प्रतिपिपादयिषिते पर्यवस्यतीति सम्पूर्णवाक्यविचारादवगम्यते । अतः पूर्वोक्ताः फलत्वादय एतद्विनिगमकयुक्तिरूपा इत्यर्थः । एवं विनिगमकबोधनेन परोक्तं प्रतिक्षिप्य प्रकृते पूर्वपक्षमाहुः * तत्रेत्यादि * । * तथैवेति * ब्रह्मत्वेनोपासनेनैव । सूत्रं व्याकुर्वते * अभिधीयत इत्यादि * । ननु हेतुना साध्यसिद्धिर्व्याप्तिनिश्चये सति भवति । प्रकृते चाभ्यासत्वेन परमात्मबोधकत्वेन व्याप्त्यभावादसिद्धोऽयं हेतुरित्यत आहुः *अभ्यासस्येत्यादि* पूर्वतन्त्रे हि, समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीति पञ्चकृत्वो यजत्यावृत्तौ मीमां-

यथा पूर्वतन्त्रे शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानां षण्णां कर्मभेदकत्वमेवमेवानन्दमयस्याप्यभ्यासात् पूर्ववैलक्षण्यम्। अतोऽतुल्यत्वाद् ब्रह्मत्वम्। एवमभ्यासः श्रूयते। को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयातीत्यर्थतोऽभ्यासः स्तुत्या।

सितं, किमत्र तनूनपादादिषु चतुर्षु पूर्वयागान्तरविधानमिति। तत्र पूर्वपक्षिणा धात्वर्थप्रत्यभिज्ञानादिडादिगुणविधानार्थे समिद्यागानुवादेऽङ्गीकृते सिद्धान्तितम्। भेदाभेदसाधारण्या यजिश्रुत्या यागमात्रप्रत्यभिज्ञानेन श्रुतेर्यागान्तरपक्षेऽपि तुल्यत्वाद् गुणविधानपक्षेऽपि चतुर्थीतद्धितयोरभावेन देवतायास्तृतीयाया अभावेन द्रव्यस्य च वक्तुमशक्यत्वाद् द्वितीयया चाग्निहोत्रं जुहोतीत्यादिवत् तेषां कर्मनामत्वनिश्चयात् पदान्तरसमभिव्याहृतेन यजतिना यागान्तरमेव बोध्यत इति। तथाच यत्र यत्र वाक्ये पदान्तरसमभिव्याहृतस्य यस्य पदस्याभ्यासस्तत्र तत्र तस्य पदस्य पूर्वस्मादर्थान्तरगमकत्वमिति व्याप्तेः पूर्वस्मादर्थान्तरत्वेन परमात्मसाधनाय सिद्धो हेतुरित्यर्थः। नन्वभ्यासस्य भेदकत्वमात्रं सिद्धम्। तस्य फलमितरभेदः सोऽत्र शब्दान्तरादेव सिद्धो वाक्यान्तरसिद्धमसन्निहितमभ्यासं स्वलाभाय नापेक्षते। तथा सति कथं तेन परमात्मावगतिरित्यत आहुः * यथेत्यादि * तथाच शब्दान्तरेण सिद्धेऽपि भेदवैलक्षण्यमभ्यासः साधयति। सिद्धाच्च वैलक्षण्यादन्नमयादिभ्य आनन्दमयस्यातुल्यत्वं सिद्ध्यति। तेन ब्रह्मात्मावगतिरित्यर्थः। नन्वभ्यासस्यान्नमयादिवाक्येष्वपि दर्शनादत्रैव कथं वैलक्षण्यसाधकत्वमित्यत आहुः * एवमभ्यास इत्यादि * अयमर्थः। पूर्वानुवाकेष्वन्नादीनां प्रशंसामुक्त्वापि, को ह्येवान्यादितिवाक्ये किंशब्दद्वयेन पूर्वोक्तं सर्वं परामृश्यते। तेन तदन्नादिकं प्रति व्यतिरेकमुखेनानन्दस्यैव हेतुता श्राव्यते। तेनान्नादीनामपि यत्स्वकार्ये सामर्थ्यं तस्यानन्दसापेक्षता बोध्यत इति सर्वोपजीव्यत्वेन स्तुत्या सर्वता-

मयडर्थत्वप्रकृतिस्तु तुल्या । पुनर्वचनेनाभ्यासेन प्रवाहाद् भेदे साधिते ब्रह्मत्वम् । न तु द्वयापत्तिः । उत्तरस्य साधकत्वात् । तस्माद् आनन्दमयं ब्रह्मैव ।

ऽऽनन्दोऽर्थनोऽभ्यस्यत इति स्तावकत्वेन वैलक्षण्यसाधकत्वमित्यर्थः। ननु तावकाभ्यासस्य पूर्वेष्वपि सत्त्वाद् वैलक्षण्यस्य तेष्वपि सिद्धेर्वैलक्षण्यं नानन्दमयस्य परमात्मत्वनिर्णायकम् । लिङ्गेन सिद्ध्यतस्तस्य मयट्श्रुत्यपेक्षया दुर्बलत्वात् । अर्थान्तरत्वेऽपि प्रायपाठेन च तुल्यत्वनिश्चयात् । किञ्चायं विकारे मयट् । द्व्यचश्छन्दसीतिनियमस्य, मृण्मयं गृहं राजन्नह गममित्यादिमन्त्रेषु व्यभिचारात् । तेन विकारार्थे द्व्यचो भवत्येव। अन्यस्मात्तु विकारार्थे भवति, न भवति चेति व्यवस्थितविकल्पाश्रयणेन त्र्यचोऽप्यानन्दशब्दात् तस्य विकारार्थे सुवचत्वात् । तथा सति न तेन वैलक्षण्यसिद्धिर्वैलक्षण्यसिद्धावपि न तेन परमात्मत्वसिद्धिरित्यत आहुः * मयडर्थेत्यादि * मयट् प्रत्ययः । अर्थत्वमर्थान्तरत्वम् । ताभ्यां सहिता प्रकृतिर्मयडर्थत्वप्रकृतिः शब्दान्तररूपा । सा तुल्या व्यवस्थितविकल्पाश्रयणेऽपि पदार्थान्तरपक्षे परमात्मपक्षे च साधारणा । यद्वा स्तुत्या तुल्या यादृशी स्तुतिस्तादृशमर्थान्तरं बोधयति । अतो न तयाऽवान्तरप्रायपाठेन वा विकारार्थाग्रहो युज्यते । तदपेक्षयाऽसाधारणस्य लैङ्गिकाभ्यासस्यैव ज्यायस्त्वादित्यर्थः । तेन सिद्धमाहुः * पुनरित्यादि * किमः पुनर्वचनेन बोधितो य आर्थिकोऽभ्यासस्तेन मयडर्थान्तरयोः प्रवाहाद् भेदे आनन्दमयस्य साधिते तस्य ब्रह्मत्वं सिद्धमित्यर्थः । नन्वानन्दमयस्य ब्रह्मत्वे द्वैतापत्तिः । तस्य प्रियमेव शिर इत्यादिसम्बन्धषष्ठ्या तस्य भेदबोधनात् । तथा सति ब्रह्मत्वस्याप्यसिद्धिः । नेह नानास्तीत्यादौ ब्रह्मणि भेदनिषेधादित्याशङ्कायामाहुः * नत्वित्यादि * उत्तरस्यैतदभ्यासवाक्यादग्रिमस्य यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीत्यन्तरशब्दवाच्यभेदकृतिनिन्दावाक्यस्य राहोः शिर इत्यादिवदभेदषष्ठीसाधकत्वान्न द्वयापत्तिरित्यर्थं । सिद्धमाहुः * तस्मादित्यादि * बाधाभावात् तथेत्यर्थः । उपचयापचयशङ्किताब्रह्मत्वपरिहारस्तु गुणोपसंहारपादे प्रियशिरस्त्वादिसूत्रे आचार्येण

अथवा स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानासेत्यादिश्रुतिभिरेष उ एवेतिश्रुतेश्च तानि तानि साधनानि कारयित्वा तानि तानि फलानि ददद् भगवान् स्वक्रीडार्थमेव जगद्रूपेणाविर्भूय क्रीडतीति वैदिकैर्निर्णीयते। एतदेव काण्डद्वयेऽपि प्रतिपाद्यते। अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेर्जीवपरत्वमेव स्यान्न ब्रह्मपरत्वम्।

कर्मब्रह्मणोरपि जीवशेषत्वं नापेयात्।

विधेय एवेति न चोद्यावसर इति बोधयितुमेवकारः। एवमस्मिन् वर्णकेऽन्नमयादीनां ब्रह्मकार्यत्वेन पदार्थान्तरत्वमङ्गीकृत्य। आनन्दे फलत्वस्य वक्तव्यत्वात् साधनशेषभूते ज्ञेये ब्रह्मण्यानन्दं चानिवेश्याथिकाभ्यासादानन्दमयस्य तेभ्यो भेदः साधितः।

साम्प्रतं तु प्रभुचरणैरखण्डब्रह्मवादेन पूर्वं सिद्धं कार्यस्यापि ब्रह्मत्वमनूद्यानन्दस्य साधनशेषत्वेऽपि रूपभेदेन फलत्वानपायाज्ज्ञेयकोटावानन्दं निवेश्यापि तेभ्य आनन्दमयभेदस्तस्यैष एव शारीर आत्मेत्यादिवाक्याभ्यासाद् वर्णकान्तरेणाधिदैविकवादमाश्रित्य साध्यते * अथवेत्यादि *। तदर्थं पूर्वं सर्वश्रुतीनां ब्रह्मपरत्वेनैकवाक्यत्वाय प्रतीयमानस्य द्वैतस्य बाध्यताप्रकारबोधनाय च सृष्टिप्रक्रियास्मारणपूर्वकमखण्डब्रह्मवादस्वरूपं सप्रमाणं निरूप्यते * स वै नैवेत्यादि *। * वैदिकैरिति * प्राचीनौपनिषदैः। एतेन सम्मतिरपि शिष्टानामुक्ता। एतेन सृष्टीच्छायां प्रयोजिका क्रीडेच्छेति बोधितम्। * एतदेव काण्डद्वयेऽपि प्रतिपाद्यत इति * शाब्दस्य हि ब्रह्मण एष पन्था इत्यनेन द्वितीयस्कन्धे उक्तार्थस्यैवोपबृंहणात् क्रीडनमेव प्रतिपाद्यत इत्यर्थः। तेन सृष्टीच्छा क्रीडेच्छारूपैवेति निर्णीयोक्तोपबृंहणेऽन्यस्याप्यर्थस्य सम्भवदुक्तिकत्वात् तदनुक्त्वा विपक्षे बाधकं तर्कमेवाहुः * अन्यथेत्यादि *। * अन्यथेति * भगवतः सर्वरूपत्वाभावे। *नापेयादिति *पारार्थ्यस्य शेषलक्षणस्य फलद्वारा तत्र सत्त्वान्नापेयादित्यर्थः। नच जीवशेषत्वमेव काण्डद्वयस्यास्तु

एवं सति पूर्वकाण्डेऽवान्तरफलान्युक्त्वैतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेर्निरवद्यानन्दात्मकमेव परमं फलमिति तद्विवक्षमाणा पूर्वं सामान्यत आह । सप्साधनं तैत्तिरीये । ब्रह्मविदाप्नोति परमिति । अक्षरब्रह्मवित् परं ब्रह्माप्नोतीत्यर्थः । अत्र परशब्दस्य पूर्वपरत्वे तद्वित्येव वदेत् । पूर्वं ब्रह्मोक्त्वाग्रे यत् परमित्याह तेन सान्निध्यात् तत एव परं पुरुषोत्तमरूपमेवाऽत्राभिप्रेतमिति ज्ञायते ।

किञ्च प्रतिवादिना तदाप्तिर्ज्ञानात्मिकैव वाच्या । तथा सति ब्रह्मप्राप्तो ब्रह्म प्राप्नोतीत्यर्थः स्यात् । स चासङ्गतः । साधनसाध्यभावव्याहृतिश्च ।

बाधकाभावादिति वाच्यम् । सर्वे वेदा यत् पदम्, ओमित्येतदक्षरम्, इदं सर्वं, यस्यात्मा शरीरमित्यादिषु वेदादेर्भगवत्परत्वस्य भगवतो जीवशेषित्वस्य च श्रावणेन तद्विरोधस्यैव बाधकत्वात् । तस्मान्नात्र शङ्कालेशः । एवमखण्डब्रह्मवादस्यैव श्रौतत्वादुक्तरीतिक एवार्थ इति हृदि कृत्वाधिदैविकवादेन भेदं साधयितुं विषयवाक्यं व्याकरिष्यन्तः सिद्धमनूद्य तदवतारयन्ति * एवं सतीत्यादि * । * एवं सतीति * उक्तदोषपरिहारायोक्तरीत्या श्रुतीनां ब्रह्मपरत्वे सति । * इति श्रुतेरिति * आनन्दान्तरस्यैतदंशत्वादिति शेषः । * सामान्यत इति * सङ्क्षेपेण । विषयवाक्यप्रतीकं धृत्वा व्याकुर्वन्ति * ब्रह्मेत्यादि * । साधनशेषाद् ब्रह्मणः परस्यातिरिक्तत्वे गमकमाहुः * अत्रेत्यादि * तथा च शब्दान्तरेण निर्देश एव भेदगमक इत्यर्थः । एतेन निरवधिसत्यज्ञानात्मकत्वे सत्यक्षरादुत्कृष्टत्वमिति परस्य लक्षणमप्युक्तप्रायम् । तस्योत्कृष्टत्वमानन्दमीमांसोत्तरं, यतो वाच इति श्लोके गणनापरिच्छेदराहित्याद्वाङ्मनसगोचरानन्दरूपत्वेन सिद्धं भविष्यति । ननु सर्वं ब्रह्मेति वित् परं ब्रह्माप्नोतीत्यर्थोक्तौ न कोऽपि दोष इत्यत आहुः * किञ्चेत्यादि * । * असङ्गत इति * पुनरुक्तिदोषासङ्गतः । नन्वत्र व्याख्यानव्याख्येयभाव एव सङ्गतिरिति चेत् तत्राहुः * साधनेत्यादि * नच

अतः परं विशेषतस्तद्विवक्ष्यमाणानुभवैकगम्यं तत्स्वरूपं नान्यमानगम्यमिति ज्ञापयितुमन्यमुखेनाह । तदेषाभ्युक्तेति । अन्यथा सर्वार्थतत्त्वप्रतिपादिका श्रुतिरेवं कथं वदेत् । तदित्यव्ययम् । तथाच तत् पूर्वोक्तं ब्रह्मविदः परमाप्तिलक्षणमर्थं विशदतया प्रतिपाद्यत्वेनाभिमुखीकृत्योपगृह्य ऋगेषा विदितपरब्रह्मकैरुक्ता । पूर्ववाक्योक्तार्थस्य वैशद्यमनया क्रियत इत्यर्थः सम्पद्यते । तामेवाह । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । सोपपत्तिकमानन्दात्मकत्वमग्रे निरूपणीयमित्यधुना तदनिरूप्य सच्चिदंशौ देशकालापरिच्छिन्नत्वं चोक्तवती ।

शाब्दज्ञानवान् परं साक्षात्काररूपं ज्ञानमाप्नोतीत्युक्तौ न दोष इति वाच्यम् । प्रत्यक्षविरोधात् । नच साधनान्तरासमवधानाद्दोष इति वाच्यम् । तस्यात्रानभिप्रेतत्वात् । अनुपदेशेन तथावसायात् । यमेवैष इति श्रुत्या साक्षात्कारस्य वरणेतरसाधनानधीनत्वाच्च । साधनान्तरकल्पनायामपि पूर्वोक्तरीत्या परशब्दवैयर्थ्याच्च । अत उक्तविधस्यैवार्थस्यात्र सङ्क्षेपत उक्तिरेवात्रेति निश्चयः । एवं सामान्यत उक्तिं तथैव व्याख्याय विशेषतो व्याख्यातुं सामान्यविशेषभावे गमकाकाङ्क्षायां व्याख्यानव्याख्येयभाव एव गमक इत्याशयेनाहुः *अतः परमित्यादि * । * अन्यथेति * व्याख्यानत्वाभावे, परस्य तत्प्राप्तेश्चानुभवैकवेद्यत्वाभावे च । *एवमिति* अन्यमुखेन । * अव्ययमिति * हेतुपञ्चम्यन्तमव्ययम् । श्रुतिव्याख्यानगतं तत्पदं त्वर्थाध्याहृतमर्थविशेषणत्वाय वाऽव्ययमित्युक्तम् । तथाच सम्पूर्णा ऋक् फलांशविवरणार्थैवेति सम्पद्यत इत्यर्थः । तामित्यादिना ऋचं पठित्वा व्याकुर्वन्ति * सोपपत्तिकमित्यादि * । एवमग्रे फलनिरूपणावसरे निरूपणीयमित्यधुना साधननिरूपणावसरे सोपपत्तिकमनिरूप्य सत्यज्ञानपदाभ्यां सच्चिदंशावनन्तपदेन देशकालापरिच्छिन्नत्वं च ज्ञेयस्य ब्रह्मण. साधनशेषत्वायोक्तवतीत्यर्थः । एवं पूर्ववर्णकस्यास्य ज्ञेयांशे

अथवा, अक्षरब्रह्मण्यानन्दात्मकत्वे सत्यपि तस्य परिच्छिन्नत्वान्न परमफलत्वमत आनन्देऽपरिच्छिन्नत्वमेव परमफलतावच्छेदकमिति तद्धर्मपुरःसरं परमानन्द एवानन्तशब्देनोच्यतेऽत्र। सत्यं विज्ञानमानन्दं ब्रह्म, सच्चिदानन्दविग्रहमित्यादिश्रुतिषु त्रयाणामप्येकप्रक्रमपठितत्वाद् द्वितीयोक्तौ तन्नियतसहचरितत्वेनाऽनुक्तोऽप्यानन्दः प्राप्स्यत एवेत्याशयेन वाऽऽनन्दः स्फुटतया नोक्तः। अथ वेदनपदार्थमाह। यो वेदेत्यादिना। अत्रेदमाकूतम्। 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्' इति श्रुत्या वरणेतरसाधनाप्राप्यत्वमुच्यते।

कारणत्वमथानन्दांशमप्रवेश्येत्यस्य सङ्ग्रहाय तदाशयो विशदीकृतः। तेन ब्रह्मत्वे तुल्येऽपि क्षरस्य देशकालापरिच्छिन्नत्वाभावान्न विवक्षितफलसाधनशेषत्वम्। अक्षरस्य तु तदपरिच्छिन्नत्वात् तादृशसाधनशेषत्वमिति बीजं प्रकाशितम्।

अतः परं प्रस्तूयमानवर्णकरीत्या विवक्षितफलविवरणार्थमक्षानन्दांशप्रवेशं वक्तुमनन्तशब्दस्यार्थान्तरमाहुः * अथवेत्यादि *। * परिच्छिन्नत्वादिति * गणनया परिच्छिन्नत्वात्। एवमत्र वेद्यपदार्थो गणितागणितानन्दभेदेन द्वेधा विवृतः। अनन्तरूपमितिश्रुत्यन्तरादत्राप्यनन्तपदं रूपानन्त्यवाचकमेवास्तु। तथा सति नानन्तपदेन परमानन्दलाभ इत्याशङ्क्य पक्षान्तरमाहुः * सत्यं विज्ञानमित्यादि *। * अथेति * वेद्यनिरूपणोत्तरम्। नन्वेवं द्वेधा वेद्यव्याख्याने किं बीजमित्याकाङ्क्षायामाहुः * अत्रेत्यादि *। * इदमाकूतमिति * अत्र वेदनव्याख्यानांशे इदं वक्ष्यमाणं तात्पर्यम्। * वरणेतरसाधनाप्राप्यत्वमिति * अत्र प्रवचनपदं वेदे रूढम्। तदत्र वाच्यतासम्बन्धेन तदुक्तसाधनान्युपलक्षयति। मेधा धारणावती बुद्धिः सा च पुरुषनिष्ठस्वाभाविकसाधनानि श्रुतं चानुगतं तु साधनानि-

एवं सति श्रुतिद्वयविरोधपरिहारायाक्षरब्रह्मज्ञानेनाविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धत्वसम्पादनेन पुरुषोत्तमप्राप्तौ स्वरूपयोग्यता सम्पाद्यते । तादृशे जीवे स्वीयत्वेन वरणे भक्तिभावात् सहकारियोग्यतासम्पत्त्या पुरुषोत्तमप्राप्तिर्भवतीति निर्णीयते । तदेव गुहायां परमव्योमाविर्भावः । परो मीयते दृश्यतेऽनेनेति तथा । ज्ञानमार्गीयजीवज्ञेयप्रकारकाद्वैशिष्ट्येनापि तथा । परमव्योम्नोऽप्यलौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः ।

ति तथा । * एवं सतीति * व्याख्येये यजुषि वेदनप्राप्त्यर्थ उक्ते सति । * सहकारियोग्यतासम्पत्त्येति * सहकारियोग्यतयोः सम्पत्त्या । तथाच वरणाभावे ज्ञानमार्गरीत्या ज्ञानप्रधानतया ब्रह्मज्ञानं, वरणे तु भक्तिमार्गरीत्याऽऽनन्दप्रधानतया ब्रह्मज्ञानं, येन परप्राप्तिरिति वेद्यस्य द्विधाविर्भाव एव द्विधा व्याख्याने बीजमित्यर्थः । अस्या ऋच एवं निर्णायकत्वे गमकमाहुः । * तदेवेत्यादि * । * कृत इत्यन्तम् * । तथाच श्रुत्यन्तरे वेद्यनिरूपणे हार्दाकाशविशेषणत्वेन परमादिपदाभावोऽत्र तु तत्सद्भाव इत्येव गमकमित्यर्थः । यत आकारायुधादिलिङ्गानां व्यूहेष्ववतारेषु च सत्त्वात् पुरुषोत्तमत्वं तैर्निश्चेतुमशक्यम् । अक्षरस्थितत्वज्ञाने तु निश्चेतुं शक्यमतोऽक्षरात्मकत्वव्योम्नः परमत्वम्, अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिं, यं प्राप्य न निवर्तन्ते तद्धाम परमं ममेति गीतावाक्यस्वारस्यात् । तस्य परमव्योमत्वं तु, ऋचो अक्षरे परमे व्योमन्, यदक्षरे परमे व्योमन्नित्यादिश्रुतिभ्योऽवगन्तव्यम् । नचाव्यक्तपदादक्षरपदं प्रकृतिवाचकमिति शङ्क्यम् । यं प्राप्य न निवर्तन्त इति मुक्तिस्थानत्वरूपलिङ्गविरोधात् । प्रकृतिं प्राप्तानां तु पुराणे प्रकृतिचिन्तकानधिकृत्य, पूर्णं शतसहस्रं तु तिष्ठन्ति विगतज्वरा इति वाक्येन तदुत्तरं पुनरावृत्तिबोधनात् । द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव चेति पुरुषत्वोक्तिविरोधात् । अव्यक्तत्वं त्वक्षरीयमेव प्राथमिककार्यत्वात् प्रकृतिगामि भवति । आकाशजन्ये वायौ नीरूप-

भक्त्याऽहमेकया ग्राह्यो, नाहं वेदैरित्युपक्रम्य, भक्त्या त्वनन्यया शक्य इत्यादिस्मृतिरप्येवमेव सङ्गच्छते । अन्यथा ज्ञानमार्गिणामपि ब्रह्मविदां परमाप्तिः स्यान्न त्वेवम् । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने । तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह' इत्यादिवाक्यैः । एतदेवाह । गुहायां हृदयाकाशे यदाविर्भूतं परमं व्योमाक्षरात्मकं व्यापि वैकुण्ठं, तस्य पुरुषोत्तमगृहरूपत्वात् तत्र निहितं स्थापितमिव वर्तमानं यो वेद स भक्तो ब्रह्मणा नित्याविकृतरूपेण विपश्चिता, विविधं पश्यच्चित्त्वं हि विपश्चित्त्वम् । पृषोदरादित्वात् पश्यच्छब्दावयवस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दः । तेन विविधभोगचतुरेण सह सर्वान् कामानश्नुत इत्यर्थः । एतेन परमाप्तिपदार्थ उक्तो भवति । शुद्धपुष्टिमार्गीयत्वादस्य भक्तस्य स्वातन्त्र्यं भोग उच्यते । सहभावोक्त्या ब्रह्मणो गौणत्वम् । अत एव भक्ताधीनत्वं भगवतः स्मृतिष्वप्युच्य-

---

त्ववत् । न तु तत्प्रकृत्यसाधारणम् । अतोऽक्षराधिष्ठातृत्वं पुरुषोत्तमाऽसाधारणमित्यक्षरस्यैव तद्गमकत्वमिति हृदयम् । ननु वरणपदार्थो लक्षणया ज्ञापनात्मको ग्राह्यो, न तु रूढोऽङ्गीकारात्मक इति नात्र भक्तिनिवेशे किञ्चिद् बीजं पश्याम इत्याशङ्कायां स्वोक्तमुपपादयन्ति * भक्त्येत्यादि * । * एवमेवेति * वरणपदस्याङ्गीकारपरत्व एव । विपक्षे बाधकं तर्कमाहुः * अन्यथेत्यादि * । * न त्वेवमिति * न ज्ञानमार्गिणां विवक्षितलक्षणा परमाप्तिः । एवम् ऋचो निर्णायकत्वमुपपाद्यैवंप्रकारकज्ञानस्य फलनान्तरीयकत्वादुत्तरार्द्धं सर्वमेव व्याकुर्वन्ति । * एतदेवाहेत्यादिना * । * एतेनेति * ऋगुत्तरार्द्धेन । एतमर्थं स्मृत्योपपादयन्ति * अत एवेत्यादि * । नचास्य नवमस्कन्धीयवचनस्य सात्त्विकांश-

ते । अहं भक्तपराधीनः, वशे कुर्वन्ति मां भक्त्येत्यादिवाक्यैः ।

यद्यप्यश भोजन इति धातोरश्नातीत्येवं रूपं भवत्यशूङ् व्याप्ताविति धातोर्भवत्यश्नुत इति रूपं, विकरणभेदात् पदभेदाच्च । तथाप्यत्राश भोजन इति धातोरेव प्रयोग इति ज्ञायते। तथाहि। अत्राशनक्रियायां ब्रह्मणा सहभाव उच्यते । तथाच व्याप्त्यर्थकत्वे ब्रह्मणा सह भूतान् कामान् व्याप्नोतीत्यर्थो भवत्यथवा ब्रह्मणा सह भूतः स जीवः कामान् व्याप्नोतीति । एतौ त्वनुपपन्नौ । न हि कामवज्जीवकर्तृकव्यापनक्रियाकर्मत्वं ब्रह्मणि सम्भवत्यतिमहत्त्वात् । व्यापनं चात्र स्वाधीनीकरणमेव वाच्यम् । न हि कामानां तथात्व स्वतः पुरुषार्थरूपम् । भोगशेषत्वात् तेषाम् । पूर्वोक्तपरमाप्तिव्याकृतिरूपत्वाच्चास्य तथार्थोऽनुपपन्नः ।

भूतविष्णुवाक्यत्वेन पुरुषोत्तमवाक्यत्वाभावान्नोक्तार्थोपष्टम्भकत्वमिति शङ्क्यम् । तस्य भिन्नत्वेऽपि मूलपुरुषरूपनामलीलासाम्येनादोषात् । पराशरपुराणे 'वैष्णवानि पुराणानि समस्तानि महामुने । त्रिमूर्तीनां हरेर्नाम्ना मूर्त्या तस्य परं पदम् । प्रवदन्ति' इति साम्यस्मरणादिति । उक्तेऽर्थेऽनुपपत्तिमुद्भाव्य परिहरन्ति * यद्यपीत्यादि * । व्युत्पादयन्ति * तथाहीत्यादि * । विपक्षोद्भावितयोरर्थयोराद्यं दूषयन्ति * न हीत्यादि * । * कामवदिति * सप्तम्यर्थे वतिः । * अतिमहत्त्वादिति * 'एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् । सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मन' इतिवाक्यादित्यर्थः । द्वितीयं दूषयन्ति * व्यापनं चेत्यादि * संयोगरूपव्यापनस्यापुरुषार्थत्वाद् व्यापकात्मवादिमते तस्य स्वतः सिद्धत्वाच्च तद्विधानासङ्गत्यात्तेरत्र कामस्वाधीनीकरणरूपं तद् वाच्यम् । तेन कामप्राप्तिरेव व्याकृता भवति, न परप्राप्तिरिति सोऽर्थोऽनुपपन्न इत्यर्थः । एतेनैव, ब्रह्मणा करणभूतेन सर्वान् कामान् सहाऽश्नुते युगपद् भुङ्क्त इति योजनासिद्धोऽर्थोऽपि निरस्तो बोध्यः ।

तेन अश भोजन इति धातोरेवायं प्रयोगोऽर्थस्यालौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः । व्यत्ययो बहुलमिति सूत्रेण छन्दसि तद्विधानात्, *नाप्रत्ययपरस्मैपदयोर्व्यत्ययेन श्नुप्रत्ययात्मनेपदे जाते इति भोगार्थक एवायं धातुः । एवमेव, न तदश्नोति कश्चन, न तदश्नोति कश्चनेत्यत्र प्रत्ययमात्रव्यत्ययेन प्रयोगोऽशधातोरेवेति ज्ञेयम् । अन्यथा सर्वव्यापकस्य ब्रह्मणस्तन्निषेधोऽनुपपन्नः स्यात् ।

ननु सकामोऽत्रोऽपासकस्तदुपास्यं च सगुणं ब्रह्म । द्वयोरपि कामोपभोगश्रवणात् । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिनाऽन्यदर्शनादिनिषेधाद् ब्रह्मविदः कामोपभोगासम्भवश्चेति चेन्मैवम् । तदेषाभ्युक्तेति वाक्येन पूर्ववाक्योक्तार्थनिरूपिकेयमृगित्युक्तत्वेन प्राकृतगुणसम्बन्धस्य तत्र वक्तुमशक्यत्वात् । तथा सति ब्रह्मवित्प्राप्यत्वपरत्वयोरसम्भवापत्तेः । नच वेद्यस्यागुणत्वमुत्तरस्य सगुणत्वमिति वाच्यम् । परत्वानुपपत्तेः ।

भोगस्य सुखसाक्षात्कारातिरिक्तोदासीनज्ञानात्मकोऽर्थस्तु पूर्वमेव निरस्त,* स चासङ्गत इत्यादिना । तेनोक्तैव योजना । अयमेव चार्थ इति निश्चयः । सिद्धमाहुः * तेनेत्यादि * । जाते इति प्रथमाद्विवचनम् । श्रुत्यन्तरेऽप्ययमेवार्थ इत्याहुः * एवमित्यादि * तथाच तत्प्राप्यस्थूलादिलक्षणं ब्रह्म कमपि न भुङ्क्ते, कोऽपि ब्रह्म न भुङ्क्त इत्येवार्थो वक्तव्यः । सकलप्रापञ्चिकधर्मनिषेधे प्रापञ्चिकभोगनिषेधकथनस्यापि युक्तत्वादित्यर्थः । एवं परप्राप्तिपदार्थे भोगरूपे व्याख्याते भोगलिङ्गात् परस्य सोपाधिकत्वं, ब्रह्मवित्पदस्य सकामोपासकपरत्वं चापाद्य चोदयति * ननु सकाम इत्यादि * तथाच वृथा पूर्वोक्ता चिन्तेति चोद्याशयः । तत्र समादधते * मैवमित्यादि* । तत्र हेतुमाहुः * तदेषेत्यादि * दर्शन इत्यन्तम् * । एवं पूर्वदूषणं परिहृत्य

साधनशेषभूतस्यागुणत्वं तत्फलस्य सगुणत्वमित्यसङ्गततरं च । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता इति श्रीभागवतवाक्येन गुणातीतपुंसां वैकुण्ठदर्शनाधिकार उच्यते यत्र तत्र किमुवाच्यं तत्परदर्शने ।

यच्चोक्तं ब्रह्मविदो द्वैतदर्शनानुपपत्त्या कामभोगासम्भव इति । तत्राप्युच्यते । यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतिरखण्डब्रह्माद्वैतभाने ब्रह्मविदः प्रापञ्चिकभेदादर्शनं वदति, न तु प्रपञ्चातीतार्थदर्शनं बोधयति निषेधति वा । पुरुषोत्तमस्वरूपं तु यावत्स्वधर्मविशिष्टं प्रपञ्चातीतमेवेति तद्दर्शनादौ किमायातम् । पुरुष एवेदꣳ सर्वं यद् भूतं यच्च भाव्यमित्यनेन ब्रह्मात्मकत्वं प्रपञ्चस्योक्त्वैतदपि तस्य विभूतिरूपं पुरुषस्त्वितो महानित्याह, एतावानस्य महिमा अतो ज्यायांश्च पूरुष इति श्रुतिरतो न किञ्चिदनुपपन्नम् । एवं सति ब्रह्मविदः परप्राप्तेः पूर्वदशा तत् केनेत्यादिनोच्यते, उत्तरदशा तु सोऽश्नुत इत्यनेनोच्यत इति सर्वं सुस्थम् । छान्दोग्येऽपि, यत्र नान्यत् पश्यतीत्यादिना भूमस्वरूपमुक्त्वा, आत्मैवेदꣳ सर्वमित्यन्तेन तद्विभावमुक्त्वोच्यते । स

द्वितीयं परिहर्तुमनुवदन्ति *यच्चेत्यादि* । समादधते * तत्रापीत्यादि * । * किमायातमिति * श्रुत्यविरोधात् किं दूषणमायातं, न किमपीत्यर्थः । ननु धर्मविशिष्टस्य पुरुषोत्तमस्य प्रपञ्चातीतत्वे किं मानमित्याकाङ्क्षायां तदुपपादयन्ति * पुरुष एवेत्यादि * तथाचोक्तश्रुत्या प्रपञ्चाज्ज्यायस्त्वकथनेन तदतीतत्वमेव बोध्यतेऽतस्तथेत्यर्थः । एवं चोद्यनिराकरणेन पूर्वोक्तचिन्तायाः सार्थकत्वाय सिद्धमाहुः । * एवं सतीत्यादि * । ननु शाखाभेदेन पूर्वोत्तरदशावैपरीत्यस्यापि शक्यवचनत्वान्नेदं सुस्थमिति शङ्कायामाहुः *छान्दोग्येऽपीत्यादि* । * तद्विभावमिति * उत्तरदशारूपसर्वात्मभावस्योद्दीपकमखण्डब्रह्मभानरूपं विभावम् । तथाचात्राऽखण्डब्रह्मभानात्मरतिक्रीडादीनां पू-

वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति सर्वेषु लोकेषु कामचारो भवतीति । एतच्च, लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपीत्यधिकरणे प्रपञ्चयिष्यते ।

अथवा तदेषाऽभ्युक्तेति वाक्येन पूर्ववाक्योक्तब्रह्मनिरूपिकैयमृगित्युच्यते । तत्र साधनफले निरूपिते इति ऋच्यपि ते एव निरूप्येते । तथाहि । आनन्दस्य फलात्मकत्वेन साधनशेषभूते ब्रह्मणि तमनुक्त्वा, यो वेदेत्यन्तयर्चा, ब्रह्मविदित्येतावतो वाक्यस्य विवरणं क्रियते । एतेन फलाप्तौ स्वरूपयोग्यतासम्पत्तिरुक्ता । तत उक्तरीत्या भगवद्वरणेन भक्तिलाभे गुहायामाविर्भूतं यत् परमं व्योम, तस्मिन्निहितः पुरुषोत्तम एवेति । तं निहितमिति तृतीयार्थे द्वितीया । तथाच तत्र निहितेन ब्रह्मणेत्यग्रे पूर्ववत् ।

र्थोत्तरभावस्य स्पष्टत्वान्न पूर्वोक्तस्य मुख्यत्वाभावः शङ्कितुं शक्य इत्यर्थः । नन्वेवं चेच्छान्दोग्यवाक्येऽपि सम्यग् व्युत्पाद्यमित्यत आहुः । * एतच्चेत्यादि * । * एतदिति * छान्दोग्यवाक्यम ।

एवमनेन ग्रन्थेन श्रुतौ मुख्यतया फलमेव निरूप्यत इत्युपगम्य श्रुतिर्व्याख्याता । व्याख्येयवाक्ये ज्ञानस्य ज्ञातृविशेषणतया प्रवेशनाऽमुख्यत्वात् । तथापि तद्व्याख्यानभूतायामृचि साधनस्य पृथङ्निरूपणाद् व्याख्यानस्य विशेषप्रतिपत्तिहेतुत्वात् तामनुसृत्य पूर्वोक्तमर्थं द्रढयितुं पूर्ववर्णकोक्तव्याख्यानमेवानुसरन्तः पक्षान्तरमाहुः * अथवेत्यादि * । * पूर्ववदित्यन्तम् । एवञ्चोक्तरीत्येत्यस्य ब्रह्मणेत्यादिनाऽन्वयः । तथाच ब्रह्मणा सह तदात्मकानेव कामानश्नुत इत्यर्थः । यत्तु, न ह्यन्यज्ञानेनान्यप्राप्तिर्भवतीति परैर्दूषणमुक्तम् । तदसङ्गतम् । य एवं वेदप्रतितिष्ठतीत्यादिश्रुतिविरोधात् । यच्च परिच्छिन्नत्वेऽन्यत्वे च प्राप्तिर्नापरिच्छिन्नत्वेऽनन्यत्व इति । तदपि तथा । इच्छयाऽऽविर्भावतिरोभावाभ्यामेवोपपत्तेः । अनन्यत्वं तु सुवर्णशकल्या-

अथ परमफलत्वान्निरवध्यानन्दात्मकत्वमन्तरङ्गेभ्योऽप्यन्तरङ्गत्वं स्वस्मिन् ज्ञापयितुं सर्वस्य सर्वरूपत्वेन सर्वाधिदैविकरूपत्वमपि ज्ञापयितुमाधिभौतिकादिरूपेणाविर्भवितुं भगवानाकाशादिरूपेणाविर्भूतोऽत एव भवन आकाशस्यैव कर्तृत्वमुच्यते ।

अग्रेऽन्नमयादीनि चत्वारि रूपाणि पूर्वं निरूपितान्युत्तरोत्तरमन्तरङ्गभूतानि । अन्नरसमयशरीरभूतात् प्राणमयस्तस्मान्मनोमयस्तस्माद् विज्ञानमयः ।

कश्चित्त्वेतानि रूपाणि विकारात्मकत्वात् प्राकृतान्येवैतेभ्योऽप्यन्तरङ्गो विमुक्ताविद्यो जीव एवानन्दमय उच्यत इत्याह । स प्रतिवक्तव्यः ।

येन ब्रह्मणः सकाशाज्जीवस्य, न तु जीवस्य सकाशाद् ब्रह्मण इति तस्यापि प्राप्तिप्रतिबन्धकत्वाभावादिति । तेन ज्ञानमपीच्छयैवेति न कोऽपि दोषः । एवमुक्ततात्पर्यमुक्त्वाऽऽधिदैविकवादमाश्रित्य सृष्ट्यादिनिरूपकग्रन्थस्य तात्पर्यमुपयोगं चाहुः । *अथेत्यादिना* । *सर्वस्य सर्वरूपत्वेनेत्यादि* प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमिति श्रुत्यनुसारेणात्राप्यन्नमयस्यान्नमय. प्राणमयस्य प्राणमय इत्येवमानन्दमयमात्मा मे शुद्ध्यन्तामिति तैत्तिरीयश्रुत्यन्तरे शोध्यत्वज्ञापनेन, आनन्दमानन्दमयोऽवसान इति स्मृतौ च क्रममुक्तिप्रकरणेन कारणशरीरनिविष्टविमुक्ताविद्यजीवयोरानन्दमयत्वकथनात् तयोरपि य आधिदैविकस्तमानन्दमयमत्र ज्ञापयितुमित्यर्थः । * कर्तृत्वमुच्यत इति * तेनात्र नाकाशादीनां प्राकृतत्वं, किन्तु विभूतिरूपत्वमेवेत्यर्थः ।

अत्यन्तरङ्गत्वं विशदयन्ति । * अग्र इत्यादि * अन्योऽन्तर आत्मेति सर्वत्र कथनात् तथेत्यर्थः । अत्र मायावादी मयटो विकारार्थकत्वमङ्गीकृत्य सूत्राण्यन्यथा नीत्वा आनन्दमयमपि जीवं मन्यते । तन्मतमनूद्य परिहरन्ति * कश्चिदित्यादि * । * स प्रतिवक्तव्य इत्यादि * । तत्र मयटः सन्दिग्धार्थकत्वाद् निर्णायकत्वेन श्रुत्यन्तरादेव निर्णय उचित इत्याशयेना-

अग्निममपाठके भृगुणा अधीहि भगवो ब्रह्मेति पृष्टो वरुणस्तत्रोत्तमाधिकाराभावात् स्वयं ब्रह्मस्वरूपमनुक्त्वा, तपसाऽधिकारातिशयक्रमेण स्वयमेव ज्ञास्यतीति तदेव साधनं सर्वत्रोपदिष्टवान् । तपसा ब्रह्म विजिज्ञासस्वेति । ब्रह्मातिरिक्तेन साधनेन न तज्ज्ञातुं शक्यमिति ज्ञापनाय, तपो ब्रह्मेति सर्वत्रोक्तवान् । तथाच तपसा साधनेन ब्रह्मत्वेन ज्ञातानि रूपाणि प्राकृतानीति विचारकेण न वक्तुं शक्यमिति । तर्हि पुनर्ब्रह्मविषयकप्रश्नसाधनोपदेशनत्करणपूर्वातिरिक्तब्रह्मज्ञानानां परम्परा नोपपद्यते इति चेत् । मैवम् । भगवतो हि विभूतिरूपाण्यनन्तानि । तत्र येन रूपेण यत्कार्यं करोति तेन रूपेण समर्थोऽपि तदतिरिक्तं न करोति । तथैव तल्लीलापतः ।

तथाचान्नमयादिरूपैः क्षुद्राण्येव फलानि ददाति । हीनाधिकारिणां तावतैवाकाङ्क्षानिवृत्तिर्भवति । एवं सति यादृशेनाधिकारेणान्नमयस्वरूपज्ञानं भवति तादृशे तस्मिन् सम्पन्ने तज्ज्ञानमपि तथा । एवमेवोत्तरत्रापि । तथाचाकाशादिरूपमाधिभौतिकस्वरूपमुक्त्वाऽऽध्यात्मिकं तत् पुरुषरूपं वदन्ती पक्षिरू-

---

द्धुः * अग्निमेत्यादि * । * तर्हीति * तेषां ब्रह्मरूपत्वे । *यन इति * सोऽकामयत, बहुस्यां प्रजायेय, तस्मादेकाकी न रमते, स हैतावानास इत्यादिष्वेकस्यैव बहुत्वोच्चनीचभावलीलानामुक्तत्वादित्यर्थः ।

* तज्ज्ञानमपि तथेति * । तज्ज्ञानमपि तदुक्तफलदमित्यर्थः । एवं विभूतिरूपज्ञानफलमुक्त्वाऽऽनन्दमयस्याधिदैविकत्वं बोधयितुं पूर्वोक्तं स्मारयन्ति * तथाचेत्यादि * । आकाशादिरूपमाधिभौतिकं स्वरूपं तस्माद्वेत्यारभ्यान्नात् पुरुष इत्यन्तेनोक्त्वा आध्यात्मिकमन्नमयादिपुरुषरूपं वदन्ती श्रुतिस्तस्येदमेव शिर इत्यादिना पक्षिरूपमा-

पमाह । यतस्तेनैव रूपेणाधिभौतिके रूपे आध्यात्मिकस्य पुरुषस्य प्रवेशः । तदुक्तं वाजसनेयिशाखायाम् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः, पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति । वस्तुतस्तु पुरुष एव । परन्तु पुरः सम्बन्धी सन् पक्षी भूत्वा पुरः शरीराण्याविशदित्यर्थः । प्राकृतीषु विविधासु पूर्वप्राकृतस्यैकविधस्य प्रवेशोऽनुचितो यद्यपि तथापि स्वप्रवेशं विना न किञ्चिद् भावीति गतिप्रतिबन्धकमुल्लङ्घ्यालौकिकया गत्या प्रविशामीति ज्ञापनाय पक्षिभवनम् । स हि तादृशः । अत एव द्विपदश्चतुष्पद इति ।

आधिदैविक एक एवेति यः पूर्वस्येति सर्वत्रोक्तम् ।

नन्वानन्दमयेऽप्येवमुक्तेर्नायमपि परमकाष्ठापन्नरूपः, किन्तु

इत्यर्थः । ननु तस्येदमेवेतीदमा प्रत्यक्षविषयस्यैव शिर आदेः परामर्शात् प्रत्यक्षविषयस्यैव पक्षित्वं कल्पनयोपदिश्यत इति नात्राध्यात्मिकपुरुषोपदेश इति शङ्कायां तद्बोधनार्थं स्वोक्ते हेतुमाहुः * यत इत्यादि * तथाच पक्षिरूपस्यातिरिक्तत्वाङ्गीकारे पक्षादिपदेषु लक्षणाभावादयमेव पक्षो ज्यायानित्यतस्तथेत्यर्थः । ननु तथापीदम्पदे लक्षणा गौरवं चाधिकमतो नेदं साधीय इत्यतः स्वोक्तमुपष्टम्भन्ति * तदुक्तमित्यादि* तथाचातिरिक्तस्य श्रुत्युक्तत्वात् तेनेदम्पदलक्षणाया अप्युपष्टम्भादयमेव पक्षो ज्यायानित्यर्थः । *एकविधस्येति* अन्नमयेऽन्नमयरूपस्येत्येवमित्यर्थः । * स हि तादृश इति * पक्षी यतो गतिप्रतिबन्धकोल्लङ्घनेनेष्टदेशप्रवेशसमर्थ इत्यर्थः । प्रतिबन्धकज्ञापकमाहुः * अत एवेत्यादि * तथाच पुरां विशेषणबलात् तथाऽवसीयत इति नात्र कल्पनालेशोऽपीत्यर्थः । नन्वेवं पक्षिरूपस्यान्नमयादिषु पञ्चस्वपि सत्त्वादानन्दमये को विशेष इत्याकाङ्क्षायामाहुः * आधिदैविक इत्यादि* । एवमत्र श्रुत्यर्थे निर्णीते यः पूर्वपक्षोऽधिकरणावतारणायोत्तिष्ठति तमाहुः * नन्वित्यादि * तथाच योग्यत्वात् प्रायपाठाच्चानन्दरूपत्वमवयवानामुच्यते, न तु परमात्मत्वादित्यर्थः । परमात्म-

पूर्वोक्तेभ्योऽतिशयितधर्मत्वात् विभूतिरूप एव । नच शिरआदीनामान्दरूपत्वेनैवोक्तेरयं परमात्मैवेति वाच्यम् । अन्नमये यथाऽवयवानां तद्रूपत्वं तथाऽऽनन्दमयेऽपि तेषां तद्रूपत्वादन्यथा तस्यैष एव शारीर आत्मेति न वदेत् । शरीरं हि पूर्वोक्तं, तत्सम्बन्धी हि शारीरस्तद्भिन्नः प्रतीयते । तथाच परब्रह्मत्वं स्वान्यात्मवत्त्वं च सर्वश्रुतिविरुद्धम् । नन्वेतदतिरिक्तं चेद् ब्रह्म स्यात् तदानन्दमयादन्योऽन्तर आत्मा ब्रह्मेत्यपि वदेत् । नत्वेवमतोऽयं पर एवेति चेन्न । आध्यात्मिकरूपाणामेवात्र निरूपणात् तेषां च पञ्चरूपत्वात् तावतामेव निरूपणमतोऽस्मादन्य एव पर इति प्राप्ते प्रतिवदति ॥ आनन्दमयोऽभ्यासात् ॥ आनन्दमयशब्दवाच्यः पर एव । कुतः । अभ्यासात् । तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यन्नमयादिषु सर्वत्रैवात्मत्वेनानन्दमयस्यैव कथनात् ।

ननु न किञ्चिन्मानमत्र पश्यामः । किञ्च । आनन्दमयस्यैव सर्वत्रात्मत्वेन कथने आनन्दमयेऽपि, तस्यैष एवेत्यादि न वदेदयमेव पूर्वस्यात्मेति वदेदतो नानन्दमयः पर इति चेत् ।

त्वाभावे गमकमाह * अन्यथेत्यादि * । * पूर्वोक्तमिते * आनन्दमयम् । शेषं निगदव्याख्यातम् । एवञ्च मयटो विकारार्थत्वानङ्गीकारेऽप्यन्नमयादीनामिवानन्दमयस्याऽऽध्यात्मिकविभूतिरूपत्वापरब्रह्मत्व प्रायपाठबलादङ्गीकर्तव्यं, न तु परब्रह्मत्वमिति पूर्वपक्षाशयः । अत्र सूत्रमुपन्यस्य समादधते * आनन्दमयोऽभ्यासादिति * । *तस्येत्यादि* नथाच वाक्याभ्यासात् तथेत्यर्थः । अयं प्रकारो गुणोपसंहारपादे, आत्मगृहीतिकार्याख्यानाधिकरणाभ्यां पुनः स्फुटीकर्तव्यः । अत्र चोदयति । * नन्वित्यादि * । * अत्रेति * उक्तवाक्येष्वानन्दमयग्रहणे । साधकतर्काभावमुक्त्वा बाधकतर्कमाह *किञ्चेत्यादि । *

उच्यते । न हीश्वरादन्यः सर्वेषामेक आत्मा भवितुमर्हति । तस्यानन्दरूपत्वं त्वेतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । रसो वै सः रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् । कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयातीत्यादिश्रुतिभिर्निर्णीयते । एवं सति तदेकवा-

---

अनयोर्दूषणयोः पूर्वं निरस्यन्ति । * न हीत्यादि, मन्तव्यमित्यन्तम् * । तथाच सर्वेभ्योऽन्तरात्मत्वमानन्दमयस्य निरूपयिष्यन्त्या यत्, तस्यैष एव शारीर आत्मा यः पूर्वस्येति प्राणमयाद्यानन्दमयान्तस्य, एष एव शारीर आत्मा य पूर्वस्यान्नमयस्येत्यन्नमयसम्बन्धिन आत्मनः सर्वसम्बन्ध्यात्मत्वमभ्यस्तम् । अन्नमयाभिमानी तु पूर्वं नोपक्रान्तः, किन्तु जगत्कर्त्तैवोपक्रान्तस्तत्रापि सृष्टिकथनेन तदेतच्छब्दाभ्यां सन्निहितं विपश्चिद् ब्रह्मैव परामृश्यत इति तदेव पञ्चानामात्मेति बोध्यते । अत आत्मपदघटितवाक्याभ्यासस्तस्य सर्वात्मत्वं सर्वान्तराऽऽत्मत्वं वा बोधयँस्तत्र निरङ्कुशमीश्वरत्वं निगमयति । एतस्यैवानन्दस्यैवेति * श्रुत्यन्तरञ्चानन्दप्राचुर्यम् । तच्च निरवधिसम्विदंशापेक्षयेति प्रकृतत्वात् सिद्ध्यति । तथा रसो वै स इत्यादिश्रुत्यन्तरं चानन्दरूपताम् । एवं सर्वश्रुत्येकवाक्यत्वेऽभ्यस्यमानवाक्यगतस्यैष इत्ययमेतच्छब्दः पूर्वोक्तमात्मानं परामृशन्नेतादृशं त सर्वत्र ग्राहयतीति पूर्वोक्तश्रुत्येकवाक्यतापन्नस्यास्यैव मानत्वान्न मानाभाव इत्यर्थः । एतेनैव बाधकतर्कोऽपि निरस्त एव । शारीरपदन्तु शरीरसम्बन्धिमात्रबोधकं, न त्वभिमानित्वबोधकम् । किञ्चाभिमानित्वपक्षेऽपि नाभिमानित्वं दोषः । सर्वात्मकत्वात् । अन्यस्यान्यस्मिन्नभिमानस्यैवाध्यासरूपत्वेन दोषत्वात् । अत एव पुरुषविधब्राह्मणे, ब्रह्म वा इदमग्र आसीदित्युपक्रान्तस्यात्मनो ब्रह्मत्वं निगमयित्वा तदात्मानमेवावेदहं ब्रह्मास्मीत्युच्यते । नच तस्यैष इति षष्ठ्या भेदनिर्देशान्नात्र तथेति वाच्यम् । राहोः शिर इति वदभेदेऽपि षष्ठीदर्शनात् । नन्वस्त्वेवं, तथाप्यानन्दमय एतत्कथनस्य किं प्रयोजनमित्य-

रूपतायै प्रकृतोऽप्यानन्दमयशब्दस्तद्वाच्येवेति मन्तव्यम् । अन्यथाऽऽनन्दमयादन्योऽन्तर आत्मेत्येव वदेत् ।

ननूक्तमाध्यात्मिकानामेवात्र निरूपणादित्यादीति चेन्न । उक्तरीत्याऽऽधिदैविकस्यैवान्ते निरूपणात् । अत एव भार्गव्यां विद्यायामपि भृगोरन्नमयादिज्ञानानन्तरमपि पुनर्ब्रह्मजिज्ञासोक्ता, न त्वानन्दमयज्ञाने । न हि भृगोराध्यात्मिकज्ञानार्थं प्रवृत्तिः, किन्तु ब्रह्मज्ञानार्थमेव । अधीहि भगवो ब्रह्मेति प्रश्नवचनात् ।

किञ्च, ब्रह्मविदाप्नोति परमित्युपक्रमादन्ते ज्ञेयानन्दगणनामुक्त्वा, स यश्चायं पुरुषे यश्चासावादित्ये स एक इति वाक्यैर्ब्रह्मविदि पुरुष आदित्ये च तदेवाक्षरं ब्रह्म प्रतिष्ठितमिति सदानन्दोऽपि तथैवेति तयोरानन्दयोरैक्यम् । एवं रूपं ब्रह्मेति यो वेद तस्य क्रमेणान्नमयादिप्राप्तिमुक्त्वा अन्ते वदत्येतमानन्दमयमात्मानमुपसंक्रामतीति । एवं सत्युपक्रमे परमाप्तेः फलत्वेनोक्तेरुपसंहारेऽपि तथैव भवितव्यत्वादानन्दमयप्राप्तेरेवान्ते फलत्वेनोक्तेस्तदुत्तरमन्यस्यानुक्तेरानन्दमय एव परः ।

शङ्का तु, शरीरप्रवेशप्रयोजनेत्यादिनाऽनुपदमेव निवारणीया। तस्मान्न कोऽपि दोष। उक्तसाधनाय विपक्षबाधनाय च तर्कमाहुः *अन्यथेत्यादि * । अत्र चोदयति * नन्वित्यादि * । तत्र समादधते *नेत्यादि * । *उक्तरीत्येति * सर्वात्मत्वादेरन्यत्रासम्भवेन । एतमेवार्थं श्रुत्यन्तरेणोपष्टम्भन्ति * अत एवेत्यादि * ननु भृगोर्ब्रह्मज्ञानार्थं प्रवृत्तिरिति सत्यं, परन्तु तत्रानन्दत्वेन ब्रह्मज्ञानाज्जिज्ञासोपरतिर्न त्वानन्दमयत्वेन ज्ञानात् । अतो नानया श्रुत्या तदुपष्टम्भ इत्याकाङ्क्षायां प्रकृतप्रपाठकोपक्रमादिविचारेणापि तमर्थं साधयन्ति * किञ्चेत्यादि * । * पर इत्यन्तम् * । तथाचास्य प्रपाठकस्य, ब्रह्मविदाप्नोति परमिति

ननूपसंक्रमणं ह्यतिक्रमणमतो न तथेति चेत् । हन्तैवमतिक्रान्तशब्दार्था त्वन्मतिर्भाति । यतः संक्रमणशब्दः प्राप्त्यर्थकः सर्वत्र श्रूयते । अत एव रवेर्मकरादिराशिप्राप्तौ तत्तत्संक्रमणमित्युच्यते । नचेयं न परममुक्तिः । अस्माल्लोकात् प्रेत्येति पूर्वमुक्तेः । अत एव पुरुषोत्तमानन्दानुभवे सत्यनुभवैकगम्योऽयमान-

---

सूत्रितार्थविवरणरूपत्वात् फलविवरणमेवानन्दमये प्रपाठकस्य तात्पर्यं नियमयत् तस्य ब्रह्मत्वं गमयति । एवं भृगुप्रपाठके यद्यपि जिज्ञासोपरतिस्थले आनन्दमयपदाभावस्तथापि समाप्तावेतमानन्दमयमात्मानमुपसंक्रम्य एतत् साम गायन्नास्त इति फलकथनेन द्वयोरपि प्रपाठकयोरैकार्थ्यावगमात् तस्याप्युपष्टम्भकत्वमव्याहतमित्यर्थः । अत्र वादी परमफलत्वाभावमाशङ्कते * नन्वित्यादि * संक्रमः प्रतिसंक्रम इति पुराणप्रयोगात् तथेत्यर्थः । समादधते * हन्तेत्यादि * । * उच्यत इति * कार्मुकं तु परित्यज्य झषं संक्रमते रविरित्यादिवाक्येपूच्यते । ननु संक्रम एव प्राप्तिर्नतूपसंक्रमोऽपीति चेत् तथाप्युपोपसर्गेणातिक्रमोऽर्थः कथं लब्धव्यः । तर्हि किमर्थोऽयमुपसंक्रम इति चेत् । भेदेन स्थित्वा भोगार्थ इत्यवधेहि । श्रुचि तथैव सिद्धत्वेन तदुपपादकग्रन्थे ऽपि तथैव सिद्धेरावश्यकत्वादिति । नन्वेवं भेदे सति नेयं परममुक्तिः, किन्तु जीवन्मुक्तिरेवेयमिति चेत्तत्राहुः * नचेत्यादि * तथाचैतच्छरीरत्यागकथनेनात्र जीवन्मुक्तेरशक्यवचनत्वात् परममुक्तिरेवात्रोच्यत इत्यर्थः । तर्हि देहान्तरे सिद्धिरेवास्तु । परममुक्तौ साधकस्य भेदस्योक्तत्वादिति चेन्न । तथा सति करणग्रामसद्भावात् प्राणमयादिसत्त्वेन पुनस्तत्संक्रमोक्तिविरोधापत्ते । तस्मादत्र परममुक्तिरेव विवक्षित इति हृदिकृत्यैतस्याः परममुक्तित्वसाधकं हेत्वन्तरमाहुः * अत एवेत्यादि * अस्य परममुक्तित्वादेव पुरुषोत्तमानन्दानुभवे सति वरणैकहेतुकानुभवमात्रगम्योऽयमानन्दो, न मनोवाग्विषय इति ब्रह्मण आनन्दं ज्ञात्वा विद्वान् सन् कुतश्चन लोकवेदादिभ्योऽपि न बिभेतीति सर्वतो भयाभावन-

न्दो. न मनोवाग्विषय इति ज्ञात्वा लोकवेदकालादिभ्योऽपि न बिभेतीति, यतो वाच इति श्लोकेनोक्तवती । अन्यथा आनन्दे मनसोऽप्यगम्यत्वमुक्त्वा, विद्वानिति कथं वदेत् ।

एवं सति सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यृचि यत् फलमुक्तं तदेवान्ते विवृतमिति ज्ञायते । अन्यथा अस्माल्लोकात् प्रेत्येत्युक्तत्वाद्देहाभावेन भयानुपस्थित्या तन्निषेधासम्भवः । कामभोगासम्भवश्च । अत एव सामानाधिकरण्यमनुक्त्वा आनन्दं ब्रह्मण इत्युक्तम् । एतेन लौकिकं पूर्वदेहं त्य-

---

तेन श्लोकेनोक्तवतीति सर्वभयाभावः परममुक्तेर्लिङ्गमिति स एव तथात्वसाधक इत्यर्थः । विपक्षबाधकतर्कोक्तिमुखेन पुनर्हेत्वन्तरमाहुः * अन्यथेत्यादि * । * अन्यथेति * परममुक्तित्वाभावे । तथाच मनोवागविषयानन्दवेदनमपि परममुक्तेरेव लिङ्गमित्यर्थः । एवं हेतुत्रयेणास्याः परप्राप्तेः परममुक्तित्वसाधनेनेदं सिद्धम् । या ज्ञानमार्गिणां ब्रह्माऽभेदरूपा परममुक्तिः सा भक्तानां फलानुभवे स्वरूपयोग्यतासम्पादकतयोपयुज्यते । तस्यां सत्यां भक्त्या तादात्म्येन फलानुभवात् । अतः सा पूर्वकक्षारूपेति । तदेतद् हृदिकृत्य सिद्धमाहुः * एवं सतीत्यादि * । एवं सतीति * आनन्दमयप्राप्तेरेवं परममुक्तित्वे सति * विवृतमिति * यतो वाच इति श्लोकेन विवृतम् । अस्य श्लोकस्यर्गुक्तफलांशविवरकत्वमृगंशस्य च यजुर्विवक्षितफलबोधकत्वमिति द्वयं निगमयितुं तद्विपरीतवादबाधकं तर्कमाहुः * अन्यथा अस्मादित्यादि * तथाच यद्यस्यर्गंशविवरकत्वं न स्यात् तदोक्तरीत्या भयाभावेन भयनिषेधनमसङ्गतं स्यात् । यदि ऋगंशस्य विवक्षितफलबोधकत्वं न स्यात् तदा कामभोगोक्तिरप्यसङ्गता स्यादित्युभयमन्त्रवर्णादेवोभयं निगम्यत इत्यर्थः । अथैतत्साधकं हेत्वन्तरमाहुः * अत एवेत्यादि * तथाच विवक्षितफलविवरकत्वादेव तथोक्तमित्यर्थः । एवमेतस्याः श्रुतेः फलांशविवरकत्वमुपपाद्य तेन सिद्धं निगमयितुमाहुः * एतेनेत्यारभ्य, अवग-

कृत्वा साक्षाद्भगवद्भजनोपयोगिनं भगवद्विभूत्यात्मकं सङ्घातं प्राप्नोत्यादौ । तथाहि । देहेन्द्रियप्राणान्तःकरणजीवात्मको हि सङ्घातः । तत्र स्थूलं शरीरमाद्यविभूतिरूपम् । द्वितीयं स्पष्टम् । तृतीयं सर्वेन्द्रियसम्बन्धित्वेनेन्द्रियरूपत्वेन चान्तःकरणात्मकत्वेन चेन्द्रियान्तःकरणरूपम् ।

तुरीयं जीवतत्त्वात्मकम् । यत्र गुहायां भगवद्वरणेन परमव्योमाविर्भावस्ततः पूर्णानन्दात्मकं पुरुषोत्तमस्वरूपं फलरूपं प्राप्य उक्तप्रकारेण तेन सह सर्वकामाशनमेव मनोवागविषयानन्दवेदनं तद्वान् भवतीति वाक्यैकवाक्यतयाऽवगम्यते ।

गत इत्यन्तम् * । * आद्यविभूतिरूपमिति* अन्नमयविभूतिरूपम् । मनोमयविभूतिरूपस्येन्द्रियान्तःकरणरूपत्वे हेतूनाहुः * तृतीयमित्यादि * अत्र मनसः सर्वेन्द्रियनियामकत्वान्मनोमयस्य सर्वेन्द्रियसम्बन्धित्वम् । शेषं स्फुटम् । तथाच कार्यद्वारा मनसैवेन्द्रियाण्याक्षिप्यन्त इति तथेत्यर्थः । जीवस्य विद्यमानत्वाद्विज्ञानमयविभूतिर्बुद्धिरूपा मनसः पृथग् भविष्यतीत्याशङ्कावारणाय तत्स्वरूपमाहुः * तुरीयमित्यादि * । जीवतत्त्वात्मकमिति * जीवस्य यत् तत्त्वं स्वरूपसहकारियोग्यतासम्पत्तिस्तदात्मकमित्यर्थः । अत्र गमकं, यत्रेत्यादिना प्रोक्तं ज्ञेयम् । एवं विभूतिरूपाणि व्याख्याय तच्छेषिणं व्याकुर्वन्ति * तत इत्यादि * अत्र कामाशनस्य वेदनरूपत्वम् । भोगस्य सुखसाक्षात्काररूपत्वात् । * वाक्यैकवाक्यतयेति * उपसंक्रमेण वेदनभयाभावाभ्यां ताराभावादिभिश्चास्य फलांशविवरकत्वेन वाक्यानामेकवाक्यतया ।

एवमानन्दमयप्राप्तेर्यथा परममुक्तित्वं, तथा प्रकारो विषयवाक्यभूतप्रपाठकविवरणेन प्रकाशितः । तत्र पूर्वोक्तानां विभूतीनां पक्षिरूपत्वं यदुक्तं तल्लीलोपयोगिषु तेषु कोशेषु पक्षिरूपेण यः प्रवेशस्तद्धेतुकमिति तदुपनिषत्कायाः श्रुतेरर्थविचारे तन्न इह भव-

अथेदं विचार्यते । पुरश्चक्रे द्विपद इति श्रुतौ वस्तुतस्तु पुरुष एव । परन्तु पुरः सम्बन्धी सन् पक्षी भूत्वा पुर आविशदिति निरूपितम् । भक्तिे चान्नमयादयस्तथैवोक्ताः । एवं सत्येकस्यां पुरि बहूनां तेषां प्रवेशो न वक्तुमुचितः । प्रयोजनाभावादित एकैकस्यां पुरि तथा वाच्यः । तत्र कीदृश्यां तस्यां कस्य प्रवेश इति विचार्यमाणे प्राकृतत्वब्रह्मत्वयोरविशेषाद् विनिगमकाभावात् सर्वेषां सर्वत्र प्रवेशोऽप्रवेशो वा भवेदिति चेत् ।

अत्रेदं प्रतिभाति । अस्माल्लोकात् प्रेत्येति वाक्ये इदंशब्द-

तीति तद्दृढीकरणाय पक्षिरूपप्रवेशबोधकश्रुतिविचारं प्रतिज्ञाय तद्विचारबीजं वक्तुं प्रथमतो विषयमाहुः * अथेत्यारभ्य, उक्ता इत्यन्तम् * । * तथैवेति * पक्षिरूपेण । अत्र विचारबीजं वदन्तः पूर्वपक्षमाहुः * एवं सतीत्यादि, चेदित्यन्तम् । * अविशेषादिति * सर्वेषु पक्षिष्वविशेषात् । * अप्रवेश इति * उक्तश्रुत्यैकस्य प्रवेशोक्तावप्यन्नमयादिषु पक्षिलिङ्गेन पुरि प्रवेशे प्राप्तेऽपि प्राणमयादिष्वन्तर आत्मेति श्रावणात् तेषां चतुर्णां तत्तदन्तःप्रवेशोऽस्तु । अन्नमये तु तदश्रावणात् तत्प्रवेशो न शक्यवचनः । किञ्च, द्विपत्त्वादिलिङ्गस्य स्थूलस्यैव सत्त्वात् तस्यैव प्रवेशोऽत्र भासत इति प्राणमयादिषु लिङ्गाभावेन विवक्षितपुष्ट्यभावात् तेष्वपि तदन्तराणां सोऽशक्यवचन इत्यप्रवेश इत्यर्थः । सिद्धान्तमाहुः * अत्रेत्यादि * अयमर्थः । अस्माल्लोकात् प्रेत्येत्यत्र स्थूलशरीरत्यागाङ्गीकारे सूक्ष्मशरीरकारणशरीरयोः सत्त्वेन प्राणमयादिकोशानां सत्त्वेन, एतं प्राणमयमात्मानमुपसंक्रामतीत्याद्यग्रिमवाक्याविरोधादस्माल्लोकादित्यस्येदम्, इदं सर्वं यदयमात्मा, अस्मिल्लोकेऽमुष्मिन् स्यादित्यादाविदमः परिदृश्यमानयावत्संग्राहकत्वदर्शनादत्रापि ब्रह्मविदः फलप्रकरणे प्रापञ्चिकसर्वसंग्राहकताया एवाभिप्रेतत्वौचित्यात् तथावगम्यते । ततो गुणातीतप्रपञ्चप्राप्त्यैव भगवत्युत्कटरत्यां जातायां पु-

प्रयोगात् प्राकृतगुणमयं प्रपञ्चमतिक्रम्य गुणातीतं प्रपञ्चं साक्षाल्लीलोपयोगिनं प्राप्नोतीत्यवगम्यते। तस्मात्स्यैव भगवद्भावे सम्पन्ने पूर्वं भगवद्विरहभावेनातितीव्रत्वेन सर्वोपमर्दिना शरीरेन्द्रियप्राणान्तःकरणानि नष्टान्येव स्युर्यदि तत्तद्रूपं ब्रह्म तेषु तेषु न प्रविष्टं स्यात्। जीवस्य च ब्रह्मण्येव लयेन लीलारसाऽननुभवेन नाश एव सः। तथाच तत्तद्रूपं ब्रह्म तेषु तेषु स्थितमिति न तेषां नाशः। जीवे त्वानन्दमयः पुरुषोत्तमः प्रविशतीति रसात्मकत्वादानन्दात्मकमेव विरहभावरसाब्धिमनुभूय पश्चात् प्रादुर्भूतं प्रभुस्वरूपं प्राप्य, न बिभेति कुतश्चनेति वाक्येन लोकात् तद्भावमुक्त्वा, एतꣳह वा व न तपति किमहं साधु नाकरवं किमहं पापमकरवमितिवाक्यैर्वेदाद्भयाभाव उच्यते।

शरीरप्राणमनोऽन्तः करणजीवात्मनां शरीरत्वं वाजसने-

यिविरहभाव एवोद्दिश्यत इति तेन शरीरादीनि मूलसति लीनानि स्युरतस्तदभावाय प्रवेशः सर्वत्रावश्यकः। किञ्च, लये ज्ञानिसाधारण्येन वरणवैयर्थ्याल्लीलाननुभवे स जीवस्याप्यनिष्टरूप एवेत्यतोऽप्यावश्यक इत्यर्थः। ननु भवत्वन्यत्रान्येषां प्रवेशस्तथापि जीवस्य नित्यत्वात् तत्रानन्दमयप्रवेशो निष्प्रयोजनत्वादयुक्त इत्यत आहुः * जीवे त्वित्यादि *। * उच्यत इत्यन्तम् *। * प्रविशतीति * रसानुभावनाय प्रविशति। * इतिर्हेतौ * तथाच सोऽपि सप्रयोजनः। तस्य पुरुषोत्तमत्वं श्लोकाद्युक्तभयाभावरूपाल्लिङ्गादेव ज्ञायते। एतदग्रिमार्थस्तु य एवमतापकरत्वेन एते साध्वसाधुनी विद्वान् स आत्मानं स्पृणुते ब्रह्म प्रीणाति। तत्र हेतुरुभे ह्येवैष इत्यादि। अत्र स्पृणोतिर्ज्ञानार्थक इति न पुनरुक्तिः। तेन सोऽपि युक्त इत्यर्थः। अत्र या स्वरूपप्राप्तिरुक्ता सा फलाध्यायतुरीयपादे निपुणतरं भाष्य उक्तेति मया तत्रैव व्युत्पादनीयेति बोध्यम्। किञ्च। द्विपत्त्वादीत्यादिनोक्तद्वितीयबाधकनिरासाय पूर्वं स्फुटीकुर्वन्ति * शरीरेत्यादि * प्राणमनोऽन्तःकरणेतिपाठे मनोऽन्तरिति भिन्नं पद-

यिशाखायामन्तर्यामिब्राह्मणे पठ्यते। यस्य सर्वाणि भूतानि शरीरं यस्य प्राणः शरीरं यस्य वाक् शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनः शरीरं यस्य त्वक्छरीरमित्यादेरन्ते यस्यात्मा शरीरमिति। अत्र पूर्वोक्तनिर्गुणदेहानां भगवच्चरणरेणुजत्वेन भूतरूपत्वाद् ब्रह्मशरीरत्वम्। तत्रान्नमयतत्प्रवेशेन तत्स्थितिः प्राणेष्वपि तथा। ज्ञानेन्द्रियेषु विज्ञानमयप्रवेशात् तथा। मनसि मनोमयप्रवेशात् तथात्वम्। जीवेत्वानन्दमयः प्रविशतीति तथात्वम्। अतो युक्तं पक्षित्वकथनम्।

आनन्दमयस्य स्वरूपं विशेषतो वक्तुमशक्यमिति यः पूर्वस्येति सर्वत्रोक्तम्। शरीरप्रवेशप्रयोजनकपक्षिरूपित्वं पञ्चस्वपि

म्। पतद्गणनामध्ये इत्यर्थः। प्राणेन्द्रियान्तःकरणेति वा पाठः। अत्रायमर्थः। पूर्वं हि शरीरत्वम्। तच्च भूताद्यात्मान्तेषु तुल्यम्। तथा ब्रह्मण अन्तरत्वं च सर्वत्रात्रोक्तमिति प्रवेशोऽपि तस्य सिद्धः। एवं सत्येतदनुरोधाद् बहुपदां पुरां दर्शनादत्र प्रतिष्ठा पदेन पादयोर्बोधनाच्च पुरश्चक्र इति श्रुतौ द्विपदादिपदं कृतपूर्णोत्रोपलक्षकमिति नव तासां करणे, तासु प्रवेश इति चाभिप्रेतं, न तु तासां द्वैविध्यं स्थूलत्वं वेति निर्णये सर्वास्वेव कार्यार्थं पक्षिरूपेण प्रवेशः सिद्ध्यतीति पक्षिलिङ्गादन्नमयादीनामपि प्रवेशः शक्यवचन इत्यर्थः। एवं सर्वेषां प्रवेशं समर्थयित्वा लीलौपयिकप्रवेशार्थमप्राकृतविभूतिरूपाणां स्वरूपमाहुः। * अत्रेत्यादि * इदं च प्रथमस्कन्धसुबोधिन्यां, या वै लसच्छ्रीतुलसीविमिश्रपादाब्जरेण्वभ्यधिकाम्बुनेत्रीत्यत्र सिद्ध्यति। प्रवेशं विभजन्ते * तत्रेत्यादि * जीवस्य वरणेनैव शुद्धत्वाद् विज्ञानमयस्य प्रवेशोऽनर्थक इति शङ्कावारणाय तदधिकरणमाहुः। * ज्ञानेन्द्रियेष्वित्यादि * जीवे तथात्वं लीलारसानुभवयोग्यत्वरूप बोध्यम्। एवं सर्वत्र पक्षित्वोक्तिं समर्थयित्वाऽऽनन्दमये शारीरत्वोक्तेस्तात्पर्यं वक्तुं यः पूर्वस्येति गूढोक्तेराशयमाहुः। * आनन्दमयस्येत्यादि। * * शरीरेत्यादि च *। विशेषतो वक्तुमशक्यत्वं मनोवागगम्यत्वाद्

साधारणमिति तेषु तथा वदन्त्यानन्दमयेऽपि तथैवोक्तवती श्रुतिरिति ज्ञेयम्। एवं सति स्पर्शमणिसम्बन्धेन रजतादेर्हेमत्वमिवोक्तप्रकारकप्रवेशाश्रयाणामपि तत्तदात्मकत्वमित्युच्यते। वस्तुतस्तु परोक्षवादोऽयमिति ज्ञायते। तथाहि। ब्रह्मविदाप्नोति परमिति वाक्येन ब्रह्मविदः परमाप्तिं सामान्यत उक्त्वा तत्तात्पर्यं सत्यं ज्ञानमित्यृचोक्तम्। तत्र सर्वात्मभाववान् भक्तो भगवता सह तत्स्वरूपात्मकान् कामान् भुङ्क्ते इत्युक्तव्याख्यानेन तदर्थोऽवधार्यते। उक्तभक्तस्य सदैव, विरहभावे तु विशेषतः प्रियस्वरूपातिरिक्तास्फूर्त्या अन्नप्राणादिरूपः स एवेति ज्ञापनाय तत्तद्रूपमुच्यते।

तेन परमप्रेमवत्त्वं सिद्ध्यति। ततो भगवदाविर्भावे सत्यपि पूर्वभावस्यातितीव्रत्वेन ज्ञानादिसर्वतिरोधानेनाग्रिमरसानुभवो न भविष्यतीति स्वयमेव तदनुभवात्मको भवतीति ज्ञापनाय वि-

---

बोध्यम्। तथाच तस्यैष इत्यत्र शब्द एव पूर्वसमो, न त्वर्थोऽपि। तेनात्रायमर्थः। तस्येत्यभेदे षष्ठी। तथाच पूर्वस्य यः शारीर आत्मा उपक्रमे जगत्कर्तृत्वेनोक्तस्तदभिन्न एष इति। एवमर्थोक्तौ गमकं तु, अग्रेऽन्यस्यान्तरात्मन उक्त्यभाव एवेति प्रागेवोक्तम्। प्रवेशस्य योग्यतासम्पादकत्वप्रकारं दृष्टान्तेनाहुः। * एवं सतीत्यादि *। एवमत्र श्रुत्यन्तरानुसारेण वास्तवं पक्षिरूपमादृत्य प्रकृतश्रुत्यर्थो निर्णीतः। अतः परं परोक्षप्रिया इव हि देवा प्रत्यक्षद्विष इति श्रुतेः। वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे। परोक्षवादा ऋषयः परोक्षं च मम प्रियमित्येकादशस्कन्धीयभगवद्वाक्याच्च परोक्षवादस्यैव ज्यायस्त्वेनात्र परोक्षवाद एवास्तीत्याहुः। * वस्तुत इत्यादि। * उपपादयन्ति। * तथाहीत्यादि, * प्रतिष्ठारूपत्वमित्यन्तम् * तत्रेति * तात्पर्यकथने *। तदर्थ इति *। ऋगर्थः। * तत्तद्रूपमिति *। अन्नप्राणमनोरूपम्। * स्वयमेवेति *। भगवानेव।

ज्ञानरूपत्वमुच्यते । तदाऽनुभवविषयः प्रकट आनन्दमय इति तत्स्वरूपमुच्यते । तत्र निरुपधिप्रीतिरेव मुख्या, नान्यदिति ज्ञापनाय प्रियस्य प्रधानाङ्गत्वमुच्यते । तदा प्रियेक्षणादिभिरानन्दात्मक एव विविधरसभावसन्दोह उत्पद्यते यः स दक्षिणः पक्ष उच्यते । ततः स्पर्शादिभिः पूर्वविलक्षणः प्रकृष्टानन्दसन्दोहो यः स उत्तरः पक्ष उच्यते । नानाविधपक्षसमूहात्मकत्वात् तयोः पक्षयोर्युक्तं तथात्वम् । स्थायिभावस्यैकरूपत्वादात्मत्वमुच्यते । यतस्तत एव विभावादिभिर्विविधभावोत्पत्तिः । परमाप्तिसाधनीभूतब्रह्मज्ञानदशायां तदानन्दोऽपि यः पूर्वमनुभूतः स गणितानन्द इत्येतदानन्दानुभवानन्तरं तुच्छत्वेन भातीष्टगतावसाधन-

---

तत्रेति। आनन्दमयस्वरूपकथने *प्रियस्येति * प्रियस्वरूपस्य । तेन श्रुतौ प्रियमिति नपुंसकलिङ्गस्य नानुपपत्तिः। *प्रधानाङ्गत्वमुच्यत इति * कल्पनयोपदिश्यते । इत आरभ्य कल्पनोपदेशो बोध्यः । तत्रायं प्रकारः । आनन्दमयानुभवे निरुपधिप्रीतिरेव मुख्या । भक्त्याऽहमेकया ग्राह्य इति वाक्ये तस्या एवानुभवजनकत्वात् । नान्यत् साधनान्तरमिति ज्ञापनाय प्रियस्य प्रीतिविषयस्यानन्दस्वरूपस्य प्रधानाङ्गत्वं शिरस्त्वमुच्यते । शिरसाऽभिज्ञायते, सोऽयमिति । तथा निरुपधिप्रीत्या भगवानिति शिरःशब्दे तत्सिद्धिनिबन्धना गौणी । एवमग्रे, * तदेत्यादिना वक्ष्यमाणयोर्भावयोर्दक्षिणोत्तरपक्षत्वेऽपि तथा । ताभ्यामुड्डीयाऽभीष्टदेशं प्राप्नोति । एवं दर्शनस्पर्शजनिताभ्यां भावाभ्यां शीघ्रं भगवन्तं प्राप्नोतीति । * स्थायिभावस्येत्यादिनाऽऽत्मशब्दे तत्सिद्धिनिबन्धना सा । परमाप्तीत्यादिना च पुच्छशब्दे पूर्वेषामानन्दानां प्रशंसानिबन्धना सा बोध्यते । * प्रतिष्ठाशब्दोऽपि तथा । एवमवयवेषु परोक्षवादो बोध्यः । तथाच स्वर्णघर्मानुवाके आनन्दरूपं परप्रकाशकं कमनीयं परमेश्वरस्य यत्स्वरूपं ब्रह्मा ज्ञातवान् । स सर्वान्तर्यामी सर्वनियामको बहुधा विचरति यत्र सर्वमेकं भवति स आत्मा जननां मानससम्बन्धी । मानसाश्चैते भावा आनन्दरूपा

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं खं० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ४ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड १)	४	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम् । श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा । श्रीमदन्नंभट्टप्रणीता खण्डानि ६	६	०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिकारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० ४	४	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता ।	१	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः ।	१	०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् । गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् ।	२	०

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस

BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, Ph. D.
No. 103

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY ŜRÎ VALLABHÂCHÂRYÂ,
With the Commentary called Bhâshya Prakâsa,
By Goswami Ŝrî Purushottamjee Mahâraj.
EDITED BY RATNA GOPÂL BHATTA.

Fasciculus III.

BENARES.
Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H D GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilas Press
BENARES.

1905.

Registered under Act XXV. of 1867. (ALL RIGHTS RESERVED.)

	०	४	
	२	८	०
	०	१	०
	०	४	०
	०	१२	०
	०	१	०
	०	१	६
	०	८	०
	०	१	६
	०	२	०
	०	२	०
	४	०	०
परिभाषापाठः	०	१	०
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लघुकौमुदीभाषाटीका	४	०	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०	०
उपसर्गवृत्ति	०	१	०
छत्रकौमुदी	०	६	०
क्षेत्रसंहिता	२	०	०

स्वेन स्वरूपतोऽपि तस्माद्धीनत्वं चेति पृष्ठभागादपि दूरस्थित-पुच्छरूपत्वं ब्रह्मण उच्यते । पुरुषोत्तमाधिष्ठानत्वात् प्रतिष्ठारूपत्वं च । एवं सत्यक्षरादप्युत्तमत्वेऽप्यप्रधानीभूय भक्तकाम-पूरणकर्तृत्वेऽसम्भावना विपरीतभावना च सम्भवति । तदभा-वायासन्नेव स भवतीत्याद्युक्तम् । स्वानुभवाभावेऽपि गुरूपदे-शादिनापि तदस्तित्वमात्रमपि यो जानाति तं ब्रह्मविदः सन्तं सत्त्वधर्मविशिष्टं वर्तमानं च विदुरित्यग्रेऽवददस्ति ब्रह्मेति चेदि-त्यादिना । ब्रह्मासत्त्वज्ञानेऽसन् भवतीत्युक्त्वा तदस्तित्वज्ञाने सन् भवतीत्यनुक्त्वा, सन्तमेनं विदुरिति तत्त्वेनान्यज्ञानं यदुक्तं, तेनोक्तपुरुषोत्तमानन्दानुभववन्तं ज्ञानक्रियाविशिष्टं जीवं वर्त-मानं विदुः । अननुभवे केवलं गुरूपदेशादिना तादृग्ब्रह्मास्ति-त्वज्ञाने स्वरूपतः सन्तं तं विदुर्न तु ज्ञानादिमन्तम् । तदसत्त्व-ज्ञाने त्वलीकतुल्यमिति श्रुतितात्पर्यमिति ज्ञायते ।

एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ।
आनन्दमयतानन्दसन्दोहायाऽवधार्यते ॥ ॥ ११ ॥

नन्वानन्दमयस्य न ब्रह्मता वक्तुं शक्या । मयटो लोके विकाराधिकारविहितत्वादित्याशङ्क्य स्वयमेव परिहरति ।

इति तज्जनकस्य यत् स्वरूपं भावरूपं कल्पनया परोक्षवादार्थमु-च्यत इति बोध्यः । एतमर्थं दृढीकर्तुम्, असन्नेव स भवतीति श्लोकं व्याकुर्वन्ति * एवं सतीत्यादि * ज्ञायत इत्यन्तम् * । शेषाणां श्रुतीनामर्थस्तु पूर्वोक्तपक्षेष्वपि तुल्य इत्यतोऽग्रे न व्याख्यातम् । एवं परोक्षवादव्याख्यानस्य फलं कारिकयाऽऽहुः । * एवं विचारे-त्यादि * एवमस्मिन् वर्णके आनन्दस्य ज्ञेयकोटिनिवेशे तदनिवेशे चानन्दमयस्य परब्रह्मत्वं निर्बाधमिति प्रभुचरणैर्व्यवस्थापितम् ॥११॥

अतः परमग्रिमसूत्रमवतारयन्ति * नन्वित्यादि * मयड्वै-

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥

अनेनैव पूर्वसूत्रार्थः सिद्धो भविष्यति । विकारवाची मयट्प्रत्ययो यस्मिंस्तद्विकारशब्दं तस्मात्तच्छब्दवाच्यं ब्रह्म न भवति । ब्रह्मणोऽविकारित्वादिति चेत् । नात्र विकारे मयट्, किन्तु प्राचुर्यात् । प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात् । तथाच पाणिनिः । तत्प्रकृतवचने मयट् । प्राचुर्येण प्रस्तुत वचनं तत्प्रकृतवचनं, तस्मिन् मयट् प्रत्ययो भवतीत्यर्थः ।

तयोर्भाषायामित्यनेन लोके मयटो विकाराधिकारे विहितत्वाद्वैदिकनिर्णयस्यापि वादिबोधनाय लोकन्यायेनैव कर्तव्यत्वादित्याशङ्क्य परिहरतीत्यर्थः । सूत्रं पठित्वा व्याकुर्वते ॥ विकारशब्दान्नेतिचेन्न प्राचुर्यात् ॥ * अनेनेत्यादि * । विकारार्थनिराकरणेनैव पूर्वसूत्रगत आनन्दमयशब्दो यौगिक इति बोधनान्निरवध्यानन्दरूपः परमात्मेति सिद्धो भविष्यतीत्यर्थः । * विकारशब्दमिति * पदमिति शेष. । अनेन सूत्रांशे मायावादिवद् भ्रान्ताः प्रागपि ऋषयः सन्तीति, तथा प्राचुर्यादित्यनेन व्याकरणान्तरे प्राचुर्येऽपि मयडस्तीत्यपि बोधितम् । तथापीदानीं पाणिनीयस्यैवात्यादृतत्वात् प्रसिद्धत्वाच्च प्राचुर्यार्थे तत्सम्मतिमाहुः । * तथाचेत्यादि * ननु पाणिनीये सूत्रे तत्प्रकृतवचने मयडुक्तो, न प्राचुर्ये इति कथं तस्य सम्मतित्वेनोपन्यास इत्याकाङ्क्षायां व्याकुर्वन्ति * प्राचुर्येणेत्यादि * सूत्रं तु काशिकायामेवं व्याख्यातम् । तदिति प्रथमा समर्थविभक्तिः । प्राचुर्येण प्रस्तुतं प्रकृतम् । तथाच, प्रथमान्तात् समर्थात् प्रकृतोपाधिके वर्तमानात् स्वार्थे मयड् भवतीति । उदाहरणं तु प्रकृतमन्नमन्नमयमिति । अपरे तु प्रकृतमुच्यतेऽस्मिन्निति प्रकृतवचनम् । उदाहरणं तु प्रकृतमन्नमुच्यतेऽस्मिन्नित्यन्नमयो यज्ञ इति । उभयथा च सूत्रप्रणयनाद् द्वयमपि प्रमाणमिति । अयमेवार्थः प्रसादेऽनूदितः । सिद्धान्तकौमुद्यां तु तथानूद्य प्राचुर्येण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनमिति व्याख्यानेन सूत्रे षष्ठीतत्पुरुषो

प्राचुर्येण पूर्वापेक्षयाऽप्याधिक्येन, को ह्येवान्यात् कः प्राण्यादिति वाक्ये प्रकर्षेण स्तुतम् । अतो मयट् पूर्वापेक्षया प्राचुर्यमयते । एकदेशनिर्देशेन तदर्थलक्षणया प्राचुर्यः । प्राचुर्येण प्रस्तुतार्थवाचकत्वादित्यर्थ इति वा ।

बोधितः । मनोरमादिषु तट्टीकासु तु यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढस्तथापि वचनग्रहणसामर्थ्याद् यादृशस्य प्रकृतस्य लोके प्रत्यायनमभिप्रेतं तत्रायं मयट् स्यादिति विशेषो लभ्यत इत्युक्त्वा स्वार्थिकप्रकरणवशात् प्रचुरार्थबोधविषयवृत्तिमतः प्रातिपदिकात् स्वार्थे मयड्विधाने प्रातिपदिकार्थोपस्थापिका प्रथमा विभक्तिः प्रकृतार्थादेव सिद्ध्यतीति वचनपदस्य भावव्युत्पत्तौ तच्छब्दग्रहणं व्यर्थम् । अधिकरणव्युत्पत्तौ तु थप्रमाप्रापकत्वात् सार्थकम् । उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणम् । ल्युटोक्तमधिकरणत्वं तु मयडर्थ इत्युक्तम् । शब्देन्दुशेखरे तु स्वार्थिकप्रकरणविरोधादधिकरणत्वं मयडर्थ इत्यसङ्गतम् । नचान्नमयो यज्ञ इत्याद्युदाहरणासिद्धिः । प्राचुर्यवदाधिकरणलक्षकाच्छब्दात् स्वार्थे मयट्करणेऽपि तत्सिद्धेः । वृत्तेरप्यत एव सङ्गतेश्च । सूत्रे तु तद्ग्रहणं चिन्त्यप्रयोजनमित्युक्तम् । तदेतत् सर्वं वृत्तिविचारादेवानुसन्धाय तद्ग्रहणवैयर्थ्यनिवृत्त्यर्थम् । तेन प्रकृतं तत्प्रकृतम्, उच्यत इति वचनमवश्यप्रतिपादनम् । प्राचुर्येण प्रस्तुतस्य वचनं तत्प्रकृतवचनम् । तन्न तथेति सूत्रार्थः । तथाच तच्छब्दस्य विवक्षितप्रकारबोधनार्थत्वाद्वचनपदस्यावश्यकार्थत्वादेवं सूत्रार्थोक्तौ सम्मतित्वं निर्बाधमिति तथेत्यर्थः । स्वोक्तं विभजन्ते * प्राचुर्येणेत्यादि * । * पूर्वापेक्षयेति * अन्नमयादिचतुष्टयापेक्षया । ननु प्राचुर्येण प्रस्तुतेऽर्थेऽनुशिष्टो मयट् कथं प्राचुर्यबोधक उच्यत इत्यत आहुः । * एकदेशेत्यादि * । यथा हि भीमसत्यादिपदानि, विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य इति वार्तिकेनैकदेशभूतान्यपि विशिष्टार्थनामानि, तथात्र नामत्वाभावेन वक्तुमशक्यत्वाल्लक्षणया प्राचुर्येण प्रस्तुतं बोधयतीत्यर्थः । पूर्वस्मिन् पक्षे कल्पनाक्लेशात् प्रकारान्तरेण व्याख्यातम् । त-

छन्दसि द्व्यज्व्यतिरिक्तस्थले मयटो विकारे विधानाभावाद् व्याकरणमप्यर्थनिर्णायकम् । विज्ञानमयानन्दमयशब्दौ पश्यन्नपि पाणिनिर्मयड् वैतयोर्भाषायां, द्व्यचश्छन्दसीति कथमवोचत् ।

थाच पञ्चम्यन्तमिदं पदम् । तेन कल्पनाऽक्लेश इत्यर्थः । ननु, मयड्वैतयोर्भाषायामिति सूत्रे विकल्पस्य भाषायां सिद्धेर्वेदे नित्यं विकारे मयट् । किञ्च, नित्यं वृद्धशरादिभ्य इत्यग्रिमसूत्रे भाषायामित्यस्यानुवृत्त्या भाषायां नित्यो, वेदे वृद्धादिभ्यो वैकल्पिक इति सिद्ध्यति । एवं सत्यानन्दशब्दस्य वृद्धत्वात् ततो वैकल्पिको, विज्ञानशब्दाच्च नित्यो विकारे मयडदण्डवारितः । अन्नादिपदेभ्यश्च स्वारसिक एवेति प्रायपाठानुग्रहाद् विकारार्थ एव युक्त इति तं विहाय प्राचुर्ये तदङ्गीकारो न युक्त इत्यत आहुः * छन्दसीत्यादि* । *द्व्यज्व्यतिरिक्तस्थल इति * बह्वज्स्थले । तथाच यदि सूत्रकारः पाणिनिस्तथाभिप्रेयात् तदा छन्दसि बह्वज्व्युदासाय द्व्यच एवेति न नियमयेत् । अतो नित्यो वैकल्पिको वा मयट् छन्दसि बह्वचो विकारे न भवत्येवेति पाणिनीयविचारेणापि प्राचुर्यार्थग्रहणं युक्तमेवेत्यर्थः ।

अत्र शङ्कराचार्याः । अन्नमयादिविज्ञानमयान्तं विकारप्रायपाठमनादृत्यानन्दमयपदस्य प्राचुर्यार्थत्वब्रह्मविषयत्वयोरङ्गीकारे प्रायपाठविरोध आकस्मिकत्वं च । मान्त्रवर्णिकब्रह्माधिकाराद् ब्रह्मविषयत्वादरणेऽन्नमयादीनामपि ब्रह्मत्वप्रसङ्गः । अन्नमयाद्यान्तरस्यान्यस्य कथनात्तेषां न ब्रह्मत्वम् । आनन्दमयादन्तरस्यान्यस्याकथनात् तस्य ब्रह्मत्वमित्यङ्गीकारेऽप्येकस्यैवानन्दमयस्य ब्रह्मण आत्मत्वेनावयवित्वं, तस्यैव पुच्छत्वेनावयवत्वमित्यसामञ्जस्यम् । किञ्च । प्रियमोदादिविशेषयुतस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वेन भावाभावशङ्कास्पदत्वाभावादसन्नेव स भवतीतिश्लोकस्यापि विरोधः । अपि चानन्दमयस्य ब्रह्मत्वेऽपि प्रियाद्यवयवयोगेन सविशेषब्रह्मत्वमङ्गीकर्तव्यम् । तथा सति वाङ्मनसाऽगोचरत्वबोधकस्य, यतो वाचो निवर्तन्ते इति वाक्यशेषस्य विरोधः । किञ्चानन्द प्रचुर इ-

अत्र केचित् सर्वविप्लववादिनो विकारार्थत्वं वदन्ति । श्रुतिसूत्रादीनामर्थाज्ञानात् । तद् वेदाद्यर्थविद्भिर्भगवतो नवमावतारकार्यं ज्ञात्वोपेक्ष्यम् ।

त्युक्ते तत्र दुःखास्तित्वस्यापि प्रत्ययापत्तिः । लोके प्राचुर्यस्य प्रतियोग्यल्पतासापेक्षत्वात् । तथाच सति यत्र नान्यत् पश्यति शृणोति विजानातीति सुखैकरसे भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावबोधकश्रुत्यन्तरस्यापि विरोधः । किञ्च । प्रियादेः प्रतिशरीरं भिन्नत्वेनानन्दमयस्यापि तथात्वात् तस्य न ब्रह्मत्वं शक्यवचनम् । सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतौ, एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति श्रुत्यन्तरे च ब्रह्मण आनन्त्यैकत्वयोः श्रावणात् । किञ्च । आनन्दपदस्यैवाभ्यासो, न त्वानन्दमयपदस्येत्यतोऽपि न ब्रह्मत्वम् । एतमानन्दमयमात्मानमुपसङ्क्रामतीत्यभ्यासस्त्वन्नमयादिप्रवाहपतितत्वान्न ब्रह्मत्वसाधनसमर्थः । अत आनन्दमयशब्दस्य ब्रह्मविषयताया अनिश्चितत्वेन तत उत्तरेष्वानन्दमात्रप्रयोगेष्वानन्दमयाभ्यासस्य कल्पयितुमशक्यत्वान्नानन्दमयो ब्रह्मेत्याहुः ।

तन्मतस्याधिकरणसमाप्तौ दूषणीयत्वादत्रैतत्सूत्रे पूर्वपक्षतयोदितमानन्दमयपदस्य विकारार्थत्वं यत् सिद्धान्तितं, तस्यासङ्गतत्वायाहुः । * अत्र केचिदित्यादि * अत्रानन्दमयशब्देऽन्नमयादिषु पञ्चस्वपि वा केचिन्निर्विशेषवादग्रहिला विवर्तवादाद्यङ्गीकारेण भगवन्माहात्म्यादिनाशकत्वात् सर्वविप्लववादिनो विषयवाक्याकरश्रुतेस्तद्विचारकाणां व्याससूत्राणां व्याकरणसूत्राणां च तात्पर्याज्ञानाद् विकारार्थत्वं वदन्ति।तत उक्तश्रुत्याद्यर्थविद्भिर्भगवतो नवमावतारस्य बुद्धस्य कार्यं वेददूषणरूपं ज्ञात्वोपेक्ष्यम् । पाद्मोत्तरखण्डे उमामहेश्वरसंवादे तामसशास्त्रकथनं प्रतिज्ञाय कानि चिदसच्छास्त्राण्युक्त्वा, 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा । अपार्थं श्रुतिवाक्यानां दर्शयँल्लोकगर्हितम् । कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते । सर्वकर्मपरिभ्रष्टं वैकर्मत्वं तदुच्यते । परेशजीवयोरैक्यं मयात्र प्रतिपाद्यते । ब्रह्मणश्च परं रूपं निर्गुणं

वक्ष्यते मया। सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे। वेदार्थवन्महाशास्त्रं मायावादमवैदिकम्। मयैव वक्ष्यते देवि जगतां नाशकारणात्' इति शिववाक्याद् वेदाद्यर्थविद्भिर्नादरणीयमित्यर्थः। नच प्रायपाठविरोधः। विकारार्थस्य प्राणमयपद एवाभावात्। प्राणादीनां त्रयाणां वृत्तित्वेनाकाशपृथिव्योश्च भूतान्तरत्वेन तदवयवकल्पनाग्रन्थतस्तत्र मयटः स्वार्थिकत्वस्यैव भट्टभास्करोक्तरीत्या निश्चयात्। नच घटाकाशस्य घटविकारत्ववत् प्राणाद्युपाध्यवच्छिन्नस्य प्राणविकारत्वं भामत्युक्तरीत्या सिद्ध्यतीति प्रायपाठसिद्धिरिति वाच्यम्। एतस्या रीतेर्मजत्फेनावलम्बनकल्पत्वात्। अवच्छिन्ने तद्विकारत्वस्याप्रत्ययात्। शास्त्रेषु क्वापि तथाप्रयोगादर्शनाच्च। तुष्यतु दुर्जनन्यायेन तदङ्गीकारेऽपि मस्य सत्यामुभयत्र प्राप्तावेकतरानिर्णायकत्वं, न तु तत्प्रापकत्वमिति द्व्यचश्छन्दसीति व्याकरणसूत्रेण, न बह्वच इति नियमिते विज्ञानानन्दशब्दाभ्यां वैकारिकमयट्प्राप्तेरेवाभावेनाऽकिञ्चित्करत्वाच्च। नच मनोरमादिषु, मयड् वेति सूत्रेण, हेतुमनुष्येभ्य इत्यनुवर्तमाने हेतुवाचकादानन्दशब्दादागतार्थे मयटं साधयित्वा विकारस्यार्थिकत्वमुक्तमित्यस्त्येव प्राप्तिरिति वाच्यम्। पञ्चस्वप्यन्नमयादिषु स्वार्थे मयट्प्राप्तौ बाधकाभावेन वृथा तदतिहायैवं क्लिष्टकल्पनस्यायुक्तत्वात्। हेतुत्वस्य निमित्तोपादानसाधारणत्वेन विकारस्यार्थिकताया निर्णेतुमशक्यत्वाच्च। नचानन्दप्राचुर्यस्योक्तरीत्या दुःखशाबल्यस्फोरकत्वेनानन्दमये ब्रह्मत्वसिद्ध्यभावादागतार्थमादाय विकारादरेऽपि को दोष इति वाच्यम्। लोकेऽपि प्रचुरप्रकाशः सविता, प्रभूतसन्तापो निदाघदिवसोऽन्धकारमयी वर्षाविभावरी, बहुधनो वैश्रवण इत्यादिवाक्यश्रवणे प्रतियोगिनां तमःशैत्यप्रकाशदारिद्र्याणां प्रत्यक्षतो बाधेन तत्र तदल्पत्वशङ्काया अनुदयात्। वेदे तु सर्वभूतोपजीव्यांशानन्दप्राचुर्यबोधके दूरापेतैव प्रतियोग्यल्पत्वशङ्का। यदि हि तत्र वेदो दुःखसम्भेदमभिप्रेयादवयवकल्पनायां तदपि क्वचिन्निवेशयेत्। सजातीयैरेवार्थैरवयवकल्पनाया अनुपक्रान्तत्वात्। आकाश आत्मा पृथिवी पुच्छं महः पुच्छमित्यादिना तथा निश्चयात्। यच्च शारीर आत्मेति शरीरसम्बन्धबोधनं दुःखसम्भेदसमर्थकमित्युक्तं, तदप्यन्तर्यामिब्राह्मणाननुसन्धानहेतुकम्। अत एवं सत्यपि यत् तदविचारेणानन्दमये दुःखा-

योऽर्थस्तमवोचाम ॥ १२ ॥

स्तित्वकथनं, तदू ग्रन्थकृतो महादुःखसंस्कारस्य प्राबल्यमेव गमयतीति दिक्।

भास्कराचार्यास्तु स्वरूपैक्ये प्राचुर्यवचनं प्रचुरप्रकाशो रविरितिवन्नेतरालपत्वमपेक्षत इत्याहुः।

रामानुजाचार्यास्तु, तत्प्रचुरत्वमितरसत्तां नावगमयति। अपि तु तस्याल्पत्वं निवर्तयाति। इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ। इह त्वपहतपाप्मेत्यादिना प्रमाणान्तरेण तदभाव एवावसीयते। तथा आनन्दमीमांसायां ब्रह्मणि निरनिशयदशाशिरस्कानन्दबोधिकया श्रुत्या पूर्वोक्तजीवानन्दापेक्षया प्राचुर्यबोधनेन सापेक्षत्वमप्येवं पूर्यत इति दुःखसद्भावावगमकथनमसदित्याहुः। तदपि युक्तमेव। उपपन्नत्वात्।

यत्तु, श्रीग्रामण्योश्छन्दसीत्यत्र श्रियश्छन्दसीत्यंशो भाष्यकृता छन्दसि विभाषाया व्यवस्थितत्वमुपेत्य प्रत्याख्यातस्तद्रीत्या प्रकृतेऽपि भाषाग्रहणं, द्व्यचश्छन्दसि, नोत्वद्वर्ध्रबिल्वादिति सूत्रद्वयं च त्याज्यम्। तथाचानन्दमय इत्यादावपि विकारे मयट् सुकर एवेति शङ्कराचार्योदितं सम्यगेवेति मनोरमायां समर्थितम्। तत्तु विकारत्वप्रकारकबोधविवक्षायां बह्वचः परस्य मयट्प्रत्ययस्यासाधुत्वज्ञापनाय, द्व्यचश्छन्दसीत्यादेरावश्यकत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति दूषणं प्रदर्श्य रामकृष्णशास्त्रिभिरेव सिद्धान्तरत्नाकरे दूषितमिति न कथमपि विकारे मयट्सिद्धिः। यदपि प्राचीनवृत्तिकारैर्विज्ञानमयस्थले विकारार्थकत्वं यदाश्रितं तत्रैवैव गतिरिति मनोरमायामुक्तम्। तदपि कल्पितमिवाभाति। रामानुजाचार्यैर्वृत्तिकारानुसरणस्य कृतत्वेन तैरननूदितत्वात्। अथास्ति तत्र तर्हि तत्रैव दोषो नान्यत्रेति, न किञ्चिदेतत्। किञ्च पूर्वसूत्रे, अभ्यासादित्युक्त्वाऽस्मिन् सूत्रे प्राचुर्यादिति यदुक्तं तेनान्नमयादिषु पञ्चस्वपि प्राचुर्यमेव बाधकाभावात् सिद्ध्यतीति प्रायपाठोऽप्येतस्यैवानुग्राहको, न तु विकारार्थस्येति बोधनायाहुः * योऽर्थस्तमवोचामेति * यः सर्वत्रानुस्यूतः पञ्चानामर्थस्तं व्याकरणसूत्रोपन्यासेनावो-

शब्दबलविचारेण मयटो विकारार्थत्वं निवारितम् । अर्थबलविचारेणापि निराकरोति ।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥

हेतुत्वेन व्यपदेशो हेतुव्यपदेशः । तस्य हेतुव्यपदेशस्तद्धेतुव्यपदेशस्तस्मात् । एष ह्येवानन्दयाति । आनन्दयतीत्यर्थः । सर्वस्यापि विकारभूतस्यानन्दस्यायमेवानन्दमयः कारणम् । यथा विकृतस्य जगतः कारणं ब्रह्म अविकृतं सच्चिद्रूपमेवमेवानन्दमयोऽपि कारणत्वादविकृतोऽन्यथा तद्वाक्यं व्यर्थमेव स्यात् । तस्मान्नानन्दमयो विकारार्थः । चकारः समुच्चयं वदन् सूत्रद्वयेनैकोऽर्थो मध्ये प्रतिपादित इत्याह ॥ १३ ॥

ननु किमिति निर्बन्धने सूत्रत्रयेणैवं वर्ण्यते । अन्नमयादि-

ध्यामेत्यर्थः ॥ १२ ॥

उक्तसूत्रेण विकारार्थे निरस्तेऽग्रिमसूत्रस्य किं प्रयोजनमित्यत आहुः * शब्देत्यादि * तामिन्द्रो मध्यतोऽपरोध्य व्याकरोदिति श्रुतेर्मुखं व्याकरणंस्मृतमिति परिशिष्टाच्च व्याकरणरूपः शब्दोऽर्थनिर्णायक इति तद्बलविचारेण तथा कृतम् । तदपेक्षया अर्थस्तु बलिष्ठः । प्रतिपाद्यत्वेन शेषित्वात् । उक्तरीत्या निराकरणे स चेद् विरुध्येत तदा प्रयासो व्यर्थः स्यादतस्तद्वारणाय सूत्रान्तरमित्यर्थः । उक्तरीतिकं विकारार्थनिराकरणं व्युत्पादयन्ति * सर्वस्येत्यादि * । * व्यर्थमेव स्यादिति * रसꣳ ह्येवायं लब्ध्वाऽऽनन्दीभवतीति पूर्ववाक्ये पूर्वप्रकृतस्यानन्दमयस्यैव रसत्वेन सिद्धत्वात् तल्लाभेनानन्दवत्ताश्रावणेनैव रसरूपस्यानन्दकारणताया अर्थतः सिद्धौ पुनस्तत्कथनमप्रयोजनकं सत् तथा स्यादतः कारणत्वेनाविकृतत्वबोधनायैवेदं वाक्यम् । तेनाविकारत्वमेव सिद्ध्यतीत्यर्थविचारेणापि न तथेत्यर्थः ॥ १३ ॥

मान्त्रवर्णिकसूत्रमवतारयन्ति *नन्वित्यादि* । *एवमिति*

वदुपासनापरत्वेनापि श्रुत्युपपत्तेः । पक्षपुच्छादित्वेन मोदप्रमोदादीनामुक्तत्वाच्च । तस्माद् ब्रह्मत्वेन साधितमप्यावश्यकोपपत्त्यभावान्न ब्रह्मपरत्वमिति प्राप्तेऽभिधीयते ।

मान्त्रवर्णिकमेव च गम्यते ॥ १४ ॥

सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति मन्त्रः । मन्त्रेणाभिधया वृत्त्या प्रतिपाद्यं मान्त्रवर्णिकम् । तदुपपादनग्रन्थे तदेव मुख्यतया ज्ञायते । यत्र यदुद्दिष्टं तदेव मुख्यतया ज्ञातव्यम् । उपपादनीयं च सन्दिग्धम् । तत्र, ब्रह्मणा विपश्चितेति सन्दिग्धं सर्वज्ञं ब्रह्म ।

परमात्मपरत्वेन । नचोपास्तेरश्रवणादप्रामाणिकं कथं कल्पनीयमिति शङ्क्यम् । तदभावेऽपि विद्युद् ब्रह्मेत्यादिषु विद्युदाद्युपासनासु प्रकरणबलेन तत्स्वीकारात् । प्रकृते तु पक्षपुच्छादित्वेन मोदप्रमोदादीनां कल्पनयोक्तत्वाच्च लिङ्गस्यापि सद्भावात् । तस्मादुक्तहेतुद्वयाद् ब्रह्मत्वेन साधितमप्यानन्दमयपदमावश्यकोपपत्त्यभावान्न ब्रह्मपरमिति प्राप्ते इत्यर्थः । ब्रह्मपरत्वमिति पाठे त्वर्हतीति शेषस्त्रुटितो बोध्यः । को मन्त्रः, किं मान्त्रवर्णिकमित्याकाङ्क्षायामाहुः । * सत्यमित्यादि * यथाच यं कश्चिदर्थमभिसन्धाय शक्यसम्बन्धानां नानात्वात् तेषु यं कञ्चिदादाय लक्षणया यत्किञ्चिदुच्यते, तन्न मान्त्रवर्णिकम् । किन्तु मन्त्रेणाभिधया पदशक्त्या मुख्यवृत्त्या यत् प्रतिपाद्यं, तत् तथेत्यर्थः । एतस्य मान्त्रवर्णिकस्य कथमुपपत्तित्वमित्यत आहुः * तदित्यादि * । *तदुपपादनग्रन्थ इति* । सर्वस्मिन् प्रपाठके । तथाच तस्य मुख्यत्वादावश्यकोपपत्तित्वमित्यर्थः । मुख्यत्वमेवास्य कथमित्यत आहुः * यत्रेत्यादि * ननु तदेषाऽभ्युक्तेति प्रतिज्ञानान्मन्त्रस्य ब्राह्मणव्याख्यानत्वं स्फुटम् । शिष्टस्य प्रपाठकस्य मन्त्रव्याख्यानत्वे किं गमकमित्यत आहुः * उपपादनीयमिति * । * सन्दिग्धमिति * विभक्तिभेदात् पदभेदाच्च सन्दिग्धम् । तथाच सन्दिग्धोपपादकत्वमेव व्याख्यानत्वगमकमित्य-

तस्य हि फलत्वं वाक्ये नोपपाद्यते । फलं तु सर्वैः स्तुत आनन्दः । अभ्यासात् स्तुतत्वमित्यत्रोचाम । शिरःपाण्यादिकं तु स्तुत्यर्थमेव पुरुषविधत्वाय । लोके ह्यन्तर्भृतं वहिर्वेष्टितं च तदाकारं भवति ।

र्थः । ननु सर्वज्ञे ब्रह्मणि कस्मिन्नंशे कुतश्च सन्देह इत्यत आहुः । * तस्य हीत्यादि * । * वाक्य इति * मन्त्रे । तथाच ब्राह्मणवाक्ये द्वितीयया परस्य फलत्वबोधनात्, तद्व्याख्यानमन्त्रे तु द्वितीयया कामानां फलत्वबोधनाद् ब्रह्मणश्च गौणत्वबोधनात् तस्य फलत्वांशे सन्देह इत्यर्थः । तर्हि कथं तस्य फलत्वमुपपाद्यत इत्याकाङ्क्षायां सर्वतः प्रचुरानन्दरूपत्वेनोपपाद्यत इत्याहुः * फलन्त्वित्यादि * । * सर्वैरिति * प्रकारैः । प्रकारास्त्वभ्याससर्वान्तरत्वसर्वाधिकत्वादयो बोध्याः । ननु यदि प्रचुरानन्दरूपेणैव फलत्वाभिप्रेतं स्यादमूर्तस्य तथोक्तं स्यान्न तु शिरःपाण्यादिकं कल्प्येत । प्रयोजनाभावात् । कल्पनया चोपासनार्थता प्रतीयते, न तु परमफलतेत्यत आहुः * शिर इत्यादि * । * शिरःपाण्यादिकमिति * इदमा बोधितं शिरःपाण्यादिकम् । * पुरुषविधत्वायेति * सर्वेषां पुरुषविधत्वाय । यदि हि स्वयं पुरुषविधो न स्यात्तदा तदुपरितनोऽन्नमयान्तः कोऽपि पुरुषाकारो न स्यादिति तदर्थं तथोक्तिरिति तस्य पुरुषविधतामन्वयं पुरुषविध इति वाक्यादेव प्रतीयते । अतः सा कल्पना नोपासनार्थाऽपि तु स्तुत्यर्थेति कल्पनाया लिङ्गत्वाभावात् प्रकरणापेक्षया वाक्यस्य वलिष्ठत्वाच्चानन्दमयपदस्य ब्रह्मपरत्वं न पारिप्लवमित्यर्थः । नन्वानन्दमयस्य पुरुषविधत्वेन कथं सर्वेषां तथात्वमित्यत आहुः । *लोके हीत्यादि* । अयमर्थः । लोके ह्यन्तर्भृतस्य तदाकारता मूषानिषिक्तप्रतिमादौ दृष्टा । वहिर्वेष्टितस्य तदाकारता तूपदेहे सीवितवसनादौ च दृष्टा । तथाच यथा भाण्डकर्तारः प्रथमत आकृतिं मधूच्छिष्टादेः कृत्वा तदुपरि मृदं वेष्टयित्वा तन्मूषायां धातून् पूरयन्ति । अन्यथा पूरितभाण्डनिर्माणं न भवति । तथात्र तादृशोऽयं देहः । अतोऽत्र देहे कश्चिदान्तर एवंविधो वर्तते यदुपरि समागता अन्नरसादयः पुरुषाकारा भवन्ति । नो चेद् घटादिवत् कृतिसाध्यत्वाभावाद्

जीवोऽत्र मुख्यः। कर्तृत्वेन व्यपदेशात्। स च वस्तुतो हंसरूपः। पुरुषाधिकारकं हि शास्त्रम्। तेन पुरुषशरीरे तदाकारः सर्वं फलं प्राप्नोति। अतः पुरुषं हंसरूपेणानुवर्णयति।

भस्मोत्करवद् राशीभूता एव भवेयुः। अत्र तु श्रुतौ, तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविध इत्यादौ पूर्वं प्राणमयादिकमुक्त्वा तेन प्राणमयादिना आन्तरेण एषोऽन्नमयादिरुपारतनः पूर्ण इति पूर्वोक्तन्यायेन पूर्णतां प्रतिज्ञाय ततस्तां निगमयितुं, स वा एष प्राणमयादिः पुरुषविध एवेत्यनेन तदाकारमुक्त्वा तस्य प्राणमयादेः पुरुषविधतामनुलक्ष्यीकृत्य, अयमन्नमयादिः पुरुषविध इति वदति। तेन सर्वान्तरस्यानन्दमयस्यैव सर्वत्र पुरुषाकारसमर्पकता पर्यवस्यति। तेन तथा सिद्ध्यतीति। नन्वस्त्वेवं, तावता स्तुतिः का वा सिद्ध्यतीत्यत आहुः * जीव इत्यादि, वर्णयतीत्यन्तम् *। * तेनेति * हेतुना। * तदाकार इति * हंसाकारः। अयमर्थः। उक्तमन्त्रे सोऽश्नुत इत्यनेन जीवः फलाशने कर्तृतया व्यपदिष्टः फलभोगे मुख्यः। तस्य च, द्वासुपर्णेति श्रुत्या, एवं स मानसो हंसो हंसेनैव प्रबोधित इति स्मृत्या च हंसरूपेणैव सिद्धत्वात् पुरुषाधिकारेण प्रवृत्तस्य शास्त्रस्य तं प्रत्यप्रवृत्तौ तस्य ब्रह्माविर्भावाभावेन वेदनादिफलस्याप्यभावाच्छास्त्रादेर्वैयर्थ्यं स्यादिति फलार्थं शास्त्रसार्थकतार्थं च जीवस्य पुरुषरूपमावश्यकम्। तथा समतां विना फलानुभवदौर्घट्याद् ब्रह्मसमतायाश्च, न तत्सम इत्यादिश्रुत्या निषेधात् फलानुभावनार्थं समतायै ब्रह्मणोऽपि हंसरूपमावश्यकम्। अतः पुरुष एव यदा हंसरूपेण जीवान्तराविश्य तं पुरुषरूपेणान्तरितवाँस्तदा तद्वेष्टनेन पुरुषरूपो जीवः सर्वं लौकिकालौकिकफलमनुभवति। परमात्मा च हंसेऽन्तर्भूतो हंसाकारश्च सँस्तत्फलमनुभावयतीति श्रुतिरपि परमात्मानं हंसरूपेण पुर्यावेशोत्तरं वर्णयति। तथाच स्वयमतिमहानपि जीवस्य फलभोजनार्थमेवं करोतीत्येषा स्तुतिरित्यर्थः। एवं पक्षिरूपकल्पनस्य शिरःपाण्यादिकथनस्य च स्तुत्यर्थतासमर्थनेन निरालम्बना प्रत्यगात्मविषया बुद्धिः कर्तुमशक्येति दृष्टशारीरात्म-

पञ्चस्वपि शारीर आत्मा जीव एक एव । तत्रान्नमये निःसन्दिग्धत्वात्, तस्यैष एव आत्मेति नोच्यते । द्वितीयादिषु प्रथमोक्तमेवातिदिश्यते । तत्रान्नमये हस्तेन प्रदर्शयन्निव निःसन्दिग्धं व्याख्यातम् । तदन्तरो हि प्राण आन्तरव्यवहारकारणम् । बलभोजनविसर्गादिषूपयोगात् । तस्य सञ्चार आकाशे परिनिष्ठितः पृथिव्याम् । एवं लौकिकव्यवहारार्थं बाह्याभ्यन्तरभेदेन द्वयम् ।

सामान्येन प्रत्यगात्मनि बुद्धिसिद्ध्यर्थं शाखाचन्द्रन्यायेनेदं कल्पनमित्यपास्तम् । तथा सति पुरुषरूपकल्पनयापि कार्यसिद्धेः पक्षिरूपकल्पनावैयर्थ्यप्रसङ्गादिति । ननु यद्येवमभिप्रेतं स्यात् तर्ह्यानन्दमयस्यैव पक्षिरूपत्वं वर्णितं स्यान्नान्नमयादीनामतो नैवमित्याशङ्कायां स्वोक्तं विभजन्ते * पञ्चस्वित्यादि * तथाच प्राणमयादीनां चतुर्णां व्याख्याने, तस्यैष एव शारीर आत्मेति कथनात् पञ्चस्वपि फलेष्वेकस्यैव जीवस्य भोक्तुः पञ्चानां शरीरतया भोग्यत्वस्य च ज्ञाप्यत्वेन हंसरूपजीवानुरोधादन्नमयादिष्वपि तथा कल्पनं युक्तमित्यर्थः । ननु यद्येवं तदान्नमय इदं वाक्यं कुतो नोच्यत इत्यत आहुः *तत्रेत्यादि* कोशेऽन्नमये शरीरत्वस्यैकात्मभोग्यत्वस्य च प्रत्यक्षसिद्धत्वेन तत्तुल्येऽन्नमयेऽपि तथात्वस्यासन्दिग्धत्वान्नोच्यत इत्यर्थः । नन्वेवं सत्यन्येष्वपि तत्तत्कोशतौल्यात् तत्रापि नोच्येतेत्यत आहुः *द्वितीयेत्यादि* * प्रथमोक्तमिति * अन्नमय उक्तं पञ्चावयवकत्वम् । तथाचातिदेशदार्ढ्यार्थं तदुक्तिरित्यर्थः । एतदेव प्रपञ्चयन्ति * तत्रेत्यादि * । * प्रदर्शयन्निवेति * वदतीत्यत इति शेषः । तथाच यत एवं वदत्यतः प्राप्यरूपेऽन्नमयेऽप्यत्र व्याख्यातं तदवयवसाम्य निःसन्दिग्धमित्यर्थः । प्रदर्शयतीवेति वा पाठः । प्राणमये आहुः । * तदन्तर इत्यादि * । अत्र, * बलेत्यादिना प्राणादित्रयस्य कार्यमुक्तम् । कोशाद्भेदश्च दर्शितः । स पञ्चवृत्तिको दशवृत्तिको वा अयं तु त्रिवृत्तिकः । तस्य सञ्चारो नियते देशे हृदयादौ । अस्य तु सर्वत्राकाश

तदनु वैदिकव्यवहारः। स च मनोमयः पुरुषः। आदेशः कर्मचोदना। ब्राह्मणानि सशेषाणि। अथर्वाङ्गिरसे ब्रह्मकर्मत्वात् प्रतिष्ठा। तदनु नानाविधयागादिसाधनत्वतः फलं विज्ञानमयः। तत्र श्रद्धा आपः। तृतीयाध्याये त्वयमर्थो विस्तरेण

इति स तस्य स्वरूपलाभहेतुत्वादात्मा। स तु देहे स्थितोऽयं तु सर्वस्यां पृथिव्यामिति। अतो द्विविधभोगसाधनत्वेन साभिमानाय द्वयोः कथनमित्यर्थः। अग्रिमप्रयोजनादिकमाहुः * तदन्वित्यादि * लौकिके व्यवहारे वय.प्रभृतिभिः स्वातन्त्र्यसम्पत्तौ सत्यां वैदिके प्रवर्तत इति वेदप्रयुक्तो मनोमात्रेन्द्रियप्राणव्यापारस्तस्यानन्तरभावी। तस्य च लौकिकाद् भेद, शब्द इति चेन्नातः प्रभवाद् इत्यत्र सोपपत्तिकं वक्तव्यः। तद्भोगसाधनाय च स वेदात्मको मनोमयः पुरुषः। वेदस्य च मनोमयत्वमेकादशस्कन्धे, स एष जीवो विवरप्रसुतिरितिश्लोकेन भगवतोक्तम्। * सशेषाणीति * सार्थवादानि * ब्रह्मकर्मत्वादिति *। चातुर्होत्रविधाने ब्रह्मणः कृताऽकृतावेक्षकत्वेन तत्कर्मणोऽथर्वसिद्धस्य कर्मस्थैर्यसम्पादकत्वादथर्वाङ्गिरसः प्रतिष्ठारूप इत्यर्थः। शान्त्यादिकर्मबोधकत्वात् पुच्छत्वमपि तस्य बोध्यम। एतेन नानावृत्तिकान्मनोमयकोशाद् भेदोऽपि दर्शितः। एवं द्विविधैहिकभोगौपयिकं द्वयं वैदिकव्यवहारौपयिकं तृतीयं चोक्त्वा पारलौकिकभोगौपयिकं चतुर्थमाहुः। *तदनु नानेत्यादि*। विज्ञानमय इति * विज्ञानप्रचुरः। तस्यावयवानां स्वरूपमाहुः * तत्र श्रद्धेत्यादि *। पञ्चाग्निविद्यायां, पतिष्यामाहुत्यां हुतायामापः पुरुषवचसो भूत्वा समुत्थाय वदन्तीति प्रश्नाग्निरूपणभागे प्रथमाहुतौ, देवाः श्रद्धां जुह्वतीति कथनाच्च श्रद्धारूपा आपो मुख्या इति शिर इत्यर्थः। अस्यार्थस्य काल्पनिकत्वपरिहाराय विचारितत्वं बोधयन्ति * तृतीयेत्यादि * रंहत्यधिकरण इत्यर्थः। ननु प्रथमाहुतौ श्रद्धाहोमस्ततः सोमवृष्ट्यन्नरेतःक्रमेण पञ्चम्यामाहुतौ हुतायां रेतसः पुरुषभाव इत्यवयवपूर्त्यभावात् कथमस्य जीवभो-

लक्ष्यते । यथोक्तकर्तृत्वात् क्रममुक्तिः ।

ऋतसत्यौ मीयमाणानुष्ठीयमानौ धर्मौ योगश्च मुख्यत्वादात्मा । अधोभागो महर्लोकः । तादृशस्य ततोऽर्वाक् संसृतभावात् । ततोऽपि ब्रह्मविद आनन्दमयः फलम् । तस्य स्वरूपस्यैकत्वाद् धर्मभेदेन शिरःपाण्यादि निरूप्यते । तस्य मुख्यतया प्रीतिविषयत्वं धर्मस्तच्छिरः । मोदप्रमोदावपरिनिष्ठितपरिनिष्ठितावानन्दातिशयौ । आनन्दस्तु स्वरूपम् । साधनरूपत्वात् ।

म्यत्वं भोगसाधनत्वं चेत्याकाङ्क्षायामाहुः । * यथोक्तेत्यादि * । अन्नमयाद्युक्तोपासनाकर्तृत्वात् क्रममुक्तिः । एतेनोपासनाकथनप्रयोजनमपि बोधितम् । तथाच श्रद्धादीनामर्थानां पूर्वसिद्धत्वेन सत्त्वादेतच्चयवास्तु पूर्णा एव । तेन जीवस्य क्रमिको भोग इति न दौस्थ्यमित्यर्थः । एतेन संशयविपर्यासादिनानावृत्तिकाद् विज्ञानमयकोशाद् भेदो दर्शितः । अत्रैतत् सिद्धम् । अन्नब्रह्मोपासनायां सर्वान्नप्राप्त्या लौकिको बाह्यो भोगस्ततोऽग्रिमोपासने सर्वायुःप्राप्तिरूप आन्तरः । तदग्रे ब्रह्मानन्दज्ञानात् सर्वदा भयाभावाद् वैदिकः । तदग्रे प्रमादाभावे सति पापनाशपूर्वकसर्वकामाप्तिरूप इति । अवयवान्तरस्वरूपमाहुः * ऋतेत्यादि * । * तादृशस्येति * श्रद्धाहोमात् पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य ततः श्रद्धादिक्रमेण प्राप्तयोग्यदेहस्य । एतादृशस्य ज्ञानप्राप्त्या मुख्यं फलं भवतीति विवेक्तुमाहुः * ततोऽपीत्यादि * । * साधनरूपत्वादिति * ज्ञेयत्वेन साधनशेषतया तथात्वात् । एवं, लोके हीत्यादिना वर्णयतीत्यन्तेनोक्तमर्थं विभज्य पुरुषविधत्वं पक्षिरूपत्वं च समर्थितम् । तेन च मन्त्रे द्वितीयान्नकामपदेनोक्ता एत एव धर्माः । आनन्दमयस्तु विपश्चिद् ब्रह्म । धर्मधर्मिणोः प्रकाशाश्रयवद्भेदेऽप्यभेदादेतादृशमेव व्याख्येयवाक्योक्तं परमिति बोधितम् । तावतापि तस्य विविज्ञानवत्त्वं लक्षणोक्तसच्चिद्वैशिष्ट्यं च सम्यङ् नावगम्यत इति

ब्रह्मपुच्छमिति । श्लोकौ तु सच्चिदंशबोधकौ केवलानन्दत्वपरिहाराय ।

अपरौ तु श्लोकौ माहात्म्यज्ञापनाय । वाग्गोचरागोचरभेदेन । अन्तरानन्दास्तु सर्वे तस्मान्न्यूनतया तदुत्कर्षत्वबोधनाय । तस्मात् सर्वत्र प्रपाठके मान्त्रवर्णिकमेव प्रतीयते । अतो मुख्योपपत्तेर्विद्यमानत्वेनानन्दमयः परमात्मैव । चकारो मध्ये प्रयुक्तो विधिमुखविचारेणाधिकरणसम्पूर्णत्वबोधकः ॥ १४ ॥

तदर्थमग्रिमो ग्रन्थो, न तु साधनशेषब्रह्मज्ञानायेत्याहुः * श्लोकौ त्वित्यादि * श्लोकात् पूर्वं, तदपीत्यनन्तानन्दमयं लक्ष्यीकृत्य, असन्नेवेति श्लोक उक्तः । तेनानन्दमयमेवास्ति ब्रह्मेति वेत्तव्यमित्यायाति । एवमसद्वेतिश्लोके कर्तृत्वसमवायित्वयोर्बोधनाच्चिदंशलाभः तेन द्वावेतौ विपश्चित्त्वसमर्थनायेति फलति । तथा सति तत्तच्छ्लोकोत्तरं यो ग्रन्थः सोऽपि श्लोकोक्तार्थपोषणायेति बोधितम् । तेनाथातोऽनुप्रश्ना इत्यादिना ग्रन्थेन साधनस्य विद्वत्त्वस्य फलोपधायकस्वरूपप्रश्नः । सोऽकामयतेत्यारभ्य तत्त्वेव भयं विदुषोऽमन्वानस्येत्यन्तेनोक्तरूपतया सर्वदा विचारयन् एव पूर्णं विद्वत्त्वं तदेव फलं नान्यथेति सिद्ध्यति । भीषाऽस्मादित्यादिग्रन्थस्य तात्पर्यमाहुः * अपरावित्यादि * भीषाऽस्मादिति श्लोको वाग्गोचरमाहात्म्यबोधनाय । यतो वाच इति तु वागाद्यगोचरतद्बोधनाय । तथाच सव्याख्यानावेतौ परत्वस्य निगमनायेति सिद्ध्यति । गणितागणितानन्दत्वरूपविशेषावगमं विना ज्ञेयब्रह्मणः सकाशात् परस्य निष्कष्टुमशक्यत्वादिति । शेषं स्फुटम् । श्रीभागवते दशमस्कन्धे वेदस्तुतौ, पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु य इत्यनेनायमर्थ उपबृंहितः । अन्नमयादिषु चरम आनन्दमयो भगवानिति । तथा सति तेन पुरुषाकारे समर्पिते सर्वस्य पुरुषाकारता सिद्ध्यति । ये तु प्रसिद्धमन्नमयस्य पुरुषविधत्वं स्वीकृत्य तस्य पुरुषविधत्वमनु प्राणमयाद्यानन्दमयान्तानां पुरुषविधत्वं मूषानिषिक्तप्रतिमान्यायेनाहुः । तैः स्वोक्तदृष्टान्तप्रकार एव न

बुध्यते । मूषानिषिक्तप्रतिमायास्तदान्तराकारानुविधायित्वात् । तस्य च मधूच्छिष्टनिर्मितप्रतिमया समर्पणादत्रापि तेन न्यायेन बाह्याकारानुरोधस्याशक्यवचनत्वात् । तेनैष पूर्ण इत्यत्र तच्छब्देन प्रकृतम्, एतच्छब्देन पूर्वोक्तं च परामृश्य मध्ये, स वा एष इति तदेतच्छब्दाभ्यां च प्रकृतं परामृश्य तस्य पुरुषविधतामित्यत्र पूर्वपरामर्शनम् । ततस्तस्य प्राण एव शिर इत्याद्यवयवकल्पनावाक्ये पुनः प्रकृतपरामर्श इत्येवं व्याख्याने प्रक्रान्तत्यागप्रसङ्गाच्च । तस्मान्नैते कोशाः, किन्तु पञ्चापि फलरूपा व्यापका भिन्ना एव । एतल्लोकत्यागोक्तिपूर्वकं तत्तत्प्राप्तिश्रावणात् । तथा श्रुत्यन्तरे, अन्नात् प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिः स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगत् स स भूतं स भव्यमित्यादिना अनादिपञ्चविधस्योक्तरीत्या पञ्चात्मकस्य पुरुषस्य सर्वव्याप्तिसर्वात्मकत्वबोधनपूर्वकं, ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वानित्यनेन तद्विदो मुक्तिश्रावणाच्च । कोशास्त्वन्नमयप्राणमयमनोमयविज्ञानमयमानन्दमयमात्मा मे शुध्यन्तामिति श्रुत्यन्तरे शोध्यत्वलिङ्गाः प्रतिशरीरं भिन्ना एव । स इति स्वस्वजीवीयत्वरूपभेदलिङ्गात् । अतस्तद्भ्रमेणात्र तदङ्गीकरणमपि प्रकृतविरुद्धमेवेति । ननु शोध्यत्वलिङ्गिकायां श्रुतौ सिद्धवन्निर्देशादत्र चाकारसमर्पणालिङ्गात् कोशत्वं चतुर्णां सिद्ध्यति । मतान्तरे तु तत् सृष्ट्वा तदेवानुप्राविशदित्यनुप्रवेशस्याग्रे श्रावणादनुप्रवेशस्य च श्रुत्यन्तरे, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति जीवकरणकत्वबोधनादत्र शारीरपदाच्च पञ्चानां कोशत्वम् । द्वितीयवर्णकरीत्या विचारे त्वग्रे अस्माल्लोकात् प्रेत्येत्यादिना इत उत्क्रमणपूर्वकमन्नमयाद्युपसंक्रमणश्रावणादेतेषामेव प्राप्यतया फलरूपत्वं सिद्ध्यति । तत्र सिद्धान्ते चतुर्णां विभूतित्वं, पञ्चमस्य परपुरुषरूपत्वात् परमफलत्वम् । पूर्वपक्षे तु पञ्चानामपि विभूतिरूपत्वमिति विशेषः ।

तथापि श्रुतिसमर्थनं तु सर्वत्र तुल्यमतः कुत उत्क्रमणं, कस्य प्राप्तिरित्येतत् सर्वमतेऽपि विचारणीयमेवेति चेत् । अत्रेदं प्रतिभाति । तथाहि । ब्रह्मविदाप्नोति परमिति प्रतिज्ञानात् तत आनन्तं तद्विवरणे फलत्वस्यैवोपपादनादिदं फलप्रकरणमेवेति निश्चीयते । एवं सत्यनु-

प्रवेशश्रुतिः प्रकरणेन सन्दष्टा परस्य फलरूपस्यैव सर्वत्रानुप्रवेशं समर्पयति । न त्वप्रकरणिनो जीवस्य । नच लिङ्गाद् बाधः। तदनु प्रविश्य सच्च त्यच्चाभवदित्यादिना, सत्यमित्याचक्षते इत्यन्तेन वाक्येनानुप्रविष्टसर्वात्मकतायाः सर्वस्य सत्यतायाश्च श्रावणादनुप्रवेशस्य नामरूपव्याकरणार्थताया अश्रावणाच्चास्यानुप्रवेशस्य तस्मादनुप्रवेशाद् भिन्नत्वेनास्य जीवलिङ्गत्वाभावात् । अन्यथा वाक्यपीडापत्तेः । अग्रे च, यदेष आकाश आनन्दो न स्यादित्यनेनानन्दस्यैवान्तराकाशवर्तित्वश्रावणेन प्रकरणस्यैव पोषाच्च । अत आकारसमर्पणस्याप्युक्तरीत्या ब्रह्मकोशत्वसाधकतया मैत्रायणीयश्रुतौ, विश्वभृन्नामैषा तनूर्भगवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येति भगवत्तनुत्वश्रावणेन, अन्नात् प्राणा भवन्ति भूतानामिति पूर्वोक्ततैत्तिरीयश्रुतौ व्यापकत्वादिब्रह्मलिङ्गश्रावणेन चैतेषां जीवकोशरूपत्वे दूरानिरस्ते, एते विभूतिरूपाः प्राप्या एवेति सिद्धम् । जीवकोशास्त्वेतद्व्यष्टिरूपा इति तावत् प्रेत्यपदोक्तोत्क्रमणलिङ्गादत्र बोधिताः कल्प्यन्ते । तेन श्रुत्यन्तरीयः सिद्धवन्निर्देशोऽप्युपपन्न एव । एवमेतेषां विभूतित्वे जीवकोशाद् भेदे च निश्चिते पूर्वोक्ताभ्यासादिभिरानन्दमयस्य ततोऽपि निष्कर्षात् परमफलत्वं सुसिद्धमिति ब्रह्मवज्जीवः पूर्वोक्तविभूतिव्यष्टिरूपेभ्यः स्वकोशेभ्य उत्क्रम्य मान्त्रवर्णिकसूत्रभाष्योक्तरीत्या क्रमेण समष्टिभूतान्नमयाद्यानन्दमयान्तानि विभूतिरूपाणि प्राप्यानन्दमयो भूत्वा, एतमानन्दमयं परं ब्रह्माप्नोति । आनन्दमानन्दमयोऽवसान इति द्वितीयस्कन्धवाक्यात् । यद्यप्यत्रानन्दमयो मध्ये नोक्तस्तथापि, तडितोऽधि वरुण सम्बन्धादितिन्यायेन श्रुत्यन्तरसिद्धत्वान्निवेशनीय इति नात्र विवादलेशः । एवमत्र त्याज्येभ्योऽन्नमयादिकोशेभ्य उत्क्रमणं तत उक्तरीत्या विभूतिरूपाणां तेषामानन्दमयस्य परस्य च क्रमेण प्राप्तिरिति वर्णकद्वयोक्तमुपपन्नतरमित्यवधेहि ।

ननु भवत्वेवं ज्ञानमार्गीयाणां प्राप्तिः, परन्तु भक्तिमार्गीयाणां प्राप्तिः कथं व्युत्पाद्या । प्राप्तिर्हि पूर्वमसम्बद्धस्य पाश्चात्यसम्बन्धरूपा । अत्र चाकारसमर्पकत्वेनानन्दमयस्य लौकिकेऽपि शरीरे स्थितेः पूर्वं सिद्धत्वेन विभूतिरूपाणां चाकाशवद् व्यापकतया स्थि-

निषेधमुखेन चतुःसूत्र्येदमेवाधिकरणं पुनर्विचार्यते सुदृढत्वाय । इदमत्राकूतम् । जीव एवानन्दमयो भवतु । फलस्य पुरुषार्थत्वात् । स ब्रह्मविदानन्दमयो भवतीति स्वर्गादिसुखवदलौकिकमेव रूपमानन्दमयं जीवस्य फलभूतमिति प्राप्तेऽभिधीयते ।

तेरर्थात् सिद्धत्वेन भक्तशरीरेष्वपि सत्तया पक्षिरूपेण तेषु भक्तशरीरेषु प्रवेशनिर्वचनाशक्तौ फलप्राप्त्युत्पादयितुमशक्यत्वादिति चेद् । अत्रोच्यते । अनुप्रवेशश्रुत्या, आविशदिति श्रुत्या च पुरेषु भगवत्प्रवेशो निर्विवादः । पक्षिलिङ्गेनान्येषामपि गतिप्रतिबन्धकीभूतव्यापकत्वोल्लङ्घनात् स निर्विवादः । या पुनः सार्वदिकी स्थितिः सा तु तावन्मात्रकार्यार्थत्वादेतत्फलानुभावने प्रयोजिका न भवत्येव । यथा काष्ठादिषु वह्निस्थितिर्दाहादौ । एवं सति यर्हिष्ठो भक्त्या यदान्तः प्रविशति, हृद्येव वा मायामपसार्य प्रादुर्भवति तदा अक्षरात्मकानि विभूतिरूपाण्यपि भगवता सह त्रिशन्त्याविर्भवन्ति वा । अक्षरस्य चरणाद्यात्मकत्वेन तेषामपि तत्त्वात् । इयं तु लौकिकशरीरे व्यवस्था । यदा त्वेतत्त्यागेनालौकिकशरीरे प्राप्तिस्तदा तु तत्र वर्तमानत्वात् तेषां कार्यकारित्वमेवेति विशेषः । एवञ्चाधिभौतिकरूपेण व्याप्तानि तिष्ठन्त्याध्यात्मिकेन प्रविशन्त्याधिदैविकेन कार्यं कुर्वन्ति । आधिभौतिकत्वं च लौकिके नियतम् । आधिदैविकं भगवति नियतं पर्यवसन्नम् । अवान्तरेषु सर्वेषु त्वाधिदैविकादित्रयमपि यथासम्भवं सव्यपेक्षमिति, न क्वापि प्राप्तिव्युत्पत्तिप्रतिबन्ध इति जानीहीति दिक् ॥ १४ ॥

प्रकृतमनुसरामः । अग्रिमसूत्रमवतारयितुं तत्र प्रयोजनमाहुः * निषेधेत्यादि * ननु को वा सन्देहो येन निषेधमुखविचारावश्यकतेत्यत आहुः । * इदमित्यादि * । यद्यप्यानन्दमयस्य फलत्वं, सर्वापेक्षयोत्कर्षश्च प्रतिपादितस्तथापि फलस्य पुरुषार्थत्वेन पुरुषशेषत्वात्, तस्यैव एव शारीर आत्मेत्यानन्दमयेऽपि श्रावणाज्जीव एवानन्दमयो भवतु । नच मन्त्रवर्णविरोधः । स ब्रह्मवित् सर्वान्

नेतरोऽनुपपत्तेः ॥ १५ ॥

इतरो जीवो न । आनन्दमयो न भवति । कुतः । अनुपपत्तेः । जीवस्य फलरूपत्वमात्रेणानन्दमयत्वं नोपपद्यते । तथा सति तस्य स्वातन्त्र्येण जगत्कर्तृत्वेऽप्यलौकिकमाहात्म्यवत्त्वेन निरूपणं नोपपद्यते । अतो न जीव आनन्दमयः ॥ १५ ॥

भेदव्यपदेशाच्च ॥ १६ ॥

इतोऽपि न जीव आनन्दमयः । यतो भेदेन व्यपदिश्यते । रसꣳ ह्येवायं लब्ध्वानन्दी भवतीति । आनन्दोऽस्यास्तीत्यानन्दी । एष ह्येवानन्दयाति । आनन्दयतीत्यर्थः ।

कामान् अश्नुते, विपश्चिता ब्रह्मणा सह भूत आनन्दमयो भवतीत्यर्थोक्तौ तदभावात् । तेन यथा स्वर्गसुखमस्य फलभूतं तथा अखण्डैकरसं मुक्तावस्थालौकिकरूपमपीत्यर्थः । सूत्रं पठित्वा व्याचक्षते ॥ नेतरोऽनुपपत्तेः ॥ इत्यादि । * तथा सतीति * जीवस्यानन्दमयत्वे सति । *निरूपणमिति* ब्रह्मणो निरूपणम् । तथाच, तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिनोक्तं माहात्म्यं जीवेऽपि गच्छदेतां श्रुतिं विरुन्ध्यादिति माहात्म्यश्रुत्यनुपपत्तेस्तथेत्यर्थः । नचात्रैवं जीवस्य जगत्कर्तृत्ववारणे कृते फलाध्यायस्य वक्ष्यमाणस्य जगद्व्यापारवर्ज्जसूत्रवैयर्थ्यापत्तिरिति शङ्क्यम् । तत्रैतादृशजगद्व्यापाररा-हित्यस्याविवक्षितत्वेनावैयर्थ्यात् ॥ १५ ॥

भेदव्यपदेशाच्च ॥ रसꣳ ह्येवायं लब्ध्वानन्दी भवतीत्यानन्दीति लब्धृलब्धव्यभेदव्यपदेशो न जीवभेदगमकः । आत्मलाभान्न परं विद्यत इत्यत्र स्वरूपैक्येऽपि लब्धृलब्धव्यभेदव्यपदेशदर्शनेन तस्यानियामकत्वादिति परे मन्यन्ते । तन्निवारणायाहुः *एष ह्येवेत्यादि* तथाचानया श्रुत्याऽऽनन्दनीयानन्दकत्वेन भेदनिर्देशाज्जीवब्रह्मभेदे सिद्धे, आनन्दीति निर्देशस्यापि भेदोपोद्बलकत्वे बाधकाभावात् । आत्मलाभश्रुतावपि

चकारात् सूत्रद्वयेन जीवो नानन्दमय इति निरूपितम् ॥१६॥

तर्हि जडो भवत्वानन्दमयः । न । आन्तरत्वान्न कार्यरूपो भवति । किन्तु कारणरूपः । स स्वमते नास्त्येव । मतान्तरे प्रकृतिर्भवेत् । तन्निवारयति ।

कामाच्च नानुमानापेक्षा ॥ १७ ॥

जडा प्रकृतिर्नास्तीति कारणत्वेन निराकृतैव । अथैतद्वाक्यान्यथानुपपत्त्या सत्त्वपरिणामरूपा कल्प्यते । सा कल्पना नोपपद्यते । कुतः । कामात् । आनन्दमयनिरूपणानन्तरं, सोऽकामयतेति श्रूयते । स कामश्चेतनधर्मः । अतश्चेतन एवानन्दमय इति । चकारात्, स तपोऽतप्यतेत्यादि । अतोऽनुमानपर्यन्तमर्थमबोधयद् वाक्यं न तिष्ठतीत्यर्थः ॥ १७ ॥

त जीवलाभस्तात्पर्यविषयः, किन्तु परमात्मलाभ एव तत्र भूम्न एवात्मतया सनत्कुमारेण नारदं प्रति छान्दोग्ये व्याख्यातत्वात् । अतो जीवब्रह्मैक्यस्य तद्रीत्या अभ्युपगमैकशरणत्वमिति दृष्टान्तोऽप्यसङ्गत एवेत्यर्थः । * नानन्दमय इति * कस्यामप्यवस्थायाम् ॥ १६ ॥

कामाच्चेति सूत्रद्वयमवतारयन्ति * तर्हि जड इत्यादि * । * नेति * एतदेव विभजन्ते * आन्तरत्वादित्यादि * । * मतान्तर इति * सांख्यमते । * जडेत्यादि * प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादौ प्रधानादिशब्दैः श्रुतावुक्तापि यादृशी सांख्यैर्जडा मूलकारणभूताङ्गीक्रियते तादृशी श्रुतौ नास्तीतीक्षतिसूत्रे कारणत्वेन निराकृतैव । अथ तस्य प्रियमेवेत्यवयवकल्पना वाक्यान्यथानुपपत्त्या आत्मपदार्थं गौणमङ्गीकृत्य आनन्दस्य सुखात्मकत्वेन सत्त्वधर्मत्वात् सत्त्वपरिणामरूपा कार्यरूपा कल्प्येत, सा तथेत्यर्थः । * अनुमानपर्यन्तमित्यादि * । वाक्यश्रवणोत्तरम, आनन्दमयपदोक्तोऽर्थः सत्त्वपरिणाम आनन्दविकारत्वाल्लौकिकसुखवदित्येवं यावदनुमीयते तावत् ततः पूर्वमेव कामवाक्यश्रवणात् तत्प्रतिहन्यतेऽतस्तथेत्यर्थः ॥ १७ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥

इतश्च न जड आनन्दमयः। अस्मिन्नानन्दमये अस्य जीवस्य च आनन्दमयमात्मानमुपसंक्रामतीति तेन रूपेण योगं शास्ति। फलत्वेन कथयतीति। न हि जीवस्य जडापत्तिर्युक्ता। ब्रह्मैव सन् ब्रह्माप्येतीति वदस्याप्यर्थः। तस्मान्नापि जीवो, नापि जडः। पारिशेष्याद् ब्रह्मैवेति सिद्धम्।
ये पुनरधिकरणभङ्गं कुर्वन्ति, तेषामज्ञानमेव। यतस्तैरप्यानन्दमयः कः पदार्थ इति वक्तव्यम्।

अस्मिन्नस्य च तद्योगं शास्ति॥ * इतिवदस्याप्यर्थ इति * आनन्दमानन्दमयोऽवसान इति श्रीभागवतीयवाक्यादानन्दमय एव सन्नानन्दमयमात्मानमुपसंक्रामतीत्यर्थो ज्ञेय इत्यर्थः।

एवमधिकरणव्याख्यानं समाप्य विकारशब्दसूत्रे विशेषेणाऽदूषणादधुना परमतं दूषयन्ति स्वोक्तसमर्थनाय। * ये पुनरित्यादि *। ये शाङ्करा एकवारं सर्वसम्मतप्राचीनरीत्या व्याख्याय, पुनरिदं त्विह वक्तव्यमित्यादिना प्रायपाठविरोधमाकस्मिकत्वमेकस्यैवावयवित्वावयवत्वाभ्यामसामञ्जस्यम्, असन्नेवेत्यादिश्लोकद्वयविरोधमानन्दप्राचुर्येऽपि दुःखसाहचर्यमब्रह्मत्वापत्तिमानन्त्यैकत्वविरोधमानन्दमयपदानभ्यासं च प्रदर्श्यानन्दमयपदस्य ब्रह्मपरत्वानादरणेन व्यासोक्तस्याधिकरणस्य भङ्गं कुर्वन्ति तेषां श्रुत्यर्थाज्ञानमेव। यतस्तैरप्यानन्दमयपदार्थः क इति प्रश्ने तस्योत्तरं वक्तव्यम्। तस्यानुक्तत्वाद् तथेत्यर्थः। नचानन्दमयपदस्य ब्रह्मपरतायां दूषितायां जीवो वा जडो वा पारिशेष्यादानन्दमयः सेत्स्यतीति कथमनुक्तमिति वाच्यम्। दूषणानामसङ्गतत्वात्। तथाहि। अस्यामुपनिषद्यारम्भ एव ब्रह्मविदाप्नोति परमिति ब्राह्मणोक्तोऽर्थः सत्यं ज्ञानेत्यस्यामृचि संक्षेपेणोक्तः। स एव सम्पूर्णे प्रपाठके विस्तारेण व्याख्यायते। तत्र ज्ञानशेषस्य ब्रह्मण ऋचि स्वरूपलक्षणवाक्यादेवासन्दिग्धं प्रतीतेस्तत्र सन्देहानुदयेन तदर्थमुपपादनविस्तारस्याप्रयोजनकत्वात् फलवाक्ये

विभक्तिवचनयोर्भेदेन सन्देहाच्च तदर्थं एव सम्पूर्णवाक्यम् उपपादनीयः । अत्र उपपादनबीजत्वेन ज्ञानदोषस्य ब्रह्मणो मन्त्रवर्णे प्रकृतत्वकथनमेवासङ्गतम् । तत एव बुद्धिकल्पितविषय पञ्चानां कोशात्वकथनमपि तथा । हृदयस्थयोरैक्याङ्गीकारेऽपि शब्दान्तरप्रयोगेन तदनुसन्धानात् तथा । विकारान्यथात्वस्य प्रागुपपादितत्वाद्ब्रह्म । पाठविरोधो लिङ्गकाल्पनिकत्वोक्तिश्चापि तथा । प्रियाद्यवयवयोगस्य बाधकत्वकथनमपि तथा । द्वितीयवर्णकसम्मतिस्पष्टे स्ववाद्यस्य, तदावरीतिकसमकहृदयाधिकरणप्रादुर्भावाज्ञानात् । केवलनिर्विशेषब्रह्मण इत्येकस्याधिकरण एव निरस्तत्वाच्च । एकस्यावयवावयवित्वावविरोधकथनमपि, प्राणस्य प्राणमिति श्रुतिस्तस्य, नेह नानास्तीत्यागमार्थाज्ञानादेव । आकारदर्शनं विना नानात्वस्फुरणायोगेन तस्य निषेधानर्हत्वात् तेनैवाकारप्राप्तौ सत्यां नानात्वनिषेधस्यावयवावयविभावविरोधात्तत्र एव पर्यवसानादिति । एवं, कृत्स्नः प्रज्ञानघन एवेति कृत्स्नशब्दादपि ज्ञातव्यम् । अकृत्स्नत्वापादकभेदहेतुद्वयं विना सेह निष्कारणकलककृत्स्नपदवैयर्थ्यस्य दुष्परिहरत्वादिति । एवमग्रेऽपीति लोकस्य ब्रह्मपुच्छत्वेनुक्तब्रह्मरूपत्वोपेक्षणमपि निर्हेतुकम् । अन्नमयादिकोशानामिवास्याप्यवयवविपर्ययप्रकल्पनायास्त्यागे बीजाभावात् । न च प्रियमोदादिरूपस्यानन्दमयस्य सर्वप्रतीतिगोचरत्वात् तद्विषयकभावाभावशङ्काभावादेव तस्य लोकस्यासङ्गतिरेव बीजमिति युक्तम् । उक्तप्रियादिपञ्चावयवविशिष्टावयविरूपेणानन्दमयपुरुषज्ञानस्य स्वतः कान्यदर्पणेनोक्तश्रुतेर एव ज्ञानसम्भवे तत्र विश्वासरहितस्य निन्दाया विश्वस्तस्य प्रशंसायाश्च बोधनेनास्यासङ्गत्यभावात् । एवं, यतो वाच इति वाक्यशेषस्य निर्विशेषसमर्पकत्वकथनमपि तथा । नायमात्मेति मन्त्रे तदनुविवरणश्रवणेन तदुत्तरार्धे आचितस्यानन्दवित्त्वस्यापि तत एव निष्ठाः तदननुगृहीतवाङ्मनसयोरगोचरत्वस्यापि तत एव निर्धर्मत्वस्य निर्विशेषसमर्पकतायाः कल्पयितुमशक्यत्वात् । किञ्चोपक्रमे प्रियवेदनाविषयाणामलौकिकानामेव प्रियादीनामत्र पूर्वोक्तरीत्या प्रसक्तत्वात् तेषां प्रतिशरीरं भेदाभावादेवानन्दमयस्यानेकत्वमपि न शङ्क्यकल्पनम् । अत्र आनन्दमयेऽनेकत्वप्रसञ्जनाय लौकिकानां प्रियादीनामादरोऽप्यसङ्गत एव । यत्पुनर्नचानन्दमयपदाभ्यासः श्रुत-

न तावज्जीवः। तस्य ब्रह्मज्ञानफलत्वेन, ब्रह्मणा विपश्चितेत्यानन्दमयस्योक्तत्वात्।

इत्यादिना आनन्दपदाभ्यासे आनन्दमयपदाभ्यासस्याशक्यकल्पनत्वमुक्तं, तदपि तथैव। यतोऽभ्यासोऽभ्यस्यमानं भिन्दन्नाभ्यस्तपदवाच्येन सामान्यरूपेण तं भिनत्ति. किन्तु पदान्तरोक्तेन विवक्षितरूपेण। समिधो यजतीत्यादिरूपे तदुदाहरणे पञ्चसु यागत्वे समानेऽपि पदान्तरोक्तसमिदादिरूपेणैव भेददर्शनात्। एवं सति तत्र यथाभ्यस्तो यजतिः समिदादिपदाभ्यासकल्पनानपेक्ष एव समिदादिरूपयागभेदसाधकस्तथात्रानन्दपदमप्यानन्दमयपदाभ्यासकल्पनानपेक्षमेवानन्दमयरूपानन्दभेदसाधकमिति स्फूर्त्या तादृशशङ्काया एवानुदयादिति बोध्यम्। अथानन्दवल्लीभाष्ये यदुक्तम्। आनन्द इति विद्याकर्मणोः फलं, तद्विकार आनन्दमय इति। प्रियादिवासनानिर्वृत्तो ह्यात्मानन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यत इति च। तदप्यसङ्गतमिति। तत्रान्त्यं दूषयन्ति * नेत्यादि * अयमर्थः। ब्राह्मणं परशब्देनोदितं फलं तदुव्याख्यारूपायामृचि न केवलेन कामपदेन शक्यवचनम्। तेषां ज्ञेयब्रह्मापेक्षया अपरत्वेन ऋगुपजीव्यब्राह्मणस्थपरशब्दविरोधापातात्। किन्तु विपश्चिद्ब्रह्मपदाभ्यां सहितेन। अतः, सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्येतावन्तं ग्रन्थं व्याख्यातुं सर्वप्रपाठक इत्युपपादितम्। तथा सत्यन्नमयादीन्निरूप्य सर्वान्तरः प्रियाद्यावयववानानन्दमयो यो व्याख्यायते स जीवस्य ब्रह्मज्ञानफलत्वेनैव व्याख्यायते। तत्रावयवा एव कामपदार्थोऽवयव्येव विपश्चिद् ब्रह्मेति सिद्ध्यति। उत्तरत्रैतमानन्दमयमात्मानमुपसंक्रामतीत्यनेन तादृशस्य तस्यैव पर्यवसितफलत्वेनोपसंहारात् स यदि जीवत्वेन विवक्षितः स्यात् प्रथमान्तत्वेनात्र निर्दिष्टः स्यात्।सोऽश्नुत इति श्रुतौ फलशेषिणो जीवस्य प्रथमान्तत्वेनैव निर्दिष्टत्वात्। भोक्तृफलयोरैक्यापत्तिश्च स्यात्। किञ्चान्नमयादीनां व्यवहारे सतामन्न प्रायपाठेनाकस्मात् तद्विहाय स्वप्नोपलभ्यमानग्रहणे तद्विरोधोऽपि। किञ्च ब्रह्मांशस्याविद्ययात्यन्तभिन्नमानिनो जीवस्य ब्रह्मवेद ब्रह्मैव भवतीत्युक्तो ब्रह्मभाव. सर्वात्मभावरूपं ज्ञानं तदधिकार-

अथ जडः स्वर्गवत् तदा किमाश्रित इति वक्तव्यम् । जडाश्रितत्वे कर्मफलमेव स्यात् । ज्ञानस्याप्यवान्तरफलमिति चेन्न। तर्हि किमानन्दात् तस्यातिरिक्तं फलं भविष्यति । जडचिद्रूपतायाः पूर्वमेव विद्यमानत्वात् । अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीतिश्रुतिविरोधश्च ।

रूपा अविद्यानिवृत्तिश्च न ब्रह्मज्ञानफलत्वेन वक्तुं शक्यानि । ब्रह्मभावस्यावरणभङ्गमात्रेण स्वतो भवनस्य भवतिना बोधनात् प्रकृते तदङ्गीकारे द्वितीयाविभक्तिपीडा लक्षणादोषश्च स्याताम् । ज्ञानस्य तथात्वाङ्गीकारे तु तस्य, स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवं विदितसाधनशेषभूतपुरुषविशेषणत्वेन तत्कोटिनिविष्टत्वात् । साधनरूपस्य फलरूपस्य च ज्ञानस्य वैजात्यात् साधनफलभावव्याहतिश्च । तेन, एतं ह वा व न तपतीत्यादिकं ब्रह्मविन्माहात्म्यबोधनद्वारा विद्यादिमाहात्म्यायैव सिद्ध्यति । अतः श्रुतिव्याख्यातस्यासङ्गतत्वादानन्दमयो जीव इत्यसङ्गतम् । एवं द्वितीयं दूषयित्वा आद्यं दूषयन्ति । * अथ जड इत्यादि । * जीवाश्रितत्वे भोक्तृशरीरान्तःपातात् तद्व्यतिरिक्तं जडं वा ब्रह्म वा आश्रित इत्यनयोर्मध्ये एकं किञ्चिद् वक्तव्यम् । तत्राद्ये ज्ञानफलत्वाभावादुक्तश्रुतिविरोध एव दूषणम् । यदि तदविरोधाय ज्ञानावान्तरफलत्वमङ्गीक्रियते, तदा मुख्यं फलमानन्दादतिरिक्तं किं भविष्यतीति वक्तव्यम् । ब्रह्मभावादीनां फलत्वाङ्गीकारे दूषणानामुक्तत्वात् संसारदशायां जडरूपतायाः ब्रह्मविरवदशायां चिद्रूपतायाश्च सत्त्वात् । अत आनन्दमयस्य विकारत्वाङ्गीकारे फलबोधकश्रुतिविरोधः सर्वथा दुर्वार इत्यर्थः । दूषणान्तरमाहुः । * अस्येत्यादि । स एको ब्रह्मण आनन्द इत्यस्य व्याख्याने ब्रह्मानन्दस्य परमत्वायैतस्यैवानन्दस्येति श्रुतिस्तैरुपन्यस्ता । आनन्दमयस्य विकारत्वे ब्रह्मानन्दैकदेशत्वाभावात् स्फुट एव तद्विरोध इत्यानन्दमयस्य विकारत्वेन ब्रह्मानन्दैकदेशत्वाभावात् स्फुट एव तद्विरोध इत्यानन्दमयविकारत्वाङ्गीकारः सर्वथा श्रुतिविरुद्ध इत्यधिकरणभङ्गो न युक्त

पुच्छत्वेन ब्रह्मवचनात् प्रद्वेष इति चेत्, तर्हि स एको ब्रह्मण आनन्द इत्यत्रापि षष्ठ्या भेदनिर्देशाद् ब्रह्मणः परमपुरुषार्थत्वं नाङ्गीकुर्यात् । उपक्रमादिसर्वविरोधश्च पूर्वमेव प्रतिपादितः । यदप्यधिकरणमन्यथा रचितं, ब्रह्मपुच्छमिति । तत्र न पुच्छस्य ब्रह्मत्वं प्रतिपाद्यते, येनान्यथा समाधानं भवेत् । किन्तु ब्रह्मणः पुच्छत्वमिति पूर्वन्यायेनेदं पुच्छं प्रतिष्ठेतिवत् । तत्र श्रुतिबाधो ब्रह्मणाप्यशक्यः ।

इत्यर्थः । अधिकरणभङ्गस्याशयान्तरमुद्भावयन्ति । * पुच्छत्वेनेत्यादि । * जिज्ञास्यत्वेन मुख्यतया शास्त्रारम्भे बोधितस्य ब्रह्मणोऽनयाधिकरणरचनया न्यूनता समायातीत्यतः प्रद्वेषादधिकरणभङ्ग इत्यर्थः । तद् दूषयन्ति । * तर्हीत्यादि * । स्वप्रधानस्याप्रधानत्वापत्त्या यदि प्रद्वेषस्तदा ब्रह्मण आनन्द इत्यत्राभिन्नस्य षष्ठ्या भेदनिर्देशाद्भयाभावरूपस्य फलस्यानन्दकर्मकज्ञानेनैवोक्तत्वात् तस्य परमपुरुषार्थत्वमपि नाङ्गीकुर्यात् । पुच्छत्ववचनवद् भेदवचनस्यापि प्रद्वेषबीजस्य सत्त्वात् । अथ यदि राहोः शिर इतिवद् ब्रह्मण इत्यभेदषष्ठी तर्हि तस्य प्रियमेवेत्यादावप्यभेदषष्ठीमाहत्य पुच्छत्वं भाक्तमङ्गीकार्यं, न त्वधिकरणं भङ्क्तव्यमित्यर्थः । भङ्गे पूर्वोक्तानि दूषणानि स्मारयन्ति । * उपक्रमेत्यादि * । ननु न वयमधिकरणं भञ्ज्मः किन्तु प्रकारान्तरेण तत् समर्थयाम इत्याकाङ्क्षायां तद् दूषयितुमनुवदन्ति । * यदपीत्यादि । * ब्रह्मपुच्छमिति । * ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते, उत स्वप्रधानत्वेनेति सन्देहे पुच्छशब्दादवयवत्वेनेति प्राप्तम् । तत्रोच्यते ॥ आनन्दमयोऽभ्यासात् ॥ आनन्दमयस्यात्मेत्यत्र ब्रह्मपुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते । असन्नेव स भवतीति निगमनश्लोके केवलस्य ब्रह्मण एवाभ्यस्यमानत्वादित्येवं रचितमित्यर्थः । तद् दूषयन्ति । * तत्र नेत्यादि । * ब्रह्मपुच्छं प्रतिष्ठेति वाक्ये पुच्छस्य यदि ब्रह्मत्वं प्रतिपाद्येत तदा शङ्का स्यात् । पूर्वं वेदनविषयतया लक्षितस्वप्रधानब्रह्मरूपत्वं पुच्छस्य कथमिति । तदा समाधानमपि सम्न-

मौर्ख्यं चैतत् । आनन्दमयस्यैव ब्रह्मत्वे न कोऽपि दोषः स्यात् । आनन्दमयस्याब्रह्मत्वं परिकल्प्य तत्पुच्छत्वेन ब्रह्म वेदबोधितमिति ज्ञात्वा तत्समाधानार्थं यतमानो महामूढ इति विषयफलयोः । किं मुख्यमित्यप्यनुसन्धेयम् । पुच्छत्वोक्तिस्तु पूर्वभावित्वाय । अत एव ज्ञानविषयत्वं प्रतिष्ठा च । आनन्दमयो

वेदभ्यासात् स्वप्रधानत्वमिति । दृश्यते तु विपरीतम् । तत्र ब्रह्मपदाभ्यासेन कथं समाधानं भवेत् । अभ्यासो हीतरशब्दश्रुतमर्थं स्थापयन्नभ्यस्यमानं परिच्छिनत्ति, न तु तदर्थं बाधते । समिधो यजतीत्यादौ तदुदाहरणे तथा दर्शनात् । एवमत्रापि ब्रह्मपदाभ्यासस्तत्समभिव्याहृतपदश्रुतं पुच्छमितरेभ्यः परिच्छेत्स्यति, न तु बाधिष्यते । अतो ब्रह्मणोऽवयवश्रुतिबाधोऽनया रीत्या ब्रह्मणा सर्ववेदपाठिनापि कर्तुमशक्यः, किं पुनरितरेणेति व्यर्थमिदमन्यथा रचनमित्यर्थः । दूषणान्तरमाहुः । * मौर्ख्यमित्यादि । * एतत् * । अन्यथा रचनम् । * चकारादधिकरणभङ्ग उभयमपि मौर्ख्यम् । तत्र हेतुरानन्दमयस्येत्यादि । * त्वदुद्भावितानां दोषाणां प्रागेव परिहृतत्वादन्येषां चाभावात् तथेत्यर्थः । ननु प्रकारान्तरेण योजनं कौशलाय भवतीति कथं मौर्ख्यमित्यत आहुः । * आनन्दमयस्याब्रह्मत्वमित्यादि * । तथाच भवेत् कौशलाय यद्यानन्दमयस्याब्रह्मत्वं न कल्पयेत्, पुच्छश्रुतिं च न बाधेत । तत्तु करोतीत्यतस्तथेत्यर्थः । ननु शास्त्रं प्रकृतं ब्रह्मैव मुख्यमतस्तस्य तथात्वं साधयितुमयं यत्नः कथं मौढ्यायेत्यत आहुः । * विषयेत्यादि * । प्रकृतत्वस्योभयत्र तौल्यान्न तेन रूपेण मुख्यत्वं निर्णेयं, किन्तु रूपान्तरेण । तथा सति तु त्वदभिमतस्य न मुख्यत्वं, किन्तु फलस्येति विषयमुख्यत्वार्थमपार्थो यत्न इत्यर्थः । ननु भवत्वेवं तथापि विषयत्वेनावश्यकस्य पुच्छत्वोक्तिकृतोऽपकर्षः कथं सोढव्य इत्यत आहुः । * पुच्छेत्यादि । * सा तु पूर्वं तत्प्राप्तिबोधनाय । न हि द्वारं गृहं वा अप्राप्य तत्र स्थितं पुरुषं कश्चित् प्राप्नोति । तेन तथेत्यर्थः । अत्र गमकमाहुः * अत इत्यादि * । आनन्दमयस्य तत्र स्थितौ गमकमाहुः * प्रतिष्ठेत्यादि * नन्वेवं सति द्वैतमापद्यते, तच्च

ब्रह्मण्येव प्रतिष्ठित इति । अत्रावयवावयविभावो भाक्त इति तु युक्तम् । प्राणमयादीनामपि तथात्वात् । अन्तःस्थितस्य बाह्यानुरोधेन तथात्वमिति सर्वं सुस्थम् ॥ १८ ॥

नेह नानाऽस्तीत्यादिभिर्निषिद्धमतो नोक्तं साधीय इत्यत आहुः । * अत्रेत्यादि * भाक्तत्वस्याप्रामाणिकत्वान्न द्वैतापत्तिदोष इत्यर्थः । ननु भाक्तत्वे भवता हंसाकारः कथं समर्थनीय इति शङ्कायामाहुः । * अन्तरित्यादि * बाह्यो जीवस्तदनुरोधेन तथाकार इति न कोऽपि शङ्कावकाशः । तत्प्रकारस्य पूर्वमेवोपपादितत्वात् सर्वं प्राचां वचनं समीचीनमेवेत्यर्थः । एवञ्च यद्भामतीनिबन्धे पक्षद्वयं व्याख्यायोक्तम्, 'प्रायपाठपरित्यागो मुख्यार्थत्रितयलङ्घनम् । पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम्' इति । अर्थस्तु, आनन्दमयपदस्य ब्रह्मार्थकत्वपक्षे मयडर्थस्य विकारस्य त्यागेन प्राचुर्यार्थाङ्गीकारे प्रायपाठपरित्यागः । आनन्दमयपदस्य ब्रह्मण्यप्रसिद्धस्य लक्षणया योगेन वा ब्रह्मणि व्याख्याने मुख्यार्थोल्लङ्घनम् । आनन्दपदाभ्यासेन च ज्योतिरधिकरणपूर्वपक्षे ज्योतिःपदेन ज्योतिष्टोमवदानन्दमयो लक्ष्यत इत्यानन्दपदस्यापि मुख्यार्थोल्लङ्घनम् । पुच्छपदं च बालधौ शक्तमानन्दमयावयवे गौणमिति तत्समानाधिकरणब्रह्मपदमपि स्वार्थत्यागेन तत्परमतस्तस्यापि मुख्यार्थोल्लङ्घनमिति चत्वारो दोषाः । विकारार्थकत्वपक्षे तु ब्रह्मपदस्य न स्वार्थत्यागो, नाप्यानन्दमयपदस्य, न चानन्दपदस्य । पुच्छपदमुख्यार्थबाधस्त्ववयवपरतायामधिकरणपरतायां च तुल्यः । अवयवप्रायपाठबाधश्च विकारप्रायपाठबाधेन तुल्य इति विकारार्थग्रहणपक्ष एव साधीयानिति । तदपि व्याख्येयपूजनमात्रमेव, न तु तात्त्विकम् । विकारार्थस्य प्राणमये बाधितस्य घटाकाशदृष्टान्तेनोज्जीवयितुमशक्यत्वात् । आप्राकृतमाचपण्डितं कस्यापि घटाकाशे घटविकारत्वप्रत्ययस्याभावात् । घटभृते दुग्धादावपि तथाप्रत्ययाभावेन दृष्टान्ताभावादनुमातुमप्यशक्यत्वात् । लोके शास्त्रे तथाप्रयोगस्य क्वाप्यनुपलम्भादिति । एवं बाधिते विकारपाठे तस्य प्रायताया अपि वन्ध्यासुतसौन्दर्यदेशीयत्वात् । किञ्च । शब्दमात्रमोङ्कारस्य विकृतिः । ॐकारस्तु ब्रह्मवाचक एवेति तद्विकृतयः सर्वे-

ऽपि शब्दा उत्सर्गतो ब्रह्मवाचका एव । ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमिति, स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः, स सर्वमन्त्रोपनिषद्वेदबीजं सनातनमिति, तस्य वाचकः प्रणव इति श्रुतिपुराणपातञ्जलस्मृतिभिस्तथा निश्चयात् । अतः शक्तिसङ्कोचेनैव व्यवहारसिद्ध्यर्थं तत्तद्वदन्तीति तन्निवर्तनायैवाचार्यः श्रौतान् हेतून् ब्रूत इति प्रागेव निर्णीतमिति नानन्दमयानन्दब्रह्मपदानामपि मुख्यार्थोल्लङ्घनम् । अतः पूर्वस्मिन् दोषाभावाद् द्वितीयस्मिन्नेव व्याकरणविरोधादिरूपदोषबाहुल्यादुत्तर एवासाधुरिति । यदपि वेदसूत्रयोर्विरोधे, गुणे त्वन्यायकल्पनेति सूत्राण्यन्यथा नेतव्यानीत्युक्तम् । तदप्यसङ्गतम् । तथाहि । इदं हि, विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वादिति नावमिक तृतीयपादस्थसूत्रस्यैकदेशभूतम् । सूत्रस्य त्वेवं विषयः । ज्योतिष्टोमेऽग्नीषोमीयपशावेकवचनान्तबहुवचनान्तौ पाशोन्मोकमन्त्रौ भिन्नयोः शाखयोराम्नातौ । अदितिः पाशं प्रमोक्त्वेतमिति तैत्तिरीये । अदितिः पाशान् प्रमुमोक्त्वेतानिति शाखान्तरे । तत्र सन्देहः । बहुवचनान्तो मन्त्रः प्रकृतौ निविशते न वेति । तत्र प्रकरणवशेन प्राप्तावपि विकल्पापादकत्वाद् बहुवचनस्यैकस्मिन् पशुपाशे असमर्थत्वाच्च न निवेशो युक्त इति बहुपाशकपशुगणयुक्तासु विकृतीषूत्कृष्टव्य इति पूर्वः पक्षः । सिद्धान्तस्तु पाशरूपप्रातिपदिकार्थान्वितं विभक्त्याभिहितं कर्मकारकं प्रकृतावप्यस्तीति पाशकर्मकोन्मोचनाभिधानेन सम्भवन्मन्त्रो नोत्कर्षं सहते । सङ्ख्यामात्रं त्वसम्भवदपि गुणत्वान्न प्रातिपदिककारकयोः प्रधानभूतयोरुत्कर्षणसमर्थम् । इह सङ्ख्याप्यविवक्षिता । पाशकर्मणोरभिधानमात्रेण व्यवहारस्य सिद्धेः । किञ्चैकस्मिन्नप्यवयवबहुत्वाभिप्रायेण छान्दसो बहुवचनप्रयोगोऽवकल्पते । अतो गुणेऽन्यायकल्पनाया अदुष्टत्वात् प्रकरणानुरुद्धो विकल्प एव युक्त इति । एवञ्चात्र सूत्राणां वेदार्थनिश्चायनाय प्रवृत्तत्वेन सङ्ख्यावदेकदेशत्वाभावात् तदन्यथा नयने मीमांसाद्वयस्य वेदस्य च वि ्वापत्तेरिति । वस्तुतस्तु ।

युक्तिभिरतिशिथिलाभिः समादधानो दृढान् दोषान् ।
वाचस्पतिरपि भाष्ये व्याख्याव्याजेन दूषणं ब्रूते ॥

इति बोध्यम् ॥ १८ ॥ ॥ इति पञ्चमाधिकरणम् ॥

अन्तस्तद्धर्मोपदेशात् ॥ १९ ॥

अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः, आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः । उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतमथाध्यात्ममप्यथ य एषोऽन्तरक्षिणि पुरुषो दृश्यत इत्यादि । तत्र संशयः । किमधिष्ठातृदेवताशरीरमाहोस्वित् परब्रह्मेति, ब्रह्मणो वा शरीरमिति । तदर्थमिदं विचार्यते । हिरण्मयशब्दः सुवर्णविकारवाची, आहोस्वित् प्रकाशसाम्येनानन्दवाचीति । ब्रह्मविदाप्नोति परमित्युपक्रम्य आनन्दमयस्य फलत्वमुक्त्वा द्वितीयोपाख्याने, स यश्चायं पुरुषे यश्चासावादित्ये

अन्तस्तद्धर्मोपदेशात् ॥ *अथ य एष इत्यादि* इदं छान्दोग्ये प्रथमप्रपाठके श्रूयते । विषयवाक्यमुपन्यस्य संशयाकारमाहुः । *किमित्यादि* तथाचात्र त्रिकोटिकः संशय इत्यर्थः । *तदर्थमिदं विचार्यत इति* तादृशसंशयोत्पत्त्यर्थं तस्य बीजं विचार्यत इत्यर्थः । तदाहुः *हिरण्मयेत्यादि* ननु जन्माद्यधिकरणसमन्वयाधिकरणाभ्यां लक्षणकथनादिना सप्रकारां कारणतां विचार्येक्षत्यानन्दमयाधिकरणाभ्यामसम्भवादिदोषनिरासेन सा परीक्षिता। तथा सति लक्षणप्रमाणाभ्यां ब्रह्मज्ञानस्य सौकर्यात् तावतैव च तत. फलसिद्धेः किमनेनाधिकरणेनेत्याकाङ्क्षायां पूर्वाधिकरणेनास्य सङ्गतिं वक्तुमाहुः * ब्रह्मविदित्यारभ्य, विचारारम्भ इत्यन्तम् * । * द्वितीयोपाख्यान इति * यद्यपि प्रथमप्रपाठक एतादृशं वाक्यमस्ति । तथापि तत्र, स एको ब्रह्मण आनन्द इति गणितानन्दं प्रस्तुत्य तत्पठितं, न तु वाङ्मनसागोचरं प्रस्तुत्येति पूर्णब्रह्मविदस्तदनुपयुक्तमिति शङ्का स्यादतस्तदस्फावायैतदुक्तम् । अत्र हि सर्वान्ते एतदुक्त्वाग्रे, हावु हावु इत्यहोअर्थकेन शब्देन वीप्सया आश्चर्यमुक्त्वा,

स एकः स य एवंविदिति साधनस्यानन्दमयमात्मानमुपसं-क्रम्येति फलं श्रुतम् ।

तत्र सवितरि विद्यमानस्याब्रह्मत्वे फलं नोपपद्यत इति विचारारम्भः । तत्र हिरण्मयशब्दो विकारवाची । केशनखा-द्यश्चोच्यन्ते शरीरधर्माः । मृता वा एषा त्वगमेध्या यत् केश-श्मश्रूिति शरीरमन्तश्च नोपपद्यते । परिच्छेदश्चाधिदैविकादि-वचनं च बाधकम् ।

अहमन्नमित्यादिना सर्वात्मभावं ब्रह्मभावं चाह । तेनैतज्ज्ञानमक्षर-सायुज्ये परब्रह्मसायुज्ये च फलोपधानायावश्यकमित्येतस्य कथ-नम् । नच भवत्वेवं, तथाप्यस्य विचारे किं बीजमिति वाच्यम् । तत्त्वेव भयं विदुषोऽमन्वानस्येत्यनेन मननाभावे भयस्योक्ततया त-दापत्तेरेव बीजत्वादित्याशयेनाहुः * तत्र सवितरीत्यादि * तथा-चास्य हेतुतागर्भः प्रसङ्गोऽत्र सङ्गतिरित्यर्थः । किञ्चायं जन्मादिसू-त्रस्थविचारः सर्वस्याग्रिमविचारस्य मूलम् । तत्राग्रे, फलमत उप-पत्तेरित्यनेन सर्वफलदाता भगवानेवेति वक्तव्यम् । ततोऽग्रे चतुर्थे ऽध्याये निषेधमुखेन प्रतीकोपासना, विधिमुखेनाङ्गोपासनाश्चादि-त्यादिमतिसूत्रे वक्तव्यास्तत्र मतान्तरोक्तरीत्या प्रतीकोपासनानाम-ब्रह्मपरत्वेऽपि तद्वाक्योक्तफलसिद्धिस्तदन्तःस्थाद् ब्रह्मण एवेति ज्ञा-पनायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तमवान्तरफलं तत्क्रतुत्वरूपं मु-ख्यं फलं च भगवत एवेति ज्ञापनाय चाप्येतद् बोध्यम् । तेनान्तःपद-घटितेषु वाक्यान्तरेषु सत्स्वप्येतस्यैव विषयवाक्यत्वेनोदाहरणे-ऽप्येतदेव बीजमिति बोध्यम् । पूर्वपक्षमाहुः * तत्रेत्यादि * । * वि-कारवाचीति * द्व्यच्त्वाद् विकारार्थकप्रत्ययवान् । * नोपपद्यते इति * मृतत्वक्सम्बन्धो नोपपद्यते । * परिच्छेदश्चेत्यादि * अन्तरा-ऽऽदित्य इत्यनेनोक्तस्तदन्तर्वर्तित्वकृतः परिच्छेद इत्यधिदैवतमित्यने-नोक्तमाधिदैविकवचनम् । आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवा-धिदैविक इति स्मृतौ तस्याध्यात्मिकाभेदकथनादाध्यात्मिकस्य च

अतः सर्वथा तच्छरीरमिति मन्तव्यम् । चाक्षुषत्वाच्च । इन्द्रियवत्त्वञ्च श्रूयते । यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्येति । कपेरास आसनम् । आरक्तं तस्यासनं भवतीति । असभ्यतुल्यता च । अतो देहेन्द्रिययोर्विद्यमानत्वाज्जीवः कश्चिदधिकारी सूर्यमण्डलस्थ इति गम्यते । फलं तत्सायुज्यद्वारेति । अथोच्येत, एष सर्वेभ्यः पाप्मभ्य उदित इति । अपहतपाप्मत्वादिधर्मश्रवणात् । पूर्वदोषस्यापि विद्यमानत्वाद् ब्रह्मण एव केन चिन्निमित्तेन शरीरपरिग्रह इति । तस्य च शरीरस्य

जीवत्वात् तद्वचनमपि ब्रह्मत्वबाधकमित्यर्थः । * आदिपदं, य एषोऽन्तरक्षिणीति, अथाध्यात्ममित्यादिनोक्तानामक्षिपुरुषधर्माणां संग्रहाय । अक्षिपुरुषविचारोऽपि, स यश्चायं पुरुष इति श्रुत्यर्थनिर्णयायेति बोध्यम् । *मन्तव्यमिति* उक्तहेतुभिर्निश्चेयम् । एवं देहत्वसाधनेन देहित्वं साधयित्वेन्द्रियवत्त्वं साधयति * इन्द्रियेत्यादि * । * कप्यासमिति * उपवेशनार्थकस्यास्तेः करणे घञ् । कपेर्मर्कटस्यासनमधोभाग इव कप्यासम् । उपमावाचकपदलोपाल्लुप्तोपमा । तेन रूपकातिशयोक्तिः । ननु यदि स जीवः स्यात् तदा तैत्तिरीये परिकरान्तानामुपासनानामनन्तरं, स यश्चायमिति वाक्यं नोच्येत । तथा बृहन्नारायणीये, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके त्रयीविद्यात्मकत्वमुक्त्वा, आदित्यो वै तेज ओजो बलमिति तदग्रिमानुवाके ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोतीति फलं नोच्येतेति शङ्कायामाह * फलमित्यादि * आनन्दमयोपसंक्रमणरूपं फलं स्वस्याधिकारिसायुज्यद्वारा भवतीत्यंतदर्थं तदनन्तरमुच्यते । आदित्यो वै तेज इत्यत्रापि ब्रह्मणः सायुज्यमित्याद्युक्त्वा, एतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युच्यते । एवमधिष्ठातृदेवताशरीरकोटिः साधिता । ब्रह्मशरीरकोटिं साधयति * अथोच्येतेत्यादि * अनया श्रुत्या असाधारणब्रह्मधर्मश्रावणादयं ब्रह्मैवेत्युच्येतेत्यर्थः । तद् दूषयति *अपहतेत्यादि*

कर्मजन्यत्वाभावादपहतपाप्मत्वादि सङ्गच्छते । सुवर्णशरीरत्वमप्यलौकिकत्वाद् ब्रह्मण एव सङ्गच्छते । शरीरवदिन्द्रियस्यापि परिग्रहः । वर्णमात्रपरिग्रहान्नासम्भवता । स्थावरापेक्षया जङ्गमस्योत्कृष्टत्वात् स्थावरावयवोपमानवज्जङ्गमावयवोपमानं स्थावरस्यापीति सर्वब्रह्मभावाय श्रुत्युक्तत्वाच्च । तस्माद् ब्रह्मण एवेदं शरीरमित्येवं प्राप्ते, उच्यते ।

अन्तस्तद्धर्मोपदेशात् ॥

अन्तर्दृश्यमानः परमात्मैव । कुतः । तद्धर्मोपदेशात् । तस्य ब्रह्मणो धर्मा उदितादिधर्मा उपदिश्यन्ते । स एष सर्वेभ्यः पाप्मभ्य उदित इति । अयमाशयः । ब्रह्म कारणं, जगत्कार्यमिति स्थितम् । तत्र कार्यधर्मा यथा कारणे न गच्छन्ति, । तथा कारणासाधारणधर्मा अपि कार्ये । तत्रापहतपाप्मत्वादयः कारणधर्मास्ते यत्र भवन्ति तद् ब्रह्मैवावगन्तव्यम् । बलिष्ठत्वात् कारणधर्मस्य । नामतुल्यतामात्रमुभयेषामपि धर्माणाम् । ते श्रुत्येकसमधिगम्याः । ब्रह्मणि लोके प्रमाणान्तरमपि प्रवर्तते । अतः सर्वरमादयो ब्रह्मनिष्ठा एव धर्माः । स्थूलत्वादयस्तु ये ब्रह्मणि निषिध्यन्ते, अस्थूलादिवाक्येषु ते कार्यधर्माः । अणो-

---

* स्थावरस्येति * पुण्डरीकस्य । एवमुपमाप्रयोजनं तु ब्रह्मप्रवेशेन सर्वस्य ब्रह्मभावबोधनम् । ब्रह्मदाशा इतिवत् । स्फुटमन्यत् ।

सूत्रं पठित्वा समादधते * अन्तरित्यादि * ननु बाधकानां बहूनामुक्तत्वाद्धर्मोपदेशमात्रेण कथं ब्रह्मत्वनिश्चय इत्यतस्तद् व्युत्पादयन्ति * अयमाशय इत्यादि * । * स्थितमिति * पूर्वाधिकरणैर्निर्णीतम् * कार्यधर्मा इति * कार्यासाधारणधर्माः । दृष्टं चैतत् । न हि घटीया जलाहरणयोग्यत्वादयो मृत्पिण्डकपालादौ गच्छन्ति । न वा मृत्पिण्डादिसंस्थानविशेषा घटादौ । अथ यदि गच्छेयुस्तदा कार्यकारणयोर्वैलक्षण्यं न भवेत् । कार्यकारणव्यवहारश्च भज्येत ।

र्णीयानित्यादिषु कारणधर्मा एव । अत एकोऽप्यसाधारणो धर्मो विद्यमानः शिष्टान् सन्दिग्धानपि ब्रह्मधर्मानेव गमयति । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वत्र ब्रह्मवाक्यनिर्णयमाह सूत्रकारः । तथाच श्रुतिव्यतिरिक्तस्थले तथैवावगन्तव्यम् । अनन्तमित्यनन्तमूर्तिता च ब्रह्मणः प्रतिज्ञाता । अन्यथा गुहायां निहितमिति विरुध्येत । तस्मात् साकारं तादृशमेव ब्रह्म ।

अतो ये असाधारणा धर्मास्तेऽन्यत्र न गच्छन्तीति नियतम् । तत्र प्रकृतवाक्ये, तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित इत्यनेनोक्तमपहतपाप्मत्वम् । तथा आदिपदेनाक्षिपुरुषवाक्ये सर्क् तत्साम तदुक्थं तद्यजुस्तद् ब्रह्म तस्यैतस्यैतदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेत्यनेनोक्तमृक्सामादिसार्वात्म्यं यन्नाम तन्नामेत्यतिदिष्टनामानिर्वचनहेतुभूतमपहतपाप्मत्वं च, य आत्मा अपहतपाप्मेतिश्रुत्यन्तरे ब्रह्मासाधारणधर्मत्वेन सिद्धम् । तथा, इदं सर्वं यदयमात्मेतिश्रुत्यन्तरसिद्धं सार्वात्म्यं च कारणभूतब्रह्मासाधारणधर्मरूपं नान्यगामि तदत्रोपदिश्यते। एवमन्येऽपि श्रुत्यन्तरोक्ता असाधारणा ब्रह्मधर्मा यत्र भवन्ति तद् ब्रह्मेत्येवावगन्तव्यम् । तेन सूत्रे अन्तःपदं स्थानान्तरस्याप्युपलक्षकं, न तु तावन्मात्रपर्यवसन्नमिति बोधितम् । नच केशनखादीनां कार्यधर्माणामपि बोधनात् कथं विनिगमनेति शङ्क्यम् । उपजीव्यत्वेन नित्यत्वेन च कारणधर्मस्य बलिष्ठत्वात् । नचापहतपाप्मत्वं स्वाध्याये मुख्यप्राणे चोच्यते, सार्वात्म्यं च चतुर्मुखादावतः कथमसाधारणत्वमिति शङ्क्यम् । यतो नामतुल्यतामात्रमुभयेषां धर्माणाम् । स्वाध्ययादौ ह्यपहतपाप्मत्वं पापराहित्यरूपं, स्वाध्यायो देवपवित्रमिति य एवंविदि पापं कामयत इति तत्र तत्र लिङ्गात् । अत्र तु सर्वकर्माऽऽनराहित्यरूपम् । अनन्वितं ते भगवन् विचेष्टितं यदात्मना चरसि च कर्म नाऽज्यस इति श्रीभागवतवाक्यात् । एवं चतुर्मुखादिसार्वात्म्यमपि साङ्कुशम् । अविज्ञाय परं मत्तः, एतावत्त्वं यतो हि म इति द्वितीयस्कन्धे नारदं प्रति ब्रह्मवाक्यात् । अत उदीत्यादीना-

मेवं कारणभूतब्रह्मासाधारणधर्मत्वे सिद्धे तत्सहपठितानां दृश्यत्व-हिरण्यश्मश्रुत्वादीनामपि ब्रह्मधर्मत्वमेव बोध्यम् । यतस्ते श्रुत्येक-समधिगम्या ब्रह्मणि । लोके तु तेषां गमकं प्रमाणान्तरमपि वर्तते । अत एतद्वत् सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इत्यादिश्रुत्यन्त-रोक्ताः सर्वरसादयोऽपि ब्रह्मनिष्ठा एव धर्मा बोध्याः । श्रुत्येकसम-धिगम्यत्वस्य तेष्वपि तौल्यात् । नचैवं सति स्थूलत्वादिप्राप्तिः श-ङ्क्या । तेषां श्रुत्या निषिध्यमानत्वेन कार्यधर्मत्वात् । नच ब्रह्मणि वि-रुद्धधर्माश्रयत्वस्याग्रे व्युत्पादनीयत्वाद्, आसीनो दूरं व्रजति, अणो-रणीयान् महतो महीयानित्यादिषु सहावस्थानविरुद्धक्रियाधर्मयो-रिव भावाभावविरुद्धस्थूलत्वतदभावयोरपि शक्यवचनत्वादेतेषां कारणधर्मत्वमेवास्त्विति शङ्क्यम् । इतः पूर्वं गार्ग्या उपादानकारण-बोधनार्थं कार्याणां प्रकृततया याज्ञवल्क्येन कार्यविलक्षणकारण-बोधनार्थं कार्यधर्माणामेव निषेधात् । अन्यथा प्रकृतिविरोधापत्तेः । नचैवमनण्वित्यनेन निषिद्धस्याणुत्वस्य, स य एषोऽणिमेत्यादिषु श्रूयमाणस्य का गतिरिति शङ्क्यम् । तत्राणोरणीयानित्यादिषु तु, सप्त प्राणाः प्रभवन्तीत्यादिभिः कार्यस्याग्रे वक्ष्यमाणतया ततः पूर्वं श्रूय-माणानां कारणधर्मत्वेन तद्भिन्नत्वात् । ऐतदात्म्यमिदं सर्वं, महतो महीयानित्यादितद्विरुद्धधर्मसामानाधिकरण्यश्रावणेन तथा निश्च-यात् । एवमन्यत्रापि बोध्यम् । अत एकोऽप्यसाधारणधर्मो विद्यमा-नः शिष्टान् सन्दिग्धानपि धर्मान् ब्रह्मधर्मत्वेनैव गमयति । अन्यथा-ऽन्यगामित्वेन तस्यासाधारण्यभङ्गप्रसङ्गात् । तथाच यत्र निषिध्य-न्ते तत्र तदनुरोधात् ते लौकिकाः कार्यधर्मा एव । यत्र च न निषेध-स्तत्रालौकिका ब्रह्मात्मकास्ते धर्मा, नेह नानास्तीतिश्रुत्यनुसारेणा-वगन्तव्याः । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वेष्वधिकरणसूत्रेषु ब्र-ह्मवाक्यनिर्णयमाह सूत्रकारः । अन्यथा, आदित्यान्तरक्ष्यन्तरित्येव-मधिकरणं विशिष्यात् । तथाचेदं सिद्धम् । यत्र निश्चिते कार्यत्वे तस्य कारणाभेदेन स्तुतिः क्रियते, यथेन्द्रप्रतर्दनसंवादादौ तत्र नेयं रीतिः । तद्व्यतिरिक्तस्थले त्वेवमेवावगन्तव्यमिति । नचैवं परि-च्छिन्नेषु नानास्थानेषु नानापरिमाणेन स्थितौ ब्रह्मणोऽनेकत्वापत्त्या, एकमेवाद्वितीयमित्यादिश्रुतिविरोध इति शङ्क्यम् । यतः सत्यं ज्ञान-मनन्तं ब्रह्मेति लक्षणवाक्य एवानन्त इत्यनेन ब्रह्मण आनन्त्यकथने-

ब्रह्मणः शरीरमिति तु सर्वथा असङ्गतम् । सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत् । किन्तु लीलया व्यामोहनार्थमन्यथा भासयेन्नटवत् ।

ऽनन्तमूर्तिता च प्रतिज्ञाता । नचात्र मानाभावः । निहितं गुहायामिति हृदयाकाशनिधानकथनस्यैव मानत्वात् । अन्यथा गुहायां निहितमिति विरुद्ध्येत । अनन्तमूर्तित्वाभावे व्यापकतया सर्वस्य तदन्तःस्थत्वात् । इदं च श्रुत्यन्तरेऽप्युक्तम् । यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादिति । तस्माद् ब्रह्मण एकत्वेन व्यापकत्वेऽप्यनन्तमूर्तित्वात् साकारं वेदैकवेद्यत्वाद् यादृशं यत्र स्थाने यद्वाक्य उच्यते तादृशं तत्र ब्रह्मेति मन्तव्यमिति सिद्धमित्यर्थः । एवमधिष्ठातृदेवतापक्षं निराकृत्य अत्र ब्रह्मैवोच्यत इति स्थापितम् । अतः परं साधकानुग्रहार्थं ब्रह्मण एव शरीरमिति पक्षं निराचक्षते * ब्रह्मणः शरीरमित्यादि * । असङ्गतत्वे हेतुमाहुः * सर्वकर्तुरित्यादि * । अयमर्थः । यदत्र शरीरमङ्गीकृतम् । तत् किं नित्यमुतानित्यम् । नाद्यः । अद्वितीयश्रुतिव्याकोपात् । सच्चिदानन्दादतिरिक्तवस्त्वभावस्य प्रागेवोपपादितत्वेन ब्रह्मात्मकताया एवापाते शरीरत्वस्याशक्यवचनत्वाच्च । अन्यथा पुरुषविधब्राह्मणोदितायाः, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाया विरोधापत्तेश्च । द्वितीयपक्षेऽपि तच्छुद्धसत्त्वात्मकं वा प्राकृतं वा मायिकं वाङ्गीकार्यम् । तत्र कर्त्रपेक्षायां ब्रह्मण एव कर्तृत्वं च वाच्यम् । तत्रान्यानपेक्षतया सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत् । अतो मूलरूपे नास्त्येव शरीरम् । किन्तु स्वरूपमेव तदाकारम् । प्राणन्नेव प्राणो भवति वदन् वागितिवच्छरीरकार्यं कुर्वल्लीलया व्यामोहनार्थं शरीवद्भासयेन्नटवत् । 'यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरमिति प्रथमस्कन्धवाक्यात् । अतो यादृशं प्रतीयते तादृशं तद् ब्रह्मैव । येषां पुनर्न मोक्षाधिकारस्तेषां तच्छरीरवद्भासत इति निश्चय । एतमेव निर्णय-

तस्माद् वेदातिरिक्तेऽप्युपपत्तिपूर्वकं यत्र ब्रह्मधर्मस्तद् ब्रह्मेति मन्तव्यम् । ब्रह्म तु वेदैकसमधिगम्यं यादृशं वेदे प्रतिपाद्यते तादृशमेवेत्यसकृदवोचाम । प्रकृतेऽपि हिरण्मय इत्यत्र यकारलोपश्छान्दसः । अतो न द्वयच् । हिरण्यशब्द आनन्दवाची । लोकेऽपि तस्यानन्दसाधकत्वात् । अतः केशादयोऽपि सर्वे आनन्दमया एव । तादृशमेव ब्रह्मस्वरूपमिति मन्तव्यम् ।

अन्यत्रातिदिशन्ति । * तस्मादित्यादि * । ननु किमित्यत्र निर्बन्धेन सर्वाकारं निरूप्यते । निर्विशेषमेवोपासकानुग्रहाय मायया शरीरं कल्पयतीत्येव कुतो न कल्प्यते इत्याकाङ्क्षायामाहुः । * ब्रह्म त्वित्यादि * ननु भवत्वेवं, तथापि प्रकृते हिरण्मय इत्यत्र विकारवाचिनो मयटः प्रयोगो, हिरण्मयशब्दस्य, दाण्डिनायनसूत्रे निपातनाद्विकारत्वसिद्धौ कथं ब्रह्मत्वनिर्णय इत्यत आहुः । * प्रकृतेऽपीत्यादि * तथाच द्व्यच्त्वेन विकारप्रत्ययाभावान्नायं निपातः किन्त्वत्र छान्दस एव यकारलोप इत्यर्थः । ननु पूर्वं स्वरूपलक्षणविचारे ब्रह्मणः सत्यज्ञानानन्दरूपत्वमेव सिद्धं, न हिरण्यरूपत्वमिति हिरण्मयस्याविकारत्वेऽपि ब्रह्मत्वं वक्तुमशक्यमतः शरीरत्वमेवाङ्गीकार्यमित्यत आहुः । *हिरण्यशब्द इत्यादि * । यद् यज्जनकं तत् तद्गुणकं, यद् यद्गुणकं तत् तदात्मकमिति व्याप्त्योः पूर्वं साधितत्वादानन्दसाधकत्वेनानन्दात्मकत्वे विकारभूतस्य लौकिकस्यापि हिरण्यस्य सिद्धे कारणभूतस्याविकारस्यानन्दात्मकत्वे बाधकाभावाद्धिरण्यशब्द आनन्दवाची । अतः केशश्मश्रुनखाक्षीणि, तत्सहभूता अनुक्ता अन्येऽपि पुरुषावयवाः कप्यासशब्देन वर्णान्तरस्यापि सूचितत्वात् तत्तद्वर्णविशिष्टा अपि शब्दे आनन्दमया एवेति पुरुषाकारं ब्रह्मस्वरूपमेवेति मननीयम । अन्यथा, तत्त्वेवं भयं विदुषोऽमन्वानस्येत्युक्तस्य भयस्यापत्तेरित्यर्थः । ननु सूर्यान्तर्वर्ति न ब्रह्मशरीरमित्यसङ्गतम् । उपबृंहणविरोधात् । अग्निपुराणे, ध्येयः सदेति श्लोके, हिरण्मयवपुरिति

अत एव, 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्र' इत्यत्रापि वपुः स्वरूपम् ।

माया ह्येषा मया सृष्टा इत्यादि भगवद्वाक्यं, भगवन्मायया भगवन्तमन्यथा पश्यन्तीत्याह । न तु भगवानेव मायिक इति । शरीरे सति जीवत्वमेवेति निश्चयः । अतो ब्रह्मधर्मोपदेशात्

शरीरवाचकपदस्योक्तत्वादित्याशङ्कायामाहुः । * अत एवेत्यादि * । तथाचात्रापि यं सुखं पुष्णातीति योगेन ब्रह्मैवोच्यते । अत एव स्मृत्यन्तरे 'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम् । ध्यात्वा जपेत्तदित्येतन्निष्कामो मुच्यते द्विजः । आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम् । छन्दोनिवृत्त्याद्गायत्री मया दृष्टा सनातनी ' इति गायत्र्या ध्येये सूर्यमण्डलान्तःस्थे वपुःपदं नोच्यत इति न तेन शरीराङ्गीकारः कर्तुं शक्य इत्यर्थः । तन्वश्च केवलस्वरूपाङ्गीकारेऽन्यत्रापि स्वरूपमेव न्यायबलेन साधयितुं शक्यम् । तथा सति 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं न मां पश्यन्ति सूरय' इति विश्वरूपाकृतेर्नारायणस्य यद्वारते वाक्यं तस्य विरोधो दुर्वार इत्यत आहुः । * मायेत्यादि * । तथाचास्मिन् वाक्येऽपि, यन्मां सर्वभूतगुणैर्युक्तं पश्यसि एषा माया मया सृष्टेति पदसम्बन्धान्न विरोध इत्यर्थः । ननु किमित्येवं निर्बन्धेन शरीरवत्ता निराक्रियते । कर्माजन्यस्यैच्छिकशरीरस्याङ्गीकारेऽपि ब्रह्मत्वाक्षतेरित्याशङ्कायामाहुः । * शरीर इत्यादि * । मास्तु कर्मजन्यत्वं शरीरस्य, तथापि शुद्धसत्त्वात्मकत्वं त्रिगुणात्मकत्वं वा तु सर्वथाङ्गीकार्यम् । तेन सह सम्बन्धश्चाभिमान एव वाच्यः । तथा सत्याभिमन्ता जीव इति तापनीये भावितस्य जीवलक्षणस्य तत्र सत्त्वाज्जीवत्वमेव । यदि च नियन्तृत्वं, तदाऽन्यस्याभिमानिनस्तत्र सत्त्वाद् ब्रह्मशरीरत्वाभावः । यदि च सम्बन्धान्तरं, तदापि 'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद् वैभवादपीति नारसिंहवाक्यवि-

सूर्यमण्डलस्थः परमात्मैव ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ २० ॥

इतोऽपि सूर्यमण्डलस्थः परमात्मा । भेदव्यपदेशात् । य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इति श्रुत्यन्तरे आधिदैविकं सूर्यमण्डलाभिमानिभ्यां भेदेन निर्दिष्टम् । यद्यपि तत्राकारो न श्रूयते, तथापि हिरण्मयवाक्यैनैकवाक्यत्वात् सर्वत्र साकारमेव ब्रह्मेति मन्तव्यम् ।

अन्तर्यामिब्राह्मणे चत्वारोऽर्था उच्यन्ते । सर्वत्र तिष्ठंस्तद्धर्मैर्न सम्बध्यते । सर्वमुक्तिपरिहाराय स्वधर्मैस्तत्र बध्यते । स्वलीलासिद्ध्यर्थं तच्छरीरमिति । तस्य नियमनं तदर्थमिति । चकाराद्धर्मा उच्यन्ते ।

रोध इति शरीराङ्गीकारे जीवत्वापत्तिरनिवार्येति तदभावाय निर्बन्ध इत्यर्थः ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ ननु पूर्वसूत्रोक्तेनैव हेतुना सिद्धे ब्रह्मत्वे किमिति हेत्वन्तरोपन्यास इत्याकाङ्क्षायामाहुः । * यद्यपीत्यादि * । तथाच समानप्रकरणोक्तधर्मान्तरस्यापि प्राप्त्यर्थं हेत्वन्तरमित्यर्थः । नन्वत्र भेदव्यपदेशमात्रेण कथं परमात्मलाभ इत्यत आहुः * अन्तर्यामीत्यादि * । * तदिति * सामान्ये नपुंसकम् । अभिमानीत्यर्थः । अत्र हि जडाज्जीवाच्च भिन्नत्वेनान्तर्यामी प्रतिपाद्यते । तत्र, य आदित्ये तिष्ठन्नादित्यादन्तर इति जडमण्डलमाधारत्वेन निर्दिश्य ततोऽन्तरत्वकथनात् ततो भेदो बोधितः । तेन तद्धर्मैर्न सम्बध्यत इति बोधितम् । तत आदित्यादन्तरत्वं तदभिमानिनो जीवस्याप्यस्तीति ततोऽपि भेदबोधनाय, यमादित्यो न वेदेति तदभिमान्यज्ञेयत्वकथनेनाभिमानिधर्मैर्न सम्बध्यत इत्याह ।

तस्मात् सर्वविलक्षणत्वादन्य एव, नाभिमानी । उपचार-ष्ठ्यावृत्त्यर्थमन्यपदेनोपसंहारः ।

तथा यद्यभिमानी तं जानीयान्मुक्तः स्यात् । अतस्तदभावाय स्वासाधारणैर्ज्ञानापहतपाप्मत्वादिभिर्धर्मैः कर्तृभिस्तद् आधारभूतम् अभिमानि वस्तु न बध्यते, न व्याप्यते । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । सैषा त्रय्येव विद्या तपतीति स्मृतिश्रुत्युक्तधर्मैर्मण्डल एव व्याप्यते, नाभिमानीति स न मुच्यते । यद्वा दिवादिर्भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादिवद् बध्यत इत्यपि कर्तरि प्रयोगः । तथा सति स्वधर्मैस्तमभिमानिनं न व्याप्नोतीत्यर्थः । तात्पर्यं तूभयथापि समानम् । तेन ततोऽपि भेद । एवमुभयाद्भेदे सिद्धेऽपि तत्र स्थितेः किं प्रयोजनमित्याकाङ्क्षायां, यस्यादित्यः शरीरमित्याह । तत्र जगद्भासनं दिग्विभागो धर्मप्रवृत्तिरित्यादिरूपा स्वस्यैव लीला तत्सिद्ध्यर्थं तन्मण्डलं शरीरं, न त्वधिष्ठानार्थम् । तेन जीवतुल्यता वारिता । एवं, गामाविश्य च भूतानि धारयाम्यहमोजसेत्यादिष्वपि भगवल्लीलात्वं बोध्यम् । तेन पृथिव्यादिकार्यस्यापि लीलात्वं, तेषां लीलाशरीरत्वं च ज्ञातं भवति । शरीरस्य तादृशत्वे गमकमाह । य आदित्यमन्तरो यमयतीति । अत्रादित्यपदं मण्डलाभिमानिनोः संग्राहकम् । तथाच * तस्यादित्यादेर्नियमनं, * तदर्थं तादृशलीलार्थम् । तं यदि, भीषास्मादित्याद्युक्तरीत्या न नियमयेत्तदा सा सा लीला न सिद्ध्येदिति । अत्र पुनरप्यन्तर इति पदम्, अन्तरं करोतीत्यन्तरयति, अन्तरयतीत्यन्तर इति सर्वान्तःस्थापकत्वबोधनार्थम् । एवमेते चत्वारोऽर्था उच्यन्ते । सूत्रे तु चकारात् पूर्वसूत्रोक्ता धर्माः समुच्चीयन्ते । तेन हेतुभेदेऽपि साध्यैक्यान्नाधिकरणभेदः । एवञ्च श्रुतिं सूत्रं च व्याख्याय सिद्धमाहुः । तस्मादित्यादि । तथाच भेदव्यपदेशात् सर्वविलक्षणत्वेन व्यपदेशादादित्यान्तवर्ती परमात्मा अन्य एव, नाभिमानीत्यर्थः । नन्वत्रान्य इत्यस्य साध्यत्वेन निर्देशादिदमधिकरणान्तरमेवास्त्विति चेत्तत्राहुः * उपचारेत्यादि * तथाच, नेतरोऽनुपपत्तेरित्यादिना पूर्वाधिकरणं निषेधमुखेन विचारितं यथोपचारनिवृत्त्यर्थं तथेदमन्यपदेनोपसंहृतमिति तत्रेवात्रापि नाधि-

ब्रह्मत्वे सिद्धे ज्ञानं वा, उपासना वेति, नास्मत्सिद्धान्ते कश्चन विशेषः । कारणे कार्यधर्मारोपस्त्वयुक्त एव । कार्ये पुनः कारणधर्माधिकरणत्वेनोपासना अभेदात् फलायेति सर्वत्र व्यवस्थितिः ॥ २० ॥

कारणभेद इत्यर्थः । ननु, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यनेनोपासनाकथनात् तस्याश्च वाचो धेनुत्ववदारोपिताकारेणापि सिद्धेः किमर्थमयमाग्रह इत्यत आहुः * ब्रह्मत्व इत्यादि * तथा च भवतूपासना, तथापि पूर्वसूत्रोक्तधर्मैस्तस्य ब्रह्मत्वे सिद्धे तदाकारस्याकल्पितत्वमप्यनुपपत्त्यभावात् सिद्धमेवेति वेदनस्य ज्ञानत्वमुपासनात्वं वास्तु, मनोव्यापारत्वस्योभयत्र तौल्यादतस्तत्र नास्मत्सिद्धान्ते कश्चिदाग्रह इत्यर्थः । नन्वतस्मिंस्तद्धर्मानारोप्य तत्त्वेन चिन्तनमुपासना, तस्य तत्त्वेन निश्चयो ज्ञानमिति स्वरूपभेदात् कुतो न विशेष इत्यत आहुः * कारण इत्यादि * अस्त्वयं विशेषस्तथापि हीने उत्कृष्टधर्मारोपस्य लोके कार्यसाधकत्वस्य विपरीते वैपरीत्यस्य च दर्शनात् कारणे यः कार्यधर्मारोपः स तु हीनत्वापादकत्वेन कार्यासाधकत्वादयुक्त एव । वेदे हि सर्वत्रान्नं ब्रह्मेत्यादौ कार्ये कारणगतानामुत्पत्तिस्थितिप्रलयकर्तृत्वादीनामारोपेणोपासनात् फलप्राप्तिः श्रूयते । तत्र हेतुः कार्यस्य कारणाभेद एव । सर्वत्र तथा दर्शनात् । कारणस्य कार्याभेदस्तु प्रत्यक्षाच्छास्त्राच्च विरुद्धः । यत्र पुनः सर्वथा भेदो यथा वाग्धेन्वोस्तत्रापि शब्दापेक्षयार्थस्योत्कृष्टत्वम् । शब्दशेषित्वादर्थस्य । अतो ज्ञानोपासनयोर्विशेषसत्त्वेऽपि यथैकदेशिभिः स्वीक्रियते तथा नास्तीति फलजनकत्वांशे विशेषाभावकथनं, तच्चोपपन्नमेवेत्यर्थः ।

माध्वास्तु, 'पूर्वाधिकरणविषयवाक्येषु, अदृश्येऽनात्म्येऽनिरुक्त इत्युक्तम् । तच्चादृश्यत्वम्, अन्तः प्रविष्टं कर्तारमेतम्, अन्तश्चन्द्रमसि मनसा चरन्तं सहैव सन्तं न विजानन्ति देवा इत्यत्रान्तःस्थस्य कस्य चिदुच्यते । तदग्रे च, इन्द्रो राजा जगतो य ईशे इति । सप्त युञ्जन्ति रथमेकचक्रं त्वष्टारं रूपाणि विकुर्वतमित्यादिभिरन्ये प्रतीयन्ते । अतः को वाऽऽनन्दमय इति, सन्देहे, इन्द्रो राजेत्यादि वच-

दैवतावाचकश्रुत्या, सप्त युञ्जन्तीत्यादिस्थलिङ्गाच्च कश्चिद्देवताजीवविशेष एव तत्र युक्तः । श्रुतेः सर्वापेक्षया प्रबलात्वाज्जगतो य ईश इत्यादियोगस्यापि तदुपोद्बलकस्य तत्र दर्शनाच्चेति प्राप्त इदं सूत्रद्वयं प्रववृते ॥ अन्तस्तद्धर्मोपदेशात् ॥ भेदव्यपदेशाच्चान्यः ॥ इति। अन्तः श्रूयमाणो विष्णुरेव । कुतः । 'अन्तःसमुद्रे मनसा चरन्तं ब्रह्मान्वविन्दद्दशहोतारमर्णे । समुद्रे अन्तः कवयो विचक्षते । मरीचीनां पदमिच्छन्ति वेधसः । यस्याण्डकोशꣳ शुष्ममाहुः प्राणमुल्बम्' इत्यादि तद्धर्मोपदेशात् । श्रुत्यर्थस्तु समुद्रे अन्तरर्णे अन्तर्जले मनसा चरन्तं यथेष्टं विहरन्तं दशहोतारं, हुदानादनयोः, दशेन्द्रियविषयदातारं ब्रह्मा अन्वविन्दद् व्यजानादिति तथा । मरीचीनां जीवानां पदमाश्रयभूतं वेधसः भूतभाविनो ब्रह्माण इच्छन्तीति । अण्डकोशं ब्रह्माण्डं यस्य शुष्मं वीर्यमाहुरिति । अत्र समुद्रशायित्वब्रह्माण्डवीर्यत्वादीनामन्तःप्रविष्टनिष्ठतयोपदिष्टानां लिङ्गानां विष्णवेकनिष्ठत्वादन्तःप्रविष्टः कर्ता विष्णुरेवेति । प्रलयार्णवशायित्वब्रह्माण्डवीर्यत्वयोः कथं विष्णुलिङ्गत्वमित्याकाङ्क्षायाम्, आपो नारा इति व्यासस्मृतिवाक्यं, चतुर्वेदशिखाश्रुतिश्चोपन्यस्ता । ननु तस्येन्द्राद्यभिन्नत्वं सर्वास्त्विति शङ्कायां द्वितीयसूत्रे, 'इन्द्रस्यात्मा निहितः पञ्चहोता । वायोरात्मानं कवयो निचिक्युः । अन्तरादित्ये मनसा चरन्तं देवानाꣳ हृदयं ब्रह्मान्वविन्ददित्यादिष्वेकस्यैव सर्वदेवान्तर्वर्तित्वकथनेन यथेष्टचारितयान्तर्यामित्वबोधनेनेन्द्रादिभ्यस्तस्य भेदव्यपदेशात् सोऽन्य एव तेभ्य इति वदन्ति ।

शैवस्तु छान्दोग्यश्रुतिमेव विषयवाक्यत्वेनोपन्यस्य साधकानुग्रहार्थं तत्र हिरण्मयं किमपि रूपं समाम्नाय सवितृमण्डलेऽधिवसति । तच्च त्रिलोचननीलकण्ठादिविशिष्टम् । न चाक्षिणी इति द्विवचनाविरोधः । तस्य पुण्डरीकोपमाबोधनार्थत्वात् । तृतीयस्य नेत्रस्य मुकुलितत्वेन तत्र पुण्डरीकोपमाया अभावात् । नचैतावता तृतीयाभावः शङ्क्यः । यथाहि कश्चित् विपुलं ब्राह्मणमुद्दिश्योच्यते, द्वावस्य पुत्रावग्निकल्पौ । न तावता तृतीयाभाव आयाति । किन्तूपमाभाव एव । तथात्रापि शक्यवचनत्वात् । ध्येयः सदेति वाक्यन्तु लौकिकानां भाक्तमेव । नापि पुण्डरीकाक्षत्वलिङ्गेन विष्णुः शङ्क्यः । कमलनेत्रत्वस्य लौकिकसाधारणत्वेन लिङ्गत्वाभावात् । नचास्मिन्

हिरण्मयपुरुषवाक्ये शिवासाधारणलिङ्गादर्शनात् कथं शिवाकारनिश्चय इति शङ्क्यम् । अस्य वाक्यस्य सन्दिग्धत्वेनासन्दिग्धेन वाक्यान्तरेणैतदर्थस्य निर्णेयत्वात् । तैत्तिरीयाणां महोपनिषदि, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके, य एषोऽन्तरादित्ये हिरण्मयः पुरुष इत्यादित्यान्तर्यामिणमभिधाय तदग्रिमानुवाके, आदित्यो वै तेज इत्यादिनाऽऽदित्यरूपस्य विभूतिमभिधाय एष पुरुष एष भूतानामधिपतिरिति भूतपतित्वेन तं निर्दिश्य तदग्रिमानुवाकेषु, सर्वो वै रुद्र इत्यादिषु, हिरण्यबाहवे अम्बिकापतय उमापतय इत्युपसंहारेण तत्र शिवाकारनिर्णयात् । अन्तर्यामिब्राह्मणे, एष त आत्माऽन्तर्याम्यमृत इति कथनाच्च । जाबालोपनिषदि, एतानि ह वा अमृतस्य नामधेयानीति शतरुद्रियप्रशंसावाक्येन अमृतपदस्य शिवपरतानिर्णयादत आदित्यान्तर्वर्ती त्रिलोचननीलकण्ठादिशरीरवानित्याह । तन्मन्दम् । शरीरपक्षस्य प्रागेव दूषितत्वात् । आकारेऽप्यक्षिद्वित्वस्य पुण्डरीकोपमाबोधनार्थत्वं तदा स्याद्यदि नीलग्रीवादिकं त्रिलोचनत्वसाधकमस्मिन् वाक्ये एतन्निर्णायकवाक्यान्तरे वा स्यात् । भूतानामधिपतिरित्यस्य तु न निर्णायकत्वम् । भूतपदस्य, क्षरः सर्वाणि भूतानि, पादोऽस्य विश्वा भूतानीतिवत् प्राणिमात्रवाचकत्वेन प्रेतवाचकत्वाभावान्न नीलग्रीवादिरूपवल्लिङ्गत्वम् । तस्य प्रेतमात्रवाचकत्वे च परिच्छिन्नैश्वर्यबोधकत्वेन परमैश्वर्यविघटकतया तस्यालिङ्गत्वमेवेत्युभयथापि तदगमकत्वात् । सर्वो वै रुद्र इत्यादीनां तु नैतद्वाक्यशेषत्वम् । आदित्यो वै तेज इत्यनुवाकान्ते, इत्युपनिषदित्यनेन विद्यासमाप्तिबोधनात् । एवममृतपदस्यापि न निर्णायकत्वम् । शतरुद्रियस्याऽमृतनामत्वेऽप्यमृतपदस्य शिवनामत्वाभावात् । इदं यथा तथा प्रहस्ताख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । यत्पुनर्ध्येयः सदेत्यस्य लौकिकवाक्यत्वमुक्तं, तत्त्वग्निपुराणादर्शनादेवेति । गायत्र्यां तु भर्ग इति पदं सान्तम् । द्वितीयपादे चास्यान्वयो मैत्रायणीयोपनिषदि सिद्धः । तथा, 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः । वह्निमध्ये स्थितं सत्यं सत्यस्यान्तः स्थितोऽच्युत इति तत्रैव मन्त्रः । योगियाज्ञवल्क्येऽप्येतादृशमेव वाक्यम् । ताभ्यामपि सर्वान्तरच्युत एवोक्तो, ध्येयत्वेन च भगवानेवात इत्यतोऽपि शैवमतमसङ्गतम-

येति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु काण्वषष्ठाध्यायस्थं, 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु । य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति । स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इति वाक्यं विषयत्वेनोपन्यस्य, तत्र किं जीवविशेष उच्यते, उत परमेश्वर इति सन्देहे विज्ञानमयशब्दस्य योगरूढिभ्यामात्मसामान्यवाचित्वाज्जाग्रदाद्यवस्थाभिर्जीवस्यैव प्रक्रान्तत्वाज्जीव एवेति प्राप्ते । अन्तः परब्रह्मैव भवितुमर्हति । कुतः । तद्धर्मोपदेशात् । सर्ववशित्वशुभाशुभकर्मफलाभागित्वसर्वाधिपतित्वादीनां परमेश्वरधर्माणामुपदेशात् । नचैते धर्माः सिद्धेः पूर्वं जीवेषु सम्भवन्ति । सत्कर्मणैव पदप्राप्तेश्चेत्यादियुक्तिभिर्हेतुं साधयित्वा, न केवलं धर्मव्यपदेशादेवान्तःस्थो विज्ञानमयो जीवादन्यः परमेश्वरः । किन्तु, भेदव्यपदेशाच्चान्यः । भेदव्यपदेशश्च यथात्रैव वाक्यशेषे । येषां नोऽयमात्मा, आत्मन्येवात्मानं पश्यतीति । आधाराधेयभावस्य भेदतन्त्रत्वादित्याद्युक्तवान् । 'आधुनिकास्तु, य एषोऽन्तरादित्ये हिरण्मय इति छान्दोग्यवाक्यं विषयतया वर्णयन्ति । तन्न । पाप्मभ्य उदित इत्यनेनोक्तस्य पाप्मभ्य उदयस्य पापनाशरूपतया ब्रह्मधर्मत्वाभावात् । धर्मान्तरस्य चात्रानुक्तत्वात् । प्रत्युत तेनैव लिङ्गेन चन्द्रनक्षत्रादिदेवताप्रकरणपठिततया च देवताविशेषावधारणाच्च । नचादित्यस्यान्तरिति भेदनिर्देशानुपपत्तिरिति वाच्यम् । आदित्यस्यान्तरपि आदित्यभिन्नस्य हिरण्यगर्भादेः स्मरणात् । 'ब्रह्मादीनां परं धाम त्रयाणामपि संस्मृतम् । वेदमूर्तिधरः पूषा पूजनीयः प्रयत्नत इति मात्स्यादिषु हिरण्मयशब्दाद्धिरण्यगर्भ एवात्रोपास्यत्वेन गम्यते । किञ्च, ध्येयः सदेतिरूपयोः श्रुतिस्मृत्योर्नारायणाख्यहिरण्मयस्य सूर्यमण्डल उपासनासिद्धेस्तदेकवाक्यतया हिरण्यश्मश्रुरित्यादिश्रुतेरपि नारायणपरत्वमेव, न परमेश्वरपरत्वम् । अपिच । यस्मिन् वाक्ये रूपसंस्थानादिकं श्रूयते, तत्र तत्तद्देवतापरिग्रह एवौत्सर्गिकः । असाधारण्यात् । ब्रह्मणश्च स्वतो नीरूपतया, अरूपवदेव हि तत्प्रधानत्वादित्यत्र वक्ष्यमाणत्वात् । क्वचित्तु प्रकरणादिबलाद्वादीन् विहाय देवादिरूपैरेवारूप ईश्वर उपास्य इष्यते ।

नचेह तथा बलवत् प्रकरणादिकमस्ति । अन्यथा देवतोपासनमात्रोच्छेदापत्तेः । सर्वत्रैव ब्रह्मोपासनसम्भवात् । लीलाविग्रहोऽपि विष्ण्वादिदेवतानामेव स्वस्याधिकारसम्पादनार्थः । न त्वीश्वरस्य । अप्राणो ह्यमनाः शुभ्रः अक्षरात् परतः परः, न तस्य कार्यं करणं च विद्यत इत्यादिश्रुतीनां सङ्कोचे प्रमाणाभावात् । तदुक्तं विष्णुपुराणे । 'स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् । करोति सर्वभूतानां नाशं चान्ते जगत्पतिरिति ।

तत्र विषयवाक्यव्याख्यानादिकं तु न दुष्टम् । तथाप्येतस्य विषयवाक्यत्वेऽधिकरणस्य पूर्वाधिकरणेन सह न स्फुटा सङ्गतिरिति बोध्यम् । यत्पुनश्छान्दोग्यवाक्यस्यस्यालिङ्गत्वादिकमुक्तं, तत्त्वतुच्छमेव । अत्र पाप्मनः उदयस्य सर्वकर्मोऽज्ञानराहित्यरूपस्य विवक्षितत्वादिति प्रागेवोक्तम् । नच पाप्मशब्दस्य पापे शक्तत्वात् तत्र उदयस्य पापनाशरूपत्वमेव युक्तं, न यावत्कर्माऽज्ञनराहित्यरूपत्वमिति वाच्यम् । 'स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । कर्मणां जात्यशुद्धानामनेन नियमः कृत' इति विधिप्रतिषेधयोर्व्यवहारनियमार्थत्वबोधके वाक्ये कर्ममात्रस्य जात्यशुद्धत्वबोधनेन तदज्ञाने पुण्यरूपेऽप्यशुचिशाबलस्य दुरपोहत्वेन सर्वस्यैव पाप्मरूपत्वात् । अन्यथा पुण्यफलस्यापि मुमुक्षूपादेयतापत्तेः । अतो धर्मान्तरानुक्तावपि न वाक्यस्य जीवपरत्वं शङ्कयितुम् । आदित्यान्तस्तु न हिरण्यगर्भादिः । मात्स्ये परं धामोद्दिश्य तस्य पूपत्वकथनेन तत्र परब्रह्मण एवाभिप्रेतत्वनिश्चयात् । ध्येयः सदेति वाक्येऽपि परमेश्वर एवोच्यते । 'नारायणः शिवो विष्णुः शङ्करः परमेश्वरः । एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इति वाराहपुराणवाक्येन तस्य ब्रह्मनामत्वात् । नीरूपेश्वरवादस्येक्षत्यधिकरणव्याख्यान एव निरस्तत्वात् । नचैवं, यो देवानां नामधा एक एव, एकं सद्विप्रा बहुधा वदन्तीत्यादिश्रुत्या, हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृगित्यादिस्मृत्या च सर्वत्र ब्रह्मोपासनायाः शक्यवचनत्वेन देवतामात्रोपासनोच्छेद इति शङ्क्यम् । ज्ञानपूर्वकोपासकान् प्रति तस्येष्टत्वात् । अज्ञान् प्रति तु तदभावात् । येऽप्यन्यदेवताभक्ता इत्यादिभगवद्गीतावाक्यसन्दर्भेण तथा निश्चयात् । स्वरूपे विग्रहस्तु नास्त्येव । आकारस्तु स्वरूपात्मकमपेत्यसङ्गदुक्तमुपपादितं च । तेनाप्राणो ह्यमनाः शुभ्र इत्यादि

आकाशस्तल्लिङ्गात् ॥ २१ ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच। सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते। आकाशं प्रत्यस्तं यन्ति। आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति। तत्र संशयः। भूताकाशो, ब्रह्म वेति। ननु कथमत्र सन्देहः। आकाशव्योमशब्दा ब्रह्मण्येव प्रयुज्यन्ते ब्रह्मप्रकरणे। कार्यनिरूपणे तु महाभूतवचनः। यथा, आकाश आनन्दो न स्यात्, परमे व्योमन् प्रतिष्ठितेत्यादि। आत्मन आकाशः सम्भूत इति

श्रुतीनां न विरोधः। अरूपवदेवेति सूत्रे तु रूपवद्भिन्नमेवोच्यते, न तु रूपरहितम्। नञः पर्युदासार्थत्वात्। अन्यथा स्वरूपसिद्ध्यैतावतापि रूपाभावबोधनसिद्धेर्मतुब्वैयर्थ्यस्य दुर्वारत्वात्। अतो, न तस्य कार्यं करणं चेत्यत्र सङ्कोच एतदेव सूत्रं प्रमाणमित्यसङ्कोच एव प्रमाणाभावः। श्रुतयस्तूक्ता वक्ष्यन्ते च। उक्तं विष्णुपुराणवाक्यं त्ववान्तरक्षितिनाशविषयकं, न तु महाकार्यविषयकम्। शरीराणीति बहुवचनेन तथा निश्चयात्। अत इदं भिक्षावैयग्र्यदशायामेवावादीदिति दिक्। अतो यत्रासाधारणधर्मोपदेशोऽभिमान्यादिभेदव्यपदेशो वा तत्र रूपोक्तावनुक्तौ वा परं ब्रह्मैवाभिधीयत इति निश्चयः॥ २०॥

इति षष्ठाधिकरणम्॥

आकाशस्तल्लिङ्गात्॥ छान्दोग्यप्रथमप्रपाठकस्थं विषयवाक्यमुपन्यस्याधिकरणप्रयोजनं विचारयन्ति। * नन्वित्यादि, विचार इत्यन्तम् *। तत्र कथंपदे गृहीतं प्रकारं विभजन्ते। * आकाशेत्यादि *। यद्यपि लोकप्रसिद्धेः प्रयोगप्राचुर्याच्च सन्देहः सम्भवति, तथाप्यस्य वाक्यस्य प्रकरणावरुद्धत्वेन प्रकरणे चाकाशपदेन कारणमुक्त्वा कार्यनिरूपणस्योपक्रान्ततया प्रकरणादेवाकाशशब्दार्थस्य निर्णयसिद्धेराकाशः प्रकरणादिति सूत्रयितव्यम्। अथ प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात् तेन निर्णिनीषा तदा तु जन्मादिसूत्रे लिङ्गस्य निर्द्धारितत्वात् तेनैवैतद्वाक्यनिर्णयसिद्धेः सूत्रमेव न प्रयो-

कार्यनिरूपणम् । अतः प्रकरणादेव सन्दिग्धनिर्णये किमिति सूत्रारम्भः । जन्मादिलक्षणसूत्रेण चायमर्थो निर्णीतः । अन्यथा ब्रह्मशब्देऽपि सन्देहः स्यात् । महाभूतवेदादिवाचकत्वात् । तस्मात् प्रकरणादेव परिज्ञानं भविष्यतीति चेत् । उच्यते । असन्दिग्धे प्रकरणे तथैव निर्णयः । इह पुनः प्रकरणमपि सन्दिग्धम् । अतो विचारः ।

अवान्तरविद्यायां पर्यवसितप्रकरणवदस्यापि प्रकरणस्य भूताकाश एव पर्यवसानमिति । लोकभाष्यन्यायेनाकाशो भौतिक एवेति पूर्वपक्षस्तत्राह ।

तव्यम् । अथ जन्मादिसूत्रे लक्षणस्यापरीक्षितत्वान्न लिङ्गता, तदा त्विदानीं तस्याः सिद्धत्वादाकाशो ब्रह्मलिङ्गादित्येवं प्रणेतव्यम् । न तु तल्लिङ्गादिति पूर्वपक्षाशयः । प्रतिवचनाशयस्तु स्फुट एव । प्रकरणस्य सन्दिग्धत्वं तु उपक्रमे उद्गीथोपासनस्योक्तत्वादत्र परोवरीयोरूपस्योत्कृष्टस्य फलस्य कथनाच्च ज्ञेयम् । तेन विचारस्यावश्यकत्वमिति । अधिकरणसङ्गतिस्तु प्रसङ्गरूपा । पूर्वाधिकरणयोः प्रत्ययकृते सन्देहे वारितेऽत्र प्रकृतिकृतसन्देहस्य वारणीयत्वादिति । प्रयोजनमुक्त्वा पूर्वपक्षमाहुः । * अवान्तरेत्यादि * । तदा च यथा जानश्रुत्युपाख्यानं संवर्गविद्यायां पर्यवसितं तथास्यापि प्रकरणस्य भूताकाश एव पर्यवसानम् । लोकेऽवगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति लोकभाष्यन्यायेनात्र भूताकाशग्रहणस्यैव युक्तत्वात् । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति जैमिनिसूत्रात् । ब्रह्मग्रहणे तु लक्षणापत्तेः । बाधकं विना तदादरस्यानुचितत्वात् । नचाकाशने, आकाशयतीति वा योगेन प्रकाशकं ब्रह्मोच्यतेऽतो न दोष इति वाच्यम् । रूढ्यपेक्षया योगस्यापि दुर्बलत्वात् । नच लिङ्गबोधकवाक्यासङ्गतिः । सर्वाणि ह वा इमानि भूतानीति सर्वपदस्य च वाय्वादिषु सङ्कोचात् सुखेन सङ्गतेः । किञ्चेह, इमानीति कथनादवान्तरभूतसम्बन्ध्यवकाशरूप एव स ग्राह्यः । फलन्तु तादृशोपासनाबलादेव भविष्यतीति पूर्वः पक्ष इत्यर्थः । सूत्रं

आकाशस्तल्लिङ्गात् ॥ आकाशः परमात्मैव । कुतः । तल्लिङ्गात् । श्रुतिलिङ्गादयो नियामकत्वेन पूर्वतन्त्रवदिहापि गृह्यन्ते । लिङ्गं श्रुतिसामर्थ्यम् एकवाक्यता च सर्वासां ब्रह्मश्रुतीनाम् । तत्र ब्रह्मैव जगत्कारणमिति निःसन्दिग्धेषु सिद्धम् । सर्वशब्दवाच्यत्वं ब्रह्मण्येव । तत्र वाक्यार्थापेक्षया पदार्थस्य दुर्बलत्वाद् वाक्यार्थः सर्वगतित्वादिः । तद् वाक्यार्थान्यथाऽनुपपत्त्या आकाशपदार्थो ब्रह्मेति । सर्वशब्दवाच्यत्वाच्च न लक्षणा । मुख्यत्वाच्च । यावन्मुख्यपरत्वं सम्भवति तावन्न कस्यापि वेदान्तस्यापरब्रह्मपरत्वमिति मर्यादा । तस्माद्, यदेष आकाश आनन्दो न स्यादितिवदत्राप्याकाशो ब्रह्मैवेति सिद्धम् ॥ २१ ॥

पठित्वा समादधाना व्याचक्षते । *आकाश इत्यादि* । *नियामकत्वेनेति * । अर्थविशेषनिर्णायकत्वेन । * श्रुतिसामर्थ्यमिति * । अन्यानपेक्षस्य शब्दस्य स्वरसेनार्थबोधकत्वम् । * एकवाक्यतेति * । विभागे साकाङ्क्षत्वे सत्येकार्थप्रतिपादकता । सा च समन्वयरूपा । उपपत्त्यात्मकं तात्पर्यनिर्णयलिङ्गम् । तेन * तल्लिङ्गादित्यस्य श्रुतिसामर्थ्यात्तात्पर्यनिर्णयलिङ्गाच्चेत्यर्थः सिद्ध्यति । * मुख्यत्वादिति * मुख्यार्थत्वात् । तथाच, यतो वा इमानि भूतानि जायन्त इत्यादिषु निखिलजडजीवकारणत्वं ब्रह्मणि सिद्धम् । अत्रापि तदेव सर्वपदेन निखिलान्युद्दिश्य, भूतपदेन च देहविशिष्टजीवतया महाभूततया च तानि जीवजडरूपेण निष्कृष्य तत्कारणत्वमाकाशे बोध्यते । तथा, एभ्य इत्यनेन पूर्वोक्तान्येव भूतानि परामृश्य ततो ज्यायस्त्वं च बोध्यते । तथा परमस्थानत्वरूपं परायणत्वं च । तद्यदि भूताकाशो गृह्येत, तदा सर्वपदार्थसङ्कोचेन सर्वपदसामर्थ्यस्यार्द्धबाधाद् भूतादीनां पदानामपि तद् बाध्येत । तच्चासङ्गतम् । एकपदानुरोधेनानेकपदार्थसङ्कोचात्मकस्य सामर्थ्यबाधस्यानुचितत्वादिति । किञ्च । सर्वे वेदा यत्पदमामनन्तीति, तं त्वौपनिषदमिति च श्रुत्या सर्वस्य वेदस्य ब्र-

ह्मण्येव तात्पर्यमिति सिद्धम् । तद्यदि निरङ्कुशसर्वकारणत्वमस्मिन् वाक्ये भूताकाशस्योच्येत, तदार्थभेदाद् विभागे साकाङ्क्षत्वाभावाच्च सर्वासां श्रुतीनामेकवाक्यता व्याहन्येत । यद्यपि सर्वे वेदा इत्यत्रासङ्कुचितवृत्तिना सर्वशब्देन ब्रह्मणि सर्वशब्दवाच्यत्वं तत्तत्पदार्थरूपतया सिद्धं, तथापि तत्र वेदे वाक्यार्थापेक्षया तदेकदेशभूतस्य पदार्थस्य दुर्बलत्वाद् वाक्यार्थ एवादरणीयः । वाक्यार्थस्तु सर्वगतित्वादिः । गतिराश्रयः । प्रश्ने, शालावत्येनैतल्लोकगतेः पृष्टत्वेऽपि जैवलिना तदुपपादनार्थं सर्वभूतोत्पत्तिप्रलयाधारत्वं वदता परायणपदेन सर्वगतित्वं प्रतिपाद्यत इति । तथा आदिपदेन सर्वज्यायस्त्वं परोवरीयस्त्वमनन्तत्वं च । तत् * तस्मात् कारणाद् वाक्यार्थान्यथानुपपत्तिरूपयोपपत्त्यापि, आकाशपदस्य ब्रह्मण्येव तात्पर्यमित्यर्थः । * सर्वशब्दवाच्यत्वादिर्ग्रन्थस्तूक्तानार्थः। एवमत्र श्रुतिसामर्थ्यरूपेण लिङ्गेन उपपत्तिरूपेण तात्पर्यालिङ्गेन चेति द्विधा व्याख्यातम् ।

अन्ये तु, तल्लिङ्गादित्यस्य, ब्रह्मासाधारणधर्मादित्यर्थं वदन्ति। केचिच्चैवं सूचयन्ति । तन्मतेऽधिकरणवैयर्थ्यम् । तद्धर्मोपदेशाधिकरणेनैव गतार्थत्वादिति ।

विज्ञानभिक्षुस्तु, काण्वचतुर्थाध्याये सुषुप्तं जीवमुपक्रम्य पठ्यते, तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इत्यादि । तत्र किं भूताकाशस्तद्देवता वा ब्रह्म वोच्यत इति संशयः । तद्बीजं तु उपक्रमोपसंहारयोर्ब्रह्मवाचकब्रह्मात्मादिपदवन्मुख्यवाक्ये भूताकाशादिवाचकस्याकाशपदस्य श्रवणम् । अन्यतरस्य गौणत्वे नियामकाभावस्त्रयाणामपि स्वापाधारत्वादविशेषश्च । निर्णयस्तु, आकाशो ब्रह्मैवेति । हेतुस्तु तल्लिङ्गात् । लिङ्गानि तु, स यथोर्णनाभिस्तन्तुनोच्चरेदिति, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत् सत्यस्य सत्यमित्यादीनि । सर्वश्रुतिषु ब्रह्मणि तथा दृष्टान्तदर्शनात् । अचेतनस्य भूताकाशस्याग्निविस्फुलिङ्गदृष्टान्तानर्हत्वात् । तद्देवतायाश्च सर्वदेवान्तर्गतत्वेनाकारणत्वात् । य एवायमाकाशे पुरुष इति पूर्ववाक्येनाकाशदेवताया ब्रह्मत्वप्रतिषेधाच्च । सत्यस्य सत्यमिति च नामपूर्ववाक्येन ब्रह्मण्येव व्याख्यातम् । तत्र सत्यशब्देन पञ्चभूतानि व्याख्याय तद्-

अत एव प्राणः ॥ २२ ॥

पेक्षयापि निषेधशेषं ब्रह्म सत्यमिति श्रुत्यैव स्पष्टमुक्तत्वात्। स्कान्देऽपि, 'चैतन्यापेक्षया प्रोक्तं व्योमादि सकलं जगत्। असत्यरूपं सत्यं तु कुम्भकुण्डाद्यपेक्षया' इत्युक्तत्वाच्च । अतः शब्दसाम्येऽपि ब्रह्मलिङ्गाद् ब्रह्मैवाकाशशब्दार्थः। आकाशशब्दश्च ब्रह्मणि रूपकविधया विभुत्वनिर्लेपत्वादिगुणलाभाय, मुखे चन्द्रवच्छ्रुत्या प्रयुक्तः। अत एव, परमे व्योमन् प्रतिष्ठितेत्यादिषु श्रुतिष्वाकाशरूपेण ब्रह्म निर्दिश्यते। नानार्थताया, गङ्गायां घोष इतिवल्लक्षणायाश्चायुक्तत्वादिति। एवं प्राणज्योतिरादयः शब्दा अपि जीवनत्वप्रकाशनत्वादिप्रतिपादनाय रूपकत्वेनैव व्याख्येयाः। वस्तुतस्त्वाकाशप्राणज्योतिरादयः शब्दा आकाशादिभावापन्नब्रह्मपरा एवैतेषु ब्रह्मवाक्येषु भवन्ति । केवलब्रह्मपरत्वे सत्याकाशादिलिङ्गानुपपत्तेः। यत्तु छान्दोग्यवाक्यमाधुनिका इहोदाहरन्ति, अस्य लोकस्य का गतिरित्यादि । तन्न । प्रकरणादिशून्यात् केवललिङ्गाच्छ्रुतेर्बलवत्त्वस्य पूर्वमीमांसासूत्रादेवावधारणात् । तत्र च श्रुतिप्रकरणयोरभावात् । किञ्च । प्रश्ने, अस्य लोकस्येत्यनेन भूर्लोकजना एवोक्ता इति प्रत्युत्तरे भूतानीत्युक्तत्वात् सर्वाणि भूतानीति ब्रह्मलिङ्गं न भवति । आकाशसाधारण्यात् । आकाशाद् वृष्टिद्वारैषां भूर्लोकस्थानां सृष्टिस्थितिसंहारादित्याह ।

तदसङ्गततमम्। सूत्रविरोधात्।सूत्रे केवलस्य लिङ्गस्यैव हेतुत्वेनोक्तत्वात्। त्वद्रीत्या तु, श्रुतिलिङ्गप्रकरणैरितिपाठापातात्। श्रुतिविरोधाच्च। श्रुतौ सामाद्यदोलोकान्तगतिज्ञानवतः शालावत्यस्यैतल्लोकगतिप्रश्नेन सामाद्येतल्लोकान्तस्य परमाश्रये परमोपजीव्ये वा प्रश्नपर्यवसानात्, तादृशत्वस्य चाकाशेऽसम्भवात् । अतश्छान्दोग्यवाक्यस्याविषयत्वकथनमसङ्गतम् । अन्येषामाधुनिकत्वकथनमपि तथा। स्वस्य सर्वार्वाचीनत्वात् । प्राचीनवृत्त्यादीनामनाश्रयणाच्च । आकाशशब्दस्य भूताकाशतद्देवताब्रह्मसु साधारण्यकथनमपि तथा। ब्रह्मणि रूपकविधया प्रयोगाङ्गीकारेण गौण्या वा निरूढलक्षणाया वाऽऽदराद् ब्रह्मवाचकत्वस्याभावेन साधारण्यस्याभावादिति ॥ २१ ॥

इति सप्तमाधिकरणम् ॥

अत एव प्राणः ॥ अत्रापि छान्दोग्यप्रथमप्रपाठकस्थं वाक्यं

प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते । कतमा सा देवतेति प्राण इति होवाच । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । सैषा देवता प्रस्तावमन्वायत्तेति । तत्र संशयः । आसन्यः प्राणो ब्रह्म वेति । पूर्वपक्षसिद्धान्तौ पूर्ववदेवेत्यतिदिशति ।

नन्वधिकरणानां न्यायरूपत्वात् सर्वत्र गमिष्यति, किमित्यतिदिश्यत इति । उच्यते । प्राणस्य मुख्यस्यापि सर्वभूतसंवेशनं स्वापादौ श्रुतावेवोपपाद्यते यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिना । तत्र यथा प्राणविद्यायां न ब्रह्म-

---

विषयवाक्यत्वेनोदाहरन्ति * प्रस्तोतरित्यादि * । अत्रापि देवतापदेनोपक्रमादन्नादित्यसहपाठाच्च प्रकरणं न ब्रह्मणः । प्राणस्य प्राणमित्यादिर्ब्रह्मप्रकरणस्था श्रुतिः पुराणप्रसिद्धिश्च सन्देहबीजम्। श्रुतौ तु प्रस्तावः सामोपासनाविशेषः । अन्वायत्ता अनुगता प्रस्तावाख्योपासनाविषया । प्राणश्च वायुवत् प्रतीयमानोऽपि न वायुविकारः । बुद्धिः प्राणस्तु तैजस इति पुराणेषु भिन्नकारणकत्वेन सिद्धत्वात् । श्रुतौ च प्राणाद्वायुरजायतेति वायुजनकत्वेन, यो वायुः स प्राण इति श्रुतौ वायुत्वेन च कथनात् । यद्यपि लोके वायुविकारत्वेनोक्तस्तथापि तदपेक्षया वेदहृदयरूपस्यैतदुपबृंहणस्य बलिष्ठत्वात् । अतः स आसन्यो ब्रह्म वेति संशयः । पूर्वपक्षस्तु पुराणप्रसिद्धेरासन्यो ग्राह्य इति । सिद्धान्तस्तु, असङ्कुचितवृत्तेः सर्वशब्दस्य सामर्थ्यादेवात्र प्राणशब्देन ब्रह्म ग्राह्यम । प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात् । पुराणस्य चान्यत्र सावकाशत्वेनात्रानुपबृंहणतायामपि विपरीतबलाबलभावस्याशक्यकल्पनत्वादिति । अत्राधिकरणवैयर्थ्यमाशङ्कते * नन्वित्यादि * । समादधते * उच्यत इत्यादि * । * उपपाद्यत इति * धर्मत्वेनोपपाद्यते । * तत्रेत्यादि * तत्र प्राणविद्यावाक्ये पुरुषस्वापप्रयुक्तं भूतसंवेशनं, तत्प्रबोधप्रयुक्तं

परत्वमेवमेतस्यापि न ब्रह्मपरत्वमिति, न न्यायेन प्राप्नोति। अतोऽतिदिशति। अनेन चायमतिरिक्तो न्याय आपादितः। यत्रैव प्रकरणे ब्रह्मपरत्वे कल्प्यमाने न किञ्चिद् बाधकं तत्रैव ब्रह्मपरत्वं कल्पनीयमिति, न त्वन्यस्मिन् सम्भवे तत्परत्वमिति। अत एव तल्लिङ्गात् प्राणशब्दवाच्यं ब्रह्मेति ॥२३॥

च भूताधिजननमुच्यते, न तु स्वतन्त्रमतो यथा न प्राणविद्याया ब्रह्मपरत्वमेवमस्यापि वाक्यस्य न ब्रह्मपरत्वं स्याद्यदि श्रुतिसामर्थ्यरूपे हेतौ स्वातन्त्र्यपारतन्त्र्यविवेको न क्रियेत। * इति * हेतौ। प्राणविद्यासाधारण्यस्य बाधकस्य सत्त्वात् तेन न्यायेनास्य ब्रह्मपरत्वं न प्राप्नोति। अतोऽप्राप्तत्वादतिदिशति। एवकारेण बाधकयोगं व्यवच्छिन्दन्नत्र तं हेतुं प्रापयतीत्यर्थः। एतस्यातिदेशस्य फलमाहुः। * अनेनेत्यादि *। * न त्वन्यस्मिन् सम्भव इति * सम्भवान्तरे सति तु नेत्यर्थः। सिद्धमाहुः * अत एवेत्यादि * बाधकशून्यात् पूर्वोक्ताल्लिङ्गात्तथेत्यर्थः। नच, प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनो यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त इत्यत्रेन्द्रियसंवेशनमुच्यते, न भूतसंवेशनमिति विषयभेदात् कथमस्य साधारणत्वशङ्केति वाच्यम्। दीपश्चक्षुस्तथा रूपं ज्योतिषो न पृथग्भवेदित्यादिषु पुराणवाक्येष्विन्द्रियाणां भूतापृथग्भावस्योक्तत्वेन भूतविशेषत्वस्य सिद्धतयेमानीत्यस्य श्रुत्यन्तरे वागादिरूपत्वेनोक्तानीत्यर्थस्य शक्यवचनत्वेन शङ्कोदयस्य सम्भवात्। अतः सर्वथेदं समाधेयमिति। एतेन माहात्म्यज्ञानोपयोगिनीनां देवान्तरोपासनानामनुच्छेदायेदमधिकरणम्। अन्यथा तु लोके पित्रपेक्षया क्वचित् पुत्रमाहात्म्यदर्शनात्, केचिदं ब्रह्मकार्यत्वेऽपि ब्रह्मापेक्षयाऽधिका भविष्यन्तीति शङ्का स्यादिति तेनोपोद्घातः सङ्गतिरिति बोधितम्। एवञ्चात्रातिदेशाङ्गीकारे, आपो वा इदं सर्वमित्यादिवाक्येष्वपि सर्वात्मकत्वादिब्रह्मलिङ्गदर्शनादबादिशब्दानामपि ब्रह्मप्रकरणे ब्रह्मवाचकत्वमित्यपि साधितं ज्ञेयम्। अधिकरणानां न्यायरूपत्वादिति।

ज्योतिश्चरणाभिधानात् ॥ २३ ॥

इदमामनन्ति । अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु । इदं तावद्यविदमस्मिन्नन्तः पुरुषे ज्योतिरिति ।

तत्र ज्योतिःशब्देन प्राकृतं ज्योतिराहोस्विद् ब्रह्मैवेति संशयः ।

अत्र सर्वेऽपि ब्रह्मासाधारणधर्ममेव हेतूकृत्याधिकरणं योजयन्तीति तद्दूषणमपि पूर्ववदेव बोध्यम् ।

माध्वास्तु, तद्धि त्वं प्राणो अभवः महान् भोगः प्रजापतेः । भुजः करिष्यमाणः यद्देवान् प्राणयो न वा ' इति तैत्तिरीयोपनिषच्छ्रुतिं विषयवाक्यत्वेनोपन्यस्याधिकरणं रचयन्ति तत्र लोकप्रसिद्धिः, ईशानः प्राणदः प्राण इति विद्वद्रूढिः सन्देहबीजम् । श्रीश्च ते लक्ष्मीश्च पत्न्यावित्यादि तल्लिङ्गं हेतुत्वेनाहुः । अतिदेशप्रयोजनं तु किमपि नाहुः । अत्रापि पूर्ववदेव दूषणम् । किञ्चात्र हेतुः पुरुषसूक्तस्थो, विषयवाक्यं भर्तृसूक्तस्थमतो हेतुसाध्यवैयधिकरण्यपरिहारप्रयासश्चाधिक इत्यवधेयम् ।

विज्ञानभिक्षुस्तु कौशीतकिब्राह्मणादिस्थां ब्रह्मप्रकरणीयां श्रुतिं विषयत्वेन वक्तीति तद्दूषणमपि पूर्ववदेव ॥ २२ ॥

इत्यष्टमाधिकरणम् ॥

ज्योतिश्चरणाभिधानात् ॥ *आमनन्तीति* छान्दोग्ये पञ्चमप्रपाठके वदन्ति । श्रुतौ तु, *विश्वतः पृष्ठेष्विति* सर्वेषामुपरि । अयं च विश्वशब्दो न सङ्कोचसह इति ज्ञापनाय तदर्थकं शब्दान्तरं * सर्वतः पृष्ठेष्विति * । शेषं स्फुटम् । संशयमाहुः * तत्र ज्योतिरित्यादि * । अत्र लोकप्रसिद्ध्या, अनादिमत् परं ब्रह्मेति प्रकृत्य पठितेन, ज्योतिषामपि तज्ज्योतिरितिगीतावाक्येन च कोटिद्वयोपस्थितिः

अत्रासाधारणब्रह्मधर्माभावात् पूर्वपक्षः । सिद्धान्ते तु चरणस्य ब्रह्मधर्मत्वमिति । एतावानस्य महिमा, अतो ज्यायांश्च पूरुषः, पादोऽस्य सर्वा भूतानि त्रिपादस्याऽमृतं दिवीति पूर्ववाक्यम् । गायत्री वा इदं सर्वभूतं यदिदं किञ्चेति गायत्र्याख्यब्रह्मविद्यां वक्तु तस्याः पादचतुष्टयं प्रतिपाद्य ब्रह्मणश्चतुष्पात्त्वमुक्तम् ।

संशयबीजम् । पूर्वपक्षमाहुः । * अत्रेत्यादि * । अयमर्थः । लोके तमोविरोधी पदार्थ आदित्यादिर्ज्योतिःपदेनाभिधीयते । अत्र च दीप्यत इत्युक्तं, प्रकाशकत्वमपि तस्यैव लिङ्गम् । तथाग्रे, तस्यैषा दृष्टिर्यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति, तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेर्ज्वलत उपशृणोतीति जाठरस्याग्नेर्लिङ्गम् । नच सूर्यादिप्रकाशस्य दिवोऽर्वागपि दर्शनाज्जाठरप्रकाशस्य च क्वाप्यदर्शनादुभयोर्बाधे गीतावाक्यादिभिर्ब्रह्मैव ज्योतिःपदवाच्यतयाऽऽदरणीयमिति वाच्यम् । ब्रह्मासाधारणधर्मस्य तत्प्रकरणस्य चात्रानुपलम्भात् । अतस्तेजोधर्मस्यात्र दर्शनाद्, बर्हिराज्याधिकरणन्यायेनात्र शास्त्रप्रसिद्ध्यपेक्षया लोकप्रसिद्धेरेवात्र फलवत्त्वाच्च त्रिवृत्कृतं वा प्राकृतमेव तेज इह ग्राह्यम् । अघटमानो धर्मो द्युमर्यादत्वादिर्यः स तूपासनार्थः । किञ्च । यदि ब्रह्मैवात्रोपास्यत्वेनाभिसंहितं स्यात्तदाऽस्या उपासनायाश्चक्षुष्य. श्रुतो भवतीत्यल्पं फलं नोच्येत । अतः फलमपि वाक्यस्य तेजस्तात्पर्यकत्वगमकमतः प्राकृतं तेज एवात्रादरणीयमिति पूर्वः पक्षः । सिद्धान्ते युक्तिमाहुः । * सिद्धान्ते त्वित्यादि * । नन्विह कुत्र चरण उक्तो यस्य ब्रह्मधर्मत्वमुच्यत इत्यत आहुः । * एतावानित्यादि *। तथाच यद्यप्यत्र नोक्तस्तथापि वाक्यान्तर उक्तस्तस्य चैतस्य चैकवाक्यत्वमतश्चरणलाभ इत्यर्थ. । कथमेकवाक्यतेत्याकाङ्क्षायां तामुपपादयन्ति * गायत्रीत्यादि, * । * सिद्धमित्यन्तम् * उक्तरीत्या तां ब्रह्मप्रतिपादकविद्यां वक्तु यस्मात् तस्या भूतादिपादचतुष्टयं प्रतिपाद्य तदेतदृचाऽभ्यनूक्तमिति तत्पदेन तदेव चतुष्पात्त्वं परामृश्य ब्रह्मणश्चतुष्पात्त्वमृचोक्तम् । यदि हि सा ब्रह्मविद्यात्वेन

पुरुषसूक्तेऽप्याश्रमचतुष्टयस्था जीवाः पादत्वेनोक्ताः। तथा प्रणवब्रह्मविद्यायामप्यकारोकारमकारनादवाच्याश्चत्वारः पादा विश्वतैजसप्राज्ञतुरीया उक्ताः। तद्विष्णोः परमं पदमिति च। ब्रह्मपुच्छमिति च। सत्यकामब्राह्मणे तु स्पष्टा एव ब्रह्मणश्चत्वारः पादा निरूपिताः। अतः सच्चिदानन्दरूपस्य प्रत्येकसमुदायाभ्यां चतूरूपत्वम्। तत्र केवलानां कार्यत्वमेव। चतुर्थपादस्य तु ब्रह्मत्वम्।

विवक्षिता स्यादन्यथैवं कथनं निष्प्रयोजनकं स्यात्। अत एवं गायत्र्या ब्रह्मविद्यात्वेन प्रकरणस्य ब्राह्मत्वे सिद्धे, एकप्रकरणगतत्वेनैकवाक्यतेत्यर्थः। नन्वग्रिमसूत्रैकदेशे प्रकरणस्य ब्राह्मताया आक्षेप्स्यमानत्वेन सन्दिग्धत्वान्न तावन्मात्रेणात्र ब्रह्मणश्चतुष्पात्त्वसिद्धिरिति हेतोः साध्यसमत्वमत आहुः। * पुरुषसूक्त इत्यादि *। तत्र पुरुषसूक्तं प्रकृत्य पठिते, एतावानितिमन्त्रे श्राविनानां पादानां द्वितीयस्कन्धीये पुरुषसूक्तविवरणाध्याये, 'पादास्त्रयो वहिश्चासन्न प्रजानां य आश्रमाः। अन्तस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः' इत्येतेन विवरणादाश्रमवद्देहविशिष्टा जीवाः पादत्वेन सिद्धा इति तत्प्रत्यभिज्ञानादत्र ब्रह्मपादसिद्धिः। किञ्च। यद्येकत्रैव क्वचिद् ब्रह्मणः पादनिरूपणं स्यात्, तदा कथञ्चित् सन्दिह्येतापि। अस्ति तु तद् बहुषु स्थलेष्विति बोधयितुमाहुः। * तथेत्यादि *। तथाच माण्डूक्यादौ काठके तैत्तिरीये छान्दोग्यस्थसत्यकामब्राह्मणे च नानाप्रकारेण पादश्रावणान्न ब्रह्मणश्चतुष्पात्त्वे सन्देह इति न हेतोः साध्यसमत्वमित्यर्थः। ननु भवतु ब्रह्मणश्चतुष्पात्त्वं, तथापि ते चत्वारो न पशोरिवावयवाः किन्त्वंशा एव वाच्याः। तच्च न युज्यते, ब्रह्मणोऽनंशत्वादित्यत आहुः। * अत इत्यादि *। यतो जन्माद्यधिकरणेषु ब्रह्मणस्त्रिरूपता, कार्यकारणभावो, विरुद्धधर्माधारत्वं च साधितमत एवं चतूरूपत्वादेवमंशाः सुखेन युज्यन्त इत्यर्थः। ननु भवतु ब्रह्मणश्चतुष्पात्त्वं, तथाप्यत्र प्रकरणे सत्यकामब्राह्मणवत् कार्यरूपा एव भूतादयः पादा निरूप्यन्ते। तेषां च न ज्योतिर्वाच्या-

तत्रापि षड्विधत्वप्रतिज्ञानाद् भूतपृथिवीशरीराणां परिचायकत्वेन षड्विधत्वमनिरूप्य हृदयस्य षड्विधत्वं निरूपयँस्तस्य ह वा एतस्येत्यादिना पञ्च देवपुरुषान्निरूप्य तेषां द्वारपालत्वज्ञानानन्तरम्, अथ यदतः परो ज्योतिर्दीप्यत इति चतुर्थपादस्य षड्विधत्वप्रतिपादनात्। अतश्चतुर्थपादे पञ्चपुरुषास्ततः परो दिवो ज्योतिः षष्ठस्तस्यैव सर्वत्र दीप्यमानत्वं निरूप्य तदेवान्तःपुरुष उपसंहरति । तस्मात् पूर्वं त्रिपादस्याऽमृतं दिवीत्युक्तत्वादस्य त्रिपात्सम्बन्धि अमृतममुष्पारितनलोकेष्विति । अतोऽत्र चतुर्थः पादो निरूप्यत इति सिद्धम् ।

काङ्क्षा । गायत्रीं प्रकृत्योक्तत्वात् । नापि ज्योतिर्वाक्यस्य तदाकाङ्क्षा । अथेति प्रकृतच्छेदात्। उभयत्राप्याकाङ्क्षोत्थापकपदाभावाच्च। यदि च तेषाम् ऋचा विवरणादृचीव पुरुषपदाद्गायत्राणामपि तेषां ग्राह्यत्वं विभाव्यते, तदापि ऋचि ज्योतिर्वाक्ये च परस्पराकाङ्क्षोत्थापकपदाभावान्न तयोरेकवाक्यता । तदभावे च प्रकरणैक्येन साधितमप्येकवाक्यत्वमप्रयोजकमित्याकाङ्क्षायां तयोः परस्पराकाङ्क्षां साधयितुमाहुः । * तत्रापीत्यादि * । यत्र गायत्र्याश्चतुष्पदात्वमुक्तं तत्रापि तस्याः षड्विधत्वप्रतिज्ञानादस्ति षण्णां विधानामाकाङ्क्षा । तत्र भूतपृथिवीशरीराणां पादत्वेन प्रतीयमानानामपि पार्ष्णिप्रपदाङ्गुल्यादिवत् पादपरिचायकत्वमेव, न तु पादत्वं, न वा तद्विधापूरकत्वमित्याशयेन तेषां षड्विधत्वमनिरूप्य हृदयस्यास्ति तथात्वमित्याशयेन हृदयस्य षड्विधत्वं निरूपयन् वक्ता तस्य ह वेत्याद्युक्तरीत्या पञ्चविधाज्ञानानन्तरमथेति प्रकृतविच्छेदनपूर्वकविधाभ्यो ज्योतिषो वैलक्षण्यं बोधयंश्चतुर्थपादस्य षड्विधत्वप्रतिपादनाल्ल्यब्लोपे पञ्चमीप्रतिपादनं कृत्वा, अतः, तृतीयातस्तसिः, अनेन प्रकारेण चतुर्थपादेत्युक्तरीत्या तदेव ज्योतिरन्तःपुरुष उपसंहरति । तस्मात् पूर्वं मन्त्रे त्रिपाद-

स्येतिकथनात् पादत्रयमुपरि यतोऽतोऽत्र, तस्य ह वेत्यारभ्या-न्तं विधानिरूपके वाक्ये चतुर्थः पादो निरूप्यत इति सिद्धम् । तथा च षड्विधत्वप्रतिज्ञाया विधानिरूपणसाकाङ्क्षत्वाद्विधोपपादनस्य चाकांक्षकत्वाभावाय प्रतिज्ञासाकाङ्क्षत्वादुभयोरेकवाक्यत्वम् । अतः परम् ऋगवशिष्यते । सापि चतुष्पदात्वषड्विधात्वप्रतिज्ञयोरनन्तरं तद्विवरणतयोक्तेति तच्छेषस्तस्मादुपपादनवाक्यात् पूर्वं च पठिता । तस्यां च त्रिपादस्याऽमृतमितिरीत्या पादत्रयं कण्ठत उपरितनलोकेष्वित्युक्तत्वादस्ति चतुर्थपादाकाङ्क्षा । चतुर्थश्च पादः सर्वभूतात्मको हृदयाधिष्ठानक इति तदधिष्ठानस्य हृदयस्य ज्योतिर्वाक्यपर्यन्तेन विवरणादाकाङ्क्षा पूर्यते । विवियमाणपादविधानां च स्वाधारभूतपादस्वरूपविवरणाङ्क्षा । सा च पादोऽस्य सर्वा भूतानीति विवरणेन ऋचा पूर्यते । तथा ऋचि, दिवीति पदादत्र च परो दिव इति कथनादृचि पुरुषपदेनोक्तः पादत्रयाधारो ज्योतिर्वाक्ये प्रत्यभिज्ञायते । अतश्चतुर्थः पादोऽस्मिन् वाक्ये निरूप्यत इत्यृचा सहास्यैकवाक्यत्वं सिद्धमित्यर्थः ।

अत्रेदं बोध्यम् । अत्र गायत्रीमुपक्रम्य तस्याः सर्वभूतात्मकत्वं प्रतिज्ञाय तत्स्वरूपजिज्ञासायां, वाग्वै गायत्रीति तत्स्वरूपमुक्त्वा वाचः कथं गायत्रीत्वमित्यपेक्षायां, सर्वभूतगातृत्वात्तत्त्रातृत्वाच्च गायत्रीत्वमुक्तम् । तर्हि तस्याः कथं सर्वभूतात्मकत्वमित्यपेक्षायां, या वै गायत्रीयं वा व सेत्यादिना तस्याः पृथिवीत्वं प्रतिपाद्य तेन रूपेण सर्वभूतधारकत्वात् सर्वभूतत्वे समर्थिते, किं तत् सर्वं भूतं ? का च तद्धारिका पृथिवीत्यपेक्षायां तां शरीरत्वेन सङ्कोच्य शरीरं हृदयत्वेन सङ्कोचयति । तत्र प्राणांश्च प्रतिष्ठापयन्ति । तेन प्राणरूपाणि भूतानि शरीरैकदेशहृदयात्मकपृथिवीरूपेण वाग्रूपा गायत्री धारयतीति प्रतिपाद्य तस्याः स्वरूपमाह । सैषा चतुष्पदा षड्विधा गायत्रीति । तत्र वाग्रूपायाः कथं पृथिव्यादिरूपत्व भूतधारकत्वञ्च । तथा पदशब्दोऽपि किं स्थानवाची, उत चत्वारि वाक्परिमिता पदानीति श्रुत्युक्तपरापश्यन्तीमध्यमावैखरीति वागवस्थाचतुष्टयवाची वा पादवाची वेति सन्देहवारणाय तदेतदृचाऽभ्यनूक्तमिति प्रतिज्ञाय ऋचा विवृतम् । यावान् सर्वभूतात्मकत्वादिरूपोऽर्थः पूर्वमुक्तस्तावान् अस्य गायत्रीनाम्नः पुरुषस्य

महिमा माहात्म्यं विभूतिः । तत उक्तरूपान्महिम्नः पुरुषो ज्यायान् अधिकः । पूर्वोक्तं कथमस्य महिमेत्यत आह । पादस्येत्यादि । तथाचोक्तरूपस्य सर्वस्यैतत्पादरूपत्वान्महिमत्वम् । तत एव च पुरुषस्य ज्यायस्त्वम् । एतेन पदशब्दार्थोऽपि निर्णीतः । पादा एव पदशब्दवाच्या इति । एवञ्चार्थरूपपादबोधनेन गायत्र्या वाग्रूपत्वं निवारितम् । तेन पुरुषस्य गायत्रीवाच्यत्वाद् गायत्रीत्वम् । तेन वाग्रूपाया गायत्र्यास्तद्विद्यात्वमित्यपि साधितम् । ततः पुरुषः को वेत्यपेक्षायां तं पूर्वोक्तपार्थिवशरीरवतः पुरुषाद् व्यावर्तयितुं, यद्वैतद् ब्रह्मेत्यारभ्य, योऽयमन्तर्हृदय आकाश इत्यन्तेन तत्स्वरूपमाह । तेन मन्त्रे पुरुषत्वेन यदुक्तं, तद् ब्रह्म आकाशो, न तु शरीरी पुरुष इत्युक्तम् । तत आधेयस्य कथं महिमाधारत्वमित्यतस्तथात्वं साधयितुं तस्य व्यापकत्वं तदुपासनं तत्फलं चाह । तदेतत्पूर्णमित्यादिना । ततः कास्तद्विधा इत्यपेक्षायां तस्य ह वा एतस्य हृदयस्येत्यादिना पञ्चप्राणानिन्द्रियाणि तद्देवांश्च द्वारपालकोटौ निवेशयति । षष्ठेन ज्योतिषा च षट्संख्यां पूरयति । तेनैते षडपि विधाः । एतद्व्यतिरिक्तः प्राणविद्यायां, प्राणो हि पिता प्राणो मातेति प्रसिद्धो जीवात्मकः प्राणः पाद इति सिद्ध्यति । सोऽपि न विविक्तः किन्तु शरीरविशिष्ट इति तद्विशिष्टानां जीवानां पादत्वं, तस्य च मुख्यं स्थानं हृदयं, विधाश्च तत्रैव भूयस्य इति हृदयमपि पाद एव निविशते । ज्योतिश्चात्र हार्दमेव यदाकाशशब्देनोक्तं, हृद्यन्तर्ज्योतिरितिश्रुत्यन्तराच्च । अतः पूर्वोक्तरीत्या एकवाक्यत्वं निष्प्रत्यूहमित्यर्थः ।

यत्तु केचित् पुरःस्फूर्तिकमालम्ब्य गायत्र्या भूतपृथिवीशरीरहृदयभेदेन चतुष्पात्त्वं, तस्या वाग्रूपत्वकथनाद् हृदये प्राणानां चोक्तत्वात् तदुभयसहितानि तानि भूतानि सङ्ख्यायां निवेश्य तैः षड्भिर्गायत्र्याः षड्विधत्वं व्याख्याय, इदं यावदुक्तं तावानस्य महिमा विकारस्ततो ज्यायान् पुरुषो महान् विकारोऽस्य पुरुषस्य सर्वाणि भूतानि पूर्वं गायत्र्यात्मनोक्तान्येकः पादोऽस्य गायत्रीब्रह्मणस्त्रिपाद् अमृतं दिवि द्योतनवति स्वात्मन्यवस्थितमित्येवं मन्त्रं व्याख्याय तस्य गायत्र्यवच्छिन्नस्य ब्रह्मणो हृदयाकाश उपास्यत्वं च व्याख्याय तत उपास्यङ्गभूतं पञ्चद्वारपालोपासनं च व्याख्याय गायत्र्युपाधिकस्य

अतः पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वमिति ।

हृद्युपास्यत्वेनोक्तस्यैव कौक्षेयज्योतिःप्रतीकत्वेनोपासनम् 'अथ यदतः परो दिव' इत्यादिना विधीयते । अत्र चाथशब्दो विद्यान्तरोपक्रमार्थ इत्याहुः ।

तन्मन्दम् । पुराणोपबृंहितश्रुत्युपष्टम्भेन व्याख्यातप्रकारेण पादानां विधानां च विवेकसिद्धावेवं साङ्कर्येण पादविधयोर्व्याख्यानस्यासङ्गतत्वात् । उक्तपुराणश्रुत्योरेवंविरोधेनैव मन्त्रव्याख्यानस्याप्यसङ्गतत्वात् । अथ योऽस्य दक्षिणः शुषिरित्यादावप्यथशब्दस्य सत्त्वेऽपि तत्र न विद्याभेदकत्वम्, अथ यदतः पर इत्यत्र विद्याभेदकत्वमित्यत्र बीजानुपलम्भाद् अङ्गोपास्तिभेदप्रायपाठविरोधाच्चेति । एवमेकवाक्यतामुपपाद्य सिद्धमाहुः * अत इत्यादि * अत एवम् ऋग्वाक्ययोरपि परस्पराकाङ्क्षासत्त्वेन पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वं सिद्धमित्यर्थः । अत्रैतद् बोध्यम् । मन्त्रे, पादोऽस्य सर्वा भूतानीत्यत्र, क्षरः सर्वाणि भूतानीति गीतोक्तः क्षरः पुरुषो जीवसमष्ट्यात्मको यद्यपि वक्तुं शक्यते । किञ्च । हृद्यन्तर्ज्योतिः पुरुष इति श्रुत्या जीवस्य हृदयं स्थानं, तद्विराड् जीवस्य स्वर्लोकः । हृदा स्वर्लोक इति द्वितीयस्कन्धात् । अत्र च स्वर्लोकस्य द्वारपान् वेदेति तत्प्रत्यभिज्ञानात् । तथापि मन्त्रे, त्रिपादस्यामृतं दिवीति विशेषकथनात् पुरुषसूक्तविवरणाध्याये च तेषामाश्रमत्रयस्थत्वेन व्यष्टितया निगमनात्, पादोऽस्येत्यत्रापि व्यष्टिजीवा एव ग्राह्याः । अन्यथा त्रिपादित्यादेर्विरोधापत्तेः । एवं सिद्धेऽत्रत्यानां सर्वभूतानामुपरितनानां च व्यष्टिजीवत्वे तेषां सर्वेषां हृद्यन्तरिति श्रुत्या हृदयमेव स्थानमिति तस्यैकत्र षड्विधत्वेऽन्यत्रापि तथात्वमिति ब्रह्मपादानां गायत्रीपादतुल्यत्व, तद्विधानां च गायत्रीविधातुल्यत्वं भवति । एवं सति यथा प्रणवविद्यायां ब्रह्मणः पादसङ्ख्यापूरकत्वं, तथास्यां गायत्रीविद्यायां विधासङ्ख्यापूरकत्वम् । एवमत्र चरणानां ब्रह्मधर्मत्वात् प्रकरणस्य ब्राह्मत्वे सिद्धे शब्दमात्रस्य ब्रह्मण्येव मुख्यवृत्तत्वात् । तमेव भान्तं, यदादित्यगतं तेज इत्यादिश्रुतिस्मृतिभिर्दीपनात्मकस्य तेजोलिङ्गस्यापि ब्रह्मण्येव समन्वयात् । अहं वैश्वानरो भूत्वेतिगीतावाक्येन जाठरध-

ब्रह्मधर्मनिर्णयार्थमिदमधिकरणं चरणानामौपचारिकत्वव्यावृत्त्यर्थम् । एतन्निर्णयेन प्राणवादिविद्या निर्णीता वेदितव्याः ॥ २३ ॥

छन्दोऽभिधानान्नेतिचेन्न तथा चेतोऽर्पणनिगदात्
तथा हि दर्शनम् ॥ २४ ॥

ननु नात्र ब्रह्म चतुष्पान्निरूपितं, किन्तु गायत्री छन्दः । गायत्री वा इदं सर्वं यदिदं किञ्चेत्युपक्रम्य तामेव भूतपृथिवीशरीरहृदयभेदैर्व्याख्याय, सैषा चतुष्पदा षड्विधा गायत्री । तदेतदृचाभ्युक्तं, तावानस्य महिमेति । तस्यामेव व्याख्यानरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद् ब्रह्म चतुष्पादभिदध्यात् । यद्वै तद् ब्रह्मेति ब्रह्मपदमपि छन्दसः प्रकृतत्वात् त-

---

मस्योष्णिमादेरपि तत्र समन्वयात् । द्युमर्यादत्वस्यापि ब्राह्मणश्रमणन्यायेनाधिक्यबोधनार्थत्वात् । चक्षुष्यः श्रुतो भवतीति फलस्यापि भगवदीयत्वेन दृश्यो विख्यातश्च भवतीत्याकारकत्वात् । अपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था इति पञ्चमस्कन्धोक्तरीत्या तस्य महाफलत्वात् । वसन्ते ज्योतिषा यजेत, वाचैव ज्योतिषेत्यादिश्रावणेन ज्योतिःपदस्य तेजोमात्रवाचकत्वाभावाच्च ज्योतिषो ब्रह्मत्वमिति हृदयम् । एवं सिद्धान्तमुक्त्वा, तद्धर्मोपदेशाधिकरणेनास्य गतार्थताशङ्कां परिहरन्ति । * ब्रह्मेत्यादि * । तथाच तत्र हेतोः सिद्धत्वेनात्र तु साध्यत्वेन फलभेदान्न गतार्थतेत्यर्थः । ननु ब्रह्मप्रतिपत्तिरूपस्य फलस्यान्यथापि सिद्धेः का हेतुसाधनावश्यकतेत्यत आहुः । * एतदित्यादि * । पादनिर्णयेन पादवत्योऽन्या अपि विद्या निर्णीताः स्युरित्येतदर्थं तदावश्यकतेत्यर्थः ॥ २३ ॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॥ आक्षेपांशं व्याकुर्वन्ति । *नन्वित्यादि* । *अकस्मादिति *।

त्परमेवावगन्तव्यम् । शब्दस्यापि ब्रह्मवाचकत्वसिद्धेर्ब्रह्मोपनिषदितिवच्छन्दब्रह्मेति च । तस्माच्छन्दस एव पादाभिधानान्न ब्रह्मधर्माः पादा इति चेन्नैष दोषः । तथा चेतोऽर्पणनिगदात् । तथा तेन द्वारेण चेतसोऽर्पणं निगद्यते । गायत्री वा इदं सर्वं यदिदं किञ्चेति । न हि वर्णसमाम्नायरूपस्य सर्वत्वमनुपचारेण सम्भवति । यथा सूचीद्वारा सूत्रप्रवेशस्तथा गायत्रीद्वारा बुद्धिस्तत्प्रतिपाद्ये ब्रह्मणि प्रविशेदिति ।

कुत एतदेवं प्रतिपाद्यत इति, तत्राह । तथा हि दर्शनम् । तथा तेनैव प्रकारेण दर्शनं ज्ञानं भवति । स्थूला बुद्धिर्नाहत्यैव ब्रह्मणि प्रविशेदिति । एतेन सर्वा मन्त्रोपासना व्याख्याताः । हि युक्तश्चायमर्थो, लोके स्वतो यत्र प्रविशति तदुपायेन विशतीति । न त्वदृष्टद्वारा । दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात् । तस्मात् । पादा ब्रह्मधर्माः ॥ २४ ॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २५ ॥

तात्पर्यलिङ्गोपष्टम्भं विना । तथाचोपक्रमस्य तात्पर्यलिङ्गत्वादसंजातविरोधित्वेन प्रबलत्वाच्च तदनुरोधेनैव मन्त्रव्याख्यानमुचितमिति मन्त्रेण ब्रह्मपादासिद्धेर्हेतुः स्वरूपासिद्ध इत्यर्थः । परिहारांशं व्याकुर्वन्ति । * तथा तेनेत्यादि * । अत्र हि, तथा चेतोऽर्पणनिगदे सर्वरूपत्वोक्तिर्लिङ्गम् । वाग्रूपायां गायत्र्यां तस्यासम्भावितत्वात् । तदेव च विरुद्ध्यमानमुपक्रमस्य प्राबल्यमपहन्ति । निवृत्ते च तस्मिन् प्रकरणस्य ब्राह्मत्वं मन्त्रवर्णादेव निश्चीयते । अतस्तथेति । अग्रिमं व्याकुर्वन्ति । * कुत इत्यादि * । वेदेनेति शेषः । एवं निरूपणप्रयोजनमाहुः । * एतेनेत्यादि * । तथाच सर्वासां मन्त्रोपासनानां निर्णयार्थमेतदित्यर्थः ॥ २४ ॥

किञ्च । भूतादयोऽत्र पादा व्यपदिश्यन्ते । भूतपृथिवीशरीरहृदयानि चत्वारि । न ह्येतानि गायत्र्याः पादा भवितुमर्हन्ति । ब्रह्मपरिग्रहे तूपपद्यन्ते । यावन्मुख्यमुपपद्यते । तावन्न गौणं कल्पनीयम् । अयमर्थः । पूर्वहेतौ छन्दसोऽपि पादा व्यपदेशाद् भवन्ति । तथापि ब्रह्मण एव युक्ता इति । पुरुषसूक्ते एतावानस्येत्यस्य ब्रह्मपरत्वात् । अस्मिन् वाक्ये तु गायत्र्याः पादा एव नोपदिष्टाः, किन्तु ते ब्रह्मण एव पादा इति ।

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ युक्त्यन्तरं वदतीत्याहुः । *किञ्चेत्यादि* । अयमर्थः । त्वया हि गायत्र्याः प्रकरणित्वमुपगम्य सन्निहितत्वाद् भूतादय एव पादत्वेन वाच्याः । ते च स्वरसेनासंभवन्तो गौण्या योज्या । गौणीत्वेकत्र वास्तवत्वेऽन्यत्र भवत्यतस्तथेति स एव मुख्यो विवक्षित इति श्रुतौ वक्ष्यमाणपरामर्शं बोधयितुं सैषेत्येतत्पदमुक्तम् । अन्यथा तु पूर्ववदियं वा व सेत्येवं वदेदित्यर्थः । नन्वयमर्थस्तु पूर्वसूत्रेणैव सिद्ध इत्यस्य सूत्रस्य किं प्रयोजनमत आहुः । * अयमर्थ इत्यादि * । पूर्वहेतौ चेतोऽर्पणनिगदरूपे छन्दसोऽपि पादा गौण्या कथनाद् भवन्ति । तथापि ब्रह्मणः पादा युक्ता इति ज्ञायते । नच तर्हि भूतादय एव मुख्यतया ब्रह्मणः पादा भवन्त्विति शङ्क्यम् । पुरुषसूक्ते, एतावानस्येत्यस्य ब्रह्मपरत्वात् । तदर्थस्य चात्र विवरणंचि प्रत्यभिज्ञानात् । नच तत्रापि सर्वभूतपदैनैतान्येवोच्यन्त इति शङ्क्यम् । पुरुषसूक्तविवरणाध्याये चैतद्व्याख्यान आश्रमचतुष्टयस्थानां भौतिकशरीरविशिष्टजीवानामेव व्याख्यातत्वाच्छरीरवैशिष्ट्ये च भूतपृथिव्यादेरपि परिचायकत्वेनैव सङ्ग्रहान्मुख्यतया ग्रहणे तद्विरोधापत्तेस्तन्मुख्यताया वक्तुमशक्यत्वात् । नच गायत्री वेति वाक्यविरोधः । * अस्मिन् वाक्य इत्याद्युक्तरीत्या तेषां गायत्र्यामुप-

तद्वाचकत्वेन गायत्र्यामुपचारेणोपसंहारः । चकारादर्थो न शब्दस्य पादा भवन्ति, किन्त्वर्थस्यैवेति । तस्माद् ब्रह्मवाक्यत्वे भूतादीनां पादत्वमुपपद्यते नान्यथेति । तस्मात् पादानां ब्रह्मधर्मत्वम् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२६॥

पादोऽस्य विश्वा भूतानि, सर्वाणि भूतान्येकः पादः । पादत्रयममृतं दिवीत्येकोऽर्थः ।

'पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः । अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु ' इत्यपरः ।

चारेणोपसंहार इति तद्विरोधाभावादित्यर्थः * तद्वाचकत्वेनेति * ब्रह्मवाचकत्वेन । * उपसंहार इति* सैषा चतुष्पदेत्यादिनोक्तः सः। तथाच पादानां ब्रह्मधर्मत्वाभावे गायत्र्यां तद्व्यपदेशस्यापि वक्तुमशक्यत्वात् त्वया स्वमतोपपादनायाप्यस्मदुक्तमवश्यमङ्गीकरणीयमिति, गले पादुकान्यायेन तदङ्गीकारणं प्रयोजनमित्यर्थः । एतेन सूत्रस्थमेवंपदं व्याख्यातम् । स्फुटमन्यत् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ सूत्रं व्याख्यातुं तदर्थं प्रथमतो मन्त्रं व्याकुर्वन्ति । * पादोऽस्येत्यादि * । * एकोऽर्थ इति * । पुरःस्फूर्तिकः सर्वोहतस्तृतीयोऽर्थः । अस्मिन् पक्षे श्रौतं दिवीतिपदं द्योतनात्मस्वरूपपरम् । अतः पादसंख्यापूर्तिस्त्वमृतात्मकेन स्वरूपेणैव । न तु जीवैर्वा लोकैरिति । द्वितीयस्कन्धानुसारेणेतरमाहुः । *पादेष्वित्यादि* । तिष्ठन्ति येष्विति स्था भूरादिलोकाः स्थितपदवाच्याः । ते पादा यस्येति स्थितिपात् । तस्य स्थितिपदो भगवतो भूरादिषु पादेषु सर्वाणि भूतानि विदुः । त्रिमूर्ध्नो भूरादित्रयोपरिवर्तमानस्य महर्लोकस्य मूर्द्धसूपरितनेषु जनस्तपःसत्येषु, अमृतं क्षेममभयमिति सुखत्रयमधायि । अतो भूरादिचतुष्के

पुरुषसूक्तानुरोधे द्वितीय एवार्थः । प्रथमे तावत्। ननु त्रिवीतिमन्त्रे सप्तम्याऽऽधारत्वं प्रतिपाद्यते । अतः परमित्यत्र पञ्चम्याऽनाधारत्वमत उपदेशभेदात् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमिति चेन्नैष दोषः। उभयस्मिन्नप्यविरोधात्। मन्त्रे दिव्येवोक्तम्। अस्मिन् वाक्ये सर्वत्रोच्यते। सर्वत्र विद्यमानस्य दिवि विद्यमानत्वं न विरुध्यते। अतः शब्देन न तत्राविद्यमानत्वं, किन्तु ततोऽप्यन्यत्र सत्त्वं बोध्यते। तस्मात् सप्तमीपञ्चमीनिर्देशो न विरुद्धः। द्वितीये तु। ननु मन्त्रे अमृतपदमत्र ज्योतिःपदमत उपदेशभेदाच्चतुर्थश्च पादो हृदयम्।

अनित्यं सुखमित्यर्थादायाति । अस्मिन् पक्षे श्रौते पादशब्दे, सुपां सुलुगिति सुपः स्वादेशः। अस्येत्यस्य स्थितिपदः पुंस इत्यर्थः । दिवीति जनश्रियोपलक्षकम् । अमृतपदममृतत्वस्यानुसीव्यमानत्वात् सुखत्रयोपलक्षकम्। एवं सति द्वितीयस्योपपादनसापेक्षत्वात् प्राञ्जलः पूर्व एव ग्राह्य इति शङ्कायामाहुः * पुरुषेत्यादि * एवकारोऽप्यर्थे। पूर्वस्यापि पादास्त्रय इत्युक्तरीत्या पुरुषसूक्तानुसारित्वात्। एवमभिप्रेत्य सूत्रं द्वेधा व्याकरिष्यन्त आहुः *प्रथमे तावदित्यादि*। * प्रथम इति* पुरःस्फूर्तिके तृतीये * । पूर्वोक्तपरामर्शाभावादिति* विभक्तिभेदेन मन्त्रोक्तस्य दिवशब्दस्यास्मिन् प्रत्यभिज्ञाभावात्। सिद्धान्तग्रन्थे पञ्चम्याः कथं सर्वत्र विद्यमानताबोधकत्वमत आहुः। * अत इत्यादि * अतो दिव इत्युक्त्वा, सर्वत पृष्ठेष्वित्यादिश्रावणेन पञ्चम्या ल्यब्लोपीयत्वे, इमं द्युलोकमारभ्येत्यर्थात् तथेत्यर्थः। अत्र सर्वे, वृक्षाग्रे श्येनो, वृक्षाग्रात् परतः श्येन इति विभक्तिभेदेऽपि यथैकार्थ्यप्रत्यभिज्ञा तथात्रेति दृष्टान्तमाहुः । अत्र तु विभक्तिभेदस्य प्रयोजनमप्युपदेशभेदमाहुः । * चतुर्थश्चपादो हृदयमिति * मन्त्रे लोकात्मकः पादः । ब्राह्मणस्य तु हृदयमुपक्रम्य पठितत्वाद्हृदयपादत्वेन तत्र सिद्ध्यतीत्युपदेशभेद इत्यर्थः । अन्यमपि भेदकमाहुः ।

अतः शब्दाच्च सर्वस्माद्भेदः प्रतिपाद्यते । अत उपदेशभेदान्नैकवाक्यता । अस्मिंश्च वाक्ये चरणाभावात् स्वरूपासिद्धो हेतुरिति चेन्नैष दोषः । उभयस्मिन् ज्योतिःपदे अमृतपदे च प्रयुज्यमाने एकार्थत्वान्न विरोधः । पादत्रयमुपरितनलोकेषु चतुर्थं सर्वत्रेति । अन्यथा वैजात्यं पादानामापद्येत । परिच्छेदश्च विरोधश्च । अतोऽमृतज्योतिःशब्दयोरेकार्थत्वेन विरोधाभावादेकवाक्यत्वम् । अतोऽत्र चरणसद्भावात्तस्य च ब्रह्मधर्मत्वाज्ज्योतिर्ब्रह्मैव ॥ २६ ॥

---

* अतः शब्दादित्यादि * अत इत्यस्य पूर्वपरामर्शित्वात् पूर्वस्माद् भेदे प्रत्यायिते पूर्वोक्ताद् ब्रह्मणोऽपि सकाशाज्ज्योतिषो भिन्नत्वसिद्धिरित्यर्थः । *अत इत्यादि* एवं प्रकारत्रयेणैकदेशभेदान्मन्त्रब्राह्मणयोर्भिन्नार्थत्वेनोपदेशभेदादित्यर्थः । तेन सिद्धमाहुः * अस्मिन्नित्यादि * ब्राह्मणवाक्ये तदभावादेकवाक्यत्वाभावेन मन्त्रतः प्राप्त्यभावात्तथेत्यर्थः । सिद्धान्तं व्याचक्षते * नैष इत्यादि * । * एकार्थत्वादिति* उभयोर्ब्रह्मवाचकत्वेनैकार्थत्वान्नैकवाक्यताविरोधः । ननु तथापि पादभेदेन विभागे साकाङ्क्षत्वाभावात् कथमेकवाक्यतेत्यत आहुः * पादेत्यादि * आश्रमचतुष्टयस्थजीवानां पादत्वपक्षे लोकानां च पादत्वपक्षे यथायथं हृदयरूपं चरणस्थानं, पादान्तर्वर्ति ब्रह्म च ज्योतीरूपं सर्वत्रेति पादभेदेऽपि तदुपलक्षकस्य तदन्तःस्थितस्य च सार्वत्रिकत्वेनोभयत्रापेक्षणाद्विभागे साकाङ्क्षतायाः सत्त्वान्नैकवाक्यत्वभङ्ग इत्यर्थः । ननु स्पष्टस्य ब्रह्मधर्मस्यात्राभावेऽपि निर्बन्धेनैवं व्याख्याने का वोपपत्तिरित्यत आहुः * अन्यथेत्यादि * गायत्रीपरतया व्याख्याने गायत्र्याः शब्दत्वेन पादानां चार्थत्वेनांशांशिभावाङ्गीकारे वैजात्यं पादानामापद्यते । किञ्च । गायत्री परिच्छिन्ना । अत्र तु, सर्वतः पृष्ठेष्वित्यादिना परिच्छेदराहित्यं प्रतिपाद्यतेऽतः परिच्छेदविरोधश्च । तथाच गायत्रीपक्षे दोषद्वयसत्त्वं, ब्रह्मपक्षे तदभावश्च व्याख्यानिर्बन्ध उपपत्तिरित्यर्थः । एवं सर्वमुपपाद्य सिद्धमाहुः * अत इत्यादि * । *अत इति* पक्षान्तरस्याघटमानत्वात् । * अत इति * एकवाक्य-

प्राणस्तथाऽनुगमात् ॥ २७ ॥

अस्ति कौशीतकिब्राह्मणोपनिषदि इन्द्रप्रतर्दनसंवादः । प्रतर्दनो ह वै दैवोदासिरित्यादिना, एष लोकपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्याद् स म आत्मेति विद्यादित्येतदन्तम् । तत्र वरदाने मामेव विजानीह्येतदेवाहं मनुष्याय

त्वस्य सिद्धत्वात् । तथाच प्रकरणस्य ब्राह्मत्वे सिद्धे ब्रह्मधर्मस्य तत्र सिद्धत्वादुपसंहारगतमपि ज्योतिःपदं ब्रह्मवाचकत्वेनैव सिद्धमतस्तथेत्यर्थः । अत्र पादवतीविद्यानां ब्रह्मस्वरूपपरत्वप्रतिपादनादध्यायसङ्गतिः । आश्रमचतुष्टयस्य जीवस्थितितद्भोग्यसुखरूपकार्यद्वारा तत्प्रतिपादनात् पादसङ्गतिः । ज्योतिषः स्थितिकार्यकत्वेन ब्रह्मलक्षणेऽतिव्याप्तौ प्राप्तायां तन्निवृत्त्यर्थं ज्योतिःपदे सन्देहवारणादवसरोऽधिकरणसङ्गतिः । तेनापो वा इदं सर्वमित्यादावप्ययं न्यायो बोध्यत इति न न्यूनता ।

माध्वास्त्वत्राधिकरणद्वयमङ्गीकुर्वन्ति । तत्र प्रथमसूत्रस्याग्निसूक्तं विषयवाक्यम् । 'वि मे कर्णा पतयो विचक्षुर्वीदं ज्योतिर्हृदय आहितं यत् । वि मे मनश्चरसे आधीः किं स्विद् वक्ष्यामि किमनूमनिष्य' इति । अत्र विशब्दो विरुद्धार्थकः । पतय इति पततो विरुद्धं चरत इत्यर्थः । इदं चरणं हेतुः । शेषं समानम् । वस्तुतस्त्वत्र विचरणमुक्तं, न तु चरणमतश्चिन्त्यम् । छन्दोऽभिधानादिति सूत्रमधिकरणान्तरम् । तत्र छान्दोग्यस्थमुक्तमेव विषयवाक्यम् । समानमितरत् । अत्रापि सूत्रे साध्यानुल्लेखात् सूत्रकृदाशयगोचरत्वं सन्दिग्धम् ॥ २६ ॥

इति नवमाधिकरणम् ।

प्राणस्तथाऽनुगमात् ॥ विषयवाक्यमुदाहरन्ति *अस्तीत्यादि* तथाच सम्पूर्णः पञ्चमाध्यायोऽत्र विषयवाक्यमित्यर्थः । कथमस्य विषयत्वमित्याकाङ्क्षायामेतदर्थं वदन्तो मतान्तरीयाः सर्वेऽपि, मुख्यः प्राणो वा देवतात्मा वा, जीवो वा, ब्रह्म वेति चतुष्कोटिकं संशयं वदन्तीति ततो वैलक्षण्यबोधनाय व्युत्पादयाहुः । * तत्र वरेत्यादि * ।

हिततमं मन्य इत्युपक्रम्य त्वाष्ट्रवधादिनात्मानं प्रशस्य स्वोपासनायाः पापाभावं फलत्वेन प्रतिपाद्य कस्त्वमिति विवक्षायां, प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वेत्युक्त्वा आयुषः प्राणत्वमुपपाद्याऽमृतत्वं च प्राणस्योपपाद्य, प्राणेन ह्येवामुष्मिँल्लोके अमृतत्वमाप्नोतीति, अमृतत्वं योगेन प्रतिपादयति। तत्र सन्देहः। प्राणः किमासन्यो ब्रह्म वेति ।

अत एव प्राण, इत्यत्र प्राणशब्दमात्रे सन्देहः। अत्रार्थेऽपि सन्देहः। बाधकं च वर्तत इति पृथगधिकरणारम्भः। तत्र साधकासाधारणधर्मस्याभावाद् बाधकानां विद्यमानत्वान्न ब्रह्मत्वमिति पूर्वपक्षः। सिद्धान्तस्तु चतुर्भिः सूत्रैः प्रतिपाद्यते। तत्र प्रथमं साधकधर्ममाहैकेन । त्रिभिर्बाधकनिराकरणम्। प्राणः परमात्मा भवितुमर्हति। कुतः। तथाऽनुगमात्। तथाहि। पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मप्रति-

---

* योगेनेति * प्राणसंयोगेन। तथाचेन्द्रेण स्वस्मिन् प्राणत्वस्यैवोपपादितत्वेन प्रज्ञापदस्य बुद्धिवाचकतया चेतनधर्माणां तत्रोपचरितत्वाद् द्विकोटिक एव युक्त इत्यर्थः । ननु चतुष्कोटिक एव युक्तोऽन्यथा पूर्वाधिकरणेनास्य गतार्थत्वं स्यादित्यत आहुः । * अत एवेत्यादि *। उक्ताधिकरणे विषयवाक्ये ब्रह्मलिङ्गस्य विद्यमानत्वात् प्राणशब्दः प्रयुक्त इति प्राणशब्दमात्रे सन्देह.। अत्र तु प्राणे प्रज्ञात्मत्वकथनादायुष्ट्वोपपादनाच्चासन्यो वा, जीवो वेति प्राणशब्दार्थे सन्देहः। किञ्च जीवमुख्यप्राणलिङ्गादिकं बाधकं वर्तत इत्यतस्तथेत्यर्थः। युक्तिपूर्वकं पूर्वपक्षमाहुः । * तत्र साधकेत्यादि *। कथमेवमित्यत आहुः * तत्र प्रथममित्यादि *। सूत्रं व्याकुर्वन्ति * प्राण इत्यादि * तथा ब्रह्मपरत्वेऽनुगमात् पदार्थानां समन्वयादिति सूत्रार्थ इति त-

पादनपर उपलभ्यते । उपक्रमे तावद् वरं वृणीष्वेति इन्द्रः प्रतर्दनोक्तः परमपुरुषार्थं वरमुपचिक्षेप । त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति । तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात् । न हि परमात्मनोऽन्यद्धिततममस्ति । परमानन्दस्वरूपत्वात् । पापाभावश्च ब्रह्मविज्ञान एव । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इति श्रुतेः । प्रज्ञात्मत्वं च तस्यैव सम्भवति । उपसंहारेऽप्यानन्दोऽजरोऽमृत इति, एष लोकाधिपतिरित्यादि च । तस्मात् सर्वत्रानुगमात् प्राणो ब्रह्म ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥ २८ ॥

बाधकमाह । यदुच्यते प्राणो ब्रह्मेति, तन्न । कुतः । वक्तुरात्मोपदेशात् । वक्ता हीन्द्र आत्मानमुपदिशति । मामेव विजानीहीत्युपक्रम्य प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्वेति । स एष प्राणो वक्तुरात्मत्वेनोपदिश्यमानः कथं ब्रह्म स्यात् । तथाच वाचो धेनुत्वोपासनवद्देवतायाः प्राणत्वेनोपासना बोध्यते ।

अन्ये च ब्रह्मधर्माः प्राणस्तावका इति कथमस्य ब्रह्मोपा-

मुपपादयन्ति * उपक्रम इत्यादि * । * सम्भवतीति * चिद्रूपत्वात् सम्भवति । * सर्वत्रानुगमादिति * आद्यन्ते पदार्थानां ब्रह्मधर्मत्वेनैव समन्वयात् । एवं साधकधर्मो व्याख्यातः ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥ *बाधकमाहेति* सूत्रांशेनाहेत्यर्थः । *उपदिशतीति* मामित्यहङ्कारवादेनोपदिशति । * ब्रह्मधर्मा इति * पूर्वसूत्रव्याख्यान उक्ताः ।

ख्यानत्वमिति चेन्न । अध्यात्मसम्बन्धभूमा ह्यस्मिन् । अस्मिन् प्रकरणे अध्यात्मसम्बन्धः । आत्मानमधिकृत्य यः सम्बन्धः । आत्मशब्दो ब्रह्मवाची । वस्तुतो जीवस्य ब्रह्मत्वाय तथा वचः । तस्य सम्बन्धः । तद्धर्माः । तेषां बाहुल्यं प्रतीयते । एष लोकपाल इत्यादि । यावद् यथाकथञ्चिदपि ब्रह्मप्रकरणत्वं सिध्यति, तावदन्यप्रकरणत्वमयुक्तमिति हिशब्दार्थः । प्राणस्य प्रज्ञात्मत्वम् । स्वातन्त्र्येणायुर्दातृत्वम् । न वाचं विजिज्ञासीत वक्तारं विद्यादिति चोपक्रम्य, तद्यथा रथस्यारेषु नेमिरर्पिता, नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणे अर्पिताः । स एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणेत्यादिविषयेन्द्रियव्यवहारे अनभिभूतं प्रत्यगात्मानमेवोपसंहरति । स म आत्मेति विद्यादिति चोपसंहारः । तस्मादध्यात्मसम्बन्धबाहुल्याद् ब्रह्मोपदेश एवायम् ॥ २८ ॥

निराकरणांशं व्याकुर्वन्ति * अस्मिन्नित्यादि * । * अधिकृत्येति * अधिराधिक्ये । अधिकं कृत्वा । आत्मपदार्थस्य सन्दिग्धत्वादाहुः । * आत्मेत्यादि * । ननु तर्हि ब्रह्मपदमेवास्मिन् सूत्रे कुतो नोक्तमत आहुः * वस्तुत इत्यादि * । ऐकात्म्यवादेन जीवस्य ब्रह्मत्वं बोधयितुमात्मपदम् । अत एव सूत्रपरिहारांशप्रयोगो नकारस्य न कृतः । * सम्बन्ध इति * सम्यग् बन्धो यस्याऽसौ स सम्बन्धः । तथाच जीवात्मनः सकाशात् परमात्मानमधिकं कृत्वा तद्धर्मबाहुल्यमस्मिन् प्रकरणे प्रतीयते । अतोऽत्र बहूनामनुग्रहस्य न्याय्यत्वात् प्राणः परमात्मेत्यर्थः । ननु किमित्येवं निर्बन्ध इत्यत आहुः । * यावदित्यादि * तथाच पूर्वसूत्रे साधकहेतुमुक्त्वाऽत्र हिशब्दकथनात्, सर्वे वेदा यत् पदमितिश्रुत्यनुरोधेन निर्बन्ध इत्यर्थः । तदुपपादयन्ति । * प्राणस्येत्यादि * । भूतमात्राः शब्दादयः । प्रज्ञामात्रा ज्ञानेन्द्रियांशाः । * तस्मादिति * । प्रज्ञात्मत्वाद्युपदेशात् ॥ २८ ॥

तर्हि बाधकस्य का गतिरित्यत आह।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥

पूर्वसूत्रेणापरिहृतमत्र परिहरति तुशब्दः। अयं दोषो व्यवहारदृष्ट्योपदेशे। अहं ब्रह्मेत्यार्षेण दर्शनेन तूपदेशः। ननु, तत्त्वमसि, अयमात्मा ब्रह्मेतिवाक्येषु जीवस्य ब्रह्मत्वं बोध्यते। तत्र प्रत्यधिकारं शास्त्रप्रवृत्तिरिति न्यायेन स्वात्मन एव ब्रह्मत्वावगतिर्मुख्या। न प्रतर्दनस्येन्द्रजीवब्रह्मत्वावगतिरुपासनं वा पुरुषार्थाय। अतः शास्त्रदृष्टिरपि नैवंविधा। केवलस्य चैतन्यमात्रस्य तादृशे ब्रह्मण्यैक्यावगतिविरोधात्तत्त्वमस्यादिवाक्यार्थोऽध्यवसीयते। ननु ब्रह्मधर्मा जीवे वक्तुं शक्यन्त इत्या-

---

* तर्हीत्यादि *। प्रकरणस्य ब्रह्मपरत्वाङ्गीकारे। वक्त्रा इन्द्रेण यः स्वात्मोपदेशः कृतस्तस्य बाधकस्य क उद्धरणप्रकार इत्यर्थः।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ व्याकुर्वन्ति* पूर्वेत्यादि*। * अयं दोष इति *। स्वात्मोपदेशरूपो दोषः। तथाचार्षज्ञानेन स्वात्मानं ब्रह्मात्मकमवगत्येन्द्रेणैवमुपदिष्टमतोऽत्रैवं प्रकारभेदे भासमानेऽपि ब्रह्मण एवोपदेशान्नानेनान्यथा सम्भावयितुं शक्यमित्यर्थः। कथमेवमवगम्यत इत्यपेक्षायां दृष्टान्तमवतारयन्ति। * नन्वित्यादि *। * प्रत्यधिकारमिति * अधिकारं लक्ष्यीकृत्य। * नैवंविधेति *। नेन्द्रजीवस्य ब्रह्मत्वबोधनपरा। तर्हि, न वाचं विजिज्ञासीत वक्तारं विद्यादित्यग्रे श्रावणाज्जीवसामान्य एव शास्त्रदृष्टिरस्त्वित्याशङ्क्याह। * केवलस्येत्यादि *। सर्वज्ञत्वाज्ञत्वादीनां धर्माणां परस्परविरोधाद्भागत्यागलक्षणया निर्विशेषस्य चैतन्यमात्रस्य जीवस्य निर्विशेषे चैतन्यमात्रे ब्रह्मण्यैक्यावगतिस्तत्त्वमस्यादिवाक्यार्थ इति निश्चीयते। न त्वानन्दाऽजराऽमरत्वादयो ब्रह्मधर्मा ऐक्यावगतिविरोधिनस्तत्र जीवे वक्तुं शक्यन्ते। अतोऽत्र सत्कृत्वादिवैशिष्ट्यस्योक्त्या केवलास्यानाविवक्षितत्वाद्ब्रह्मणोऽपि तादृश-

शङ्कां परिहरति । वामदेववत् । तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति । य एवं प्रत्यबुध्यत स सर्वं भवति । तत्र सर्वेषां सर्वभावे सर्वानन्त्यप्रसङ्गात् सर्वमेकमेवेति वक्तव्यम् ।

ततः कारणलय एव सर्वभाव इति मनुरभवं सूर्यश्चेत्यवयुत्यानुवादोऽनुपपन्नः । तत्र यथा ज्ञानावेशात् सर्वधर्मस्फूर्तिरेवमत्रापि ब्रह्मावेशादुपदेश इति । त्वाष्ट्रवधादयो ब्रह्मधर्मा एव । तदावेशेन क्रियमाणत्वात् । 'नन्वेष वज्रस्तव शक्र ! तेजसा हरेर्दधीचेस्तपसा च तेजितः । तेनैव शत्रुं जहि विष्णुयन्त्रित' इति वृत्रवचनं भागवते । तस्माद्युक्तं ब्रह्मधर्मवचनम् । ननु, स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीतिसूत्रे सुषुप्तौ ब्रह्मसम्पत्तौ च ब्रह्मधर्माविर्भावो, न त्वन्यदेति कथमेवमिति चेन्नैवम् ।

त्वेनाविवक्षितत्वाज्जीवसामान्ये शास्त्रदृष्टिरपि न वक्तुं शक्येति नायं समाधिरुपपन्न इत्यर्थः । परिहारं व्याकर्तुं दृष्टान्तं व्याकुर्वन्ति । * तद्धैतदित्यादि * । इदं बृहदारण्यके पुरुषविधब्राह्मणस्थं वाक्यम् । * तत्रेति * । अस्मिन् वाक्ये । *एकमेवेति* । ब्रह्मात्मकतयैकमेव । * कारणलय इति * । कारणे ब्रह्मणि लये । * अवयुत्यानुवादोऽनुपपन्न इति । स्वसर्वत्वविध्यंशं पृथक्कृत्य मन्वाद्यनुवादः स्वस्य ब्रह्मणि लीनत्वादनुपपन्नः । न प्रेत्य संज्ञास्तीति श्रुत्यन्तरे ब्रह्मभूतानां भिन्नतया स्वानुसन्धानाभावबोधनात् । तर्हि कथमेवमुक्तं तत्राहुः । *तत्र यथेत्यादि * । * ब्रह्मावेशादिति * । शास्त्राभ्यासदार्ढ्यवाहुल्येन तदावेशात् । ननु यदि शास्त्रदृष्ट्योपदेशः स्यात् तदा जगल्लयादय उक्ताः स्युर्न तु त्वाष्ट्रवधादय इन्द्रकर्तृका इत्यत आहुः । *त्वाष्ट्रेत्यादि, * धर्मवचनमित्यन्तम् * । अत्रागामिसूत्रविरोधमाशङ्कन्ते । * नन्वित्यादि * । परिहरन्ति । * नैवमित्यादि * । नान्यदेतिनियमरूपः सूत्रार्थो नाङ्गीकर्तव्यः । किन्तूभयत्र नियतोऽन्यत्र त्वनियत इ-

उपदेशभावनादिष्वपि कदाचिदुत्तमाधिकारिविषये ब्रह्मप्राकट्य-मित्यङ्गीकर्तव्यम्। मय्येव सकलं जातमित्यादिवाक्यानुरोधात्।

इहैव समवनीयन्ते प्राणाः। ब्रह्मैव सन् ब्रह्माप्येतीत्यस्याविर्भावापेक्षम्। तस्य प्रायिकत्वान्न सूत्रे फलत्वमाह। जीवन्मुक्तानामपि परममुक्तेर्वक्तव्यत्वाच्च।

त्यङ्गीकर्तव्यः। तत्र हेतुः * उपदेशेत्यादि * तथाचैवं विधवाक्यानि पश्यन् व्यासः कथमेवं नियमयेदतो नैवं सूत्रार्थः। आदिपदेन, एतत्साम गायन्नास्त इत्यादिश्रुतीनां, कस्याश्चित् पुनर्नायन्त्या इत्यादिवाक्यानां च सङ्ग्रहः। तथाच वाक्यानां सूत्रोपजीव्यत्वेनोक्तसूत्रस्थे सम्पत्तिपदे उपलक्षणविधयोत्तमाधिकारोऽपि सङ्ग्रहीतु शक्यत इति न तद्विरोध इत्यर्थः। ननु तद्धैतदिति, मय्येवेति श्रौतं वाक्यद्वयं पूर्णज्ञानिन इति तस्याहङ्कारवादेन तथा कथनं युज्यते, न त्वावेशिनः। इन्द्रस्त्वावेशीति दृष्टान्तदार्ष्टान्तिकवैषम्यम्। नचेन्द्रस्यापि पूर्णज्ञानित्वं शक्यवचनम्। तथा सति वामदेवादेरिवेन्द्रस्यापि मुक्तत्वात् तद्वदेवमुपदेशस्यापि फलत्वमुक्तं स्यादित्यत आहुः। *इहैवेत्यादि *। अस्तु तस्य पूर्णज्ञानिवाक्यत्वं तेषां मुक्तत्वं च। तथापि ज्ञानमुक्त्योराविर्भावापेक्षत्वं तु निर्विवादम्। इहैवेति श्रुतौ ब्रह्मैव सन्निति ब्रह्मभावे मोक्षकथनाद्, ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्यन्तरे ज्ञानेन ब्रह्मभावश्रावणाच्च। ब्रह्मभावश्च स्वस्मिन् ब्रह्मधर्माविर्भावपूर्वकब्रह्मस्फूर्तिरूप एव। न तु तद्व्याप्तिरूपो, न वा तादात्म्यरूपः। तस्य सार्वदिकत्वेन सर्वावस्थासाधारणतया ज्ञानित्वाद्यप्रयोजकत्वात्। नापि निष्प्रपञ्चतत्स्फूर्तिरूपः। सर्वभावस्फूर्त्यादिविरुद्धत्वात्। अतः प्रकृते उपदेशरूपकार्यदर्शनेन तत्कारणरूपे ज्ञाने ब्रह्मधर्माविर्भावपूर्वकब्रह्मभावे चेन्द्रस्य सिद्धे तथा वाक्यकथनस्य युक्तत्वान्न दृष्टान्तदार्ष्टान्तिकवैषम्यम्। एतावान् परं विशेषो, यन्मुक्तस्योक्तविधब्रह्मभावः सार्वदिक, आवेशिनस्तु कादाचित्कः। अतस्तस्य प्रायिकत्वाद् वामदेवादिसर्वत्ववन्न सूत्रे तस्य फलत्वमाह। किञ्च। सर्वभाव-

असम्प्रज्ञातसमाधाविवाविर्भावदशायामेव शरीरवियोगे वियोजकाभावाद् वागादिमात्रं लीयते । तस्य च प्राप्तत्वादेव नार्चिरादिगतिः ।

स्यापि साधनत्वेनावान्तरफलत्वमेव, न परमफलत्वम् । परममुक्तिश्च जीवन्मुक्तानामप्यग्रे वक्तव्या, सुतरामावेशिन इत्यतोऽपि नाह्वातो न तदनुक्तिर्दोष इत्यर्थः । ननूक्तस्थले ब्रह्माविर्भावाङ्गीकारो न युक्तः । तस्मिन् सति वागादिविलयस्यैहैवेति श्रुतौ कथनाद् वक्तुस्तदापरयोपदेशनासम्भवापत्तेः । तस्य मुक्तिपूर्वावस्थारूपत्वेनार्चिरादिगतिकथनापत्तेश्चेत्यत आहुः । * असम्प्रज्ञानेत्यादि * सत्यमस्ति तत्र तथात्वं, पुराणे दधीच्यादिषु प्रसिद्धं च । तथाप्युक्तश्रुतौ, अथाकामयमान इति प्रतिज्ञाय लयकथनात्, कामाभावे सत्येव प्राणानां लयो, न तु तदभावे । प्रकृते तु दधीचिवदसम्प्रज्ञातसमाधेरभावादधिकारित्वेन तदानीमिन्द्रियवियोजकस्य कामाभावस्य चाभावान्न वागादिलय इति नोपदेशानुपपत्तिः । ब्रह्मभावस्य प्राप्तत्वान्नार्चिरादिगत्युक्तिश्चेत्यर्थः ।

यद्वा । ननूपदेशभावनादिषु ब्रह्माविर्भावो न युक्तः । यदि तत्र स स्यात्तदोपदेष्टुः सद्यो मुक्तिः स्यात् । इहैव समवनीयन्ते प्राणा इत्यादिश्रुतौ तथैव सिद्धेः । तथा सति तस्याविर्भावस्य फलत्वमपि व्यासैरुच्येतेत्यत आहुः । * इहैवेत्यादि * । सत्यं सद्योमुक्तिराविर्भावापेक्षा । परन्तु ब्रह्मैव सन्निति श्रुतावधारणकथनाद् यत्र सर्वथा ब्रह्मभावस्तत्रैव सद्यो मुक्तिः । उपदेशभावनादौ तु न तथा । बहिःस्फूर्तेरपि सत्त्वेन केषु चिदेव तद्भवनेन तस्याविर्भावस्य प्रायिकत्वाद्भगवान् व्यासस्तस्य फलत्वं नाह । न तु तावता सर्वत्र नाविर्भाव इति वक्तुं शक्यमित्यर्थः । यदि तादृशाविर्भावस्य न फलत्वं, तदा तस्य वैयर्थ्यमेव स्यादित्यत आहु. । * जीवन्नित्यादि * । पारम्याभावात् फलत्वानुक्तावपि नाफलमित्यदोष इत्यर्थः । ननु यदि तादृशाविर्भावस्य जीवन्मुक्तिसम्पादकत्वं, तदा तस्यार्चिरादिगतिरुच्येत । सा च नोच्यतेऽतो नैवमित्यत आहुः * । असम्प्रज्ञातेत्यादि * । शरीरवियोग इति * । अर्चिरादिगतिरिति शेषः । * वियोजकाभा-

तथापि प्रायिकत्वान्न सूत्रगीतादिषु तद्वचनम् । सगुणनिर्गुणभेदेन नियमवचनं त्वप्रामाणिकमेव । ब्रह्मवादे गुणानङ्गीकाराच्च । तस्माद्युक्तमुक्तं, शास्त्रदृष्ट्या तूपदेश इति ॥ २९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥

अन्यद् बाधकद्वयमाशङ्कते । ननु यद्यपि ब्रह्मधर्मा भूयांसः प्रकरणे श्रूयन्ते । तद्वज्जीवधर्मा मुख्यप्राणधर्माश्च बाधकाः सन्ति । न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि । अत्र हि वागादिकरणाध्यक्षस्य जीवस्य विज्ञेयत्वमभिधीयते । अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्येति शरीरधारणं मुख्यप्राणधर्मः । मा मोहमापद्यथा, अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति श्रवणात् ।

वागिति * । तादृशादृष्टाभावात् । भावनादौ वागादिमात्रं लीयते । तस्य ब्रह्मणश्च प्राप्तत्वात् तत्प्राप्त्यर्थार्चिरादिगतिरत्र नोक्ताऽतो नोक्तापि इत्यर्थः । ननु मुख्याधिकारस्यैवंविधत्वे सूत्रादिषु कुतस्तदनुक्तिरित्यत आहुः । * तथापीत्यादि * । प्रायिकत्वं सम्भावितत्वमनियतत्वमिति यावत् । तथाचातोऽनुक्तिरित्यर्थः । ननु सगुणोपासकस्यार्चिरादिगतिर्निर्गुणपरस्य तु, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति श्रुत्या केचिदेकदेशिनः सगुणनिर्गुणोपासनाभेदेनाधिकारिभेदमङ्गीकुर्वन्ति । तत् कुतो नाद्रियत इत्यत आहुः । * सगुणेत्यादि * । ब्रह्मवादे ब्रह्मणः सगुणनिर्गुणभावाभावेनाधिकारिभेदाभावात् तथागत्यादिनियमकथनमप्रामाणिकमेव । सांख्यप्रतिपन्नानां गुणानां व्यासेनानङ्गीकारादपि तथेत्यसङ्गतत्वान्नाद्रियत इत्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । *तस्मादिति* । अभ्यासबाहुल्येन प्रज्ञावेशात् ॥ २९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ व्याचक्षते । *अन्यदित्यादि* । *एतद्बाणमिति* । एतच्छरी-

यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राण इति जीवमुख्यप्राणवाच्यत्वे प्रज्ञाप्राणयोः सहवृत्तित्वादुपचारो युज्यते । उत्क्रान्तिश्च । ननु सर्वथा विलक्षणस्य ब्रह्मणः । तस्माज्जीवमुख्यप्राणलिङ्गयोर्विद्यमानत्वान्न ब्रह्मप्रकरणमिति चेन्न । उपासात्रैविध्यात् । अयमर्थः । किमत्र चोद्यते । जीवमुख्यप्राणलिङ्गाद् ब्रह्मधर्माणां जीवपरत्वं, त्रयाणामपि स्वतन्त्रत्वं वा, लिङ्गद्वयस्यापि ब्रह्मधर्मत्वमुच्यतामिति वा । आद्यः पूर्वमेव परिहृतः । न हि ब्रह्मधर्मा अन्यपरत्वेन परिणेतुं शक्या इति । द्वितीये दूषणमाह । उपासात्रैविध्यात् । तथा सत्युपासनं त्रिविधं स्यात् । तद्वाक्यभेदप्रसङ्गान्न युक्तम् ।

र्थम् । तथाच वागादिकरणाध्यक्षत्वस्य जीवलिङ्गस्य शरीरधारणस्य मुख्यप्राणलिङ्गस्य च ब्रह्मवाक्यत्वबाधकस्य विद्यमानत्वान्नेदं ब्रह्मवाक्यमित्यर्थः । ननु यथैते लिङ्गे ब्रह्मवाक्यत्वबाधके तथा अमृतत्वादिकं ब्रह्मलिङ्गमेतद्बाधकमिति नात्र कस्यापि निर्णय इत्यत स्वपक्षे गुणमाह । *यो वा इत्यादि* । *इति जीवमुख्यप्राणवाच्यत्व इति *अस्मिन् प्रकरणेऽङ्गीकार्यत्वे । * उत्क्रान्तिरिति * । सहैवैतैः सर्वैरुत्क्रामतीत्यनेनोक्तोत्क्रान्तिः । * सर्वथा विलक्षणस्येति* । उत्क्रान्तिविरोधिन्या व्यापकतया जीवात्, तथा चेतनतया च मुख्यप्राणाद् विरुद्धधर्मणः । * तस्मादिति * । उक्तरूपस्य महाबाधकस्य सत्त्वात् । तथाचैतेन बाधकेन ब्रह्मलिङ्गानामुपासनार्थत्वस्य शक्यवचनत्वान्नेदं ब्रह्मप्रकरणमिति पूर्वपक्षाशय इत्यर्थः । समाधानांशं व्याकुर्वन्ति । *अयमर्थ इत्यादि* । *उच्यतामिति * । उपपाद्यताम् । * पूर्वमेव परिहृत इति * । न वक्तुरिति सूत्रे ब्रह्मधर्मबाहुल्यप्रतिपादनेन बहूनामनुग्रहस्य न्याय्यत्वालम्बनात् परिहृतः । परिहारस्याकारमाहुः । * न हीत्यादि * । अत्राशक्यत्वं बहुपुलक्षणाया आपत्त्या ज्ञेयम् । * द्वितीय इति * लक्षणादोषराहित्यात् त्रयाणां स्वातन्त्र्येण प्रतिपाद्यत्वाङ्गीकार इत्यर्थः । *वाक्यभेदप्रसङ्गादिति* । विजानीहीत्यस्यावर्तनेन, मामितिपदस्यार्थत्रयकल्पनेनैवका-

तृतीये तूपपत्तिरुच्यते। जीवधर्मा ब्रह्मणि न विरुद्ध्यन्ते। आश्रितत्वात्। जीवस्यापि ब्रह्माधारत्वात् तद्धर्मा अपि भगवदाश्रिता एव। इहेत्युभयत्र सम्बन्धो ब्रह्मवादे। मुख्यप्राणे तु तद्योगात्। तेन योगस्तद्योगस्तस्मात्। प्राणधर्मा भगवति न विरुद्ध्यन्ते। प्राणस्य भगवत्सम्बन्धात् तद्धर्माणामपि भगवत्सम्बन्धात्। अथवा वक्तृत्वादयो न जीवधर्माः किन्तु ब्रह्मधर्मा एव। जीवे आश्रितत्वाद्भासन्ते। पराक्तु तच्छ्रुतेरिति न्याया-त्। प्राणेऽपि तथा। स्वाप्ययसम्पत्त्योर्जीवस्य ब्रह्माश्रितत्वम्। आध्यात्मिकाधिदैविकरूपत्वान्न संयोगः। प्राणस्य तु संयोग एव।

रार्थविरोधेन च वाक्यभेदप्रसङ्गात्। * तृतीय इति। * ब्रह्मधर्मत्वोपपादनचोदनापक्षे। * ब्रह्माधारत्वादिति *। अस्यान्वयव्यतिरेकाभ्यां सर्वमिदं जगदिति श्रुत्या जीवस्यावयवत्वबोधनेन तस्य ब्रह्माधारत्वात्। नच वैपरीत्यं शङ्क्यम्। संयोगादुत्पत्तिरितिपक्षे तथात्वे, विभागादुत्पत्तिरिति पक्षे तदभावादिति। * इहेत्युभयत्र सम्बन्ध इति *। इहाऽऽश्रिततत्वादिह तद्योगादित्येवं सम्बन्धः। ब्रह्मवादपदं मायावादिमते जीवब्रह्मणोरभेदादाश्रयाश्रयिभावानङ्गीकारेण तस्य विरुद्धत्वबोधनार्थम्। * भगवत्सम्बन्धादिति *। भगवतो नियामकतया तन्नियम्यत्वरूपात् सम्बन्धात्। तथाच, 'न प्राणेन, नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति' तत्सामर्थ्यस्य भगवदधीनत्वात् तद्धर्माणामपि परम्परया भगवद्धर्मत्वमित्यर्थः। अस्मिन् पक्षे जीवप्राणधर्माणां न साक्षाद् भगवद्धर्मत्वमिति लक्षणेवाऽऽयातेत्यरुच्या पक्षान्तरमाहुः। * अथवेत्यादि *। * ब्रह्मधर्मा इति * साक्षाद्ब्रह्मधर्माः। ननु यद्येवं प्राणे स्यात् तदाऽऽश्रितत्वमेव हेतुत्वेनोक्तं स्यान्न तु तद्योगोऽपीत्यत उपपादयन्ति * स्वाप्ययेत्यादि *। तथाच स्वाप्ययादौ जीवस्य ब्रह्माश्रितत्वम्। अवस्थाभेदकृतात् तादात्म्यान्न संयोगः। उभयप्रवेशपक्षे तु स्वाप्यये सम्परिष्वङ्गश्रुतेः संयोगः कादाचित्कः। प्राणे तु संयोग

तस्मात् सर्वे धर्मा ब्रह्मणि युज्यते ।

सहोत्क्रमस्तु क्रियाज्ञानशक्त्योर्भगवदीययोर्देहे सहैव स्थानं सहोत्क्रमणमिति भगवदधीनत्वं सर्वस्यापि बोध्यते। ननु, प्राणस्तथानुगमादिति प्राणशब्देन ब्रह्मैव प्रतिपादितं, तत्कथं धर्मयोरुत्क्रमणमिति चेत् । अत्र धर्मधर्मिणोरेकत्वपृथक्त्वनिर्देशयोर्विद्यमानत्वात् । प्राणो वा अहमस्मिन् प्रज्ञात्मेति । अत्र क्रियाज्ञानशक्तिमान् निर्दिष्टः । तदन्वेकैकस्य धर्मप्रशंसा, यो वै प्राणः सा प्रज्ञा, या प्रज्ञा स प्राण इत्युपसंहारान्तम् । पुनस्तयोरेवोत्क्रमणप्रवेशाभ्यां सह ह्येवास्मिन् शरीरे वसतः सहोत्क्रामत इत्युपक्रम्य सुषुप्तिमूर्छामरणेषु प्राणाधीनत्वं सर्वेषामिन्द्रियाणामुक्त्वा आसन्यव्यावृत्त्यर्थं प्रज्ञयैक्यं प्रतिपाद्योपसंहरति । पुनर्ज्ञानशक्तेरुत्कर्षं वक्तुम्, अथ खलु यथा प्रज्ञायामित्यारभ्य, न हि प्रज्ञापेतोऽर्थः कश्चन सिद्ध्येतेत्यन्तेन ज्ञानशक्त्युत्कर्षं प्र-

---

एव सार्वदिक इति हेतुद्वयकथनं युक्तमित्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । * तस्मादिति * अनया रीत्या ब्रह्मणः प्रयोजकत्वेन लक्षणादोषासंसर्गात् । नन्वस्त्वेवमन्येषां भगवद्धर्मत्वं, तथापि सहोत्क्रमस्यैकत्वव्यापकत्वविरुद्धत्वया तस्य तु तथात्वं न युज्यत इति तस्य का गतिरित्यत आहुः । सहोत्क्रमस्त्विवति । तथाच व्यापकत्वादसम्भवन्नपि शक्तिशक्तिमतोरभेदाद्धस्तोत्क्षेपणवत् सोऽपि भगवद्धर्म एवेत्यर्थः । एवं बोधनस्य फलमाहुः । * देह इत्यादि * अत्र पूर्वविरोधमाशङ्कते * नन्वित्यादि * । * तत् कथमिति * पूर्वोक्तविरोधेन धर्मधर्मिभावस्य वक्तुमशक्यत्वात् कथम् । एतत्समाधानाय हेतुं गृह्णन्ति * अत्र धर्मेत्यादि* तथाच यदि पृथक्त्वनिर्देशो न स्यादुत्क्रमणं विरुद्ध्येत । अत्र तूभयोः सत्त्वान्न पूर्वापरविरोध इत्यर्थः । उक्तं व्याख्यातुमुपपादयन्ति * प्राण इत्यादि * अत्र विषयवाक्ये पाठभेदो देशभेदाद् बोध्यः । यथा बृहन्नारायणोपनिषदि

तिपाद्य धर्ममात्रत्वनिराकरणाय ज्ञानशक्तिमन्तं भगवन्तं निर्दिशति, न हि मज्ञातव्यमित्यारभ्य, मन्तारं विद्यादित्यन्तेन । तदनु ज्ञानक्रियाशक्त्योर्विषयभूतभूतमात्रारूपजगतो भगवदभेदं प्रतिपादयन्, स एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृत इत्युपसंहरति ब्रह्मधर्मैः । अतः क्रियाज्ञानविषयरूपो भगवानेवेति प्रतिपाद्य, न तावन्मात्रं, ततोऽप्यधिक इत्येकोपासनैव विहिता । तस्माज्जडजीवरूपत्वात् सर्वात्मकं ब्रह्मैवेति महावाक्यार्थः सिद्धः ॥१०॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राऽणुभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

तैलङ्गद्रविडपाठभेदात् । यथा चैतद्वाणमवष्टभ्येति प्रश्नोपनिषद्वाक्ये त्विमं शरीरं परिगृह्योति पठन्तीति पाठान्तरं शङ्कराचार्यैरुपन्यस्तम् । तथाऽत्रैवोद्दूह्यमित्यत्रादुद्दुह्यादिति पठितम् । तद्वत्, शङ्करानन्दकृतटीकायामप्ययमेव पाठ इति । अत्र क्रियाशक्त्यनुग्राहकः प्राण इति, ज्ञानशक्त्यनुग्राहकश्च चेतन इति तदुभयवाचकयोः प्राणप्रज्ञात्मशब्दयोरिह सामानाधिकरण्यात् तदुभयवानेको निर्दिष्टः । ततस्तं मामायुरमृतमित्युपास्स्वेत्यनेन तस्योपासनं विधाय तस्य फलं चोक्त्वा, तदनु, तद्धैक आहुरित्यारभ्यास्तित्वे व प्राणानां निःश्रेयसमित्यन्तेन क्रियाशक्तिप्रशंसा । जीवति वागपेत इत्यारभ्य प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीत्यन्तेन ज्ञानशक्तिप्रशंसा । ततस्तस्योक्थोपासनां विधाय प्राणे सर्वाप्तिमुक्त्वा यो वै प्राणः सा प्रज्ञा, या वा प्रज्ञा स प्राण इत्युपसंहृतेत्येतदन्ता उभयप्रशंसा । तदग्रिमसन्दर्भे तूत्क्रमणप्रवेशाभ्यां पुनस्तयोरेव प्रशंसा । सा च तस्मिन् पाठे, सह ह्येतावस्मिन्नित्युपक्रम्य सुषुप्त्यादिषु सर्वेन्द्रियाणां प्राणाधीनत्वमुक्त्वा ततः प्राणस्य प्रज्ञैक्यं प्रतिपाद्योपसंहृता । प्रसिद्धपाठे तु, तस्यैवैष दृष्टिरेतद्विज्ञानमित्युपक्रमः । सह ह्येतावस्मिन्नित्युपसंहारः । वाक्यार्थस्तूभयत्राप्येक एव । तस्य प्रयोजनं तु क्रियाशक्त्यपेक्षया ज्ञानशक्तेरुत्कर्षप्रतिपादनमतस्तमुत्कर्षं वक्तुमेतावान् सन्दर्भः । ततो-

ऽथ खलु प्रज्ञायामित्यादिनोत्कर्षप्रतिपादनम् । तत्रापि पाठभेदः । प्रसिद्धपाठे, अथ यथास्यै प्रज्ञायै, इत्युपक्रमान्त हि प्रज्ञापेताधीः काचन सिद्ध्येदित्युपसंहारात । अर्थस्त्वेक एव । तदग्रे तु पाठोऽपि समानः । तदर्थस्तु, ॐ धर्ममात्रत्वनिराकरणायेत्यादिना प्रतिपाद्यते । तत्र ज्ञानशक्तिमन्निर्देशो जीवसाधारण इति जीवं वारयितुं, ता वा एता दशैव भूतमात्रा इत्यारभ्य, न ह्यन्यतरतो रूपं किञ्चन सिद्ध्येदित्यन्तेन क्रियाज्ञानशक्त्योः परस्परसापेक्षतया स्वविषयभूतरूपात्मकजगत्साधकत्वं प्रतिपाद्य, ततो नो एतन्नानेति तासां प्रज्ञायाः सकाशादभेदं प्रतिज्ञायोपपादयति । तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष इति । तथाच, यद् यज्जनकं तत् तद्धर्मकं, यद् यद्धर्मकं तत् तदविनाभूतमिति व्याप्त्या भूतमात्राप्रज्ञामात्रात्मकस्य सर्वस्य जगतः प्रज्ञाऽविनाभावेन तदात्मकत्वे सिद्धे तस्या अपि स्वरूपं निर्णेतुम, आनन्दोऽजरोऽमृत इति ब्रह्मधर्मैरुपसंहरति । अतोऽत्र प्रज्ञात्मकजीवस्वरूपादधिकस्य ब्रह्मणः सर्वात्मकत्वसर्वाधिकत्वज्ञानार्थमेकैवोपासना विहिता । तस्मात साध्वसाधुकारकतया प्राप्तस्य वैषम्यादिदोषस्यापि परिहाराद् ब्रह्म जडजीवात्मकतया सर्वोपादानत्वेन सर्वात्मकमित्येष महावाक्यार्थः सिद्ध इत्यर्थः । तेनेदमधिकरणं पूर्वोक्तस्य सर्वस्य निगमनार्थमिति बोधितम् । तथाहि । पूर्वं शास्त्रारम्भे जिज्ञासोक्ता । सा सर्वदा कर्तव्या । अन्यथा, अरुन्मुखयत्यादिवद्विनाशः स्यादिति विषयवाक्यारम्भे बोधितम् । ततो जन्मादिसूत्रसिद्धं सर्वकर्तृत्वं, समन्वयसूत्रसिद्धं सर्वोपादानत्वं चोपपादितम । तत उपसंहारे, ईक्षत्यानन्दमयाधिकरणासिद्धोऽर्थः प्रज्ञात्मानन्दपदाभ्यां सङ्गृह्य बोधितः । ब्रह्मधर्मोपदेशेन, लोकपालत्वादिबोधनेन, प्राणशब्दोक्त्या, स म आत्मेत्युपसंहारेण च यथायथं तद्धर्मोपदेशाद्यधिकरणार्थः सङ्गृहीतः । तेन तथेति ।

अत्रोपासात्रैविध्यादितिपदं शङ्करभास्कराचार्यभिक्षुभिः स्वस्वमतेनैवमेवापत्तिमादाय व्याख्यातम् ।

रामानुजाचार्यैस्तु प्राचीनवृत्तिकारानुसारेणोपासात्रैविध्यपदमेकवाक्यत्वे हेतुत्वेन व्याख्यातम । न ह्यत्र जीवमुख्यप्राणब्रह्मणां त्रयाणामुपासनमुच्यते, येन वाक्यं भिद्यते । किन्तु भोक्तुर्जीवस्य

धर्मैर्भोग्यस्य मुख्यप्राणस्य धर्मैः स्वधर्मैश्चेत्येवं त्रैविध्यादेकोपासनैव विधीयत इति, सम्भवत्येकवाक्यत्वे वाक्यभेदश्च, नेष्यते इत्यभियुक्तोक्तेः पूर्वपक्षो न युक्त इति । तेषां चौरः शैवोऽप्येवमाह ।

तच्च वाचस्पतिमिश्रैरेवं दूषितम् । एतदालोचनीयम् । कथं न वाक्यभेद इति । युक्तं सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टयागविधानम् । तत्तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिविषयत्वात् । इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति । अभावार्थत्वात् । भावार्थस्य विधिविषयत्वनियमात् । वाक्यान्तरेभ्यश्च ब्रह्मावगतः प्राप्तत्वात्तदनूद्याप्राप्तोपासाभावार्थो विधेयस्तस्य भेदाद्विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नोद्घाटित इति ।

अत्रेदं बोध्यम् । तथाहि । अत्र हि मामेव विजानीहीत्यारभ्य, नीलं वेतीत्यन्ता ऐन्द्रगुणविशिष्टैकोपासना । तदनु, सहोवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वेत्यारभ्यैवं हि पश्याम इत्यन्ता द्वितीया प्राणगुणविशिष्टस्य । तदन्वथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोत्थमुपासीतेत्यारभ्य सिद्ध्येदित्यन्ता प्रज्ञागुणविशिष्टस्य । तत्र पृथगुपासनाङ्गीकारे, मामेव विजानीहि स म आत्मेति विद्यादित्युपक्रमोपसंहारगतस्य वक्त्रात्मोपदेशस्य विरोध इति तदभावायैकवाक्यत्वस्यावश्यत्वादुपासनात्रयपक्षस्त्वसङ्गतः । अथोपक्रमाद्यनुरोधेनावान्तरोपासनावाक्यानां तदनुवादेन प्रकारविधायकत्वमङ्गीकृत्यैन्द्रवाक्यत्वं चेदङ्गीक्रियते, तदा तत्रोक्तानां प्राणधर्माणां ब्रह्मधर्माणां च काल्पनिकत्वापत्तिः पूर्वोक्तरीत्या प्रतर्दनस्य पुरुषार्थासिद्धिश्चेति तदुभयं विहायात्र ब्रह्मवाक्यत्वं सिद्धान्तितम् । तथा सति त्रितयपक्षस्य प्रागेव निरस्तत्वाद् विध्यावृत्त्यङ्गीकारे विधोल्लेखवैयर्थ्यप्रसङ्गाच्च प्रकारत्रयविशिष्टैकोपासाविधिरेव सिद्ध्यतीति वाक्यभेदस्फुटत्वं कथमित्येवालोचनीयं, न तु तदभावसमर्थनमालोचनीयम् । किञ्च । भाष्यकृतापि ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितमिति तन्मतासिद्धमुक्तमतो व्याख्येयविरोधोऽपीति ।

नन्वेवमस्य प्राचीनपक्षस्य निर्दुष्टत्वे सिद्धान्तिना कुतोऽयं नादृत, आपत्त्या च कुतो व्याख्यातमिति चेन्न । त्रैविध्यादित्यस्या

स्यब्लोपपञ्चमीत्वेनापत्तेरार्थिकतयाऽध्याहार्यत्वाभावेन व्याख्याने दोषाभावात् । सिद्धान्ते तेषां धर्माणां जीवीयत्वादिना भानस्यैव भ्रान्तित्वबोधनेन ब्रह्मधर्मत्वस्यैव निर्णीततया प्राचीनप्रतिपन्नद्वैविध्यस्याप्यभावादिति बुध्यस्व ।

माध्वास्तु, ऐतरेयोक्तं विश्वामित्रेन्द्रसंवादं विषयवाक्यत्वेनोदाहरन्ति ।

इति श्रीवल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयध्वान्तेन पुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

अथ प्रथमाध्यायस्य
द्वितीयः पादः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

समन्वये प्रथमेऽध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयो वक्तव्यः । तत्रोद्गीथाद्युपासनावाक्यानां मुख्यवाक्येषु फलोपकार्यङ्गत्वम् । ब्रह्मवाक्यानां पुनर्निःसन्दिग्धानां समन्वयः स्वतः सिद्धः सन्दिग्धानि द्विविधानि शब्दतोऽर्थतश्च ।

सर्वत्र प्रसिद्धोपदेशात् ॥ अथ द्वितीयपादं व्याचिख्यासवः पादानामेककार्यत्वरूपां परस्परसङ्गतिं क्रमनियामिकामवसररूपां च सङ्गतिं प्रतिपादयितुं व्याख्येयाध्यायार्थकथनपूर्वकं पूर्वपादसिद्धः स पदार्थः सङ्क्षेपेण वक्तव्योऽन्यथा मन्दमतीनां पूर्वोक्तानवधारणेन वक्ष्यमाणार्थे सन्देहः स्यादित्यतस्तमाहुः । * समन्वये, इत्यारभ्य,* सन्देहं निवारित इत्यन्तेन * । समन्वये * सर्ववेदान्तसमन्वयप्रतिपादकत्वेन समन्वयाख्यया प्रसिद्धे प्रथमेऽध्याये उक्तविधः समन्वय एकार्थप्रतिपादकत्वरूपो वक्तव्यः । परप्राप्तिरूपफलसाधनाय तत्साधनीभूतब्रह्मज्ञानोपकाराय चावश्यं वाच्यः । नचानन्तेष्वनन्तशाखेषु वेदेषूपनिषद्भागरूपाणां वेदान्तानामप्यनन्तत्वादुक्तरीतिकसमन्वयोक्तेरशक्यत्वमसंगतत्वं वा शङ्क्यम् । प्रकारविशेषेण सर्वोपपत्तेरित्याशयेनाहुः । *तत्रेत्यादि* । वक्तव्ये सर्वसमन्वये, अन्तस्तद्धर्माधिकरणादिविषयवाक्यभूतानामुद्गीथाद्युपासनावाक्यानां मुख्यवाक्येषु फलसम्बन्धबोधकेषु सर्वविघ्नकारणतादिप्रतिपादकवाक्येषु फलोपकार्यङ्गत्वम् । तत्तदुपासनया तेन तेन रूपेण तत्तत्फलप्राप्तौ महामाहात्म्यज्ञानस्यात्मत्वस्फूर्त्या निरूपाधिप्रेम्णश्च सिद्ध्या तस्य साधनस्य भक्तिरूपत्वसिद्धौ विघ्नक्षिनपरप्राप्तिरूपं फलं भवतीति तेषां तदङ्गत्वम । तथाचानया रीत्याऽन्येषामनुक्तानामप्युपासनावाक्यानां प्रयोजनैक्यात् समन्वयः सिद्ध्यतीति न पूर्वोक्तो दोष इत्यर्थः । एषमन्येष्वपि बोध्य इत्याशयेनाहुः । * ब्रह्मवाक्यानामित्यादि * । पूर्वं प्रतिपाद्यविषयभेदेन सन्दिग्धानि चतुर्विधान्युक्तान्यत्र तु नैवंव शब्दार्थभेदेन सन्दिग्धत्वमाहुः । * सन्दिग्धानीत्यादि * तथाचैवं

तदर्थं चैतद्विचारितम् । ब्रह्मणि व्यवहारोऽस्ति कश्चिन्नेवेति। प्रथमसूत्र एव व्यवहारः स्थापितः । यतो वाचो निवर्तन्त इत्यादीनां विशेषणेदमित्थतया निरूपणनिषेधनपरत्वम् । एवमेव कार्यसिद्धेः । अधीतानां ब्रह्मवाक्यानां चतुर्लक्षण्या ब्रह्मपरत्वे सिद्धे श्रवणं सिद्ध्यति। श्रुतस्य कालान्तरेऽप्यसम्भावनाविपरीतभावनानिवृत्त्यर्थं पूर्वस्थितानामङ्गानामनपेक्षितानामुद्धापेनान्येषामपेक्षितानामावापेन तस्यैवार्थस्य निर्द्धारणे मननं भवति ।

वाक्यविचारेणानुक्तानामपि समन्वयसिद्धिरित्यर्थः । एवमध्यायार्थस्य सर्वोपयोगित्वमुक्त्वा पादार्थस्य वक्तुं तत्रत्याधिकरणानां प्रयाजनमर्थं च वदन्तः पूर्वं प्रथमस्याहुः । * तदर्थमित्यादि *, * तृप्तिवदित्यन्तेन * । * तदर्थमिति* समन्वयार्थम् । *विचारितमिति * ईक्षत्यधिकरणे विचारितम् । ईक्षत्यधिकरणं चतुर्थं, तत्र विचारितस्य कथं प्रथमार्थत्वमित्यत आहुः । * तत्र प्रथमेत्यादि * । * स्थापित इति * प्रमाणलक्षणप्रभृतिभिः स्वरूपादिचिन्तनस्यैव विचारपदार्थत्वात् तत्प्रतिज्ञयैव स्थापितः । तथाच विचारस्य चतुर्थे सत्त्वेऽपि स्थापनस्य प्रथमे कृतत्वात् प्रथमार्थत्वमित्यर्थः । ननु सत्यं स्थापितस्तथापि श्रुत्यन्तरविरोधान्नादरणीय इति शङ्कायां तत्परिहारप्रकारमाहुः । * यतो वाच इत्यादि * अस्याः श्रुतेरेवन्तात्पर्यकत्वे गमकमाहुः । *एवमेव कार्यसिद्धेरिति * कार्यं श्रवणादिकं, तत्सिद्धेरित्यर्थः । नन्वेवं वाङ्निवृत्तिश्रुतिसङ्कोचने किं मानमित्याकाङ्क्षायामेतदेव विभजन्ते *अधीतानामित्यादि*। आत्मावारे द्रष्टव्य इत्यादिश्रुतावात्मदर्शनसाधनत्वेन श्रवणादित्रयमुक्तम्। तत्रात्मा परब्रह्म चेति तस्य वागाद्यविषयत्वे प्रमाणलक्षणादिसंसर्गाभावेन श्रौतानां पदवाक्यादीनां ब्रह्मावाचकतया तद्वाचकपदादिशक्तितात्पर्यावधारणरूपस्य श्रवणस्यासम्भवात् । तदभावे च, तदुपजीवकस्य, तत्त्वेन भयं विदुषोऽमन्वानस्येत्यनेनावश्यकतया श्रावितस्य मननस्य तदुपजीवकस्य निदिध्यासनस्य चासम्भवान्न ज्ञानस्यापि सिद्धिर्मोक्षसिद्धिश्चातो मोक्षसाधनबोधकश्रुतिवैयर्थ्यपरिहारायानिरुक्तश्रुतिविरोधप-

ततोऽप्येवं ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलभ्यनिजसुखानुभवरूपं ब्रह्म । इदमेव ब्रह्मज्ञानमिति । अतस्तादृशस्यानुभवैकवेद्यत्वाद्युक्तमविषयत्वम् । पाकभोजनतृप्तिवत् ।

अतः श्रवणाङ्गमीमांसायां माहात्म्यज्ञानफलायां भगवद्वाक्यानामन्यपरत्वेऽन्यवाक्यानां च भगवत्परत्वे दिव्यधर्मादिव्यधर्मव्यत्यासेन वैपरीत्यं फलमापद्येत । तदर्थं दिव्यधर्मनिर्द्धारो

रिहाराय च ब्रह्मणः श्रुत्यात्मकवागादिविषयत्वाङ्गीकार आवश्यकः । नचैवमुपगमे उक्तश्रुतौ सङ्कोचापत्तिः । विशेषेणेदमित्थतया निरूपयितुमशक्यस्यानुभवैकवेद्यतया वागादिनिवृत्तिभवनेन सङ्कोचाभावात् । नचैवमनुभवैकवेद्यत्वे मनोविषयस्य सम्भवान्मनसा सहेत्यस्य विरोधः । लोके मनसा ज्ञायमानानामपि फलतण्डुलादिपाकनानाविधान्नभोजनतज्जन्यतृप्तीनामिदमित्थतया अविषयत्वस्य सर्वजनीनत्वेनात्रापि तथात्वस्य युक्तया मनसो निवृत्तेर्विरोधलेशस्याप्यभावादित्यतस्तथोच्यत इत्यर्थः । भाष्ये तु वास्तवेन यत्किञ्चिद्रूपेण येनकेनचित् प्रकारेण निरूपणेऽपीदमित्थतया निरूपणस्य सम्भवात् तद्वारणाय विशेषेणेति पदं बोध्यम् । तथा पूर्वस्थितान्यङ्गानि ब्रह्मवाक्यस्थानि बोध्यानि । उद्वापस्तु प्रकृतपरत्वेन प्रतीयमानस्यान्यपरत्वापादनम् । आवापस्त्वन्यपरत्वेन प्रतीयमानस्य प्रकृतपरत्वापादनम् । * ततोऽप्येवमिति * । मननानन्तरमभ्यासेन निर्द्धारणे तद्दार्ढ्ये वा । * निदिध्यासनरूपमिति * । अत्र ज्ञानमिति शेषः । रूपपदरहितः पाठो वा । *मनसीत्यादिना तु द्रष्टव्यपदोक्तस्य ज्ञानस्य स्वरूपकथनम् । *इदमिति* ब्रह्मस्वभावजन्यम् । *युक्तमिति* अनुभवस्य प्रादुर्भावापेक्षत्वात् प्रादुर्भावस्य च वरणाधीनत्वात् प्रमाणबलस्य कौण्ठ्येन तस्याकिञ्चित्करत्वाद्युक्तम् । तथाचैतत्सर्वमनुसन्धाय जिज्ञासासूत्रप्रणयनाद् व्यवहारस्थापनं प्रथमाधिकरणार्थ इत्यर्थः । अतः परं द्वितीयाधिकरणार्थमाहुः । *अत इत्यादि, फर्मेतीत्यन्तम् । * अत इति * । ब्रह्मणि व्यवहारस्थापनेन श्रवणविषयत्वसिद्धौ तत्स्वरूपादिविचारस्यावश्यकत्वात् । * वैपरीत्यमिति * । वि-

द्वितीयाधिकरणे विचारितः । वेदा एव वाचका, अलौकिकमेव कर्मेति । ततः पूर्णालौकिकत्वाय विधिनिषेधमुखेनाधिकरणद्वयम् । समन्वयेक्षतिरूपम् । तदनु प्रथमे पादे शाब्दसन्देहो निवारितो निश्चितार्थे । तत्रापि प्रथमं प्रत्ययसन्देहो निवारितो द्वयेन । प्रकृतिसम्बन्धोऽप्यधिकरणत्रयेण । पुनरन्तिममधिकरणं संश्लेषवारणाय ।

एवं प्रथमे पादे शब्दसन्देहो निवारितः ।

परीतभावरूपम् । अपरप्राप्तिरूपमिति यावत् । * विचारित इति * । हेतोः साध्यस्य च कथनमुख्येन निर्णीतः । तस्यैवाकारो वेदा एवेत्यादिनोच्यते । अग्रिमार्थमाहुः । *तत इत्यादि* । पूर्णालौकिकत्वायेति * । अभिन्ननिमित्तोपादानरूपताबोधनेन तथात्वाय । * विधिनिषेधमुखेनेति * । समन्वयेन हेतुना पूर्णालौकिकत्वस्य विधिमुखेन स्थापनम । अव्यवहार्यत्वस्य प्रधानस्य सगुणस्य च निरासेन तत्स्थापनान्निषेधमुखत्वं बोध्यम् । नच पूर्वं जिज्ञासालक्षणविचाराणां कर्तव्यतायास्त्रिसूत्र्या उक्तत्वादत्रेक्षत्यधिकरणस्य कुतो निवेश इति शङ्क्यम् । त्रिसूत्र्युक्तप्रमेयप्रपञ्चनार्थमेव सर्वस्य शास्त्रस्योपदेशेन तत्तत्प्रयोजनाय तस्य तस्याधिकरणस्य सङ्ग्रहेऽप्यदोषादिति । आनन्दमयाधिकरणप्रयोजनमाहुः । * तदन्वित्यादि * । प्रकृतिसम्बन्ध इत्यत्र प्रकृतौ सम्बन्धो यस्य सन्देहस्य स तथेति व्यधिकरणपदो बहुव्रीहिः । सन्देह इति पाठो वा । एवं नवाधिकरणीप्रयोजनमुक्त्वा दशमस्याहुः । * पुनरित्यादि * । संश्लेषवारणायेति * । परब्रह्मणश्चिदचित्संश्लेषवारणाय । ब्रह्मवादे केवलस्यैव तादृशत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । सिद्धमाहुः । * एवमित्यादि * षडधिकरण्या निवारित. । तथाचैतावतैव शाब्दसन्देहनिवृत्तेः कार्यसिद्धेश्च सम्भवान्न्यूनाधिकाधिकरणाङ्गीकारो न युक्त इत्यर्थः । ननु केचिदेकदेशिनो, यतो वाच इत्यस्य यावच्छब्दमनसगोचरत्वनिषेधनपरत्वमास्थाय श्रोतव्यादिवाक्यवैयर्थ्यपरिहाराय ब्रह्मणि सगु-

ये पुनः कचित् सगुणनिर्गुणभेदं प्रतिपादयन्ति, ते स्वयमेव स्वस्य ब्रह्मजिज्ञासानधिकारं बोधयन्ति । ब्रह्मवादे साङ्ख्यानामिव गुणानामनङ्गीकारात् । भौतिकगुणानामसम्बन्धार्थमेवाध्यायारम्भः । अन्यथा सर्वस्यापि तत्कारणत्वेन तत्सम्बन्धस्य विद्यमानत्वादन्यनिराकरणेन तत्प्रतिपादकत्वनिर्द्धारकाधिकरणानां वैयर्थ्यमेव ।

अर्थसन्देहनिराकरणार्थं द्वितीयाद्यारम्भः । तत्रार्थो द्विविधो जीवजडात्मकः प्रत्येकसमुदायाभ्यां त्रिविधः । तत्र प्रथमं जीवपुरःसरेण सन्देहा निवार्यन्ते ।

णनिर्गुणभेदं प्रतिपादयन्ति । ततश्च निर्गुणं ब्रह्मोक्तश्रुतिरर्थाद् बोधयति । श्रोतव्यादिश्रुतयस्तु शब्दात् सगुणं बोधयन्तीत्येवमपि ब्रह्मणि व्यवहारसिद्धेः पूर्वोक्तरीत्या जिज्ञासासूत्रस्योक्तश्रुतेश्चार्थकथनं न युक्तमित्याशङ्कायां तन्मतमनूद्य दूषयन्ति । * ये पुनरित्यादि * कथं बोधयन्तीत्यत आहुः । * ब्रह्मवाद इत्यादि * । * गुणानामिति * नित्यभिन्नानाम् । ननु, प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादिश्रुतिषु गुणाङ्गीकारात् कथमनङ्गीकारावगम इत्यत आहुः । * भौतिकेत्यादि * भौतिका भूतोत्पादकत्वेन तत्सम्बन्धिनः । तथाच, प्रधानेत्यादिश्वेताश्वतरश्रुतौ गुणानां सिद्धत्वनिर्देशेऽप्युपनिषदारम्भे, भूतानि योनिः पुरुष इति चिन्त्यमित्यत्र यानिपदोक्तनित्यभिन्नगुणानङ्गीकारबोधनादुक्तश्रुतौ ब्रह्मवादसिद्धा भगवदुत्पन्ना एव ते बोध्याः । अतस्तदभिप्रेतानां मायावादसिद्धानां गुणानामसम्बन्धार्थमेवाध्यायारम्भात् सा श्रुतिव्यवस्था अलङ्गनेत्यतस्तथेत्यर्थ. । ननु कथमेवमवगम्यत एतदर्थमेवाध्यायारम्भ इति, तत्राहुः । * अन्यथेत्यादि * । * तत्कारणत्वेनेति * तत्कारणकत्वेन । तथाचातोऽवगम्यत इत्यर्थः । एवं प्रासङ्गिकं निराकृत्य प्रस्तुतमाहुः । * अर्थेत्यादि * कोऽर्थः सन्देहजनक', कथं च तन्निराकरणमित्यपेक्षायामाहुः । * तत्रार्थ इत्यादि* । द्वितीयपादार्थमाहुः । * तत्र प्रथममित्यादि * । * जीवपुरःसरेणेति * प्रथमाधिकरणे, अनुपपत्तेस्तु न शारीर इति पूर्व

इदमाम्नायते । सर्वं खल्विदं ब्रह्म तज्जलानिति, शान्त उपासीत । अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवति । स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि । तत्र वाक्योपक्रमे सर्वं खल्विदं ब्रह्मेति सर्वस्य ब्रह्मत्वं प्रतिज्ञाय, तज्जलानिति सर्वविशेषणं हेतुत्वेनोक्त्वा तत्त्वेनोपासनमुक्तम् ।

जीवस्यैव निराकरणाज्जीवपुरःसरेण विचारेणेत्यर्थः । एवमग्रिमपादेऽपि, नानुमानमतच्छब्दादितिसूत्रप्रणयनाज्जडपुरःसरत्वम् । एवं चतुर्थेऽप्युभयपुरःसरत्वमानुमानिकसूत्रविवरणादवगन्तव्यम । तथाच त्रिभिः पादैस्त्रिविधार्थसन्देहो निवार्यत इत्यर्थः । एवञ्च पादानामेककार्यकत्वेऽपि क्रमनियामिकाऽवावसररूपा सङ्गतिरिति बोधितम् ।

अन्ये तु प्रथमपादे स्पष्टब्रह्मलिङ्गान्याकाशादिवाक्यानि निर्णीतानि । द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिङ्गानि निर्णीयन्त इत्याहुः । तन्मते क्रमनियामकं न स्पष्टम् ।

एवं पादसङ्गतिं निरूप्य प्रथमाधिकरणं व्याख्यातुं विषयवाक्योपन्यासमुखेनावतारयन्ति । * इदमाम्नायत इत्यादि * छान्दोग्ये पञ्चमप्रपाठके उच्यते । अत्रादिपदेन, भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वेत्यादिनाऽणीयस्त्वगुणविशिष्टस्य, तत, एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या इत्यादिना स एव ज्यायस्त्वगुणविशिष्ट इत्युक्त्वा पुनः सर्वकर्मत्वादिविशिष्टस्य, तत, एतद् ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीत्येतावतश्च बोधकः शाण्डिल्यविद्याख्यो ग्रन्थः परामृश्यते। अत्र संशयादिकं बोधयितुमेतद् व्याकरिष्यन्तोऽत्र वाक्यद्वयस्य प्रतीयमानत्वादादौ पूर्वं व्याकुर्वन्ति *तत्रवाक्येत्यादि* * तज्जलानिति * तस्माद् ब्रह्मणो जायत इति जं, लीयत इति लम,

नचायं शमविधिः । वाक्यार्थे लक्षणाप्रसङ्गात् । कारणत्वेन सामान्यत एव सिद्धत्वाच्च । अतः सर्वजगतो ब्रह्मत्वेनोपासनमुक्तम् । इदमेव पुराणादिषु विराट्त्वेनोपासनम् । अतः परमग्निमद्वाक्यार्थे सन्देहः । क्रतु कुर्वीतेति । क्रतुर्धर्मो यज्ञ इति यावत् ।

तस्य स्वरूपं मनोमयः प्राणशरीर इति ।

अनितीत्यन्त । ब्रह्मसम्बन्धेनोत्पत्तिलयस्थितिकमित्यर्थकं तज्जलानिति सर्वविशेषणमुपासनाहेतुत्वेनोक्त्वा सर्वस्य ब्रह्मत्वेनोपासनमुक्तमित्यर्थः । ननु यथाऽत्र तज्जलानिति सर्वविशेषणं, तथा शान्त इत्युपासकविशेषणम, इतिश्च हेतौ । तथा सत्यत्र जगत उक्तरूपत्वात् सर्वत्र रागद्वेषरहितो भूत्वा वक्ष्यमाणोपासनं कुर्यादिति शमविधिमङ्गीकृत्याग्रे मनोमयत्वादिधर्मवैशिष्ट्यकथनात् तत्र जीवोपासनमेव विधीयत इति पूर्वपक्षमुत्थापयन्ति । तत् कुतो नाद्रियत इत्याशङ्क्याहुः । * नचायमित्यादि * । शमविधिमुपगच्छता, शान्त उपासीतेत्यस्य शमपूर्वकोपासनाविधानरूपे वाक्यार्थेऽङ्गीकृते, उक्तोपासनार्थं शमं सम्पादयेदिति वचनव्यक्तेः पदद्वयेऽपि लक्षणापत्त्या वाक्यार्थे लक्षणाप्रसङ्गात् । वक्ष्यमाणोपासनाया जीवात्मविषयत्वाङ्गीकारे च, शान्तो दान्त इत्यात्मदर्शनवाक्यादस्यामप्यात्मदर्शनसामान्येन शमस्यावाप्तसिद्धत्वाच्च विधिवैयर्थ्यापातः । क्रतुकरणस्याग्रे वक्ष्यमाणत्वेन तदनुवादाङ्गीकारोऽप्यसङ्गत इति चकारार्थः । तथाच नैवं पूर्वपक्ष उचित इत्यर्थः । तस्मादयमुपासनान्तरविधिरेवेत्याहुः । * अत इत्यादि * एतदुपष्टम्भायोपबृंहणमाहुः । * इदमित्यादि * तत्रोपासनं प्रकारभेदेन, पातालमेतस्य हि पादमूलमित्यादिनोक्तमतस्तदुपासनान्तरोपगम एव युक्त इत्यर्थः । एतद्विचारप्रयोजनमग्रे स्फुटिष्यति । प्रस्तुतमाहुः । * अत: परमित्यादि * कथं सन्देह इत्याकाङ्क्षायां तं बोधयितुं व्याकुर्वन्ति । *क्रतुरित्यादि* ननु द्रव्यदेवते यज्ञस्य स्वरूपभूते । ते चात्रानुक्ते इति कथं यज्ञत्वावगतिरित्यत आहुः । * तस्येत्यादि * तथाच द्रव्यादिरहितोऽयं ज्ञानयज्ञ इत्यर्थः ।

उपासनाप्रकरणत्वादुपासनैवैषा । तत्र मनोमय इति प्रपाणभूतो वेद उक्तः । प्राणशरीर इति कार्यकारणयोरभेदोपचारः । अग्रे सत्यसङ्कल्पादिधर्मवचनात् किमयं विज्ञानमयो जीवो ब्रह्मत्वेनोपास्य, उत ब्रह्मैवान्तर्यामी, यः पुराणेषु सूक्ष्म उक्तः ।

ननु यस्य भूयांसो यज्ञक्रतव इत्याहुरित्यादावङ्गोपाङ्गसहितहविस्त्यागरूपक्रियायाः क्रतुत्वेन प्रसिद्धत्वान्मानसस्यास्य कथं क्रतुत्वमित्यत आहुः । * उपासनेत्यादि * तथाच प्रकरणबलाद्रूढिमनादृत्य क्रियतेऽसौ क्रतुरिति योगं चादायोपासनाद्रियत इत्यस्यास्तथात्वमित्यर्थः । तर्हि कोऽत्र विषय इत्यतस्तं प्रकटयन्ति * तत्र मनोमय इत्यादि * वेदस्य मनोमयत्वं तु 'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः । मनोमयं सूक्ष्ममुपेत्यरूपं मात्रा स्वरो वर्ण इति स्थविष्ठ' इत्येकादशस्कन्धीयभगवद्वाक्यसन्दर्भे स्पष्टम् * कार्यकारणयोरिति * वेदप्राणयोः । नन्वेवमत्र वेदरूपस्य विषयस्य स्फुटत्वेन कथं वाक्यार्थे सन्देह उच्यत इत्यत आहुः । *अग्र इत्यादि* आदिपदेन, एष म आत्मेत्यादेर्वेदव्यावर्तकस्य जीवसङ्ग्राहकस्य धर्मस्य सङ्ग्रहः । * अयं विज्ञानमयो जीव इति * वेदवोधितत्वान्मनोमयः प्राणशरीरो, भारूपत्वेन विज्ञानमयो जीवः प्राणधारणप्रयत्नवान् ब्रह्मत्वेनोपास्यः, स म आत्मेति कथनाच्च ? उत सत्यसङ्कल्पादिपदोक्तधर्मवैशिष्ट्याद् ब्रह्म वा, यः पुराणेषु 'केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम' इत्यादौ सूक्ष्मो हृदयान्तर्वर्तित्वेनोक्त इति सन्देह इत्यर्थः । इह, तत्र मनोमय इत्यादिनोपासनविषयबोधनेनाधिकरणसङ्गतिरपि बोध्यते । पूर्वपादे जन्मादिसूत्रे ब्रह्मणः कर्तृत्वमुक्त्वा तल्लिङ्गाद्यधिकरणचतुष्टयेनातिव्याप्तिपरिहारे क्रियमाणेऽन्तिमेनानुगमाधिकरणेन जडविशिष्टे जीवेऽतिव्याप्तिनिवारणं कृतम । तदस्मिन्नधिकरणे कर्तृत्वनिर्वाहकाणां मनोमयत्वादिसर्वकर्मान्तानां धर्माणां जीवे बोधनेन ब्रह्मणि तदभावात् कर्तृत्वासम्भवं बोधयित्वा पूर्वपक्षे आक्षिप्यते । तेनाक्षेपः सङ्गतिः ।

तत्र पूर्ववाक्ये जडस्य जगतो ब्रह्मत्वेनोपासनस्योक्तत्वा-ज्जीवस्यापि ब्रह्मत्वेनोपासनमेव युक्तं, न त्वाहत्यैव ब्रह्मवाक्यं भवितुमर्हति । विज्ञानं ब्रह्म चेद्वेदेति शाखान्तरे स्पष्टत्वाच्च । तस्मात् कार्यकारणयोरभेदाज्जीव एव ब्रह्मत्वेनोपास्य इत्येवं प्राप्ते, उच्यते ।

सर्वत्र प्रसिद्धोपदेशात् ॥ अथ खल्वित्यादि ब्रह्मवाक्यमेव । कुतः । सर्वत्र प्रसिद्धोपदेशात् । कुर्वीतेत्युपदेशो, न तूपासना । तत्र परमशान्तस्य सर्वस्य जगतो ब्रह्मत्वेनोपासनया शुद्धान्तः-करणस्य सर्ववेदान्तप्रसिद्धब्रह्मोपदेश एव युक्तो मननरूपो, न तु काचित् सिद्धस्य जीवस्योपासना ।

पूर्वपक्षमाहुः । * तत्र पूर्वेत्यादि * । * आहत्येति * । अकस्मात् प्रबलहेतुं विनेति यावत् । तथाच द्वयोर्लिङ्गस्य सत्त्वेन तस्या-निर्णायकत्वादुपक्रमस्यासञ्जातविरोधत्वेन बलिष्ठत्वात् तत्र च जी-वस्यैवोक्तत्वात् पूर्ववाक्यविचारयोऽपि प्रकरणस्यैव नियामकतया औचित्याच्च नास्य ब्रह्मवाक्यत्वम् । किन्तु शाखान्तरोक्तविज्ञानमय-स्यात्र भारूपत्वेन प्रत्यभिज्ञानात् कार्ये सशरीरे जीवे कारणभूतस्य ब्रह्मण उपचारं विधाय सत्यसङ्कल्पादिधर्मवत्तया वेदाभिमानिदेव-ताजीवो वा, स्वजीव एव वोपास्य इत्यर्थः ।

सिद्धान्तं वक्तु सूत्रं पठन्ति ॥ सर्वत्र प्रसिद्धोपदेशात् ॥ कथ-मयमुपदेश इत्याकाङ्क्षायामाहुः । * तत्रेत्यादि * । तथाच, सर्वं खल्वि-ति पूर्ववाक्ये यज्जगतो ब्रह्मत्वेनोपासनं, तद्भगवत एव विराट्त्वेनो-पासनम् । तस्य काल्पनिकत्वाभावबोधनायैवात्र तज्जलानिति हेतू-क्तिः । तत्फलं चान्तःकरणशुद्धिः । ‘स सर्वधीवृत्त्यनुभूतसर्व आ-त्मा यथा स्वप्नजनेक्षितैकः । तं सत्यमानन्दनिधिं भजेत नान्यत्र स-ज्जेद्यत आत्मपात’ इति तद्विधायकवाक्ये तथा सिद्धत्वात् । एवं सति पूर्वोक्तोपासनाफलभाजा पुनः किं कार्यमित्यपेक्षायाम्, अथ खल्वि-

शाखान्तरे त्वग्रे आनन्दमयस्य वक्तव्यत्वात्तथा युक्तम् । न त्विह तथा । तस्मादानन्दरूपप्राणशरीररूपो वाक्यार्थः ॥१॥

त्यादिना पुरुषस्योपासनानुरूपफलभाक्त्वकथनेन विराट्त्वेनोपासनायामन्यत्र सङ्गाभावेऽप्यन्ते या मतिः सा गतिरिति न्यायेन, यं यं वापीति गीतावाक्येन चान्ते सर्वात्मकत्वमेव, न तु परप्राप्तिरिति तादृशा तदर्थमुपायान्तरं कर्तव्यमित्याशयेन तमाह । स क्रतुं कुर्वीतेति । स उक्तोपासनया शुद्धान्तःकरणोऽपि, यथा क्रतुरित्युक्तरीत्योपासनानुरूपमेव फलं प्राप्नोतीत्यतो मनोमयेत्युक्तप्रकारेण मननात्मकं क्रतुं कुर्वीतेति सर्वत्र वेदान्ते सर्वान्तरत्वेन प्रसिद्धस्य ब्रह्मण एव मननोपदेशस्तत्त्वेव भयमितिश्रुत्यन्तरे तस्यावश्यकत्वश्रावणाद्युक्त इति शाखान्तरसिद्धा जीवोपासना नाङ्गीकर्तुं शक्येत्यर्थ ।ननु यदि मयटो विकारार्थमनादृत्याऽत्र ब्रह्मवाक्यत्वमङ्गीक्रियते तर्हि शाखान्तरेऽपि तथा वक्तुं शक्यत्वाज्जीवोपासनाया उच्छेद एव स्यादित्यत आहुः । * शाखान्तर इत्यादि * तथाचैवं वैलक्षण्यस्य स्फुटत्वान्न तदुच्छेद इत्यर्थः । एवं वाक्यं व्याख्याय सिद्धमाहुः । * तस्मादित्यादि * यस्मादेतादृशस्य मननमेव युक्तम् । तच्चानपेक्षिताङ्गोद्वापेनापेक्षिताङ्गावापेन वाक्यार्थनिर्द्धारणे भवतीत्येतत्पूर्ववाक्यविचारे, एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानित्यादिश्रुतिभिर्जगज्जनकत्वस्य वेदे सत्त्वेऽप्यस्य महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेद इत्यादिश्रुत्या वेदस्य ब्रह्मजन्यत्वावधारणं निरङ्कुशस्य जगज्जनकत्वस्य वेदे अभावाद्, यो ब्रह्माणं विदधाति पूर्वं, हिरण्यगर्भं पश्यति जायमानमित्यादिभिर्हिरण्यगर्भेऽप्यभावादेतादृशजनकत्वस्योद्वापेन, निरङ्कुशस्य, यतो वेत्यादिश्रुत्युक्तस्य तस्यावापेन च ब्रह्मपदस्य परवाचकत्वे निर्द्धारिते तस्य वाक्यस्य परब्रह्मरूपो वाक्यार्थो मतो भवति । तथैतद्वाक्यमननेऽपि सत्यसङ्कल्पेत्यारभ्य यावन्ति विशेषणानि तेषां मनोविकारभूते वेदे हिरण्यगर्भे जीवान्तरे चासम्भवात् तद्विशिष्टे मनोमये मन्तव्ये, मनसैवानुद्रष्टव्यः, स मानसीन आत्मा जनानां, मनसा तु विशुद्धेनेत्यादिश्रुतिसिद्धतादृशमनोग्राह्यत्वेन मनःप्राचुर्या-

द्विकारोद्धापेन प्राचुर्यावापेन चानन्दमयरूपो मनोमयः, को ह्येवा-न्यात् कः प्राण्यादिति प्राणितृत्वश्रावणात् प्राणस्वरूपविग्रह इति मननादानन्दमयरूपो यः प्राणशरीररूपोऽन्तर्यामी सोऽत्र वाक्यार्थ इत्यर्थः । अत्र विषयवाक्ये, भारूप इति प्रकाशरूपो ज्ञानात्मा । सत्यसङ्कल्प इति, सत्या अवितथा विषयाऽव्यभिचारिणः सङ्कल्पा विचारा यस्य तादृशः । आकाशात्मेति, व्यापको दुर्ज्ञेयो नीरूपो नीलः सर्वाधारो नामरूपनिर्वाहकः । सर्वे कामा निर्दोषा यस्येति सर्वकामः । एवमग्रेऽपि । सर्वमिदं जगद् अभ्यात्तः, अभि अन्तर्बहिरुभयत्र गृहीतो ज्ञातः । अवाकी । उच्यतेऽनयेति वाक् । वागेव वाकः । करणे घञ् । स यस्य वर्ततेऽसौ वाकी । तद्भिन्नोऽवाकी । उपलक्षणमिदम् । कार्यं कुर्वन्नपि करणशून्यः । अपाणिपादो जवनो ग्रहीतेति श्रुत्यन्तरात् । अनादरः । न विद्यत आदरः सम्भ्रमो यस्य । आप्तकामत्वात् । सर्वानपेक्षः । अभिसम्भवितास्मीति प्राप्तास्मि । अद्धेति निश्चयः । एतादृशस्तं प्राप्नोतीति शेषः । स्फुटमन्यत् । ननु भवत्वयं विषयवाक्यार्थस्तथापि सूत्रे पक्षानुल्लेखात् कथं व्याख्यातोऽर्थः सौत्रत्वेन निश्चेतुं शक्यः । तदनिश्चये वाक्यार्थोऽपि सन्दिग्धप्राय एवेति चेन्नैवम् । द्वितीयादिपादानां पूर्वपादोक्तार्थविमर्शरूपत्वात् कारणत्वस्य तत्र विमृष्टत्वेऽप्यन्येषामविमृष्टत्वादत्रान्तस्तद्धर्मोपदेशाधिकरणसाधितस्यानन्दमयान्तरत्वस्य विमर्श इत्यविवादम् । आन्तं पादेऽन्तर्वर्तिन एव विचारदर्शनात् । सूत्रेऽप्युपदेशपदेन तदर्थविचारस्य प्रत्यभिज्ञानात् । विषयवाक्येऽप्येष म आत्माऽन्तर्हृदय इति पदात् । अतः सूत्रे पक्षानुक्तावपि प्रकरणबलेन तन्निर्णयस्य सुसाध्यत्वादिति । यः पुनरत्ता चराचरग्रहणादित्यादौ पक्षोल्लेखः, स तु तस्यैवात्तृत्वादिधर्मविचारार्थ इत्यदोषः ।

रामानुजाचार्यास्तु सूत्रारम्भगतेन सर्वत्रेतिपदेनारम्भगतसर्वपदघटिते वाक्ये विषयवाक्यत्वेन बोधिते तस्य शमविध्यपर्यवसितस्य फलाकाङ्क्षापूरणायाग्रिमसन्दर्भस्योपस्थित्या सूत्रगतपक्षाकाङ्क्षापूरणेनोक्तार्थस्य सौत्रत्वे सिद्धे वाक्यार्थनिश्चयस्य सुखेन सम्भवादिति वदन्ति ।

एवञ्च सूत्रगतन्यायचर्चा नैवं बोध्या । अथ खल्वित्यादिवाक्यमुपदेशः । परमशान्ताधिकारत्वात् । यदेवं तदेवम् । कं ब्रह्मेत्या-

ननु क्रतुमयः पुरुष इति यथासङ्कल्पमग्रिमदेहकथनाल्लोकान्तरभाविफलार्थमन्योपासनैव तु युक्ता, न तु ब्रह्मज्ञानस्य तादृशं फलं युक्तमित्याशङ्क्य परिहरति ।

दिवाक्यवत् । यन्नैवं तन्नैवम् । प्राणं तर्हि वागप्येतीत्यादिवाक्यवत् । उपदेशश्च परममहितानुशासनम् । तत इदं वाक्यं ब्रह्मवाक्यम् । सर्ववाक्यसमर्थितसर्ववेदान्तप्रसिद्धोपदेशात् । यदेवं तदेवं, यन्नैवं नैवमिति । सिद्धान्तरीत्या तु प्रकरणासमर्थितत्वेन हेतुर्विशेषणीय इति भेदः ।

किञ्च, सूत्रे प्रसिद्धपदेन, तदेजति तन्नैजतीत्यादिवाक्यप्रासिद्धत्वस्यापि स्मारणादेतद्वाक्यगताणीयस्त्वज्यायस्त्वाधारत्वेन प्रसिद्धत्वमपि सङ्गृह्यते । अतो वाक्यस्य स्पष्टलिङ्गत्वमपि बोध्यते । तेनात्र पादे अस्पष्टलिङ्गवाक्यचिन्ताङ्गीकारं प्रतिज्ञायैतस्यात्र विषयत्वेनोपन्यासोऽप्ययुक्त इत्यपि सूचितम् ॥ १ ॥

विवक्षितगुणोपपत्तेश्चेतिसूत्रमवतारयन्ति * नन्वित्यादि * । अयमर्थः । अत्र हि पूर्ववाक्ये ब्रह्मोपासनकथनेऽप्यथेतिप्रकृतच्छेदेनाग्रे उपासनान्तरमुच्यते । तथा क्रतुमय इत्यारभ्य, तथेतः प्रेत्य भवतीत्यन्तेन लोकान्तरे सङ्कल्पानुरूपदेहप्राप्तिरूपं फलमुच्यते । फलं च तात्पर्यनिर्णये लिङ्गम् । अतस्तद्विचारेऽत्रोक्तोपासनाया ब्रह्मविषयत्वं न घटते । फलस्य प्राकृततया जाघन्यात् । अतोऽत्र यथासङ्कल्पमग्रिमदेहकथनाल्लोकान्तरभाविनादृशदेहप्राप्त्यर्थं वेदाभिमानिदेवताया वा, क्रतुमय इत्यादिना साधकस्योपक्रान्तत्वात् स्वजीवस्यैव वोपासना युक्ता । इहापि भावनया पेशस्कृतो रूपान्तरस्य प्रत्यक्षसिद्धत्वेन श्रुत्युक्तपारलौकिकरूपान्तरस्य भावनाप्रचयजन्यतायां बाधानवतारात् । नचैवं सति ब्रह्मोपासनायामपि तथा वक्तुं शक्यत्वात् कुतस्तस्याग इति शङ्क्यम् । देहत्वस्य प्राकृतत्वव्याप्तत्वेन ब्रह्मज्ञानस्य च, तमेव विदित्वा अतिमृत्युमेति, ब्रह्मविदाप्नोति परमित्यादिषु ब्रह्माप्तिरूपस्यैव फलस्य श्रावणेन ब्रह्मज्ञाने तादृशफलकथनस्यायुक्तत्वादिति । तस्मादत्र मननोपदेशाङ्गीकारो न युक्त इत्याशङ्क्य परिहरतीति ।

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षिता लोकान्तरे तादृशरूपप्राप्तिः, सा प्रकृतेऽप्युपपद्यते। भगवत्स्वरूपलाभात् सारूप्यलाभाद्वा। नच व्याप्तिरुक्तेरधमप्राप्त्युपायो युक्तः।

सत्यसङ्कल्पादिवचनं च ब्रह्मवाक्यत्वपोषकमिति चकारार्थः ॥ २ ॥

सूत्रं पठित्वा तत् समाधातुं व्याकुर्वन्ति * विवक्षितेत्यादि * विवक्षिता वक्तुमिष्टा उपादेयत्वेनाभिप्रेता वा या गुणरूपा लोकान्तरे तादृशी सङ्कल्पानुरूपदेहप्राप्तिः सा ब्रह्मज्ञानपक्षेऽप्युपपद्यते। ज्ञानफलबोधिकासु श्रुतिषु मृत्युमतिक्रान्तस्य भगवत्स्वरूपस्य ब्राह्मदेहस्य परप्राप्तिरूपस्य वा, ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या ब्रह्मस्वरूपस्य वा लाभोऽभिप्रेत इति तस्य सङ्कल्पानुरूपताया युक्तत्वादिति। नच यथा क्रतुरित्यादिना लोकान्तरप्राप्यत्वेन सङ्कल्पानुरूपत्वेन व्याप्तिरुक्तेत्यतः, कुर्वीतेत्युपदेशबोधिनः क्रतुरधमस्य प्राकृतदेहस्य प्राप्त्युपायो युक्तः। परमशान्तस्य पूर्वोपासनया शुद्धान्तःकरणस्याशुद्धसङ्कल्पायोगात् तदभावे प्राकृतदेहस्याप्ययोगादित्यर्थः। हेत्वन्तरमाहुः। * सत्येत्यादि * तथाचैव हेतुद्वयबाधितत्वादस्य जीववाक्यत्वं न शङ्कितुं शक्यमित्यर्थः।

यत्तु कश्चिदपौरुषेयवेदे वक्तुरभावान्नेच्छार्थः सम्भवतीत्यत उपादेयत्वेन फलेन तत्र विवक्षितत्वमुपचर्यते। लोके तथा दर्शनात्। वेदेऽपि वाक्यतात्पर्यातात्पर्याभ्यामुपादेयत्वानुपादेयत्वयोरवगन्तुं शक्यत्वात् सूत्रे विवक्षितपदमौपचारिकमङ्गीकुर्वन्ति। तन्न रोचिष्णु। निःश्वसितश्रुत्यनुरोधेन वेदे जीवाजन्यत्वरूपस्यापौरुषेयत्वस्याश्रेयत्वेन सर्वथा वक्त्रभावस्यासङ्गतत्वात्। शास्त्रयोनित्वसूत्रे स्वयमेव वेदकर्तृत्वाङ्गीकारेण वदतो व्याघाताच्च। नच निःश्वसितस्य सार्वदिकत्वादबुद्धिपूर्वकत्वेन वक्तुरुपगमेऽपीच्छार्थासम्भवाददोष इति वाच्यम्। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनास इति श्रुतिविरोधेन तत्सार्वदिकत्वाङ्गीकारस्यैवासङ्गतत्वात्। एवं

नन्वेतावतापि नैकान्ततो ब्रह्मवाक्यत्वमुपपत्तेरुभयत्रापि तुल्यत्वादित्याशङ्क्य परिहरति ।

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

नच प्राणशरीररूपो जीवो भवति । तिरोहितानन्दत्वेन

सिद्धे निःश्वसितस्यासार्वेदिकत्वे तदुद्गमे इच्छापूर्वकत्वस्याप्यपर्यवस्यत्वात् । प्रपञ्चमात्रं प्रति, वहु स्यामितीच्छाया एव कारणत्वेन वेदात्मकनामप्रपञ्चं प्रत्यपि तस्या अदण्डवारितत्वात् । नच शब्दस्वरूपमात्रोद्गम एवेच्छासम्बन्धो, न तु तस्यार्थसाहित्येऽपीत्यदोष इति वाच्यम् । ईदृशविभागे मानाभावात् । नचैवं पौरुषेयत्वाङ्गीकारे काणादादितौल्यापातः । ईश्वरवाक्यत्वेनैव तन्निरासात् । नचैवं शब्दार्थसम्बन्धानित्यत्वप्रसङ्गः । शब्द इति चेदित्यस्मिन् सूत्रे तन्निरासप्रकारस्यापि वक्ष्यमाणत्वात् । अतो वेदे वक्तुरिच्छासम्बन्धस्य सत्त्वेन विवक्षितत्वादेः सत्त्वादुपचाराङ्गीकारो न युक्त इति दिक् ।

यत्तु पुनर्मनोमयः प्राणशरीर इत्यस्य सगुणविषयत्वम्, अप्राणो ह्यमनाः शुभ्र इत्यस्य निर्गुणब्रह्मविषयत्वमित्युक्तम् । तत्तु पूर्वपादार्थानुवादभाष्य एव दूषितमित्युपरम्यते ॥ २ ॥

अग्रिमसूत्रमवतारयन्ति । * नन्वेतावतेत्यादि * । * एतावतेति * सूत्रद्वयोक्तयोपपत्त्या । * तुल्यत्वादित्यादि* 'आत्मानं चेद्विजानीयादयमस्मीति पुरुषः । किमिच्छन् कस्य वा हेतोः शरीरमनुसंज्वरेद्' इत्यादौ ज्ञेयतया प्रसिद्धत्वेन जीवस्य मन्तव्यत्वोपदेशो, लोकान्तरे विवक्षितदेहप्राप्तिः । न वै क्वचिन्मे मनसो मृषा गतिरितिवाक्यात् सत्यसङ्कल्पत्वं, व्यापकत्वादाकाशात्मकत्वं, पर्यायेण सर्वाहंमानितया वा सर्वकर्मत्वादिकं हिरण्यगर्भे जीवे च सङ्गच्छत इति तस्य बाधाभावेन तुल्यत्वादित्याशङ्क्य परिहरतीत्यर्थः ।

अनुपपत्तेस्तु न शारीरः ॥ सूत्रं व्याकुर्वन्ति * नचेत्यादि * सत्यमस्त्वेवमुपपत्तिर्नीदृशं, तथापि शरीरसम्बन्धी जीवो वाक्यार्थो न सम्भवति । कुतः । अनुपपत्तेः । प्राणशरीरत्वस्यानुपपद्यमानत्वात् । तत्र हेतुः । * तिरोहितेत्यादि * प्राणशरीर इत्यत्र शरीरपदमाकार-

निराकारत्वात्। अध्यासेन तथात्वे त्वनुपास्यत्वमेव। इदानी-मेवोपासकस्यापि तथात्वात्। नच प्राणादेर्लौकिकत्वम्। उप-देशानर्थक्यप्रसङ्गात्। अत आनन्दरूपप्राणशरीररूपत्वाभावान्न वाक्यार्थो जीवः।

पूर्वपक्षस्यात्रैव निवृत्तत्वात् तुशब्दः। विज्ञानमये तु प्राप्ता-प्राप्तविवेकेन धर्मस्यैवोपासना॥ ३॥

परम्। तथाचात्र हि, मनोमय इत्यत्र यथा विकारार्थोद्वापेन प्राचु-र्यान्मनोमयत्वमुपदेशगोचरस्तथा प्राणशरीर इत्यत्रानन्दरूपप्राणश-रीररूपत्वम्। लौकिकप्राणस्योद्वापात्। प्राणस्यानन्दरूपता त्वनुग-माधिकरण एव सिद्धा। प्राणमुपक्रम्य, एष प्रज्ञात्मानन्दोऽजरोऽमृत इति तद्विषयवाक्यं श्रावणात्। नच लौकिकप्राणस्योद्वापे किं मान-मिति शङ्क्यम्। लौकिकस्य तस्य शरीरताया आध्यासिकत्वेनेदानी-मुपासकस्यापि प्राणशरीरत्वात् तथोपासनोपदेशे आनर्थक्यप्रसङ्ग-स्यैव मानत्वादिति। अतस्तदभावान्न वाक्यार्थो जीव इत्यर्थः। तु-शब्दं व्याकुर्वन्ति * पूर्वेत्यादि *। ननु कथं पूर्वपक्षस्यात्र निवृत्तिः। विज्ञानमानन्दं ब्रह्मेति श्रुत्युक्तस्य विज्ञानस्य, विज्ञानं यज्ञं तनुत इति विज्ञानमयनिगमनश्लोकेऽपि प्रत्यभिज्ञायमानत्वेनात्र पूर्ववाक्ये विरा-ट्त्वेन ब्रह्मोपासनवद्विज्ञानमयेऽपि विज्ञानत्वेन ब्रह्मोपासनत्वेन श-क्यवचनतया आनन्दपूर्वभावमात्रस्य जीवोपासनागमकताया अप्र-योजकत्वेन तत्रापि तदुपासनानवकाशात् तत्र तदङ्गीकारस्यासङ्ग-ततया पूर्वपक्षस्यानुपशमादित्यत आहुः। * विज्ञानमय इत्यादि * तत्र गौणान्तर्येण श्रद्धादिधर्मत्वेन च जीवत्वस्य प्राप्तत्वेन मुख्यान्तर्य-स्यानन्दरूपत्वस्य चाप्राप्तत्वेन किं ग्राह्यमिति विचारे प्राप्ताप्राप्तवि-वेकेनाप्राप्तापेक्षया प्राप्तस्यैव बलिष्ठत्वाद्धर्मस्य भगवति वृत्तिमतो जीवस्यैवोपासना युक्तेति सुखेन पूर्वपक्षोपशमात् तन्निवृत्तिरि-त्यर्थः॥ ३॥

ननु प्राप्यतादृशरूपफलाभिप्रायं भविष्यतीति परिहरति ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

एतमितः प्रेत्याभिसम्भवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य इत्यग्रे फलवाक्यम् । एतं प्राणशरीररूपं कर्मत्वेन ध्येयत्वेन प्राप्यत्वेन च व्यपदिशति । कर्तृत्वेन च शारीरं व्यपदिशति । नच भजनीयरूपाकथने तादृशं फलं सिद्ध्यतीति चकारार्थः ।

अग्रिमसूत्रमवतारयन्ति * नन्वित्यादि * यदि तत्र प्राप्ताप्राप्तविवेकेन जीवोपासना, तर्ह्यत्राप्यथ खलु क्रतुमयः पुरुष इत्यादिना जीवत्वस्यैव प्राप्तत्वाद् ब्रह्मत्वस्य चाप्राप्तत्वात्तद्विवेकेन जीवोपासनैव युक्ता । युक्तेस्तुल्यत्वात् । नचानन्दरूपप्राणशरीरनोक्तिविरोधः । तद्वचनं जीवप्राप्यतादृशरूपफलाभिप्रायं भविष्यतीत्यविरोधादित्याशङ्क्य परिहरतीत्यर्थः ।

कर्मकर्तृव्यपदेशाच्च ॥ इदं सूत्रं व्याकुर्वन्ति *एतमित्यादि* सत्यं प्राप्तं जीवत्वम् । परन्तु ध्यानकर्तृत्वेन, न तु तत्कर्मत्वेन । विषयस्तु ध्येयत्वेनैवाभिप्रेतः । अत्र चास्य क्रतोः को विषय इत्यस्मिन्नंश एव सन्देहात् तद्विचारे त्वेतमित्युपसंहारगते फलवाक्ये एतमितिपदेन पूर्वं प्राणशरीररूपतयोक्तं ध्येयमेव परामृश्य, अभिसम्भवितास्मीति वचनेन तमेव प्राप्यत्वेन व्यपदिशति, ध्यानादिकर्तृत्वेन च शारीरम् । अतः प्राप्ताप्राप्तविवेकन्यायस्यात्राप्रवृत्तिः । किञ्च, फलविचारेऽपि चेतनस्य फलस्य न पुरुषशेषत्वम् । चेतनस्य महत आशास्यस्य शेषितायाः वरणीयस्थले दर्शनात्, फलं पुरुषार्थत्वादिति पौर्वतन्त्रन्यायस्य स्वर्गादौ चरितार्थत्वादत्र च तद्वैपरीत्येनाप्रवृत्तेः । अत इदं ब्रह्मवाक्यमेवेत्यर्थः । सौत्रस्य चकारस्यार्थमाहुः । * नचेत्यादि * यथा क्रतुरित्यादिना भजनीयप्राप्ययोरैकरूप्यस्योक्तत्वात्, तादृशरूपस्याप्राप्तत्वे फलवाक्यस्याबोधकतैव प्रसज्ज्येतातस्तदपि

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देयं इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रह. खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचित.) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा। श्रीमदन्नंभट्टप्रणीता खण्डानि ६	६	०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० ५	५	
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता।	१	
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः।	१	
श्रीमदणुभाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम्। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य-व्याख्या समेतम्।	३	०

ब्रजभूषण दास और कम्पनी
चांदनीचौक के उत्तर नई सड़क बनारस

Act XXV. of 1867. (All Rights Reserved.

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 107.

श्रीमदणुभाष्यम् ।

श्रीश्रीवल्लभाचार्यविरचितम् ।

गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितभाष्य-
प्रकाशाख्यव्याख्यासमेतम् ।

श्रीमदाचार्यश्रीवल्लभाधीश्वरशुद्धाद्वैतसंप्रदायविदुषा
रत्नगोपालभट्टेन संशोधितम् ।

ANU BHÂSHYA,

ON BRAHMASÛTRA BY ŚRÎ VALLABHÂCHÂRYÂ,
With the Commentary called Bhâshya Prakâśa,
By Goswami Śri Purushottamjee Mahârâj.

EDITED BY RATNA GOPÂL BHATTA,

Fasciculus IV.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,
AND SOLD BY H. D GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press,
BENARES.

1905.

16

	०	४
	२	८
	०	१
	०	४
	०	१२
	०	१
	०	१
	०	८
	०	१
	०	२
	०	२
	५	०
	०	१
पाणिनीयशिक्षा भाष्यसहिता	०	२
प्रथम परीक्षा	०	२
प्रथमपुस्तक हिन्दी	०	१
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	८
मनोरमा शब्दरत्नसहिता (टाइप)	९	०
लघुकौमुदी टिप्पणीसहिता	०	४
लघुकौमुदीभाषाटीका	४	०
लक्षणावली	०	२
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०
वसिष्ठसिद्धान्तः	०	१
विष्णुसहस्रनाम	०	१
शब्दरूपावली	०	१
शृङ्गार सप्तशती	१	८
समासचक्रम्	०	१
समासचन्द्रिका	०	१
सरस्वतीकण्ठाभरणम्	३	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८
साङ्ख्यतत्त्वकौमुदी	०	६
सिद्धान्तकौमुदी	३	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	३	०
उपसर्गवृत्ति	०	१
क्षेत्रकौमुदी	०	६
क्षेत्रसंहित	२	०

अधिकरणसम्पूर्णत्वद्योतकश्च ॥ ४ ॥

शब्दविशेषात् ॥ ५ ॥

इदमाम्नायते। यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय इति । तत्र संशयः । हिरण्मयः पुरुषः किं जीव, उत ब्रह्मेति।उपक्रमवलीयस्त्वे जीव, उपसंहारवलीयस्त्वे ब्रह्मेति ।

प्राप्तत्वेनैवात्राऽन्तरुयमित्येष चकारार्थ इत्यर्थः। एवञ्चात्र जगदुत्पत्तिकर्तृत्वनिर्वाहकाणां सत्यसङ्कल्पादिधर्माणां ब्रह्मणि साधने तदसम्भवः परिहृतः। प्रयोजनान्तरमाहुः । * अधिकरणेत्यादि * एतेनैव पूर्वपक्षस्योपशान्तत्वात् तथेत्यर्थः । अन्ये त्वेतदधिकरणमष्टसूत्रमाहुः । तदप्येतेनैव दूषितम् ॥ ४ ॥ ॥ १ ॥

शब्दविशेषात् ॥ विषयवाक्योपन्यासमुखेनाधिकरणमवतारयन्ति । * इदमाम्नायत इत्यादि * । इदं वाक्यम् । केचन समानप्रकरणे वाजिनामित्याहुः । अन्ये तु समानप्रकरणे इत्येवाहुः । इदं च वाक्यं न बृहदारण्यकस्थम् । तत्र प्रकरणसामान्येऽप्येवं पाठदर्शनादिति । किन्तु वाजिशाखायामेवान्यत्र त्रिकं बोध्यम् । भास्कराचार्यादिभिस्तथा कथनात् । तेनात्र प्रसङ्गोऽधिकरणसङ्गतिः । नन्वत्र पक्षानुपन्यासात् कथमधिकरणान्तरत्वावगतिः । नच समानप्रकरणत्वेनैतदुक्तपक्षस्य स्मारणादिति वाच्यम् । तथा सति पूर्वशेषत्वावगत्याऽधिकरणभेदस्यासङ्गतत्वमित्याशङ्कायां संशयाकारमाहुः । *तत्र संशय इत्यादि * । तथाच तत्र मनोमयत्वादिविशिष्टः पक्षोऽत्र तु हिरण्मयत्वविशिष्ट इति पक्षभेदाद् भेद इत्यर्थः । नन्वेवं सति पूर्वपादोक्तान्तस्तद्धर्माधिकरणेनैव गतार्थत्वेनैतत्प्रणयनवैयर्थ्यापात इत्यत आहुः । * उपक्रमेत्यादि * तथाच तत्रोपक्रमस्य बलिष्ठत्वसाधनात् संशयनिरासः । प्रकृते तु तदभावादेतत्प्रणयनमतो न वैयर्थ्यमित्यर्थः । ननु प्रथमावगततयोपक्रमस्यासञ्जातविरोधत्वेन बली-

यत्रैकस्यान्यपरत्वेनैकार्थता सम्भवति तद्बलीयस्त्वमिति सिद्धं पूर्वतन्त्रे । तत्र चतुर्विधभूतनिरूपणार्थं जीवस्यैवाराग्रमात्रस्यान्तर्हृदये प्रतिपादकमिदं वचनं, फलतो हिरण्मयत्वमिति, न त्वेतादृशाभाससमानत्वं ब्रह्मणो युक्तमतो जीवप्रतिपादकमेवेदं वाक्यमिति प्राप्ते, उच्यते ।

शब्दविशेषात् ।

यस्त्वस्यात्रापि तौल्याद् वैयर्थ्यं कथं नेत्यत आहुः । * यत्रेत्यादि * । न हि प्रथमावगततामात्रं बलीयस्त्वे तन्त्रम् । किन्तु यत्रोपक्रमादावेकस्यान्यपरत्वेन वाक्यस्यैकार्थता सम्भवति, विप्रतिपत्तिनिरासेन वाक्यभेदो न भवति तस्य बलीयस्त्वमिति पूर्वतन्त्रे सिद्धम् । तदैकशास्त्र्यादत्राप्युपादेयमतोऽत्र यस्य बलीयस्त्वं तदुपपादनाय प्रणयनमतो न वैयर्थ्यम् । तथाच तत्समानप्रकरणाभावेन तत्रास्मरणात्र ततास्य प्रणयनम् । प्रकृते तु स्मरणेऽपि पक्षभेदोपस्थित्या पूर्वत्र निवेशासम्भवेनाधिकरणान्तरत्वाङ्गीकार इत्यर्थः । एवमधिकरणान्तरत्वं प्रसाध्य पूर्वपक्षमाहुः । * तत्रेत्यादि * । जरायुजस्वेदजाण्डजोद्भिज्जभेदेन चतुर्विधानि यानि भूतानि जीवदेहाः । न हिंस्यात् सर्वा भूतानीत्यादौ तथा सिद्धत्वात् । तेषां निरूपणार्थम् । छान्दोग्ये, त्रीण्येव तेषां बीजानीति श्रावणादत्र चतुर्थस्याधिकस्य कथनार्थमाराग्रमात्रस्य जीवस्यान्तर्हृदये व्रीह्यादिभिश्चतुर्भिर्दृष्टान्तैरौपाधिकस्य परिमाणस्य प्रतिपादकमिदं वचनमिति दृष्टान्तबलादवसीयते । आराग्रश्रुतावङ्गुष्ठमात्रपरिमाणस्य बुद्धिगुणेनोक्तत्वात् । नच हिरण्मयत्वविरोधः । पूर्वाधिकरणसिद्धेन तत्क्रतुन्यायेनोपासनायां फलतो हिरण्मयत्वमिति वक्तुं शक्यत्वात् । नच तथा ब्रह्मोपासनाङ्गीकारेऽपि बाधकाभावेनोपपत्तितौल्यात् संशय एव पर्यवसानं शङ्क्यम् । तुः शङ्कानिरासे । तादृशो व्रीहियवादिरूपो य आभासो जीवेन स्वात्मतयाऽध्यस्यमानं शरीरं तत्समानत्वं ब्रह्मणो न युक्तम् । निरवद्यत्वात् । अतः साधकबाधकयुक्तिसत्त्वया संशयनिरासाज्जीवप्रतिपादकमेवेदं वाक्यमिति पूर्वः पक्ष इत्यर्थः ।

हिरण्मयः पुरुषो न जीवस्य फलमपि, तत्प्राप्तेरेव फलत्वात् । नाप्ययं नियमस्तस्यामेव मूर्तौ लय इति ।

अतः शब्देनैव विशेषस्योक्तत्वान्न हिरण्मयः पुरुषो जीवः॥५॥

अत्र समादधते * हिरण्मय इत्यादि * । हिरण्मयस्यानन्दमयत्वं तद्धर्माधिकरणे सिद्धम् । आनन्दमयाधिकरणे च तत्प्राप्तेरेव फलत्वमतो जीवस्य फलमपि हिरण्मयो न भवतीति तद्विरोधाज्जीववाक्यत्वं न शङ्कितुं शक्यमित्यर्थः । ननु पूर्वाधिकरणे तत्क्रतुन्यायस्य सिद्धत्वात् तथोपासने स्वरूपसारूप्यान्यतरलाभेन भाष्येऽप्यङ्गीकाराच्च कथं न तस्य फलत्वमित्यत आहुः * नापीत्यादि * । तैत्तिरीये, आदित्यो वा एष एतन्मण्डलं तपतीत्याद्यनुवाकद्वयमध्ये पूर्वस्मिन् हिरण्मयं पुरुषं प्रस्तुत्य, द्वितीये चादित्यो वै तेज ओजो बलमित्यादिना तद्विभूतिभूता देवताश्चोक्त्वाऽन्ते वदति । ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषदिति । तथाच यदि तत्क्रतुन्यायो नियतः स्याद्धिरण्मयस्य फलत्वं युज्येतापि । न तु तथा । नचैतद्विरोधः शङ्क्यः । यथा क्रतुरित्यत्र पुरुषविशेषणस्याधिकारस्यापि प्रकारांशे निवेशे तदभावात् । अन्यथोक्तश्रुतिविरोधस्य दुष्परिहरत्वात् । एवं सिद्धे तन्मूर्तौ लयानियमे हिरण्मयस्य फलताया अपि प्रायिकत्वेन तद्विरोधो दुर्वार इत्युपक्रमस्य पदवैयर्थ्यापादकतयैकार्थताविघटकत्वेन निर्बलत्वान्न तदनुरोधादस्य जीववाक्यत्वमित्यर्थः । एवं सिद्धान्तमभिधाय तस्य सौत्रत्वं प्रकटयन्ति * अत इत्यादि * । शब्दोक्तो विशेषः शब्दविशेषस्तस्मात् । उक्तरीत्या हिरण्मयशब्देनैवाधिकारविशेषमादाय तत्र लयानियमस्य सूचितत्वात् तथेत्यर्थः । एवञ्चाराग्राणुत्वबोधकैर्व्रीह्यादिदृष्टान्तैरन्तरात्मनि वर्तमानस्य जीवत्वं प्रतीयत इति युक्त्या पूर्वाधिकरणसङ्गतिमाक्षिप्योपसंहारबलीयस्त्वेन तन्निवार्य पूर्वोक्तं दृढीक्रियत इतीदं पूर्वाधिकरणस्यैव शेषः ॥ ५ ॥

ननु हृदये विद्यमानत्वादभिमान्येव जीवो युक्त इति चेत्, तत्राह ।

स्मृतेश्च ॥ ६ ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति । ननु सर्ववेदानां यन्निःश्वासत्वं तस्य भगवतो वाक्यं कथं स्मृतिरिति । उच्यते । तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः केवलोपनिषद्वेद्यं ब्रह्म, न प्रमाणान्तरवेद्यम् । ततश्चार्जुनस्य शिष्यरूपेण प्रपन्नस्य पुष्टिभक्तत्वाभावाद् भगवद्वाक्ये निर्विचिकित्सविश्वासाभावाद् रथित्वेनैव स्थाप्यत्वान्न तादृशाय तादृशदेशकालयोरुपनिषदामवक्तव्यत्वाद् गुरुरूपतादृशरूपं निःश्वसितवेदोद्गमजनकं स्मृत्वा तदर्थमपि स्मृत्वा भगवान् पुरुषोत्तमो वाक्यान्युक्तवान् स्मृतिरूपाणि ।

स्मृतेश्च ॥ इदं सूत्रमवतारयन्ति । * ननु हृदय इत्यादि । तथाच श्रुतेः सन्दिग्धत्वेऽपि लिङ्गाज्जीववाक्यत्वं युक्तमित्यर्थः । * अभिमान्येव जीव इति * अभिमानी जीव एवेति योजना । रामानुजादयो भगवन्तं श्रीकृष्णं पुरुषोत्तमत्वेन परब्रह्मत्वेन वदन्तो गीतावाक्यान्येवात्र स्मृतित्वेनोदाहरन्तोऽप्येतत्स्वरूपं न विचारितवन्त इति तत्स्वरूपं तदुपन्यासादिप्रयोजनं च निर्णेतुं विषयवाक्यस्य स्मृतित्वं व्युत्पादयन्ति । * ननु सर्वेत्यादि * । * शिष्यरूपेणेति * शिक्षणीयरूपेण । शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नमिति वाक्यात् । * निर्विचिकित्सविश्वासाभावादिति * अपरं भवतो जन्मेत्यादिरूपात् संशयबोधकवाक्यात् तथेत्यर्थः । * रथित्वेनेत्यादि * । अग्रिमकार्यकारणार्थं साहङ्कारतया आवश्यकत्वाद्रथित्वेनैव स्थाप्यत्वान्न तादृशाय * साहङ्काराय । * तादृशदेशकालयोरिति * दारुणे देशे काले चेत्यर्थः । * गुरुरूपतादृशरूपमिति * यो वै वेदांश्च प्रहिणोति तस्मा इत्यादिश्रुत्युक्तं गुरुरूपं यन्मर्यादाप्रतिपादकरूपम् । अत्रायमर्थः । ब्रह्मण औपनिषदस्यैवात्र विचारप्रस्तावादुपनिषदामेव चि-

ततो ब्रह्मविचारे तान्यप्युदाहृत्य चिन्त्यन्ते। पुनश्च भगवाँस्तदधिकारेण ब्रह्मविद्यां निरूप्य स्वकृपालुतया, सर्वगुह्यतममित्यादिना भक्तिप्रपत्ती एवोक्तवान्। अतोऽङ्गत्वेन पूर्वं सर्वानिर्णया उक्ता इत्यध्यवसेयम्। तथैवार्जुनविज्ञानात्, करिष्ये वचनं तवेति।

न्तनीयत्वेनास्मिन् विचारे निश्चायनाय स्मृतेर्हेतुत्वेनोपन्यासस्यायुक्तत्वेऽपि वेदस्य परोक्षवादत्वेन सूरिमोहजनकत्वात्तादृशस्यापि योऽर्थेबाधः सोऽधिकारविशेषदेशकालविशेषसापेक्ष एवेति तदभावान्मन्दमध्यमाद्यर्थं तदुपबृंहणभूतेतिहासपुराणोपन्यास आवश्यकः। तत्रापि, वेदान्तकृद् वेदविदेव चाहम्, इत्यस्या हृदयं लोके नान्यो मद्वेदकश्चनेति वाक्यादृष्यन्तरवाक्यापेक्षया भगवद्वाक्योपन्यास एवावश्यकः। तेषु चोक्तरीत्याऽधिकारिदेशकालानां जाघन्यदर्शनेन भवति वैयधिकरण्यशङ्केति तत्परिहारेणोभयसामञ्जस्याय वाक्यानां स्वरूपमवश्यं विचारणीयम्। तत्र वक्तुरभेदे स्मृतित्वस्यासङ्गतत्वाद् वक्तर्येव कश्चिदवस्थाभेदो वा रूपभेदो वा तदर्थं वक्तव्यः। तत्रानन्तरूपमिति श्रुत्या रूपभेदस्य शीघ्रं बुद्धावारोहान्मर्यादाप्रतिपादकं वेदवक्त्रक्षरात्मकं रूपं वेदार्थं तत्तात्पर्यं च स्मृत्वा तत उत्तमोऽपि भगवाँस्तादृशवाक्यान्युक्तवानतः स्मृतिरूपत्वं तेषामुपपन्नमिति। एवं स्वरूपं विचार्योपन्यासप्रयोजनमाहुः। * तत इत्यादि *। वेदान्तार्थनिश्चायकत्वात् तद्विचारोऽपि युक्त एवेति तान्यपि चिन्त्यन्त इत्यर्थः। नन्वेकार्थत्वं सामानाधिकरण्यप्रयोजकम्। तदिवह न दृश्यते। वेदे मुख्यतया ज्ञानविज्ञानयोरत्र च तथा भक्तिप्रपत्त्योः प्रतिपादनेनार्थभेदादित्यत आहुः। * पुनरित्यादि *। * तदधिकारेणेति * भक्तिघटितेनाधिकारेण। तथाचाधिकारभेदस्य वेदेऽपि सिद्धत्वाद् वेदोऽपीदमेव द्वयं तादृशाधिकार्यर्थं निरूपयति। अत एव ब्रह्मवाक्येषु सृष्ट्यादिकर्तृत्वमात्मत्वं चैकस्मिन्नेव प्रकरणे सङ्गाति। शरणमहं प्रपद्य इत्यादौ प्रपत्तिं च श्रावयतीति तस्याप्यत्रैव तात्पर्यात्सामानाधिकरण्यमिति पूर्वोक्तदोषाभावात् तच्चिन्तनम-

चकारात् तन्मूलभूतनिःश्वासोऽप्युच्यते । व्यासस्यापि भगवज्ज्ञानांशत्वाददोषः ॥ ६ ॥

उपक्रमबलीयस्त्वमाशङ्क्य परिहरति ।

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

ननु व्यापकस्येश्वरस्य हृदयदेशस्थितिरयुक्ता, व्रीह्यादिरूपत्वं च । अतोऽर्भकमल्पकमोको हृदयस्थानं यस्य तत्त्वाद् व्रीह्यादितुल्यत्वाच्च न परमात्मा वाक्यार्थ इति चेन्न । निचाय्यत्वात् । पूर्वं प्रथमदूषणं परिहरति । हृदये ज्ञातुं शक्यत इति तदायतनत्वेन प्रतिपाद्यते ।

प्यावश्यकमेवेत्यर्थः । एतस्यार्थस्य सौत्रत्वायाहुः । * चकारादित्यादि * । ननु भवत्वेवं, तथापि क्वचित् क्वचिद् व्यासचरणैः पुराणवाक्यान्यप्युदाहृत्य चिन्त्यन्ते । तत्र को हेतुरित्याकाङ्क्षायामाहुः । * व्यासस्यापीत्यादि * । बुद्धादिवारणाय, * ज्ञानांशत्वादिति * । तथाचोक्तस्मृत्या हृदयस्य भगवदाधारत्वेन निर्णीतत्वान्न तद्बलेन ब्रह्मवाक्यत्वपर्यवसानं युज्यत इत्यर्थः ॥ ६ ॥

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ इदं सूत्रमवतारयन्ति * उपक्रमेत्यादि * असञ्जातविरोधत्वेन तथाऽऽशङ्क्येत्यर्थः । सूत्रं व्याकुर्वन्त आशङ्कांशं व्युत्पादयन्ति * नन्वित्यादि * । तथाचेश्वरधर्मविरुद्धस्य जीवधर्मस्य बोधनात् स्मृतिरयोग्यतादोषदुष्टेति न सा निर्णायिकेत्यर्थः । समाधानांशं व्याकुर्वन्ति * पूर्वमित्यादि । * तदिति * हृदयम् । तथाच वृत्तिलाभस्थानत्वादायतनत्वव्यपदेशः । अत्रान्ये दृष्टान्तमपि वदन्ति । यथा, सर्वलोकपतिरप्ययोध्यापतिरिति । कथं वृत्तिलाभ-

निदिध्यासनानन्तरं हि साक्षात्कारस्तदन्तःकरण एवेति निचाय्यत्वम्। भक्तौ तु बहिरपीति विशेषः। द्वितीयं परिहरति। एवं व्योमवत्। एवं व्रीह्यादितुल्यतया यत्प्रतिपादनं चतुर्विधभूतान्तरत्वख्यापनाय। यथा चत्वार उपरवाः प्रादेशमात्रा इति तथा तद्धृदयाकाशे प्रकटस्य सच्चिदानन्दस्वरूपसर्वतःपाणिपादान्तस्य तत्स्वरूपमिति।

पूर्वपक्षसिद्धान्तयोश्चकारद्वयमेतादृशवाक्यान्तरे पूर्वपक्षासि-

---

स्थानत्वमित्यत आहुः * निदिध्यासनेत्यादि *। * हि हेतौ। * तदन्तःकरण इति * जीवान्तःकरणे। तथाच मनसैवानुद्रष्टव्य इतिश्रुतेस्तत्रैव निचाय्यत्वमिति तस्य प्रशंसया स्थानत्वव्यपदेशोऽतो न स्मृतेरयोग्यतादोषघटितत्वमित्यर्थः। ननु यदि हृदयमेव भृत्तिलाभस्थानं, नेतरत् तदा तस्य व्यापकतापि दुर्घटा। प्रत्यक्षापेक्षया शब्दस्य दुर्बलत्वादित्यत आहुः। * भक्तौ त्वित्यादि * तथाच साधनविशेषेण बहिरपि निचायनाम्न शब्दस्य नैर्बल्यमित्यर्थः। * द्वितीयं परिहरतीति * ननु मास्तु स्थानविरोधस्तथापि परिमाणविरोधस्तु स्यादेवेत्यतो द्वितीयं परिमाणविरोधरूपं दूषणं परिहरतीत्यर्थः। व्योमवदिति दृष्टान्तं विवृण्वन्ति। * यथेत्यादि *। उपरवा नाम हविर्धाने खाता बिलविशेषाश्चत्वारः। दक्षिणस्य हविर्धानस्याधस्तात् पुरोऽक्षं चतुर उपरवानन्तरदेशेषु प्रादेशान्तरालान् करोतीति कल्पे विहिताः। तैर्बिलैर्यथाकाशस्य प्रादेशमात्रं स्वरूपमभिव्यक्तीक्रियते, किमत्र भद्रमित्यादिमन्त्रैरध्वर्युयजमानयोः परस्परहस्तग्रहणाय। तथात्र व्रीह्यादितुल्यतया प्रतिपादनं चतुर्विधभूतहृदयाकाशे प्रकटस्योक्तविधस्य ब्रह्मण एव तत्स्वरूपमिति बोधनाय। तैत्तिरीये, अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तमित्येकस्यैव नानापरिमाणश्रावणात्। तथाच न परिमाणविरोधोऽपीत्यर्थः। एवं समाधानांशं व्याकृत्य चकारप्रयोजनमाहुः। * पूर्वपक्षेत्यादि * तथाचाधिक्यं

द्धान्तयोराधिभयोपपत्तिसमुच्चयार्थम् । तेन, अत एव प्राण इतिवदधिकरणान्तरमपि सूचितमिति ॥ ७ ॥

पूर्वाधिकरणापेक्षया वैलक्षण्यं, तत्र या उपपत्तिस्तयोरनुक्तयोः स्फोरणार्थमित्यर्थः । तत्सूचितमर्थमाहुः । * तेनेत्यादि * तत्रेदमुदाहियते । तैत्तिरीये महानारायणोपनिषद्याम्नायते । आदित्यो वा एष एतन्मण्डलं तपति । तत्र ता ऋचस्तदृचां मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन् मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुष इति । अत्र संशयः । हिरण्मयः पुरुषः किं जीवो ब्रह्म वेति । तद्बीजं तु विधेयत्वानिर्देशः । तत्रादित्यो वेत्युपक्रम आदित्यस्य मण्डलतापकत्वमुक्त्वोपसंहारे तत्तापकत्वं त्रय्यामुपसंहृतम । तेनादित्यस्त्रयीशरीरः सिद्धः । शरीरस्य चान्तस्तदभिमान्येव युक्तः । मण्डलस्य हृदयाद्यपेक्षया महत्त्वेऽपि परममहत्परिमाणापेक्षयाल्पत्वेन तत्र जीवस्यैव मानात् । पुरुषपदेन पूर्वोक्तार्चिर्गतयजुःपुरुषस्यैव व्यपदेशाच्च । नच हिरण्मयत्वविरोधः । तस्योपासनाफलत्वायानुवादात् । नचात्रोपासनाबोधकपदाभावान्नैवमिति शङ्क्यम् । अत्रापेक्षितगुणान्तरबोधके, आदित्यो वै तेज ओज इत्यव्यवहितोत्तरानुवाके, य एवं वेदेत्युपसंहारेण तस्या उक्तत्वात् । अतो नेदं ब्रह्मवाक्यमिति सूत्रांशेनाशङ्क्यांशान्तरेण सिद्धमतमाह । न, निचाय्येत्यादि । यथा हृदये निचाय्य एवमादित्येऽपि । स यश्चायं पुरुषे यश्चासावादित्ये स एक इति श्रुत्यन्तरात् । नच तत्र जीवो वक्तुं शक्यः । तदग्रे, स य एवंविदित्यादिना विद्वो जीवस्य वेद्याद् भेदेन निर्देशात् । 'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः । एकस्तद्वेद भगवानादित्यो ज्योतिषां पतिरिति' स्मृतेश्च । एवं त्रय्यामपि, सर्वे वेदा यत् पदमामनन्तीति श्रुत्या तदर्थत्वादिति । ननु पुरुषत्वेन व्यपदेशाज्जीवत्वं तस्येति चेत्तत्राह । व्योमवदिति । यथोपरवांबिलेषु प्रादेशमात्रत्वं व्योम्नोऽभिव्यज्यते, तथात्र

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

बाधकमाशङ्क्य परिहरति । यदि सर्वेषां हृदये भगवाञ्जीववन्न् तिष्ठेत् तदा जीवस्येव तस्यापि सुखदुःखसाक्षात्कारस्तत्साधनादिपरिग्रहश्च प्राप्नोतीति चेन्न । वैशेष्यात् । विशेषस्य भावो वैशेष्यं तस्मात् । सर्वरूपत्वमानन्दरूपत्वं स्वकर्तृत्वं विशेषः । तद्भावो ब्रह्मणि वर्तते, न जीवे इति जीवस्यैव भोगो, न ब्रह्मण इति । वैशेष्यपदादयमर्थः सूचितः । अपेक्षित एव भोगो, नानपेक्षित इति । न तु तस्य भोगाभाव एव । अग्निमाधिकरणाविरोधात् । यथेन्द्रियाधिष्ठातृदेवतानाम् । तत्त्वमस्यादिवाक्येन जीवस्यापि तथात्वे तस्यापि तद्वदेव भविष्यति ॥ ८ ॥

पुरुषरूपं तथेति न दोषः । ततश्चान्तरादित्ये यः पुरुषो यश्च पुरुषेणाभिव्यज्यते स हिरण्मय इत्येवं विधेयनिर्देशस्याप्युपपन्नत्वात् स ब्रह्मैवेत्यर्थ इति ॥ ७ ॥

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ * बाधकमिति * सम्यग् अभिनिवेशेन भोगः सम्भोगः, सम्यग्भोगो यस्मादिति वा सम्भोगः । तयोः प्राप्तिर्जीवतौल्यमापादयतीति तदाशङ्क्य परिहरतीत्यर्थः । बहुव्रीहिमङ्गीकृत्याहुः । * तत्साधनादिपरिग्रहश्चेति * । * अग्निमाधिकरणविरोधादिति * अग्निमाधिकरणविषयवाक्येषु भोगप्रतिपादनात् तदनङ्गीकारे तद्विरोधादित्यर्थः । अपेक्षित एवेत्यादिनियमे दृष्टान्तमुखेन मानमाहुः । * यथेत्यादि * । तथाचानुमानमेव मानमिति भोगप्राप्तावपि न जीवतौल्यापत्तिरित्यर्थः । नन्वेवं सति जीवस्य कुत उभयभोग इत्यत आहुः । *तत्त्वमसीत्यादि* तथाच ब्रह्मभावाभावेन कामकर्मादिवशगत्वाद् बन्धदशायां तथेत्यर्थः । तथाच तद्भावायैव साधनानां विधानमिति भावः । तदेतत्प्रासङ्गिकमुक्तम् ।

अन्यच्च पूर्वाधिकरणेऽन्तर्हृदयवर्तमानस्यान्तर्यामित्वे निश्चायितेऽपि पुनरस्मिन्नधिकरणे यथात्वप्रतिपादनं तत्तदाकारनिश्चायनार्थम् । यथा कौण्डपायिनां सत्रे, मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्देन नित्याग्निहोत्रधर्मा अतिदिश्यन्ते । तथा, हिरण्मयः पुरुष

इति शब्दाभ्यामन्तस्तद्धर्माधिकरणविषयवाक्योक्तहिरण्मयपुरुषाकारान्निर्देशार्थमिदमधिकरणमिति मम प्रतिभाति ।

यदत्र शैवः, प्रसिद्धोपदेशाधिकरणं द्विसूत्रमङ्गीकृत्य अविनाभावरूपाद्वैतोपगमेन विशिष्टाद्वैतवादं चानुसृत्य, सर्वं खल्विदं ब्रह्मेति वाक्योक्तोपासनायां ब्रह्मणः सर्वात्मकत्वोपपादनायाऽथर्वशिरोवाक्यान्यहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादीन्युदाहृत्य ब्रह्माहमित्यादिना विश्वरूपत्वमात्मनः प्रपञ्चयित्वा विश्वरूपत्वे सोऽन्तरादन्तरं प्राविशदित्यनुप्रवेशमेव हेतुत्वेनाह । तदसङ्गतम् । एको ह वै नारायण आसीन्न ब्रह्मा न ईशान इति महोपनिषदि सृष्टिप्राक्काले ईशानसत्तानिषेधेनाऽत्रत्यासिवर्ततिभवतीनां सत्तार्थकत्वस्य वक्तुमशक्यतया, यस्याहं हृदयादासं स ईशो विदधातु मे, ततो युद्धमवर्तत, नन्दपत्न्यां भविष्यसीत्यादिवज्जननार्थस्यैव ग्राह्यत्वेन प्रतिकल्पं प्रथमोत्पत्तिबोधकतया, नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यस्यापि, नासीद्वर्तते भविष्यति चेति पुरुषविपरिणामेन तास्वेव क्रियास्वन्वयस्य युक्तत्वेन रुद्राविनाभावरूपाद्वैतबोधकताया वक्तुमशक्यत्वात् । नच, सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्मेत्यग्रिमसन्दर्भे विश्वरूपत्वस्य स्वस्मिन् प्रपञ्चनात् तत्सिद्धिरिति वाच्यम् । महोपनिषदुक्तनिषेधेन सिद्धे तस्याब्रह्मत्वे वामदेववच्छास्त्रदृष्ट्या ब्रह्मदृष्ट्या वाहम्पदप्रयोगाद्रुद्ररूपेणाविनाभावस्यासिद्धेः । नापि, सोऽन्तरादन्तरं प्राविशदिति प्रवेशोक्त्या तत्सिद्धिः शङ्क्या । स प्रसिद्धः परमात्मा अन्तरादन्तरं दहरपुण्डरीकं प्राविशदनस्तदभेददृष्टित्वात् तथेत्यर्थात् । अन्यथा प्रथमपुरुषादिप्रयोगविरोधापत्तेरिति । किञ्चाविनाभावरूपाद्वैतोपगमस्य चिदचिदीश्वरभेदसिद्धिसापेक्षत्वेन, सदेव सोम्येदमग्र आसीदिति श्रुतिविरुद्धत्वस्य प्रागेवोपपादितत्वेन तदादरस्याप्यसङ्गतत्वमेवेति दिक् ।

यदप्यनुपपत्तेस्तु न शारीर इत्यादिकं षट्सूत्रमधिकरणान्तरमङ्गीकृत्य बृहन्नारायणोपनिषदो महोपनिषदिति नामान्तरं चाभिधाय, तत्रत्ये 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेयम्' इत्यादिवाक्ये, किं परमेश्वरमूर्त्यात्मा तद्विभूतिर्नारायणो विश्वपतित्वादिलक्षणकतया प्रतिपाद्यते? किं वा परमेश्वरः शिव? इति

सन्दिह्य सहस्रशीर्षं देवमित्यारभ्य सहस्रशीर्षादिविशिष्टत्वेन नारायणस्यैवोद्दिष्टतया अभ्यासात्, समुद्रेऽन्तमिति समुद्रशायित्वरूपतल्लिङ्गात् तद्वाचकाच्युतहर्यादिशब्दप्रयोगाच्च नारायण एव विश्वपतित्वादिलक्षणकत्वेन प्रतिपाद्यत इति पूर्वपक्षमभिधाय सिद्धान्तमाह । अत्र नारायणान्तर्यामी परमेश्वर एव प्रतिपाद्यते । कुतः । विश्वपतित्वादीनां परमेश्वरधर्माणां पदार्थान्तरे नारायणेऽनुपपत्तेः । पशूनां पतये वृक्षाणां पतये जगतां पतये नम इत्यादिना शिव एव परमेश्वरे निखिलभुवनाधिपत्यमभ्यस्यते । एको रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशिनीभिरिति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते । विश्वाधिको रुद्रो महर्षिरिति विश्वाधिकत्वं तस्यैव श्रूयते । अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर एवेति । अग्रिमसूत्रे च पद्मकोशप्रतीकाशमित्यादिना नारायणहृदयमेवोच्यत इत्यङ्गीकृत्य शिवनारायणयोर्ध्येयध्यातृभावमाह ॥ शब्दविशेषसूत्रे च, नारायणपरं ब्रह्मेति मन्त्रे नारायणात् परमिति समासमङ्गीचकार ॥ स्मृतेश्चेति सूत्रे, 'एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरम्' इति गीतावाक्यम, 'अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मादिष्टतमः कृष्णादन्यो मम न विद्यत' इति भारतीयमश्वत्थामानं प्रति शिववचनं च स्मृतित्वेनोदाजहार । तत्सर्वमसङ्गतमेव । द्वापरादिस्थलोकव्यामोहनाय पाद्मवाराहादिप्रसिद्धस्य, त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदेत्यादिवरदानस्य यथावत्पदेनात्र बोधनात् कृष्णाराध्यत्वेऽपि शिवस्य परब्रह्मत्वासिद्ध्या, गीतोक्तरूपस्याप्यनुगीतोत्तरमुत्तङ्कोपाख्याने 'ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः । शाश्वतं वैष्णवं धीमान् ददृशे यद्धनञ्जय' इत्यारभ्य, 'तद् दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम् । विस्मयं च ययौ विप्रस्तद् दृष्ट्वा रूपमैश्वरम्' इति पूर्वमर्जुनेनेदानीमुत्तङ्केन च दृष्टस्य रूपस्य वैशम्पायनेन कण्ठत एव वैष्णवत्वप्रतिपादनादुत्तङ्केनापि, विश्वकर्मन्नमस्तेऽस्तु यस्य ते रूपमीदृशमिति निगमनाच्चोपपादनमन्तरेणैव वैष्णवत्वसिद्ध्याऽनुगीतायामपि विष्णोरेवेश्वरत्वसिद्ध्या शैवमतानुपष्टम्भकत्वात् । नारायणपरं ब्रह्मेत्यस्यापि प्रथमाप्रायपाठपतितत्वेन तत्र पञ्चमीसमासनिवेशस्याशक्यवचनतया पदभेदपक्षेऽपि, सुपां सुलुगिति सू-

अत्ता चराचरग्रहणात् ॥ ९ ॥

कठवल्लीषु पठ्यते । यस्य ब्रह्म च क्षत्रं चोभे भवत ओ-

———

क्रेण मोल्लोपे सुखेन तथा पाठसिद्ध्या पुरुषसूक्त एव सहस्रशीर्षत्वादिविशिष्टरूपेण जगदुपादानतायाः श्रूयमाणतया च, नारायणपरं ब्रह्मेत्यनेनापि शब्दविशेषेण तदनुपलम्भात् । सहस्रशीर्षं देवमित्यनुवाके कर्मत्वबोधकद्वितीयाया नारायण एवाभ्यासान्नारायणपरं ब्रह्मेत्यादिप्रथमान्तप्रायपाठपतितस्य, नारायणपरो ध्यातेत्यस्य, ध्यानं नारायण. पर इत्येतत्समभिव्याहृतस्य वस्तुपरिच्छेदनिवर्तकतायाः स्फुटत्वाच्च तस्य कर्तृत्वे पर्यवसानं वक्तुमशक्यमिति तेनापि तन्मतानुपलम्भात । इतः पूर्वस्मिन्ननुवाके, अणोरणीयानिति मन्त्रे ईशाख्यस्य शिवस्य प्रस्तुतात्ममहिमरूपत्वेनैव सिद्धत्वान्मध्येऽपि, यो देवानां प्रथममिति मन्त्रे महर्षित्वादिभिर्मुख्यविभूतितया सिद्धत्वाच्च, दहरं विपापमित्युपान्तमन्त्रेऽपि तद्धृदयाकाशस्यैव ग्राह्यत्वात्, 'सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः । सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे मनसा विधीयत' इति चतुर्थस्कन्धे सतीं प्रति शिववाक्येन, अहं ध्यायामि तं विष्णुं परमात्मानमीश्वरमित्यादिना, विष्णोराराधनार्थं मे मनश्चर्या पितामहेत्यन्तेन गारुडद्वितीयाध्याये ब्रह्माणं प्रति शिववाक्येन च तदुपबृंहणादपि रुद्रस्य ध्यातृत्वेनैव सिद्धत्वाच्च । इदं यथा तथा मया प्रहस्ते निपुणतरमुपपादितमित्युपरम्यते । प्रकृतमनुसरामः ॥ ८ ॥ ॥ २ ॥

अत्ता चराचरग्रहणात् ॥ पूर्वाधिकरणे परमात्मनः पुरुषहृदयदेशास्थित्यवधारणे जीववत् सुखदुःखभोगप्राप्तिराशङ्क्य समाप्तौ परिहृता । स परिहारस्तदा युज्येत, यदि तस्य भोगः सिद्धः स्यात् । अतस्तत्साधनायोपोद्घातेनेदमधिकरणमारभ्यत इत्याशयेन विषयवाक्यमाहुः * कठवल्लीषु पठ्यते इति * द्वितीयवल्लीसमाप्तौ पठ्यते । अत्र शङ्कराचार्यादयोऽस्यामुपनिषद्यग्निजीवपरमात्मनां प्रकृतत्वात् त्रिकोटिकं संशयमुपगच्छन्ति । तदयुक्तम् । अग्नेः कोटिपात-

दनम् । मृत्युर्यस्योपसेचनम् । क इत्था वेद यत्र स इति । अत्र वाक्ये ब्रह्मक्षत्रयोरोदनत्वं वदन् यच्छब्दार्थस्य भोक्तृत्वमाह । तत्र संशयः । किं जीवो, ब्रह्म वेति । सच्चिदानन्दरूपत्वं सर्वोपास्यत्वं पूर्वाधिकरणद्वयेन सिद्धम् । सर्वभोक्तृत्वं साधयति । ब्रह्मक्षत्रयोरशक्यवधयोः सर्वमारकस्य च मृत्योर्भक्षयिता जीवो न भवत्येवेति कथं सन्देह इति चेदुच्यते । ओदनोपसेचनरूपक-

---

स्यासङ्गतत्वादित्याशयेनाहुः । * अत्रेत्यादि * ओदनस्य चेतनभोग्यत्वेन तत्समभिव्याहृतयच्छब्दार्थभूतस्य भोक्तुरचेतनतायास्तत्समभिव्याहारेणैव निवृत्तेरग्रेस्तथात्वाज्जीवब्रह्मकोटिक एव संशयो युक्त इत्यर्थः । नन्वेतस्मिन् विचारे का वा सङ्गतिरित्याकाङ्क्षायां तामाहुः । * सच्चिदित्यादि * । तथाच ब्रह्मजिज्ञासाप्रतिज्ञावाक्ये ब्रह्मण इति सम्बन्धषष्ठ्या ब्रह्मधर्माणामावश्यकानां सङ्गृहीतत्वादुपासने ज्ञाने चापेक्षितेषु धर्मेषु द्वयोः सिद्धौ तृतीयस्याप्तत्वस्यापि स्मरणात् प्रसङ्ग एव सङ्गतिरित्यर्थः । नच जन्माद्यधिकरणचतुष्टयेन सच्चिदानन्दरूपत्वस्य, तद्धर्माधिकरणे सर्वोपास्यत्वस्य च प्रथमपाद एव सिद्धत्वात् पुनर्विचारस्य किं प्रयोजनमिति शङ्क्यम् । तद्विषयवाक्येषु, ब्रह्मविदिति, हिरण्मयः पुरुषो दृश्यत इति पदात् तत्र तेषां ज्ञानशेषतया विचारादुपासनायां तेषामनुपयोग इति शङ्कानिरासायावश्यकत्वात् । नच पूर्वाधिकरणे कथं सच्चिदानन्दरूपविनिगमनेति शङ्क्यम् । सर्वं खल्वित्यत्र सद्रूपतायाः, सत्यसङ्कल्पादिपदैश्चिद्रूपतायाः, अनादरत्वेनानन्दरूपतायाश्च बोधनेन तत्सिद्धेरिति । एवं द्वितीयाधिकरणे विषयवाक्येऽन्यन्तरात्मन्नित्यधिकरणानिर्देशात् तस्य च स्थानस्य सर्वसाधारण्यात् सर्वोपास्यत्वसिद्धिः स्फुटैवेति न कोऽपि शङ्कालेशः । तस्यैवान्तिमे सूत्रे भोगस्य स्मारणात् तस्यालौकिकत्वनिश्चायनायैतदधिकरणमित्युपोद्घातोऽपि सङ्गतिरित्यपि बोधितम् । अधिकरणवैयर्थ्यमाशङ्क्य समादधते । * ब्रह्मक्षत्रेत्यादि *

त्वाज्जीवधर्मत्वम् । स्थानाज्ञानाच्च । न हि सर्वगतस्य स्वहृदयेऽपि प्रतिभासमानस्य, क इत्था वेद यत्र स इत्यज्ञानमुपपद्यते । अलौकिकसामर्थ्याच्च सन्देहः ।

तत्र निषिद्धत्वाल्लौकिकभोजनत्वन्निरूप्यमाणत्वात् स्थानाज्ञानाच्च कश्चिदुपासनोपचितालौकिकसामर्थ्यो महादेवादिरत्ता भविष्यति । न तु तद्विरुद्धधर्मा भगवान् भवितुमर्हति, अक्लिष्टकर्मत्वादिधर्मवान् । तस्माज्जीव एवोपासनोपचितमहाप्रभावो वाक्यार्थ इत्येवं प्राप्तेऽभिधीयते ।

अत्ता चराचरग्रहणात् ॥ अत्ता भगवानेव । कुतः । चरा-

---

*स्थानाज्ञानादिति विवृण्वन्ति । * नहीत्यादि * तथाच पूर्वाधिकरणद्वये सर्वगतत्वादिरूपेण सिद्धौ स्थानाज्ञानस्य वक्तुमशक्यत्वादज्ञानस्थानकत्वं जीवधर्म एवेत्यर्थः । नन्वेवं ब्रह्मवाक्यत्वसाधकपदार्थानां रूपकाज्ञानाभ्यामन्यथात्वस्य वक्तुमशक्यत्वात् कथं सन्देह इत्यत आहुः । * अलौकिकेत्यादि । ननु जीवे कथमलौकिकसामर्थ्यसम्भव इत्याकाङ्क्षायां तत्साधयन्त एव पूर्वपक्षमाहुः * तत्रेत्यादि * न हिंस्यात् सर्वा भूतानीतिश्रुत्या स्वपरप्राणवियोजनरूपाया हिंसाया निषिद्धत्वादत्र च ओदनरूपकेण तस्या लौकिकतौल्यस्य च सूचनात् तथा । * महादेवादिरित्यादिपदेन रुद्रवतोऽग्नेः संग्रहः । महादेवस्य निषिद्धभोक्तृत्वं त्वगस्त्यसंहितायां प्रथमाध्याये तेनैव पार्वतीं प्रत्युक्तम् । 'भक्त्यार्पयन्ति ये मह्यं तवापि पिशितादिकम् । उत्पादयन्ति चानन्दं गणेभ्यो वा सुरेश्वरि । तवापि मे मदीयानामस्माकं पिशितादिकम् । तृप्तिमुत्पादयत्येव विधिनाऽविधिनार्पितम्' इति । * तद्विरुद्धधर्मेति * अनिषिद्धालौकिकभोजनकृत । विरुद्धधर्मवत्त्व उपपत्तिः । * अक्लिष्टेत्यादि * सिद्धान्तं व्याकुर्वन्तो विषयवाक्ये हेतुपक्षबोधकपदादर्शनात् कथमस्य सूत्रस्य तद्विषयत्वमितिशङ्कापरिहाराय ब्रह्मक्षत्रपदं चराचरोपलक्षकमिति ला-

चरग्रहणात् । चरं सर्वप्राणिवधार्थं परिभ्रमन्मृत्युः । अचरं ब्रह्मक्षत्ररूपं कस्याप्यचाल्यम् । तयोरत्ता न जीवो भवितुमर्हति ।

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति न्यायात् । अस्मदादिप्रतिपत्त्यर्थं तु लौकिकवद्वचनं भोक्तृत्वाय । प्रलयकर्तृत्वान्नायुक्तत्वम् । सर्वत्र विद्यमानस्याप्यज्ञायमानत्वात् फलतः

क्षणिकव्याख्यानस्यासङ्गतत्वबोधाय चाहुः । * चरमित्यादि * * अचाल्यमिति * । प्रवाहनित्यत्वादचाल्यम् । श्रुतौ चकारद्वयेन वर्णान्तरस्यापि संग्रहः । तेषामपि भक्तावधिकारेण मुक्तियोग्यत्वात् । देवोऽसुरो मनुष्यो वेति वाक्यात् । एवं सति पूर्वोक्तस्यात्ता जीवो भवितुं नार्हति । अत्तुर्जीवभावे तदात्तानां मोक्षासम्भवात् । ननु मृत्युञ्जयत्वेन संहारकत्वेन ज्ञानदातृत्वेन च तस्य प्रसिद्धत्वान्मुख्यविभूतिरूप एव सोऽस्तु, न जीवो, न वा परः । बाधकानामुक्तत्वादित्याकाङ्क्षायामाहुः । *यत्रेत्यादि* यथा ह्यमात्यो युवराजो वा राजकार्यं कुर्वन्नप्यन्येभ्योऽतिशयवानपि, न राजभोग्यं भुङ्क्ते तदसाधारणं कार्यं वा करोति । अत उपासनोपचयादिना जातेऽपि सामर्थ्ये न तस्य तादृशभक्तृत्वं शक्यवचनमित्यर्थः । ननु तादृशभोक्तुर्ब्रह्मत्वे बाधकानामुक्तानां का गतिरित्यत आहुः । * अस्मदादीत्यादि * तुः शङ्कानिरासे । तथाच यथा सदेव सोम्येदमग्र आसीदित्यत्र ब्रह्मणः केवलत्वेऽभिसंहितेऽप्यग्रपदेन कालोपरञ्जनमस्मदादिप्रतिपत्त्यर्थं, तथात्र भोजने लौकिकवद्वचनमपि । नचात्र निषिद्धत्वं बाधकम् । निषेधस्य जीवेऽपि देहसम्बन्धानन्तरमेव प्रवृत्तेरनुज्ञापरिहारसूत्रे वक्ष्यमाणत्वादशरीरे ब्रह्मणि तदप्रवृत्तेस्तं प्रति निषिद्धत्वाभावात् । अन्यथा प्रलयेऽपि हिंसायास्तौल्यात् तत्कर्तृत्वमप्ययुक्तं स्यात् । तथा सति प्रलय एव न भवेदतस्तत्रैव भोक्तृत्वेऽपि नायुक्तत्वम् । नापि स्थानाज्ञानं बाधकमित्याहुः । * सर्वत्रेत्यादि * सर्वत्र विद्यमानत्वेऽपि, हन्त तिरोसानीति श्रुतेः सृष्ट्यनन्तरं तिरोधानेनाऽज्ञायमानत्वात् प्रत्यक्षरूपस्य फलस्याभावेन तदभिसंधाय स्थानाज्ञानमत्रोक्तं, न तु स्थानविषयकं परोक्षज्ञानमप्यभिसन्धायातो

स्थानाज्ञानमुक्तम् । ब्रह्मक्षत्रयोरपि मोक्षापेक्षित्वान्मृत्युसम्बन्धमात्रेण भगवति भोक्तरि प्रवेशार्थं योग्यरूपत्वमोदनत्वम् । प्राणानां तत्रैव समवलयान्मृत्युरपि तत्रैव लीनोऽग्रे जन्ममरणाद्यभावाय भगवत्येव प्रविशति । तस्मादस्मिन् वाक्ये ब्रह्मक्षत्रमृत्यूनां भोग्यत्वेन ग्रहणादत्ता भगवानेवेति सिद्धम् ॥ ९ ॥

ननु किमित्येवं प्रतिपाद्यते । पूर्वपक्षन्यायेन यमोऽन्यो वा मृत्युं साधनीकृत्य स्ववशे सर्वं करोतीति जीववाक्यमेव किं न स्या-

---

न दोषः । ननु भवत्वेवं, तथापि क्लिष्टकर्मत्वं कथं निवर्ततामित्यत आहुः । * ब्रह्मक्षत्रेत्यादि * । मोक्षापेक्षिणो ह्यत्रादनीयत्वेनाभिप्रेयन्ते । ते च देहसम्बन्धे निवृत्ते मुच्यन्ते, न तु सदेहाः । अतो यथा तण्डुलानां वन्ह्यादिसम्बन्धेनावयवशैथिल्येन विक्लित्तावोदनत्वं, तथात्र मोक्षापेक्षिणां भोक्तरि भगवति प्रवेशार्थं कथञ्चिन्मृत्युसम्बन्धमात्रेण योग्यरूपत्वमेवोदनत्वम् । यथा कंसादीनां, कुरुपाण्डवसैन्यानां च । अत एव, तदेव रूपं दुरवापमाप, यास्यन्त्यदर्शनमलं बलभीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयमित्यादीनि वाक्यानि । नचैवं मृत्योरुपसेचनत्वासम्भवः । अत्राव वै मृत्युर्जायत इत्यनेकमृत्युपक्षे, अशनाया मृत्युरेवेत्येकमृत्युपक्षेऽपि मुच्यमानब्रह्मक्षत्रप्राणानामत्रैव समवनीयन्ते प्राणा इति श्रुतेरस्मिन्नेव लयेन तद्धर्मात्मकोऽशनायादिरूपो मृत्युरपि तेषां जन्ममरणाद्यभावाय भगवत्येव प्रविशतीति तस्योपसेचनत्वमपि युक्तमेव । एवं सिद्धे तेषामोदनोपसेचनभावे तदत्तृत्वेनाक्लिष्टकर्मत्वमपि भगवतोऽनायासेनैव सिद्धम् । दुश्चिकित्स्यव्रणादिव्यापन्निवारकागदङ्कारकृतिवत्तस्योत्तमफलत्वात् । एवं प्रलयेऽपि सुषुप्तिवत्सुखजनकत्वमेव । नानासंसृतिक्लेशनिवृत्तिफलकत्वात् । तस्मादत्र बाधकानामभावात् साधकयुक्तीनां सत्त्वादस्मिन् वाक्येऽत्ता भगवानेवेति सिद्धमित्यर्थः । किञ्च । मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्येव लयादन्तर्यामित्वमपि सिद्धं ज्ञेयम् ॥ ९ ॥

सूत्रान्तरमवतारयितुं चोदयति * नन्वित्यादि * । अयमर्थः ।

दिशत आह ।

प्रकरणाच्च ॥ १० ॥

प्रकरणं हीदं ब्रह्मणः । न जायत इत्यारभ्याऽऽसीनो दूरं व्रजतीत्यादिना माहात्म्यं वदन्नन्ते, यस्य च ब्रह्म च क्षत्रं चेत्याह । अतःप्रकरणानुरोधात् पूर्वोक्तप्रकारेण ब्रह्मवाक्यत्वमिति । अन्यथा प्रकृतहानाप्रकृतकल्पने स्याताभिति चकारार्थः ॥ १० ॥

विषयवाक्ये पक्षादिबोधकपदाभावेऽपि चराचरादिपदैर्मृत्युत्वादिगतं धर्ममाहत्य योगवृत्त्या तानि बोधयित्वा तेषां ग्रहणस्य लिङ्गत्वं च कल्पयित्वा निर्बन्धेन ब्रह्मवाक्यत्वकल्पनापेक्षया पूर्वपक्षोक्तानां निषिद्धत्वादीनां शीघ्रं बुद्ध्यारोहात् तेन न्यायेन जीव एवात्र ग्रहीतुमुचितः। स चेत् साधारणो न समर्थस्तदा संहारेऽधिकृता यमो देवतारूपं मृत्युं, देवतारूपो मृत्युर्वा रोगादिरूपं मृत्युं साधनीकृत्य ब्रह्मक्षत्रोपलक्षितं सर्वं प्राणिजातं स्ववशे करोतीति युक्तम् । अतोऽस्य जीववाक्यत्वमेवादरणीयमिति । अत्र सूत्रं पठित्वा व्याचक्षते ॥ प्रकरणाच्चेति ॥ जीवप्रश्नोत्तरश्रवणानन्तरम्, अन्यत्र धर्मादन्यत्राधर्मादिति प्रश्नान्तरे कृते सर्वे वेदा यत् पदमामनन्तीत्यादिना प्रकरणान्तरं प्रवृत्तमत इदं ततोऽतिरिक्तस्य ब्रह्मणः प्रकरणम । तत्र सर्वे वेदा इति मन्त्रे सङ्क्षेपेण कथनं प्रतिज्ञाय, ॐकारस्य सङ्क्षेपरूपतामुक्त्वा एतद्ध्येवाक्षरं ब्रह्मेति मन्त्रद्वयं सर्वफलदायकत्वादिना तत्प्रशंसामुक्त्वा तत्प्रतिपाद्यस्य ब्रह्मणो माहात्म्यं, न जायत इत्यादिभिरष्टभिर्मन्त्रैर्वदन्नन्ते तस्यैवात्तृत्वं मृत्युरेवाह । तद्यदि यमो देवतारूपो मृत्युर्वात्तृत्वेनाभिप्रेतः स्यात् तदा, न जायत इति मन्त्रे तस्य जननमरणाभावं न वदेत् । पुराणादिषूभयोरपि जन्यत्वस्मरणात् । यमो यमी श्राद्धदेव इति, ततोऽपानस्ततो मृत्युरिति । वेदेऽपि न मृत्युरासीदमृतं न तर्हीति । जन्यत्वं च नश्वरत्वव्याप्तम् । तथाऽऽसीनमन्त्रे, कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हतीति स्वस्य तस्य च भेदेन ज्ञातृज्ञेयभावं च न वदेत् । अत इदं मृत्य्वादिदेवताव्यतिरिक्तस्य प्र-

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

छाया एव प्रकरणम् । तथा सत्यासीनादिमन्त्रेषु यथा विरुद्धधर्माधारत्वादिरूपं तन्माहात्म्यमत्रदत्तथात्रोक्तविधात्तृत्वस्वरूपमपीति तथेत्यर्थः । शेषं स्पष्टम् । अत्र चात्तृत्वस्य ब्रह्मणि निश्चायनात् प्रलयकर्तृत्वनिर्वाहकसामर्थ्यमवसरसङ्गत्योक्त्वा तदसम्भवो निवारितः । सर्वे वेदा, एतद्ध्येवाक्षरमित्युपक्रमात् सर्वरूपत्वात्मकं वैशेष्यमपि जीवतुल्यभोगाभावार्थं सूचितं ज्ञेयम् ।

माध्वास्तु, स यद्यदेवाऽसृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति सर्वमदितेरदिति त्वमिति बृहदारण्यकीयाग्निब्राह्मणस्थश्रुतिं विषयवाक्यत्वेनोदाहरन्ति ।

विज्ञानभिक्षुस्तु, 'य इमं मध्वदं वेदात्मानं जीवमन्तिकात् । ईशानं भूतभव्यस्य ततो न विजुगुप्सत' इति कठवल्लीस्थाम् । अत्तृत्वरूपस्य विषयस्य तत्र स्फुटत्वात् । अत्तृत्वं च प्रलयकर्तृत्वमेव सर्वे व्याकुर्वन्ति । तत्तु व्याख्यानं न युक्तम् । अत्र तत्प्रसङ्गादर्शनात् । पूर्वाधिकरणविषयवाक्ये तज्जलानिति विशेषणेन जन्मादित्रयस्य ब्रह्मकर्तृकतायाः उक्तत्वात् प्रथमपादे चोपपादितत्वात् तेषु केवलस्य संहर्तृत्वस्यैवेह पुनर्विचारे कारणस्यानुपलम्भाच्च । अतोऽत्र तद्भिन्नस्य प्रलयातिरिक्तकालिकमोक्षफलकस्य धर्मान्तरस्यैव विचार इत्येव युक्तम् । जिज्ञासासूत्रे सम्बन्धषष्ठ्या उपपादितत्वेन ज्ञानोपासनयोस्तद्धर्मविचारस्योपयोगितया आवश्यकत्वादिति । भिक्षूदाहृतस्य तु भूतभव्येशानत्वरूपे स्पष्टे ब्रह्मलिङ्गे विद्यमाने उपपादनसापेक्षलिङ्गग्रहणस्यानवसरपराहतत्वमेव । माध्वोदाहृते तु, नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीदशनाययाऽशनाया हि मृत्युरित्युपक्रमे जिघत्साश्रावणात् तस्याश्च श्रुत्यन्तरे विजिघत्सोऽपिपास इति ब्रह्मणि निषेधेनोपपादनसापेक्षत्वात् प्रकरणस्यापि सन्दिग्धत्वमेव । तस्मादुक्तमेव विषयवाक्यं युक्तमिति दिक् ।

शैवस्तु प्रहस्तादेव पराहत इति न तदर्थं पुनः प्रयतनम् । अतः पूर्वोक्तमक्षुण्णम् ॥ १० ॥ ॥ ३ ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ अयं भोगो व्यापिवैकुण्ठे

तस्यैवाग्रे पठ्यते । ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता इति ।

किमिदं ब्रह्मवाक्यमाहोस्विदन्यवाक्यमिति । अस्य वाक्यस्योत्तरशेषत्वे जीवप्रकरणपठितत्वान्न ब्रह्मवाक्यत्वम् । पूर्वशेषत्वे तु ब्रह्मवाक्यमिति प्रकरणानिर्णयः । मध्ये पाठादेवं

अन्यत्र वास्तु, न त्वन्तर्हृदयेऽपीत्याशङ्कावारणाय । किञ्च, ये पूर्वाधिकरणेषु धर्मा उक्तास्तेऽन्तर्वर्तिन उक्ताः । अन्तर्वर्ती च ह्ययन्तःपुरुष इत्यादिश्रुत्या, अहमित्यादिप्रत्यग्वित्या चान्तर्वर्ती जीवसिद्धः । ब्रह्म तु व्यापकत्वात् सार्वत्रिकमुदासीनं, न त्वन्तरेव विशेषतः सिद्धम् । तथा सति पूर्वाधिकरणेषु यन्माहात्म्यमुक्तं तज्जीव एव भविष्यति, न ब्रह्मणीति जीवनिवारणे तत्र तत्साधनाय चेदमधिकरणमुपोद्धातसङ्गत्या आरभ्यत इत्याशयेन विषयवाक्यस्थलकथनपूर्वकं तद्वाक्यमुदाहरन्ति * तस्यैवाग्र इत्यादि * । पुरः स्फूर्तिको वाक्यार्थस्तु, ऋतं सत्यं सुकृतस्य सम्यक्त्वमवगत्य कृतस्य कर्मणः फलं पिबन्तौ भुञ्जानौ । यद्यप्येको भुङ्क्ते, नेतरस्तथापि, छत्रिणो यान्तीतिवत् समुदाये गौण्या पिबन्ताविति प्रयोगः । लोके अस्मिञ्छरीरे, गुहां हृदयाकाशं प्रविष्टौ । गुहामिति सप्तम्यर्थे द्वितीया । गुहाया विशेषणं, परमे परार्द्धे इति । बाह्यपुरुषस्थानापेक्षया परम उत्कृष्टे । तत्र हेतुः परार्द्धत्वम् । परार्द्धं ब्रह्मणः स्थानम् । तत्र हि भक्तैर्ज्ञानिभिरुपासकैश्च ब्रह्मोपलभ्यत इति । तौ छायातपौ संसारित्वासंसारित्वाभ्यां धर्माभ्यां परस्परविलक्षणौ ब्रह्मविदो वदन्ति कथयन्ति । न केवलं त एव कथयन्ति, किन्तु पञ्चाग्नयस्त्रिणाचिकेताः श्रौतस्मार्ताग्निमन्तस्त्रिकृत्वो नाचिकेतोऽग्निर्यैश्चितस्तादृशा गृहस्था अपि वदन्तीति । मुख्योऽर्थस्त्वग्रे भाष्य एव वक्तव्यः । तत्रोक्तेऽर्थे संशयं तद्बीजं चाहुः । *किमिदमित्यादि * । *प्रकरणनिर्णय इति* प्रकरणेन कृतो निर्णयः । ननु वल्लीसमाप्त्या पूर्वप्रकरणसमाप्तेस्तदुत्तरप्रकरणगतत्वस्य स्फुटत्वात् कथं सन्देह इत्यत आहुः । *मध्य इत्यादि* तथाच, 'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जा-

सन्देहः । अर्थविचारे तु द्विवचननिर्देशात् पूर्वशेषत्वे बद्धमुक्तजीवौ भविष्यतः । उत्तरशेषत्वे त्विन्द्रियमनसी । उभयथापि न ब्रह्मवाक्यम् । द्वयोर्मुख्यत्वेन प्रतिपादनात् । ब्रह्मवाक्यत्वेऽपि न प्रयोजनसिद्धिः ।

अथ मन्यते, उपनिषत्पाठादन्यत्रानिर्द्धाराज्जीवब्रह्मपर-

यत' इति पूर्वतन्त्रे सिद्धत्वात् कयाचित् सङ्गत्या पूर्वशेषत्वस्यापि शक्यवचनत्वाद्, आत्मानं रथिनं विद्धीत्यादेः प्रागेव पाठाच्च सन्देह इत्यर्थः । ननु तर्ह्यर्थेन निर्णयोऽस्त्वित्यत आहुः । * अर्थेत्यादि * । * बद्धमुक्तजीवाविति * हन्ता चेन्मन्यते हन्तुमित्यनेन बद्धस्य, मत्वा धीरो न शोचतीत्यनेन मुक्तस्य च पूर्वमुक्तत्वात् तदनन्तरपठितस्य द्वित्वस्य तद्विषयत्वप्रत्यभिज्ञानात्तावेव युक्तौ, न तु जीवपरमात्मानौ । अनश्नन्निति श्रुत्या परमात्मनो भोगाभावादिति । * इन्द्रियमनसी इति * यस्त्वविज्ञानवान् भवतीत्यादौ तयोरेवाग्रे निरूपणात् । पिबन्ताविति पानकर्तृत्वव्यपदेशस्त्वेधांसि पचन्तीतिवत् करणे कर्तृत्वोपचाराद् बुद्धिजीवपक्षे बुद्धौ केवलायामिवोभयत्राप्युपपद्यते * उभयथेति * उत्तरशेषत्वे पूर्वशेषत्वे च । ननु, येयं प्रेते विचिकित्सेत्यनेन जीवस्य, अन्यत्र धर्मादन्यत्राधर्मादित्यनेन परमात्मनश्च पूर्वं पृष्टत्वात् पूर्वशेषत्वाङ्गीकारे जीवपरमात्मानौ सुखेन सम्भविष्यत इति तावेवात्र ग्राह्यावित्येकदेशिकृतं समाधानं दूषयन्ति * द्वयोरित्यादि * ब्रह्मवाक्यत्वाय हि परमात्मनिरूपणमवाङ्गीकार्यम्, तत्प्रयोजनं च मुख्यतया परमात्मनो भोक्तृत्वप्रतिपत्तिः । सा तु द्वयोस्तुल्यतया मुख्यत्वेन प्रतिपादनाद् दुर्घटेत्यपार्थं तस्य ब्रह्मवाक्यत्वमित्यर्थः । ननूपनिषदो रहस्यविद्यास्तासु यदुच्यते, तन्निर्द्धारितमेवोच्यते । अत उभयोर्ऋतपातृत्वमन्यत्रानिर्णीतमत्र निर्धारयितुं प्रवृत्तं वाक्यमिन्द्रियमनसोर्ग्रहणे उपचारदोषेण दुष्यतीति तदभावायास्य जीवब्रह्मपरत्वाङ्गीकारेऽपि तयोरवस्थाभेदेनैव भिन्नतया वस्तुन ऐक्याद् वाक्यस्योभयपरत्वेऽपि ब्रह्मवाक्यत्वमक्षतमित्येकदेशिकृतं समर्थनं दूषणार्थमनुवदन्ति । * अथेत्यादि * । तद् दूषयन्ति ।

त्वेऽपि तयोरभेदाद् ब्रह्मपरतैव वाक्यस्य युक्तेति। तथापि कस्य निर्णायकत्वं, प्रकरणस्यार्थस्य वेति। उभयोरपि सन्दिग्धत्वाद-युक्तो विचार इति चेदुच्यते।

सन्देहवारकं शास्त्रं पदशक्त्या तु निर्णयः।
जीवादुत्कर्षशब्देन द्वयोर्वाक्येऽपि न क्षतिः॥ १॥

गुहातपशब्दाभ्यामित्यर्थः।

ऋतं पिबन्तावित्यत्रैवं संशयः। किं जीवद्वयं निरूपयति, आहोस्विज्जीवब्रह्मणी वेति। तत्र ब्रह्मप्रकरणस्य सामान्य-

---

तथापीत्यादि सन्दिग्धत्वादिति। अर्थस्य सन्दिग्धत्वं जीवद्वयनि-रूपणकोट्यनिरासाद् बोध्यम्। तथाच तदङ्गीकारे विचारवैयर्थ्य-मित्यर्थः। एवमेकदेशिमतदूषणेन विचारमाक्षिप्य तत् समर्थयन्ति *उच्यत इत्यादि*। शास्त्रं व्यासप्रणीतं श्रौतवाक्यस्य सन्देहवारकम्। अतस्तत्र पूर्वं सन्देहाकारस्य निर्णयः कार्यः। अन्यथा तु समाधान-मनर्थकमेव स्यात्। नन्वोक्तयोरुभयोरपि सन्दिग्धत्वात् केन स नि-र्णय इति शङ्क्यम्। * पदशक्त्या तु निर्णयः *। सन्देहाकारस्य। कस्य पदस्य शक्त्येति चेत्। * जीवादुत्कर्षशब्देन *। जीवं प्राप्य उत्कर्षबोधको यः शब्दस्तेन। वाक्ये द्वया. पक्षयोर्न क्षतिः। तथाच तादृशपदस्य शक्त्या जीवद्वयपक्षो जीवपरमात्मपक्षश्चेति द्वावपि सं-ग्रहीतुं शक्येते इत्यर्थः। जीवादुत्कर्षशब्दः को वेत्यपेक्षायां व्याकुर्व-न्ति * गुहेत्यादि* इदं पूर्वोत्तरपक्षयोर्विवरण एव स्फुटीभविष्यति। ननु, यः सेतुरी जानानामिति मन्त्रस्यापि प्रकरणद्वयमध्ये पाठोऽ-स्तीति स कुतो न विचार्यत इत्यत आहुः। * ऋतमित्यादि * तथा-च तत्राक्षरं ब्रह्म स्फुटमेव श्रूयते इति सन्देहाभावात् स न विचार्य-ते, किन्त्वत्रैवं संशयादयमेव विचार्यत इत्यर्थः। एवं संशयं सा-धयित्वा पूर्वपक्षमाहुः। * तत्रेत्यादि *। अयमर्थः। यद्यस्मिन् मन्त्रे ब्रह्मैव प्रतिपाद्यं भवेत् तदा पूर्ववल्ल्यामिवात्राप्युपास्यत्वेन प्राप्यत्वेन

त्वाद्, यस्तु विज्ञानवान् भवतीत्यग्रे विद्वदविद्वतोर्वक्तव्यत्वात् तदर्थमुभयोः प्रथमं निर्देश उचितः । मन्त्रेऽपि, ऋतं स्वर्गापवर्गलक्षणं सुखम् । मार्गद्वयस्यापि विहितत्वात् सुकृतलोकत्वम् । गुहा तत्त्वविचारो हृदयं वा । जात्यपेक्षया त्वेकवचनम् । परमपरार्द्धं सत्यलोकः । तत्रोभयोर्भोगात् । अविद्यया पिहितप्रकाशत्वादविदुषश्छायात्वम् । ब्रह्मज्ञानेनातिप्रकाशत्वादातपत्वं विदुषः । अत एव विदुषः स्वरूपं ब्रह्मविदो वदन्ति । पञ्चाग्नयस्त्रिणाचिकेताश्चेतरम् । इन्द्रियमनसोस्त्वचेतनत्वान्न वाक्यार्थसङ्गतिः । वाक्यार्थयोगे हि विशेषणनिर्णयः । तस्माद् बद्धमुक्तजीवपरतयोपपन्नत्वाद् तत्प्रकरणपाठान्न ब्रह्मवाक्यमिति । एवं प्राप्ते, उच्यते ।

गुहां प्रविष्टावात्मानौ । गुहा हृदयाकाशस्तत्र सकृदेकस्मिन्

ण ब्रह्मोच्यत इति प्रकरणस्य तौल्यादेकवचनमेवात्र वदेत् । यदाति द्विवचनमतोऽत्र, न ब्रह्माभिप्रेतं, किन्तु बद्धमुक्तजीवावेवाभिप्रेतौ । अतः प्रथममुभयोर्निर्देशः । नचैवं मन्त्रवर्णासङ्गति । मन्त्रेऽपि ऋतपदेनोक्तरीतिकं द्विविधसुखमुच्यते । प्रवृत्तिनिवृत्तिरूपस्य मार्गद्वयस्यापि विहितत्वात् सुकृतत्वेन तज्जन्यस्य शरीरस्य लोकत्वम् । तत्र गुहा तत्सदुपयोगी तत्त्वविचारो गुहेव गुहा । यदि गौणी नाद्रियते, तदा हृदयाकाशः । नच विचारादेर्भिन्नत्वाद् द्विवचनं शङ्क्यम् । जात्यपेक्षयैकवचनस्यापि युक्तत्वात् । परमः परश्चतुर्मुखो यत्र मीयते तादृशं परार्द्धमुत्तमं सत्यलोक एव । तत्रोभयोः शतजन्मीनस्वकर्मशुद्धस्य कर्मिणो, वेदान्तविज्ञानसुनिश्चितार्थस्य सन्न्यासिनश्च भोगादिति । * विद्वदविद्वतोरिति * विच्छब्दान्मतुप्प्रयोग इति सम्बन्धे । शेषं स्फुटम् । पूर्वपक्षमुक्त्वा समाधानं व्याकुर्वते । * गुहामित्यादि * । एकस्मिन्निति * एकदेत्यर्थः । अत्र हेतुर्हिशब्देन सूच्यते ।

प्रविष्टौ जीवपरमात्मानावेव । अनेन जीवेनात्मनानुप्रविश्ये-त्युभयोः प्रवेशश्रवणात् । न ह्येकस्मिन् हृदयाकाशे जीवद्वयं प्रवेष्टुमर्हति । अर्थस्त्वेवं सम्भवति । पूर्वाधिकरणे यथाभिलषितभोगो भगवति साधितः । प्रकारान्तरेणापि, ऋतं सत्यं परं ब्रह्मेति ऋतसत्ययोर्ब्रह्मत्वप्रतिपादनात् स्वरूपाऽमृतपातारौ । सुकृतमपि ब्रह्मैव । तस्मात् तत्सुकृतमुच्यत इति श्रुतेः । स एव लोकः । उपचारात् षष्ठी ।

तं विवृण्वन्ति । * अनेनेत्यादि * अनेन जीवेन सहात्मनेत्यर्थः । नच सहार्थ तृतीया चेत् स्यात् तदोक्तं सम्भवेत् । सैवात्र सन्दिग्धेति वाच्यम् । गुहाहितं गह्वरेष्ठं पुराणं यो वेद निहितं गुहायां परमे व्योमन्नित्यादौ श्रावितस्यं निहितत्वादेः स्वरूपेण प्रवेशं विनानुपपत्त्यात्र तथा निश्चयात् । यद्यपि तत्र परमात्मनः सिद्धवन्निर्देशस्तथापि, तत् सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुत्यन्तरात् प्रवेशहेतुक एवेत्यर्थः । नन्वत्र जीवपदात् तयोरेव सोऽस्त्वित्यत आहुः । * न हीत्यादि * हृदयाकाशे हि जीवस्य प्रवेशो नामादिव्याकरणार्थः । व्याकरणं चैकेनैव सम्भवति । अत एवैकवचनम् । अन्यथा जीवाभ्यामित्यादि वदेत् । पुराणेष्वपि, 'चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत' इत्यादौ देहोत्थापनायाप्येक एवोक्तः । अतो व्यष्टिदेहेऽप्येक एव मन्तव्यः । अन्यथा करणाधिपौ द्वौ स्याताम् । ततश्च सुकृतदुष्कृतभोगोऽपि श्रुत्यादौ द्वयोरुच्येत । व्यवस्था च भज्येत । अतो जीवद्वयमेकत्र प्रवेष्टुं नार्हतीति कार्यबलात् सहार्थेऽपि सती तृतीया जीवस्य ब्रह्मसाह्यमेव गमयतीत्यर्थः । ननु भवत्वेवं तत्र, तथापि प्रकृतमन्त्रार्थः कथं सङ्गच्छत इत्यत आहुः । * अर्थ इत्यादि * यथेति भिन्नं पदं नित्यसम्बन्धात् तथापदमध्याहरति । तेनास्मिन्नधिकरणे जीवेन सहापि विवक्षितरीतिकं भोगं साधयतीत्यर्थः । तमेव प्रकारं स्फुटीकुर्वन्ति । * ऋतमित्यादि * । * उपचारादिति * राहोः शिर इतिवदभेदेऽपि भेदोपचारात् । उपचारमरोचयन्तो लोकपद-

अक्षरं वा परमपरार्द्धोपरि तत्रत्यानां परिदृश्यमानत्वाच्छाया प्रतिसारूप्यं सायुज्यं गतस्य जीवस्यापि तथात्वात् ततोऽपि विशिष्टं ब्रह्म प्रकटानन्दत्वादातपः परोक्षवादः । काण्डत्रयेऽपि तद्वाद इति त्रयाणां ग्रहणम् । अतो युक्त एवायमिति हिशब्दार्थः ।

नन्वप्रकृतत्वात् कथमेवमिति तत्राह । तद्दर्शनात् । तयोर्दर्शनं तद्दर्शनं तस्मात् । जीवब्रह्मणोः प्रतिपादनीयत्वात् । येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके, नायमस्तीति चैके, एतद्विद्या-

---

स्यार्थान्तरमाहुः । * अक्षरमित्यादि * तथाच, परमे परार्द्धे इति या सप्तमी सा वृक्षाग्रे श्येन इतिवदौपरिष्टिकसामीप्ये । तेनोपचाराभावादक्षरमेव लोक इत्यर्थः । छायातपौ विवृण्वन्ति * तत्रत्येत्यादि * तत्रत्यानाम् अक्षरात्मकभगवल्लोकस्थानां जीवब्रह्मणोः परिदृश्यमानत्वादन्येषां चापरिदृश्यमानत्वात् तान् प्रत्येवं कथनं परोक्षवादः । *प्रतिसारूप्यमिति* प्रतिकूलं सारूप्यम् । विरुद्धं प्रतिबिम्बवत् सारूप्यमित्यर्थः । * त्रयाणामिति * ज्ञान्युपासककर्मिणाम् । तथाचायं मन्त्रार्थः । परो मीयते यत्र, परस्य वा मा लक्ष्मीर्यत्र तादृशे परार्द्धाऽभिधलोकोपरितने अक्षरात्मके लोके,गुहां सत्यब्रह्मपुरस्थं दहरपुण्डरीकं वेश्म प्रविष्टौ सुकृतस्य ब्रह्मण ऋतं स्वरूपाऽमृतं पिबन्तावनुभवन्तौ जीवपरमात्मानौ ब्रह्मविदो ज्ञानिनः पञ्चाग्नय उपासकास्त्रिणाचिकेताः कर्मिणश्च छायातपौ पूर्वोक्तरीत्यातिसरूपत्वेऽपि विलक्षणौ । भगवतः परोक्षप्रियत्वात् तत्तोषार्थं परोक्षवादेन वदन्तीति । तेन जीवब्रह्मपक्षाङ्गीकारेऽपि, न मन्त्रार्थासङ्गतिरित्यर्थः । तेन सिद्धमाहुः । * अत इत्यादि * यत एवं मन्त्राऽर्थोऽतोऽयं गुहाप्रविष्टात्मत्वरूपो हेतुर्जुनपात्रोर्जीवपरमात्मत्वसाधने युक्त इति हिशब्दार्थः । तथाच गुहाप्रविष्टात्मरूपस्य हेतोरस्पष्टत्वेऽपि ब्रह्मलिङ्गत्वं युक्तमित्यर्थः । प्रकरणस्य हेतुलिङ्गतासाधकत्वात् तन्निश्चायनाय सूत्रशेषमवतारयन्ति । *नन्वित्यादि* । व्याकुर्वते * तयोरित्यादि* पू-

मनुशिष्टस्तनयाहमिति जीवः पृष्टः । अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत्तत् पश्यसि तद्वदेति ब्रह्मापि पृष्टम् । तत्र ब्रह्म निरूप्य जीवं निरूपयन्नुभयोस्तुल्यत्वेन महाभोगं निरूपयन् फलार्थं मध्ये स्वरूपं कीर्तयति । अतो ब्रह्मवाक्यमेवैतदिति सिद्धम् ॥ ११ ॥

विशेषणाच्च ॥ १२ ॥

विशेषणानि पूर्वोक्तानि जीवब्रह्मणोरेव सङ्गतानि । अग्निं वा, आत्मानं रथिनं विद्धि, सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति जीवप्राप्यं ब्रह्माह । अत उभयोरेव सर्वव्यावृत्त्या कथनादग्रिमग्रन्थपर्यालोचनयापीदं ब्रह्मवाक्यमेव । द्वा सुपर्णेति निःसन्दिग्धम् । चकारः प्रकरणोक्तसर्वोपपत्तिसमुच्चयार्थः ॥ १२ ॥

वेप्रकरणे ब्रह्म निरूप्यात्र प्रकरणे जीवं निरूपयन्नुभयोस्तौल्यं विना महाभोगासम्भवात् तेन तं निरूपयन् महाभोगरूपफलार्थं मध्येऽनेन मन्त्रेण तुल्यत्वबोधकं स्वरूपं कीर्तयतीत्यतो ब्रह्मणः प्रकृतत्वान्नाप्रकृतत्वदोष इत्यर्थः ॥ ११ ॥

विशेषणाच्च ॥ अनेनापि हेतुना ब्रह्मणः प्रकृतत्वमेव दृढीक्रियते । विशेषणं किमित्यपेक्षायामाहुः । * विशेषणानीत्यादि * । * पूर्वोक्तानीति * पूर्वस्यां वल्ल्याम्, अणोरणीयानित्यादिषु द्रष्टृद्रष्टव्यत्वप्रसन्नप्रसादार्हत्ववरणैकलभ्यत्ववरणीयत्वादीनि । ननूक्तमन्यस्योत्तरशेषत्वमतः पूर्वप्रकरणस्थान्यनुपयुक्तानीत्यत आहुः । * अग्निं वेत्यादि * । * उभयोरिति * जीवब्रह्मणोः । * सर्वव्यावृत्त्येति * शरीराद्यात्मकमर्वजडव्यावृत्त्या । अन्ये तु मुण्डके, श्वेताश्वतराणां मन्त्रोपनिषदि च, द्वा सुपर्णेति मन्त्रे चाऽयमेव न्याय इति वदन्ति । तद् दूषयितुमाहुः । * द्वेत्यादि * अत्तृत्वानश्नत्वाभ्यां द्वयाविशेष्य-

माणत्वेन, 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक' इति समनन्तरमन्त्रे च जीवपरमात्मनोरुक्तत्वेनासन्दिग्धतया जीवान्तरस्य जडस्य च तत्र द्वितीयकोट्यप्रवेशाज्जीवपरमात्मानौ स्फुटौ प्रतीयेते । अतो न्यायप्रयोजनाभावादयुक्तमित्यर्थः । नच तत्र परमात्मनोऽनशनस्योक्तत्वाद्, ऋतं पिबन्तावित्यत्र जीवद्वयमेव युक्तमिति शङ्क्यम् । पूर्वोक्तयुक्तिभिर्द्वितीयस्य ब्रह्मत्वसिद्धौ जीवान्तरस्य तत्राशक्यवचनत्वेन ब्रह्मणो भोगसिद्धेर्द्वासुपर्णेति मन्त्रे जीववदशनाभावस्यैवानश्नन्नित्यत्र व्याख्येयतया जीवद्वयस्यात्राशक्यवचनत्वादिति । एवमत्र हृदयस्थस्य भोगसाधनेन पूर्वाधिकरणसिद्धोऽपि भोगः प्रकरणैक्यान्मोक्षापेक्षिहृदयस्थस्यैवेति साधितम् । तथा मन्त्रव्याख्यानेनानन्दमयरूपं वैशिष्ट्यं च बोधितम् ।

शङ्कराचार्यास्तु, द्वा सुपर्णेतिमन्त्रमुपन्यस्य पैङ्गिरहस्यब्राह्मणे, तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् । अनश्नन्नन्यो अभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञः । तावेतौ सत्त्वक्षेत्रज्ञाविति व्याख्याय, तदेतत् सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति तत्र निष्कर्षादन्त्यः सिद्धान्तस्तत्र न युज्यते । तर्ह्येतदधिकरणपूर्वपक्ष एव तदर्थोऽस्त्विति चेत् सोऽपि न । न ह वा एवंविदि किञ्चन रज आध्वंसत इत्यादिफलकथनात् । सर्वसंसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्ररूपोऽभिप्रेयते । अनश्नन्नन्योऽभिपश्यति ज्ञ इति व्याख्यानात् । यत् पुनः सत्त्वस्य भोक्तृत्वकथनं तत्तु सुखादिविक्रियावति सत्त्वेऽध्यारोपेण । अस्याः श्रुतेः क्षेत्रज्ञाभोक्तृत्वबोधन एव तात्पर्यात् । न ह वेत्युक्ते फलवाक्ये अविद्यासंश्लेषाभावरूपफलकथनेन तथा निश्चयात् । इदं हि कर्तृत्वभोक्तृत्वं सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते । वस्तुतस्तु सत्त्वस्याचेतनत्वात् क्षेत्रज्ञस्य चाविक्रियत्वान्नान्यतरस्यापि । किञ्च । सत्त्वस्याविद्याप्रत्युपस्थापितसद्भावत्वेन तत्त्वतोऽसत्त्वात् सुतरां न सम्भवतीत्याहुः ।

तन्न । प्रपञ्चस्य ब्रह्मात्मकतायाः समन्वयसूत्र एव व्युत्पादितत्वेन, आविद्यकत्वस्य च, तदनन्यत्वादिसूत्रेषु दूष्यत्वेन सत्त्वासद्भावस्याभ्युपगमैकशरणत्वात् । सिद्धे तत्सद्भावे तस्य जडत्वेनाभोक्तृत्वेऽपि तेन जीवीयश्रुत्युक्तभोगानादरस्यायुक्तत्वात् । नचानश्नदादि-

अन्तर उपपत्तेः ॥ १३ ॥

पदव्याख्यानव्याकोपः शङ्क्यः । येन स्वप्नं पश्यतीत्यस्य येन हेतुना स्वप्नं पश्यति नतु तस्माद्धेतोरेतत् स्वप्नद्रष्टृ सत्त्वं सत्त्वोपाधिकं चैतन्यमित्येवममुक्तं व्याख्यायाथ योऽयमित्यादिना मुक्तं व्याकरोतीत्यमुक्तजीवीयभोगस्य मुक्ताभोगस्य च सिद्धेस्तदभावादिति । नचैकस्मिञ्छरीरे जीवद्वयविवेशस्यासङ्गतत्वान्नायं श्रुत्यर्थ इति शङ्क्यम् । अत्र, समानं वृक्षमिति समानपदस्य तुल्यवाचकतया शरीरभेदस्यैवाभिप्रेतत्वेनोक्तदोषाभावात् । नचैवं जीवानां बहुत्वेन, द्वा इत्यादिद्वित्वसंख्याविरोधः प्रकारपरत्वेनाविरोधात् । संयुक्तस्य त्वेकस्मिन्कालावच्छिन्नप्रवेशत्वेनाप्युपपत्तेः । सखित्वस्य चाक्षण्वन्तः कर्णवन्तः सखाय इतिवत् सारूप्येणेति । अतो, नैव किञ्चित् करोमीतिन्यायेन ख्यातव्यमित्युपदेशायेदं पैङ्गिरहस्यव्याख्यानम् । न ह वा एवं विदीति फलवाक्येन तथा निर्णयात् । नचैवं श्रौतव्याख्यानुरोधेन मुण्डकाद्युक्तैतन्मन्त्रेऽप्ययमेवार्थोऽस्तु, न तु जीवब्रह्मपर इति शङ्क्यम् । तत्र प्रकरणस्य ब्राह्मत्वेन ब्रह्मण. प्रतिक्षेपानर्हत्वात् । अतो, द्व्यम्नोतेषूभौ द्व्याम्नानस्यार्थवत्त्वादिति पूर्वतन्त्रीयन्यायाद् द्वावप्यर्थौ प्रकरणानुरोधात् तत्र तत्र व्यवस्थितावङ्गीकार्यौ । तत्र पाठविशिष्टमन्त्रस्यैवार्थविशिष्टस्यैव तस्य प्रकरणिना ग्रहणात् । अर्थभेदं विना व्याख्यानवैयर्थ्यादिप्रसङ्गादिति । अतो मन्त्रवर्णैक्येऽप्यर्थभेदान्नैकवाक्यत्वम् । ऋतमित्यस्य तूभयभेद इति सुतरां तथेत्यस्मिन् मन्त्रे तन्न्यायसंचारणमसङ्गतमेवेति दिक् ।

एवञ्चात्र परमात्मनोऽलौकिकभोगयोगे दोषराहित्यस्य प्रसङ्गेन विचारात् प्रलयकर्तृत्वं दोषरहितत्वं समर्थितमितीदं पूर्वस्यैव शेषः ॥ १२ ॥ ॥ ४ ॥

अन्तर उपपत्तेः ॥ अतीतेषु त्रिष्वधिकरणेषु प्रथमे वैशेष्येण लौकिकभोगबाधकं रूपं परिहृत्याग्रिमाभ्यां चराचरग्रहणाद्युगपदुभयप्रवेशाच्च सम्पद्यमानदशायां मोक्षदशायाञ्चेत्युभयविधोऽपेक्षितो भोगः साधितः । इदानीं संसारदशायां किं वैशेष्यमित्याकाङ्क्षायां तन्निर्णेतुमिदमारभ्यत इत्युपोद्घातरूपां सङ्गतिं बोधयितुं वि-

य एषोऽक्षिणि पुरुषो दृश्यते। एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति । तद् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छतीत्यादि श्रूयते । तत्र संशयः । प्रतिबिम्बपुरुषस्य ब्रह्मत्वेनोपासनापरमिदं वाक्यं, ब्रह्मवाक्यमेवेति वा । विरुद्धार्थवाचकत्वात् सन्देहः ।

तत्र दृश्यत इति वचनात् प्रतिबिम्ब एवायम् । ब्रह्मप्रकरणस्य च समाप्तत्वादेषा सौम्य तेऽस्मद्विद्या आत्मविद्या चेत्युपसंहारदर्शनात् तत्सिद्ध्यर्थमुपासनापरतैव वाक्यस्य युक्ता ।

पयवाक्यमुदाहरन्ति । * य एष इत्यादि * । * श्रूयते इति * छान्दोग्ये षष्ठे प्रपाठके उपसकोसलविद्यायां श्रूयते । वाक्यार्थस्तु, ब्रह्मेतीत्यन्तं पुरःस्फूर्तिकः । अग्रे तु पूर्ववाक्ये यदाचार्येणोक्तम्, अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते इति फलम् । तत्र निदर्शनं स आह । *तद् यद्यपीत्यादि* तत् तत्र इदं निदर्शनम् । यद्यप्यस्मिन् अक्षिपुरुषस्थानभूते अक्षिणि, सर्पिर्वा उदकं वा सिञ्चति धारया भूयः पातयति, वर्त्मनी अक्ष्यावरणादिभूते पक्ष्मणी एव गच्छति प्राप्नोति । ते एवार्द्रे स्निग्धे च भवतो, न त्वक्षि । तथाच यत्स्थानस्येदृशं माहात्म्यं तस्य ज्ञाने सति पापसंश्लेषो न भवतीत्यत्र किं वक्तव्यमिति बोध्यः ।

अत्रान्यैश्चतुष्कोटिकः संशय उपन्यस्तः । किमत्र प्रतिबिम्बात्मा निर्दिश्यते, विज्ञानात्मा वा, इन्द्रियाधिष्ठातृदेवता वा, परमेश्वरो वेति । स न युक्तो, दृश्यत इतिपदेन विज्ञानात्मदेवतयोरदृश्यमानयोर्निरासादिति बोधयितुं संशयाकारमाहुः *तत्रेत्यादि* । ननु दर्शनविषयत्वं ब्रह्मणोऽपि नास्तीति संशय एवात्र न घटत इति शङ्कायां तद्बीजमाहुः । * विरुद्धेत्यादि * दृश्यते इत्युक्तं दर्शनम्, अमृतत्वादिकं च परस्परविरुद्धार्थौ, तद्वाचकत्वात् तथेत्यर्थः । पूर्वपक्षमाहुः । * तत्र दृश्यते इत्यादि* । प्रकरणसमाप्तौ हेतुरुपसंहारदर्शनादिति । *तत्सिद्ध्यर्थमित्युपसंहारसिद्ध्यर्थम् । ननु मास्तु तत्रोपसं-

अविरोधे हि ब्रह्मपरता । उपास्यत्वेन ब्रह्मधर्माणामन्वयो भविष्यतीत्येवं प्राप्त उच्यते । अन्तरः, अक्षिप्रदेशे दृश्यत इत्युक्तः परमात्मैव । कुतः । उपपत्तेः । उपपद्यते हि तस्य दर्शनमार्षम् । सर्वत्र ब्रह्म पश्यन् बहिः सन्निधाने तस्य स्थानस्योत्कृष्टत्वात् तत्र भगवन्तमुपदिशति । लोकं वा व तेऽवोचन्नहं तु ते तद्व-क्ष्यामीति महदुपक्रमाच्च ।

हारस्तथा सति प्रकरणैक्याद् ब्रह्मवाक्यत्वमेवास्येत्यत आह । * अ-विरोधे हीत्यादि । यदि हि दृश्यत इत्युक्तं दर्शनं न विरुद्ध्यते तदा तथात्वं शक्यवचनं, न तु तदभावेऽपीत्यर्थः । ननु त्वन्मतेऽप्यभया-दिपदविरोध इत्यत आह । * उपास्यत्वेनेत्यादि * सिद्धान्तं व्या-चक्षते *उपपद्यत इत्यादि* । *आर्षमिति* साधनविशेषजन्यम् । तद् व्युत्पादयन्ति *सर्वत्रेत्यादि* । *उत्कृष्टत्वादिति* जलाद्यसंश्लेषे-ण तन्माहात्म्यबोधकत्वात् । तेन स्वल्पस्थानोपदेशोऽपि न तस्य ब्रह्म-त्वबाधक इत्यर्थः । नन्वात्मविद्योपसंहारस्य पूर्वं दर्शितत्वात् प्रकर-णानुग्रहे हेतोः साध्यसमत्वे कथं ब्रह्मतासाधकत्वमित्यत आहुः । * लोकमित्यादि * उपकोसलेन ब्रह्मोपदेशोऽप्यद्भुतऽपीमे नूनमीदृशा अन्यादृशा इति वदता आचार्येणाग्निकृते उपदेशे ज्ञाते, उपकोसलेना-चार्याज्ञयाऽग्न्युक्तेऽनूदिते, आचार्यो लोकं वा व किल तेऽवोचन्नित्य-नेन कं ब्रह्म खं ब्रह्मेति यदवोचन्नग्नयस्तल्लोकं प्राप्यमवोचन् । श्रुतौ लोकानिति पाठे त्वग्निविद्याप्राप्याः पृथिव्यादय, आत्मविद्याप्राप्यं ब्रह्म चैकशेषवृत्त्या सङ्गृह्यते । तत्राग्निविद्योक्तलोकप्राप्त्युपायस्यादि-त्यपुरुषोपासनादिरूपस्य तैरुक्तत्वादात्मविद्योक्तलोकप्राप्त्युपायभू-ताम्, आचार्यस्तु ते गतिं वक्तेति तैराचार्यवक्तव्या गतिर्या बोधिता साऽवशिष्यते । सा तु ज्ञातापि तदा भवति यदा प्रतिबन्धकापगम इत्यभिसन्धायाचार्य आह । अहं तु ते तद्वक्ष्यामीत्यादि । तत एवं फले श्रुते, उपकोसलः श्रद्धापूर्वकं, ब्रवीतु भगवानिति विज्ञापितवाँ-स्तदा, य एषोऽक्षिणीत्याद्युक्तम् । तेन तद्वक्ष्यामीति या प्रतिज्ञा सा महत आत्मविद्यागतिकथनस्यैवोपक्रमस्तस्मात् । तथाचाग्निभिस्त-

प्रतिबिम्बमात्रस्य च न पुरुषत्वनियमः । तस्माद् विरोधाभावाद् ब्रह्मवाक्यमेव ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥

एतं संयद्वाम इत्याचक्षते। एतँ हि सर्वाणि वामान्यभिसंयन्ति । एष उ एव वामनीरेष हि सर्वाणि वामानि नयति । एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति । वामानि कर्मफलानि । तेषामेव मनोहरत्वेन तदर्थं कर्मकरणात्। कर्मफललयः कर्मफलदानं च यत्त इति स्वर्गापवर्गफलदातृत्वमुक्तम् । सर्वलोकेषु भानं च । एष इति तमेवाऽक्षिपुरुषं निर्दिश्य स्थानादि व्यपदिश्यते । न हि प्रतिबिम्बात्मनः स्थानादिव्यपदेशः सम्भवति ।

दुपसंहारे कृतेऽपि पुनस्तस्य एवोपक्रान्तत्वेन प्रकरणस्य सत्त्वाग्न हेतोः साध्यसमत्वमित्यर्थः । ननु तथापि प्रकरणे श्रुत्यपेक्षया दुर्बलत्वाद्दर्शनश्रुतिसङ्कोचोऽनुचित इति प्रतिबिम्बपुरुष एवात्राङ्गीकार्य इत्यत आहुः *प्रतिबिम्बेत्यादि*। सत्यं सङ्कोचोऽनुचितः स्याद् यदि दर्शनविषयस्य प्रतिबिम्बस्य पुरुषत्वं नियतं स्यात् । तदेव तु न । अन्येषामपि प्रतिबिम्बात् । अतो विषयवशेन दर्शनश्रुतिसङ्कोचस्तवमतेऽपि तुल्यः । प्रकरणविरोधश्चाधिक इति न प्रतिपुरुषस्योपासनाविधायकमिदं, किन्तु ब्रह्मवाक्यमेवेत्यर्थः ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ पूर्वसूत्रोक्तस्य हेतोर्बाधकवलितत्वात् सूत्रान्तरं पठतीत्याशयेन सूत्रं पठित्वा व्याचक्षते । * एतमित्यादि * तथाचान्तरपदेन पूर्वसूत्रादेव स्थानप्राप्तेरस्मिन् सूत्रे स्थानादीत्यत्रातद्गुणसंविज्ञान इत्यर्थः । एतेषां संयद्वामत्वादीनां कथं ब्रह्मत्वगमकतेत्याकाङ्क्षायामेतद् व्याकुर्वन्ति * वामानीत्यादि * । * कर्मफललय इति * एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः, सर्वे पद हस्तिपदे निमग्नमितिवत् सर्वेषां सुखानां तत्रैव श्लिष्टत्वेन लोकादीनां तदवयवत्वेन च तत्रैव लय इत्यर्थः । एतेन स्थानपदस्यो-

चकारादेतत्तुल्यवाक्यस्याप्ययमेवार्थः । इन्द्रविरोचनप्रजापतिसंवादे । अथ योऽयं भगवोऽप्सु परिख्यायत इत्यासुरम् । न तु य एषोऽक्षिणि पुरुषो दृश्यत इत्यादि । तस्मादक्षिपुरुषो ब्रह्मैव ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

ननु किमिति निर्बन्धेन ब्रह्मवाक्यत्वं सम्पाद्यते । उपासनापरत्वे को दोष इत्याशङ्क्याह । सुखविशिष्टाभिधानात् । एतदमृतमभयमेतद् ब्रह्मेति । यद्यत्रोपासना विधीयेत, एष आ-

---

करीत्या लयार्थकत्वमित्यपि व्याख्यातम् । नद्या तु तद्गुणसंविज्ञान एव । तथाचैतैः संयद्वामत्वादिभिरसाधारणधर्मैरत्र ब्रह्मैव निश्चीयते । अतः पूर्वसूत्रोक्तो हेतुरपि तस्यैव साधक इत्यर्थः । एवं न्यायं वाक्यान्तरेऽप्यतिदेष्टुं सूत्रे चकार इत्याहुः * चकारादित्यादि * । तत्स्मारयन्ति * इन्द्रेत्यादि * । तत्रापि प्रथमे पर्याये, य एषोऽक्षिणीत्यारभ्यैतद् ब्रह्मेत्यन्त एवमेवोपदिष्टत्वात् तदित्यर्थः । ननु तत्र, अथ योऽयमित्यादिना प्रश्ने प्रजापतिना, एष एतेषु सर्वेष्वन्तेषु परिख्यायत इति प्रतिबिम्बस्यैव निगमनात् कथं तस्यैतदेकवाक्यत्वमिति शङ्कायामाहुः * अथेत्यादि * । एतदग्रे, उदशराव इत्यादिना इन्द्रविरोचनयोर्बोधं परीक्ष्य ताभ्यां शरीर एवात्मत्वेन ज्ञाते प्रजापतिना, अनुपलभ्यात्मानमित्यादिना तद्दोषकथनात् तस्यैवासुरत्वं बोधितम् । श्रुत्या चोपपादितम् । अतस्तदेवासुरं, न तु ततः पूर्वतनमपीत्यर्थः । नच प्रजापतिनैवं श्लिष्टं किमित्युपदिष्टमिति शङ्क्यम् । अधिकारपरीक्षार्थत्वात् । नच मिथ्याभाषित्वं प्रतारकत्वं वा । अन्तर्यामिब्राह्मणे तस्य सर्वान्तरत्वश्रावणात् प्रतिबिम्ब अबादौ चात्मनः सत्त्वेन, यत एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति कथनेन तदुभयाभावादिति ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ अभिधानं विवृण्वन्ति * एतदमृतमित्यादि * । अयमर्थः । अत्र ह्येतद्विशेषणत्रयं पूर्वमभिधायाग्रे

स्येति । तदा अमृतादिवचनं व्यर्थं स्यात् । तद्धर्माणां पूर्वमेव प्राप्तत्वात् । तस्मादमृतमानन्दः, अभयं चिद्, ब्रह्म सत्, सच्चिदानन्द आत्मेत्युक्तं भवति । अत, एष इत्यक्षिपुरुषं निर्दिश्य सुखविशिष्टमभिधीयते । सच्चितोर्न ब्रह्मख्यापकत्वमिति सुखमेव निर्दिष्टम् । अतः सुखविशिष्टाभिधानादेव ब्रह्मत्वान्यमिति । एषा मुख्योपपत्तिरित्येवकारः ।

चकारात् सदादिभिरपि । तस्माद् ब्रह्मैवाक्षिपुरुषः ॥१५॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

स्वरूपतो निर्णीय फलतो निर्णयमाह । श्रुतोपनिषत्कस्य, श्रुता उपनिषद् विद्या येन तस्य प्रविदो या गतिर्देवयानाख्या

संयद्वामत्वादय उच्यन्ते । तेनैतत्त्रयस्य स्वरूपबोधकत्वमिति ज्ञायते । तच्च सच्चिदानन्दात्मकमतोऽत्राऽमृतपदमानन्दवाचकमिति सनत्कुमारेण सुखरूपं भूमानं प्रस्तुत्य, यो वै भूमा तदमृतमिति छान्दोग्ये श्रावणाज्ज्ञेयम् । अभयपदं चिद्वाचकमिति त्वभयं ह वै जनक प्राप्तोऽसीति ज्ञानोपदेशोत्तरमभयपदेनोपसंहारात् । ब्रह्मपदं सद्वाचकमिति च, सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र प्रथमनिर्देशादिति । एवं सति पूर्वं यदग्निभिः कंपदेन सुखविशिष्टमुक्तं, तदत्राऽमृतपदेनाभिधीयते । नच सच्चितोरपि स्वरूपभूतत्वाद् ब्रह्मविख्यापकत्वशङ्क्यम् । तयोर्यथायथं जडे जीवे च प्रव्यक्तत्वेनैकान्तिकतथात्वाभावात् । अतः सुखमेव विशेषणत्वेन निर्दिष्टम् । * सदादिभिरिति * आनन्दसहभूतैः सच्चित्संयद्वामत्वादिभिः ।

रामानुजाचार्यास्त्वेतदग्रे, अत एव च स ब्रह्मेति सूत्रान्तरं पठन्ति । अर्थस्तु, अत एव सुखविशिष्टाभिधानादेव, स खंपदोपदिष्ट आकाशो ब्रह्मेति । तत् पूर्वसूत्रेण गतार्थत्वादन्यैर्नाद्रियते ॥१५॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ एतत्सूत्रप्रयोजनमाहुः । * स्वरूपत इत्यादि * । * फलत इति * फलस्य तात्पर्यलिङ्गत्वात् तथे-

साऽक्षिपुरुषविदोऽप्युच्यते । अथ यदु चैवास्मिन् शव्यं कर्म कुर्वन्ति, यदि च नार्चिषमेवाभिसंभवन्तीत्युपक्रम्य चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति । एष देवपथो ब्रह्मपथ इत्येतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति ब्रह्मविदोऽप्येष एव मार्गः पुनरावृत्तिरहितः। चकारस्तूक्तसमुच्चयेनाधिकरणपूर्णत्वबोधकः ॥ १६ ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

त्यर्थः * ब्रह्मविदो या गतिरिति * एतस्या ब्रह्मविदां गतित्वं छान्दोग्य एव पञ्चाग्निविद्यायां तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना श्रावितम्। सैवात्र प्रत्यभिज्ञायते। गीतायामप्यग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्, तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इत्यनेन च। *अथेत्यादि* वाक्यार्थस्तु, अथेति प्रतिज्ञायाम्। यदु चैव यदि, अस्मिन् पुरुषवेत्तरि मृते, शव्यं शवसंस्काररूपमौर्ध्वदैहिकं कुर्वन्ति ज्ञातयो, यदि च न कुर्वन्ति, उभयथापि तेषामक्षिपुरुषविदां न परलोके फलवैषम्यमित्युक्त्वा विद्यावतां गमनप्रकारं वदति। अर्चिषमित्यादिना। अमानव इति। मनुकृतसृष्ट्यावनुत्पन्नः। मनवश्च शिवपर्यन्ता बोध्याः। सलोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुरिति चतुर्थस्कन्धे मैत्रेयेण महादेवेऽपि मनुपदप्रयोगात्। तेन भगवतो दूत इत्यर्थः। देवपथ इति। देवैर्गमयितृभिरुपलक्षितो मार्गः। *ब्रह्मपथ इति* ब्रह्मणः प्राप्यस्य परस्य सम्बन्धी मार्गः। * आवर्तमिति * आवृत्तिसाधनभूतमार्गम्।

मायावादिनस्तु, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः सद्योमुक्तिमङ्गीकुर्वाणा इमां गतिं नाद्रियन्ते। तत्तु व्याख्येयश्रुतिविरोधादुपेक्ष्यम्। अतिकृपानन्दभावसहकारेण सद्योमुक्तिक्रममुक्त्योरुपपत्त्योक्तश्रुतिविरोधाभावेनैतद्वक्तुर्भ्रान्तत्वापत्त्या चैतस्यानादरणीयत्वादिति ॥ १६ ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ सूत्रप्रयोजनमाहुः। *

इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयति । ननूपासनापरत्वेऽपि सर्वमुपपद्यते । तद्धर्मव्यपदेशेनैवोपासनोपपत्तेः । अतः सर्वा उपपत्तयो व्यपदेशिवद्भावेन सङ्गच्छन्त इत्येवं प्राप्त उच्यते । इतरो नात्र वाक्यार्थः । अनवस्थितेरस्थिरत्वात् । उपदेशकवाक्यत्वादुपदेष्टुरेव चक्षुर्गतं भवेत् । तथाच वक्तुर्दर्शनाभावादनाप्तत्वम् । द्रष्टुरपगमे चापगच्छति सद्वितीये तु सद्वितीयः । उपासनाकाले च सुतरामनवस्थितिः । सद्वितीयोपासनायामपि श्रवणमननयोर्भिन्नविषयत्वादनवस्थितिः । वक्तुरेव नियमे गुरोर्निर्बन्धेन सुतरामनवस्थितिः ।

इदमित्यादि * तथाचोक्ताधिकरणद्वयविषयवाक्ये उपासनाप्रसङ्गाभावेन सन्देहानुदयादेव तु तदुदयात् पुनर्विचार इत्यर्थः । पूर्वपक्षं ग्राहयन्ति *नन्वित्यादि* । विभजन्ते *तद्धर्मेत्यादि* प्रतिबिम्बपुरुषस्य ह्युपासना ब्रह्मत्वेन कर्तव्यात्रोच्यते । ब्रह्मत्वे तु तदेव बुद्धावारोहति, यदा ब्रह्मधर्मास्तत्र व्यपदिश्यन्ते । अतो व्यपदेशिवद्भावेन व्यपदेशवता ब्रह्मणा तुल्यं वर्तमानतया प्रतिबिम्बपुरुषेऽवगते उपासना सिद्ध्यतीति तत्परत्वे सर्वा उपपत्तयो गत्याभिधानान्ताः सङ्गता भवन्तीति दर्शनश्रुतिसङ्कोचो न युक्तस्तस्याः प्रथमावगतत्वेनासञ्जातविरोधतया मुख्यत्वादित्यर्थः । सिद्धान्तं व्याचक्षते * इतरो नेत्यादि* । *भवेदिति* दृश्यत इति पदेन दृश्यतया प्रतिपाद्यं भवेत् । अयमर्थः । त्वया ह्यक्षिस्थाने दृश्यत्वकथनात् प्रतिबिम्बपुरुषो वाक्यार्थत्वेनापाद्यते । तत् तदा स्याद् यदि दृश्यत्वं तस्य नियतं स्यात् । तदेव तु न । कुतः । अस्थिरत्वात् । तथाहि । किमत्राचार्येण स्वचक्षुर्गत उपदिश्यते, परचक्षुर्गतो वा । आद्ये वक्तुरनाप्तत्वादस्थिरत्वम् । द्वितीये तु द्रष्टरि पश्यत्येव प्रतिबिम्बात् तदपगमे प्रतिबिम्बस्याप्यपगमादस्थिरत्वम् । द्रष्टरि सद्वितीये तस्य सद्वितीयत्वादेकत्वोपदेशस्य विरोधादस्थिरत्वम् । उपासनाकाले च चित्तस्य स्थैर्याय नेत्रनिमीलने

किञ्च । गनमो ह्युपासनं कर्तव्यम् । तत्र चासम्भव एव । तादृशधर्मवत्त्वं च न सम्भवति । आसुरत्वं च भवेदिति चकारार्थः । तस्मादक्षिस्थाने सहज एव यो भगवानस्ति तत्परमेवैतद्वाक्यमिति सिद्धम् । व्यापकसर्वगतस्य सर्वतःपाणिपादान्त-

---

प्रतिविम्बमात्राभावादुपास्यस्याभावादुपासनायाः सुतरामस्थिरत्वम् । यदि च द्वितीयं विना तदसम्भवात् पत्नीद्वितीयस्य यागादिवत् सद्वितीयस्यैवोपासनाऽत्रोपगम्यते, तदा तु वाक्यश्रवणकाले श्रोतुरेकत्वादुपासनाकाले चान्यसापेक्षत्वाच्छ्रवणमननयोः प्रकारभेदेन भिन्नविषयत्वात् प्रमीयमाणानुष्ठीयमानावस्थयोरुपासनायाः प्रकारैक्याभावेन वैरूप्यादनवस्थितिः । यदि च श्रवणदशायां वक्तुः सत्त्वाद् वैरूप्यं परिह्रियते, तदा तु वक्तुरेव सद्वितीयत्वनियमे गुरोर्निर्बन्धापत्त्या निर्बन्धस्य कर्तुमशक्यत्वेन च सुतरां दुष्टत्वादनवस्थितिरिति । एवमनवस्थितिं व्युत्पाद्यासम्भवं व्युत्पादयन्ति *किञ्चेत्यादि* * तत्रेति * मनसि । तथाच प्रतिबिम्बस्य सन्निधापयितुमशक्यत्वादुपासनाया असम्भव इत्यर्थः । उपासनार्थं धर्माणां कल्पितत्वाङ्गीकारे सर्वैर्व्याख्यातस्य वक्ष्यमाणप्रकारकस्यासम्भवस्यैतत्त्वापादने पूर्वपक्षनिरासस्य कर्तुमशक्यत्वादेवं व्याख्यातम् । अथेतरव्याख्यातमपि सङ्गृहीतुं चकारसूचितं दूषणद्वयमन्यदाहुः * तादृशेत्यादि * आत्मत्वाऽमृतत्वादिधर्मवत्त्वं प्रतिबिम्बस्य न सम्भवति । तस्या उपासनायाः प्रतिबिम्बपरत्वे तस्या आसुरत्वं विरोचनप्रतिपन्नत्वेन श्रावितं भवेत् । ततश्च गतिविरोधो भवेदिति चकारार्थ इत्यर्थः । सिद्धमाहुः * तस्मादित्यादि * । * सहज इति । स्वाभाविकः । ननु तथापि व्यापकस्य ब्रह्मणः स्वल्पे स्थाने स्थितिः कथमुपपद्यत इत्याकाङ्क्षायां तामुपपादयन्ति *व्यापकेत्यादि*। तथाच सर्वतःपाणिपादान्तत्वेन पुरुषस्य प्राकट्यात् स्वल्पमपि स्थानं पर्याप्तं भवतीत्यत उपपद्यत इत्यर्थः । ननु सगुणस्योपाधिविशेषपरिच्छिन्नतया तावति स्वल्पे स्थाने स्थितिरुपपद्यत एवेति तद्विहाय सर्वतःपाणिपा-

तत्राधिदैवमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयिताऽन्तर्यामीति श्रूयते। तत्र संशयः। किमन्तर्याम्यधिदैवादिषु सर्वत्रैक एव, अथाधिदैवादीनां भेदाद्

स्थितेषु सर्वप्राणिष्वतिप्रसङ्ग इति तद्वारणाय विशिनष्टि। यः पृथिव्या अन्तर इति। अभ्यन्तर इत्यर्थः। एवं बहिष्ठप्राणिवारणेऽपि तदन्तःस्थस्याभिमानिनो वारणं न सम्भवतीति तद्वारणार्थं विशिनष्टि। यं पृथिवी न वेदेति। पृथिव्यभिमानिनी देवतात्मा यं न वेद न जानातीति। तेन तद्भिन्न इत्यर्थः। एवं जडाज्जीवाच्च भेदे सिद्धेऽपि तस्य तत्र स्थितं किं प्रयोजनमित्याकाङ्क्षायामाह। यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीति। गामाविश्य च भूतानि धारयाम्यहमोजसेति भूतधारणकार्यसिद्ध्यर्थं, सा शरीरम्। तन्नियमनं च तत्कार्यसिद्ध्यर्थम्। अन्यथा तद्विसम्मतौ कार्यं न सिद्ध्येदिति। अत्र द्वितीयमन्तरपदं नामधातुनिष्पन्नम्, अन्तरं करोत्यन्तरयति, अन्तरयतीत्यन्तर इति सर्वान्तःस्थापकत्वबोधनार्थम्। अन्यथा पौनरुक्त्यापत्तेरिति। एवं सर्वत्र बोध्यम्। अत्र प्रश्नवाक्यानुक्तधर्माणां बोधनं तज्ज्ञानज्ञापकं ज्ञेयम्।

अस्मिन् वाक्यसमूहे कुत्र संशय इत्यपेक्षायामाहुः। *तत्राधीत्यादि*। संशयाकारं तद्बीजं चाहुः *किमित्यादि* तथाच सर्वान्तर्यामिणोपसंहारात् सर्वत्रैकः। अधिदैवादिपदानामव्ययीभावेन तत्र तत्राधिकरणे यौगिकत्वेऽपि, पुरुषश्चाधिदैवतं, स्वभावोऽध्यात्ममुच्यते, अधिभूतं क्षरो भावः, अधियज्ञोऽहमेवात्रेति गीतायां, तं योगमनादृत्य रूढेर्वा, तत्तदधिकृत्य यो वर्तत इति योगान्तरपुरस्कारेण योगरूढेर्वा बोधनादेतेषां नामत्वमवधार्यते। समानन्यायादधिवेदाधिलोकयोरपि तथात्वम्। नपुंसकलिङ्गं तु लोकाश्रयत्वाददोष्यम्। एवं सिद्धे तेषां नामत्वे तैरप्युपसंहाराद् भिद्यते वेति तद्बीजमित्यर्थः। नन्वन्तर्यामिणः पृथिव्याद्यन्तर्वर्तित्वस्यात्र कथनादन्तर्वर्तिनश्च ब्रह्मत्वस्यान्तस्तद्धर्मोपदेशादित्यत्र साधितत्वादत्र सन्देह एव न घटत इति किमर्थमधिकरणारम्भ इत्याकाङ्क्षायां तदुपगम्य सन्देहं

भिद्यत इति। सामान्यतस्त्वन्तस्तद्धर्मोपदेशादिति न्यायेनाऽत्रापि ब्रह्मत्वं सिद्धमेव । तथा शब्दभेदात् सन्दिह्यते । अधिदैवादिषड्भेदा आधारधर्मा भगवत्युपचर्यन्ते, अथवा सञ्ज्ञाविशिष्टा अन्य एवेति। तत्र तत्तदधिकृत्य यो वर्ततेऽभिमानेन तस्य तादृशशब्दप्रयोगः ।

अधिलोकादयश्च शाखान्तरेऽन्यत्रैव प्रसिद्धा योगरूढापकाः पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमित्यादि । अतोऽधिदैवादिशब्दा यौगिकाः सन्तो न भगवति वर्तितुमुत्सह-

---

समर्थयन्ति * सामान्यत इत्यादि * । * तथा शब्दभेदादिति * अधिदैवादिशब्दभेदात् । कथं ततः सन्देह इत्यत आहुः * अधिदैवेत्यादि * देवानां समूहो दैवम् । दैवे इत्यधिदैवमित्येवमधिकरणार्थकाव्ययीभावनिष्पन्ना एते शब्दा योगेन तांस्तानाधारानभिदधाना अत्र पृथिव्यादिवाक्यसमुदायान्ते सर्वलोकाद्येकैकवाक्यचतुष्टयान्ते प्राणादिवाक्यसमुदायान्ते च यथायथमुपनिबद्धा अधिलोकादिषु पुनरुक्ततामापद्यमाना व्यर्थाः सन्तः स्वप्रयोगसामर्थ्येनाधिदैवत्वादिरूपान् धर्मांस्तत्तदाधारेषु बोधयन्तीति ते षड्भेदा आधारधर्माः शब्दतः सन्निहितेऽन्तर्यामिणि भगवत्युपचर्यन्ते । * अथवा तत्तदधिकृत्य येऽभिमानेन तत्र तत्र वर्तन्तेऽभिमानिनोऽधिदैवादिसंज्ञाविशिष्टाः षडन्ये कल्पनीया, यद्धर्मा भगवत्युपचाराद् भवेयुरित्येवं सन्देहो घटत एवेत्यर्थः । एवं सन्देहं समर्थयित्वा पूर्वपक्षमाहुः । * तत्रेत्यादि * । * तत्तदधिकृत्येति * तंतत् पृथिव्यादिकमधिकरणीकृत्य अभिमत्याऽहमिति स्वीकुर्वन् यो वर्तते तत्र तिष्ठति तत्सम्बन्धी अधिदैवादिप्रयोगः । सांख्यपञ्चशिखवृत्तौ तत्तदभिमानिषु प्रसिद्धत्वादिति । ननु योगद्वयस्य तौल्येऽप्यत्राभिमानिग्रहणे को हेतुरित्याकाङ्क्षायां तमुपपादयन्नधिकरणपक्षं दूषयन्ति * अधिलोकेत्यादि * । * शाखान्तरे इति * तैत्तिरीयाणां शिक्षोपनिषदि । *अन्यत्रैवेति* लोकादिष्वधिकरणेषु । *अत इत्यादि * वैदिकप्रसिद्धेर्बलिष्ठत्वात् ते तत्र यौगिकाः सन्तो यौगिका-

न्ते । नाप्यन्ये कल्पनीया यद्धर्मा उपचाराद् भगवति भवेयुः । कल्प्यमानस्य सर्वानुस्यूतस्य तादृशस्य भगवद्व्यतिरिक्तस्यासम्भवात् । तस्मादन्तर्यामिब्राह्मणं कुत्राप्ययुक्तं सत् तत्तदभिमानिदेवतास्तुतिपरमेव तत्तदुपासनार्थं भविष्यति ।

अज्ञानं चासन्देहे सन्देहवदुपपद्यते । देहोऽसवोऽक्षा इति

नामौपचारिकप्रयोगादर्शनात् ते तत्र तथा भवितुं न शक्ता इत्येव हेतुरित्यर्थः । तर्हि मास्तु भगवति वृत्तिरन्येष्वभिमानिष्वेव साऽस्त्वित्यत स्तामपि दूषयति * नापीत्यादि * । * कल्पनीया इति * संज्ञित्वेन कल्पनीयाः । कुतो नेत्यत आह * कल्प्यमानस्येत्यादि * एते हि शब्दाः क्वचिद्वाक्यमध्ये, क्वचिच्च वहुवचनान्तसर्वलोकादिशब्दवत्तद्वाक्यान्ते प्रयुक्ता इति तेषु तत्तत्मध्यानुस्यूतस्याभिप्रेतत्वेन तादृशस्यापि क्वचित् प्रतिनियतत्वदर्शनेनात्र च तदनुक्त्या भगवद्व्यतिरिक्तस्याभिमन्तुः संज्ञितयाऽत्र कल्पयितुमशक्यत्वेनासम्भवादित्यर्थः । सिद्धमाह * तस्मादित्यादि * । * तस्मादिति * एतेषां शब्दानामधिकरणे वर्तने वैयर्थ्यस्य बाधकतया, भगवति वर्तनेऽभिमानस्य बाधकतया, सङ्घाताभिमानिनि जीवे वर्तने च तदनुक्तेर्बाधकतयाऽधिकरणस्य भगवतोऽतिरिक्तस्याभिमन्तुश्च तत्संज्ञित्वेन वक्तुमशक्यत्वे संज्ञोपजीविन उपचारस्यापि वक्तुमशक्यत्वादन्तर्यामिब्राह्मणं पूर्वोक्तत्वन्वेतुमयुक्तं सत् तथेत्यर्थः । नन्वेवमपि वक्तुमशक्यम् । तेषु वाक्येषु यं पृथिवी न वेदेत्यादिभिरुक्तस्यान्तर्याम्यज्ञानस्य श्रावणात् तस्य चाभिमानिधर्मत्वादित्यत आह * अज्ञानं चेत्यादि * उक्तविधमज्ञानमपि, सा अङ्ग वेद यदि वा न वेदेत्यत्र यथा सन्देहः कल्पनयोच्यते तथाऽत्राऽज्ञानमप्युच्यत इत्युपपद्यत इत्यर्थः । ननु तथापि ज्ञाने अज्ञानं काप्यदृष्टं कथं कल्पनीयमित्यतो हेत्वन्तरमाह * देह इत्यादि * इदं षष्ठस्कन्धे दक्षस्तुतावस्ति । 'देहाऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे' इति । अत्र मनवोऽन्तःकरणानि । अर्थस्तु देहादयो मात्रान्ता आत्मानं दृश्यं स्वस्व-

न्यायाद्वा । न तु निषिद्धसंज्ञा भगवति कल्पयितुं शक्येति ।
एवं प्राप्ते, उच्यते ।

अन्तर्याम्यधिदैवादिषु । अन्तर्यामी अधिदैवादिषु भगवानेव । नान्यस्तादृशो भवितुमर्हति ।

ननु चोक्तं भगवति कथं निषिद्धकल्पनमिति । तत्राह ।
तद्धर्मव्यपदेशात् । तेषां धर्मास्तद्धर्माः । तत्प्रयुक्तिबोधकाः । ते विशेषेण भगवत्यपदिश्यन्ते । सर्वेषां तत्तत्कार्यसामर्थ्यं च भगव-

---

रूपम्, अन्यम् इन्द्रियवर्गदेवतारूपं न विदुः। यद् उक्तं सर्वं तत् तन्मूलभूतान् गुणान् सत्त्वादींश्च पुमाञ्जीवो वेद। तज्ज्ञः पूर्वोक्तसर्वज्ञोऽपि सन् यम् इतोऽप्यधिकं सर्वज्ञं न वेद, तमनन्तं भगवन्तमहमीडे स्तौमीति। तथाच यथात्र देहादीनां जडतया योग्यताभावेनासम्भवन्निषेधो नित्यानुवादस्तथा, यं पृथिवी न वेदेत्यादावपि पृथिव्यादिपदैर्जडपरामर्शाज्ज्ञाननिषेधो नित्यानुवाद इति नान्यथायातुपपद्यत इत्यर्थः। ननु कुतोऽयमाग्रहः क्रियते, भगवत्संज्ञात्वमेव कुतो नाद्रियत इत्यत आह * न त्वित्यादि *। * निषिद्धसंज्ञेति * निषिद्धेनाभिमानेन कृता संज्ञा सा निकृष्टा। अनुत्कृष्टस्य ह्युत्कृष्टत्वेनोपासनं दृश्यते, मनो ब्रह्मेत्यादौ, न तूत्कृष्टस्य निकृष्टत्वेन । अतः कल्पयितुमशक्येत्यर्थः। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं व्याचक्षते * उच्यत इत्यादि * । अत्र नेष्वधिदैवादिपदेष्वन्तर्यामी भगवानेवोच्यते । न ह्यन्य एकः सर्वानुस्यूतो भवितुमर्हति । नन्वभिमानिष्वेता संज्ञाः प्रसिद्धाः । भगवति तु नाभिमान इति निषिद्धस्याभिमानस्य कल्पनं कथं कर्तव्यमित्याशङ्कायां तद्वारणायैतत्प्रवृत्तिनिमित्त सूत्रे आचार्य आह । तद्धर्मव्यपदेशादिति । तेषां पृथिव्यादीनां तदभिमानिनां च ये धर्मास्ते तद्धर्मास्तत्प्रयुक्तेस्तत्कार्यव्यापारावेशबोधका भूतधारकत्वादयस्तदधिष्ठातृत्वादयश्च ते नियमयितृत्वरूपेण विशेषेण भगवत्यपदिश्यन्ते । पृथिव्यादिवाक्येष्वभिमान्यज्ञेयत्वस्य पृथिव्यादेः शरीरत्वस्य पृथिव्यादिपदैस्तदुभयं गृहीत्वा तद्यमनस्य च बोधनेन कथ्यन्ते, तस्मात् । एतस्यैव व्याख्यानं * सर्वेषामित्यादि * चोऽप्यर्थे * ।

तो, न तु स्वतस्तेषामिति। एवञ्च सत्यन्यत् सर्वं सङ्गतं भवति। तस्माद् ब्रह्मवाक्यमेव ।

एवञ्चेत्यत्र चोऽवधारणे तथाचायमर्थः। सांख्ये हि तत्तदभिमान्येव नियामकतयाऽधिदैवपदेनोच्यते। करणमेव शरीरे वर्तमानतयाऽध्यात्मपदेन। विषयश्च भूतेषु वर्तमानतयाऽधिभूतपदेन। गीतादौ तु पुरुषादय उच्यन्ते। अत्र तु ततोऽप्यधिकाः शब्दा इति सांख्योक्ता गीतोक्ताश्चार्था नात्राभिप्रेताः। अथ प्रश्नानुरोधान्न्यूनतादोषं परिहृत्य गीतोक्ताः स्वभावादयो ग्राह्यास्तदापि तेषां ये धर्मास्तत्तदधिष्ठातृत्वादयस्तेऽपि भगवन्नियमितास्त्ववश्यं वाच्याः। एकस्य सर्वानुस्यूतस्य नियन्तुर्बोधनार्थमेवान्तर्यामिब्राह्मणस्य प्रवृत्तत्वात्। एवं सति यदि तेऽतिरिक्ता अत्राभिप्रेताः स्युस्तदा पृथिव्यादिवत् तानपि नियम्यतया वदेत्। अतस्तेऽत्राधिदैवादिपदेषु नाभिप्रेताः। किन्तु, इत्याधिदैवतमित्यादाविति शब्दः प्रकारे हेतौ वा भवंस्तथा वा तेन हेतुना वाऽधिदैवतादिशब्दानां भगवद्वाचकत्वमेव बोधयतीति। तेनेदं सिद्ध्यति। विषयवाक्य उद्दालकेनैतल्लोकपरलोकयोः सर्वभूतानां चान्तर्वर्तित्वे सति तन्नियामकोऽन्तर्यामिशब्दवाच्यः पृष्टः। तत्र चेद् याज्ञवल्क्यस्तावदेव वदेत् तदाऽन्तर्यामिज्ञातृत्वं न स्फुटीभवेदत उद्दालकश्रुतीस्तद्धर्मान् विशेषतः पृथिव्यादिवाक्यैः प्रकाशयति। तत्र पृथिव्यग्निकार्यं भगवत्प्रयुक्तमिति गीताद्वादशाध्याये, गामाविश्य च भूतानीति सार्द्धेनोक्तम्। ततः सर्वस्य चाहं हृदि संनिविष्ट इत्यादिनाऽन्तर्यामित्वं पुरुषोत्तमत्वं च निगमितम्। आकाशकार्यस्य तथात्वं तृतीयस्कन्धे, अदो ददाति श्वसतां पदं यन्नियमान्नभ इति स्फुटम्। वाय्वादित्यकार्यस्य तथात्वं, भीषाऽस्मादिति श्रुतौ। तत्राग्नीन्द्रयोः कार्यं न स्फुटं, तदपि तृतीयस्कन्धे, वर्षतीन्द्रो दहत्यग्निरित्यनेन बोधितम्। अत्र त्विन्द्रस्थाने विद्युत्स्तनयित्नू। एवमन्येषां कार्यस्यापि भगवत्प्रयुक्तत्वं ततस्ततो बोध्यम्। विषयश्रुतावधिदैवतपदं, सूत्रे त्वधिदैवपदं, तथापि न तयोरर्थभेदः। गीतायाम, अधिदैवं किमुच्यत इति प्रश्ने, पुरुषश्चाधिदैवतमित्युत्तरात्। एवं देवधर्माणां भगव-

अन्यथा त्वधिकरणारचना, अन्तस्तद्धर्माधिकरणेन गतार्थत्वादयुक्तैव ॥ १८ ॥

त्वप्रयुक्तत्वबोधनात् परलोकात्मकजन्मान्तरीयदेहयमयितृत्वज्ञानं स्वस्य याज्ञवल्क्येन प्रकाशितम् । ततो लोकपदस्य भूरादिष्वाधारेष्वपि प्रयोगाद्, अथाखिलोकमिति प्रतिज्ञाय तत्सम्बन्धि सर्वं पूर्ववद् बोधितम् । ततो लोकान् कथं यमयतीत्यपेक्षायां, वेदयज्ञाभ्यां यमयतीति बोधनायाधिवेदाधियज्ञवाक्यद्वयमुक्तम् । ततः सर्वभूतयमनं पूर्ववदेवेति बोधनायाधिभूतवाक्यम् । तत एतल्लोकनियमनबोधनाय दशाध्यात्मवाक्यानीत्येवं कार्यज्ञानमुक्त्वा, तत्स्वरूपमिदमित्थतया वक्तुमशक्यमिति बोधनायादृष्टो द्रष्टेत्याद्याह । तत उपसंहारे, अतोऽन्यदार्त्तमित्यनेन तस्य सुखरूपत्वं यदाऽऽह तदान्तर्यामिज्ञातृत्वं वक्तुरभगत्योद्दालकस्तूष्णीं भूत इत्युक्तम् । तेन सर्वेषां स्वल्पेषु महत्स्वन्यसापेक्षेषु तन्निरपेक्षेष्वपि कार्येषु यत् सामर्थ्यं तदन्तर्यामिणः सकाशादेव, न तु स्वत इति साधितम् । तदेव, यत्किञ्चित् पौरुषं पुंसां मेने कृष्णानुकम्पितमिति श्रीभागवते । तेनाधिदैवादिपदप्रवृत्तिनिमित्तभूतो योऽभिमानः सोऽपि भगवत्प्रयुक्त इति तेषां पदानामभिमानिष्वौपचारिकत्वबोधनायैव तत्कथनं, नो चेत् तद्वैयर्थ्यमेव । तदनुक्तावपि विवक्षितज्ञापनस्याप्रत्यूहत्वादिति सिद्ध्यति । तेन सूत्रस्थमधिदैवादिष्विति पदं देहलीदीपवदुभयत्रापि सम्बध्यते । तथाचानेनास्पष्टलिङ्गेनान्तर्यामिण एकत्वसाधनादधिकरणवैयर्थ्यमिति । मतान्तरं दूषयन्ति * अन्यथेत्यादि * । सा रचनात्वेवम् । अस्मिन् वाक्येऽन्तर्यामीत्यपूर्वसंज्ञादर्शनात् किमधिदैवाद्यभिमानी देवतात्मा, किं वा परमात्मेत्यादिः संशयः । तत्र पृथिव्येवास्यायतनमग्निर्लोको मनो ज्योतिरिति श्रुतौ कार्यकरणवत्त्वात् पृथिव्यादीनन्तस्तिष्ठन् यमयतीति देवतात्मनः स्थितेरुक्तत्वात् तस्य यमयितृत्वसम्भवादित्येवं प्राप्ते, तद्धर्माणामात्मत्वाऽमृतत्वपृथिव्याद्यज्ञातत्वादीनां निर्देशात् परमात्मैवोच्यत इत्यादिरूपा । सा त्वन्तस्तद्धर्माधिकरणे स्पष्टलिङ्गैरेव सिद्धा । अत्राऽप्यमृतत्वादिभिः स्पष्टैरेव लिङ्गैरुपपाद्यत इति तथेत्यर्थः ॥ १८ ॥

नच स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

ननु ब्रह्मवादे अन्तर्यामी न प्रसिद्धः। जीवब्रह्मजडानामेव प्रसिद्धत्वात् । अतोऽन्तर्यामिणः सांख्यपरिकल्पितस्य गुणयोगात् तादृशस्य ब्रह्मत्वे वा कः पुरुषार्थो भवेत् ।

न हीश्वरं प्रकृतिधर्मारूढमन्तर्यामिणं मन्यन्ते। तादृशस्योपनिषत्स्वभावात् पूर्वपक्षन्यायेन स्तुतिपरता, तन्मतस्य वा श्रौतत्वमित्याशङ्क्य परिहरति। नच स्मार्तं, स्मृतिप्रसिद्धं स्मार्तं सांख्यमतसिद्धमिति यावत् । तादृशमन्तर्यामिरूपमत्र भवितुं नार्हति।

नच स्मार्तमतद्धर्माभिलापात् ॥ सूत्रमवतारयितुं किञ्चिदाशङ्क्याहुः * नन्वित्यादि * । अयमर्थः। सर्वं खल्विदं ब्रह्म, सन्मूलाः सौम्येमाः प्रजा इत्यादिश्रुतिसिद्धो वादो ब्रह्मवादः । तत्र तु कार्यत्वेन जडजीवौ, कारणत्वेन ब्रह्मेति त्रय एव पदार्थाः प्रसिद्धाः । अन्तर्यामी तूभयथापि न प्रसिद्धः । अतो नियमनरूपेण चेतनधर्मेणाऽऽत्मत्वेन च प्रधानं जडं व्युदस्य, ब्रह्म वा जीवो वा कश्चित् कल्प्यः । तत्र ब्रह्मणोऽशरीरत्वात् साधारणजीवस्य च सर्वनियामकत्वादर्शनात् कार्येश्वरभूत एव कल्पनीय । तादृशश्च महत्तत्त्वं प्रकृतिं वा योऽभिमन्यते, स भवति । तत्रापि महत्तत्त्वावस्थान्तररूपसूत्रान्तर्गतत्वं नास्य विवक्षितमिति प्रकृत्यभिमान्येव भवतीति तादृशस्यान्तर्यामिणः सांख्यपरिकल्पितस्य तद्गुणानां सत्त्वादीनां तमस एव वा योगात् सर्वनियामकस्य ब्रह्मत्वे साधिते कः पुरुषार्थः सिद्ध्येत् । असिद्धो हेतुः * नहीत्यादि * तथाचोपनिषत्सु तादृशेश्वरस्याभावेन श्रुतिविरोधभवनाच्च कोऽपि पुरुषार्थः सिद्ध्येत् । अतः पूर्वपक्षन्यायेनान्तर्यामिब्राह्मणस्य प्रकृत्यभिमानिस्तावकत्वं वा, सांख्यमतस्य श्रौतत्वं चाङ्गीकार्यमित्याशङ्कां परिहरतीति । एवं सूत्रमवतार्य तदर्थं वदिष्यन्तो, देवतास्तुतिपरत्वस्याग्रिमसूत्रे निरसनीयत्वाद् द्वितीयमेव परिहरतीत्याहुः * नचेत्यादि * । नपुंसकप्रयोगं समर्थयन्ति । * अन्तर्यामिरूपमिति * । हेत्वंशं द्विधा व्याकुर्वन्ति

कुतः । अतद्धर्माभिलापात् । तद्धर्माणामनभिलापात् । तद्विरुद्धधर्माणां चाभिलापात् । न ह्यत्र सत्त्वरजस्तमोगुणास्तत्कार्यं वा अभिलप्यते । तद्विरुद्धाश्चैते धर्मा, यस्य पृथिवी शरीरमित्यादि । तस्मात् सांख्यपरिकल्पितं नान्तर्यामिरूपमत्र भवितुमर्हतीति सिद्धम् । एवं सति ब्रह्मधर्मा एवैते भवन्तीति ब्रह्मवादः फलिष्यति ॥ १९ ॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

ननूक्तन्यायेन शारीर एव भवतु । को दोषः, किमिति ब्रह्मपरत्वं कल्प्यमिति । तत्राह । शारीरश्च । नेत्यनुवर्तते । शारीरश्च जीवो नान्तर्यामिब्राह्मणे तत्तदभिमानिरूपो, यस्य पृथिवी शरीरमितिवाक्यानुरोधेन भवितुमर्हति । ततोऽपि भिन्नतयाऽन्तर्यामिणो वचनात् । उभयेऽपि काण्वमाध्यन्दिनब्राह्मणद्वयेऽपि एनं जीवं भेदेनैवाधीयते ब्राह्मणाः । निःसन्देहार्थमुभ-

---

तद्धर्मेत्यादि * । के विरुद्धा धर्मा इत्यत आहुः *तद्विरुद्धा इत्यादि* न हि महदादौ विद्यमाने तदभिमन्तुर्व्यष्टिभूताः पृथिव्यादयः शरीराणि युगपद् भवितुमर्हन्ति । नच योगिवदिति वाच्यम् । गुणप्रधानभावगमकानुपलम्भात् । नापि गमकं कल्पयितुं शक्यम् । तद्धर्मानभिलापस्य बाधकस्योक्तत्वादिति । स्फुटमग्रिमम् ।

रामानुजाचार्यास्तु, शारीरश्चेत्यन्तमिदं सूत्रमङ्गीकुर्वन्ति ॥१९॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ सूत्रमवतारयन्ति * नन्वित्यादि * तथाच यथा संवर्गादिविद्या ब्रह्मविद्यास्तथाऽन्तर्यामिब्राह्मणमपीति देवतात्मस्तावकत्वेऽपि ब्रह्मत्वाविरोधात् को दोष इत्यर्थः । परिहारं व्याकुर्वते * नेत्यादि * । * ततोऽपीति * अभिमानिदेवतातोऽपि । * उभय इति * काण्वा इत्यस्य विवरणम् । * निःसन्देहार्थमिति * । विभागवचनेन बुद्धिनिश्चयत्वात् इति सन्दे-

यग्रहणाम् । यो विज्ञाने तिष्ठन्निति काण्वाः । य आत्मनि तिष्ठन्निति माध्यन्दिनाः । नचाऽऽत्मशब्देनान्यः सम्भवति । अन्येषां पूर्वमेव पठितत्वात् । अन्ते हि जीवमाह । तस्मादन्तर्यामिब्राह्मणे ब्रह्मैव वाक्यार्थ इति सिद्धम् ॥ २० ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

मुण्डके हि श्रूयते । कस्मिन्नु भगवो विज्ञात इति पृष्टे, द्वे विद्ये वेदितव्ये इत्युत्तरमाह । तत्र नामरूपात्मकजगतो विज्ञानार्थं नामांशे वेदादिः । रूपांशे परा च । तत्र वेदादिविद्यायां

———

ष्टनिरासार्थम् । नन्वततनि व्याप्नोतीत्यात्मेति योगमादाय दिगाकाशप्राणेष्वन्यतमः कश्चिद् ग्रहीतुं शक्य एवेति कुतो न सम्भवतीत्यत आहुः * अन्येषामित्यादि * । हिर्हेतौ । स्फुटमन्यत् । एवञ्चात्र स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितमिति तदसम्भवः परिहृतः ॥ २० ॥ ॥ ६ ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ पूर्वाधिकरणविषयवाक्ये, अमृत इति, अतोऽन्यदार्तमिति च कथनादन्तर्यामिणि सर्वहृदयदेशवर्तिनि भोगवैलक्षण्यसाधकं वैशेष्यं दर्शितम् । सृष्टिदशायां नियामकत्वं चोक्तम् । तत्र पुनरदृष्टो द्रष्टेत्याद्युक्तम् । तत् कुत इत्याकाङ्क्षायां तत्र हेतुबोधनाय सृष्टिपूर्वदशायां सर्वाभावान्नियामकत्वं न भविष्यतीत्याशङ्कायां च तदाप्यक्षरं नियमयतीति बोधनाय चोपोद्घातेनेदमधिकरणमारभ्यत इति प्रसङ्गरूपां सङ्गतिं बोधयितुं विषयवाक्यमुदाहरन्ति * मुण्डके हीत्यादि * अत्र सर्वा उपनिषद् विषयवाक्यतया ज्ञेया । * इति पृष्ट इति * अनेन वाक्येनैकविज्ञानेन सर्वविज्ञाने पृष्टे । * इत्युत्तरमाहेति * इत्यादिनोत्तरमाह । किमुत्तरमाहेत्यपेक्षायामाहुः । * तत्रेत्यादि * । * तत्रेति * उत्तरमध्ये । तथाचैतद्विद्याद्वयं सर्वविज्ञानार्थमाहेत्यर्थः । अत्र कस्मिन्नंशे सन्देह इत्यपेक्षायामाहुः । * तत्र वेदेत्यादि * । कुतः सन्देह इत्यपेक्षायां तद्बीज-

न सन्देहः । परायां सन्दिह्यते । किमेषा सांख्यमतविद्या ब्रह्मविद्या वेति। सांख्यधर्माभिलापात् सन्देहः । अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं, तद्भूतयोनिं परिपश्यन्ति धीरा इत्यादि । अग्रे च, दिव्यो ह्यमूर्तः पुरुषः स बाह्याऽभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः पर इत्युक्त्वा, एतस्माज्जायते इति निरूप्य, अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावित्यादिना रूपमुक्त्वा पुनः पुरुषात् सृष्टिमाह।

तत्रैकप्रकरणत्वादेकवाक्यता वक्तव्या। तत्राक्षरपुरुषयोर्भेदः प्रतीयते । तयोरुभयोरपि सृष्टिः । तद् ब्रह्मवादे न सङ्गच्छते ।

माहुः । *सांख्यधर्मेत्यादि * तथाचोपक्रमे, स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति प्रतिज्ञानादग्रे सांख्यधर्माभिलापाच्च सन्देह इत्यर्थः । तदभिलापमुपपादयन्ति * अथेत्यारभ्य * । * सृष्टिमाहेत्यन्तम् * । * अग्र इति * द्वितीयमुण्डके । तथाच पूर्वमुण्डके, अद्रेश्यत्वादिगुणकस्य भूतयोनित्वकथनात् तादृशत्वस्य प्रधाने सांख्यैरङ्गीकारात् । द्वितीयमुण्डके च, पुरुषं तद्रूपं ततोऽग्रे पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् सम्प्रसूता इति कथनात् प्रकृतिसंयोगेन पुरुषरूपस्य सृष्टेश्च तैरङ्गीकारात् तदभिलाप इत्यर्थः। एवं सन्देहबीजमुक्त्वा पूर्वपक्षमाहुः * तत्रेत्यादि * मुण्डकत्रये एकस्यैव मतस्य प्रतिपादितत्वेन वाक्यानामितरेतरसाकाङ्क्षतयैकप्रकरणत्वादेकवाक्यता सर्वस्य वक्तव्येत्यर्थः । तर्ह्युपक्रमस्याऽसञ्जातविरोधत्वेनावान्तरवाक्यापेक्षया प्रबलत्वाद् ब्रह्मवाक्यत्वेनैव सा भवत्विस्यत आह * तत्राक्षरेत्यादि * । * प्रतीयत इति * अक्षरात् परतः पर इत्यत्र प्रतीयते। * सृष्टिरिति * एतस्माज्जायते प्राण इत्यादिनोक्ता सृष्टिः।* न सङ्गच्छत इति * बाधकोपपत्तेरुपक्रमापेक्षया प्राबल्यान्न सङ्गच्छते । ननु सांख्ये प्रकृतेरेव सृष्टिरङ्गीक्रियते,

तस्मात् सांख्यमतमेवैतत् । प्रकृतिपुरुषयोः श्लिष्टत्वादन्यतरप्राधान्येनोभयोः स्रष्टृत्वम् । उभयात्मकत्वाज्जगतः । रूपमपि समष्टेर्व्यष्टीनामग्रे व्युत्पत्तिरिति । तिरोहितरूपत्वान्न ब्रह्मविद्या । किन्तु स्मृतिरेवेति । ब्रह्मविद्या वेदविद्या, उपचाराद्वेति । एवं प्राप्त उच्यते । अदृश्यत्वादिगुणकः परमात्मैव । ब्रह्मविज्ञानेनैव सर्वविज्ञानात् । तत एव विद्याया अपि परत्वम् । अक्षरस्यापि ब्रह्मत्वं, पुरुषस्यापि । तयोः परापरभावः । अभेदश्च । एतादृश एव हि

न पुरुषादतः कथं तन्मतसिद्धिरित्यत आह * प्रकृतिपुरुषयोरित्यादि * । * उभयात्मकत्वादिति * जीवजडात्मकत्वात् । * रूपमपि समष्टेरिति * अग्निर्मूर्द्धेत्याद्युक्तं रूपमपि श्लिष्टस्यैवेत्यर्थः । अत्र युक्तिमाहुः * व्यष्टीनामित्यादि * । नन्वेतत्सर्वं ब्रह्मवादेऽपि तुल्यमित्यत आह * तिरोहितेत्यादि * सच्चिदानन्दरूपस्य विषयवाक्येऽनुक्तत्वेन तिरोहितरूपत्वात् तथेत्यर्थः । ननु तथापि ब्रह्मविद्यापदविरोधो दुर्वार इत्यत आह * ब्रह्मविद्येत्यादि * ब्रह्मपदस्य वेदेऽपि शक्तेस्तथा । नन्वग्रे विद्ययोः परापरविभागमुक्त्वा तत उपनिषत्समाप्तावक्षरविद्यासमापने, तेषामेवैतां ब्रह्मविद्यां वदेतेति प्रकृतपरामर्शपूर्वकं ब्रह्मविद्यापदकथनाद् वेदविद्यापक्षो न साधीयानित्यत आह * उपचाराद्वेति * । एवं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं व्याचक्षते * उच्यत इत्यादि * । * ब्रह्मविज्ञानेत्यादि * एकविज्ञानेन सर्वज्ञानस्य ब्रह्मविद्यालिङ्गत्वम्, अपि वा तमादेशमप्राक्ष्य इत्यादिश्रुत्यन्तरे सिद्धम् । प्रकृतेऽपि, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रश्नस्योत्तरत्वेनादृश्यत्वादिगुणकस्य ततः सृष्टेश्च कथनेन तद्विज्ञानादेव सर्वविज्ञानबोधनादक्षराधिगमकत्वादेव विद्यायाः परत्वबोधनाच्च तल्लिङ्गमत्रापि दृश्यत इति स परमात्मैव, न तु प्रकृतिः । तद्विज्ञानेन पुरुषाविज्ञानात् तद्विद्यया मोक्षाभावेन परत्वानङ्गीकाराच्च तथेत्यर्थः । अत्रापि धर्मोक्तेरेव हेतुत्वम् । नन्वत्राक्षरपुरुषावुक्तावत उभयोर्विज्ञानेन तथात्वमुच्यते, न त्वेकविज्ञानेनेति नायं हेतुरित्यत आहुः * अक्षरस्येत्यादि * । * एतादृश एव हीति * अन्यथा पुरुषस्वरूप-

ब्रह्मवादः । तत्र प्रथममक्षरस्य ब्रह्मत्वमाह । अदृश्यत्वादिगुणकः परमात्मैव । कुतः । धर्मोक्तेः । तथाऽक्षरात् सम्भवतीह विश्वमिति । इयं चोपनिषत् । न ह्यत्र ब्रह्मव्यतिरिक्ताज्जगदुत्पत्तिरस्ति । पुरुषस्य ब्रह्मत्वं निःसन्दिग्धमेव । ईषद्दानन्दतिरोभावेन ब्रह्माऽक्षरमुच्यते । प्रकटानन्दः पुरुष इति । ब्रह्मविदाप्नोति परमित्यत्रैव तथा निर्णयात् । तस्माददृश्यत्वादिगुणकः परमात्मैव ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

ननु पूर्वपक्षन्यायेन ब्रह्मविद्याख्यायामपि स्मृतिर्ब्रह्मविद्यैवाऽस्तु । द्वे ब्रह्मणी वेदितव्ये मूर्तं चाऽमूर्तं चेत्यत्र विकार-

---

कथंनस्य पादत्रयेणैव सिद्धेरक्षरात् परतः पर इति तुरीयं पादं नि वदेत् । प्रयोजनाभावात् । तथाच ब्रह्मवादस्य परापरभावपूर्वकाभेदघटितत्वेनात्राप्येकविज्ञानादेव सर्वविज्ञानस्याभिप्रेतत्वेन हेतुरस्त्येवेत्यर्थः । ननूभयोः कथमभेद इत्याकाङ्क्षायामाहुः * तत्रेत्यादि * । * तत्रेति * अभेद उभयोर्वक्तव्ये । विश्वोत्पत्तेः कथं ब्रह्मधर्मत्वमत आहुः * इयमित्यादि * । नन्वेवं ब्रह्मत्वेनोभयोरभेदे, अक्षरात् परतः पर इति कथं परापरभावव्यपदेश इत्यत आहुः । * ईषदित्यादि * तथाचावस्थाभेदमादायायं भेदव्यपदेशो, न तु वस्तुभेदादतो, न ब्रह्मवादव्याघात इत्यर्थः । एवं भेदप्रत्ययस्य श्लिष्टस्पष्टत्वस्य तिरोहितरूपत्वस्य च सांख्यधर्मत्वं निराकृतम् । अतः परं पूर्वमवस्थाभेदस्यानुक्तत्वादत्र तदङ्गीकारे प्रतिज्ञान्तरस्य निग्रहस्थानस्यापत्तिरित्येतन्निराकुर्वन्ति * ब्रह्मविदित्यादि * । तथानन्दमयसूत्रस्य द्वितीयवर्णक उपपादितम् । अतो न दोषापपत्तिरित्यर्थः । सिद्धमाहुः * तस्मादित्यादि * ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ सूत्रमवतारयन्ति * नन्वित्यादि * । * स्मृतिर्ब्रह्मविद्यैवेति * । स्मृतिरेव ब्रह्मविद्येति योजना ।

स्यैव ब्रह्मपदवाच्यत्वम् । अतः प्रकृतिपुरुषावेव वाक्यार्थ इति परिहरति । इतरौ न भवतो वाक्यार्थरूपौ । कुतः । विशेषणभेदव्यपदेशाभ्याम् । विशेषणभेदो व्यपदेशश्च ताभ्याम् । अदृश्यत्वादयो गुणा न प्रकृतेर्भवन्ति । सर्वस्यापि तद्विकारत्वात् । न हि घटदर्शनेन मृन्न दृश्यत इति वदितुं युक्तम् । ब्रह्मवादे पुनः सर्वभवनसमर्थत्वाद् ब्रह्मणि विरोधाभावः । न हि नित्यं सदैकरूपं विक्रियमाणं च भवितुमर्हति । सर्वब्रह्मधर्मतुल्यत्वे तदेव ब्रह्मेति जितं ब्रह्मवादिभिः ।

अयमर्थः । पञ्चशिखवृत्तावव्यक्तपर्यायेषु नपुंसकलिङ्गस्याऽक्षरपदस्य पाठाद् योनिपदस्योपादानवाचकत्वाद् भूतयोनित्वमव्यक्तलिङ्गम् । अक्षरात् परत्वं च पुरुषलिङ्गम् । अतस्तत्सर्वं न्यक्कृत्य ब्रह्मविद्यात्वं न स्थापयितुं शक्यम् । कस्मिन् विज्ञात इति प्रश्नवाक्ये कस्मिन् मते विज्ञात इत्यर्थस्य शक्यवचनत्वादेतस्य सर्वविज्ञानस्य ब्रह्मविद्यालिङ्गत्वाभावात् । नापि ब्रह्मविद्येति समाख्यया । द्वे ब्रह्मणी इति श्रुत्या ब्रह्मपदस्य विकारेऽपि शक्तौ ग्राहितायां तस्या अप्यन्यथासिद्धत्वात् । लिङ्गापेक्षया पञ्चमत्वेनातिदौर्बल्याच्च । अतो लिङ्गबलात् प्रकृतिपुरुषावेव वाक्यार्थ इति परिहरतीत्यर्थः । सूत्रं व्याकुर्वन्ति । * इतरावित्यादि * । * व्यपदेश इति व्यपदेशभेदः । आद्यं व्युत्पादयन्ति । * अदृश्येत्यादि * । ननु ब्रह्मवादेऽप्ययं दोषस्तुल्य इति सोऽपि न वदितु युक्त इत्यत आहुः । * ब्रह्मवाद इत्यादि * । ननु प्रकृतावपि तथासामर्थ्यमङ्गीक्रियते । अतः परिहारतौल्यान्नैतदपि ब्रह्मवादलिङ्गमित्यत आहुः । * न हीत्यादि * । * भवितुमर्हतीति * । प्रधानस्य परिणामिनित्यतयैवाङ्गीकारात् तदेतादृशं भवितु नार्हति । तथाचोक्तरीत्यैकदेशदर्शने तददृश्यत्वस्याशक्यवचनत्वादेतेनैव प्रकृतिवादव्युदास इत्यर्थः । नन्वेतादृशत्वमेव तस्याः कल्प्यमित्यत आहुः । * सर्वेत्यादि * । * जितमिति * । सांख्यवादिनः प्रतिज्ञासन्न्यासप्रतिज्ञान्तरयोरा-

यः सर्वज्ञः सर्वविदित्यादयस्तु सुतरामेव न प्रकृतिधर्माः । व्यवधानाच्च-न पुरुषसम्बन्धः । अक्षरनिरूपण एव पुरुषविशेषणाच्च । येनाक्षरं पुरुषं वेद सत्यमिति । तस्मादक्षरविशेषणानि, न प्रकृतिविशेषणानि । नापि पुरुषविशेषणानि सांख्यपुरुषस्य । न हि दिव्यत्वादयो गुणाः पुरुषस्य भवन्ति । न हि तन्मते पुरुषभेदो ह्यङ्गीक्रियते जीवब्रह्मवत् । नच तस्य बाह्याभ्यन्तरत्वम् । सर्वत्वाभावात् । न हि तस्माज्जायते प्राणादिः । तस्मात् पुरुषविशेषणान्यपि न सांख्यपुरुषविशेषणानि । अतो विशेषणभेदः ।

पाताज्जितमित्यर्थः । अन्यमपि विशेषणभेदमाहुः । * य इत्यादि * नन्वेतानि पुरुषविशेषणानीति न दोष इत्यत आहुः । * व्यवधानादित्यादि * अदृश्यत्वसर्वज्ञत्वादयः प्रथममुण्डके, पुरुषनिरूपणं च द्वितीयमुण्डक इति व्यवधानात् तथेत्यर्थः । पुनर्विशेषणान्तरमाहुः । * अक्षरेत्यादि * । तथाचाक्षरनिरूपणे आद्यन्तयोः पुरुषविशेषणदर्शनात् पुरुषात्मकमक्षरमत्राभिप्रेतं, न प्रकृत्यात्मकमतस्तथेत्यर्थः । येनेति वाक्यं तु प्रथममुण्डकसमाप्तिस्थम् । ननु पञ्चशिखवृत्तौ पुंलिङ्गस्याक्षरपदस्य पुरुषपर्यायेषु पाठान्नपुंसकत्वमनादृत्य पूर्वत्रापि पुरुष एव ग्राह्य. । तथा सति पुरुषविशेषणानि कुतो न सांख्यपुरुषविशेषणानीत्यत आहुः । * न हि दिव्येत्यादि * साक्षित्वकैवल्यमाध्यस्थ्यद्रष्टृत्वाकर्तृत्वातिरिक्तधर्मानङ्गीकारात् तथेत्यर्थः । ननु बहुषु कश्चित् तादृशोऽन्यस्तु, को दोष इत्यत आहुः । * न हि तन्मत इत्यादि * । तथाच नानापुरुषाङ्गीकारेऽपि सर्वेषां तुल्यत्वमेव तन्मते, न तु नियम्यनियामकभावादिनोत्कर्षापकर्षावतस्तथाङ्गीकारस्तन्मतभञ्जक इत्यर्थः । ननु दिव्यत्वं दिविभवत्वमलौकिकत्वं वा । तदुभयमपि व्यापकत्वप्राकृतगणवैलक्षण्याभ्यामुपपद्यते । एकत्वं च जात्यपेक्षया । शेषास्त्वमूर्तत्वादयः सिद्धान्ते न तुल्या इति कथं ते तत्र नेत्यत आहुः । * नचेत्यादि * । किञ्चै-

व्यपदेशभेदश्च । ब्रह्मविद्यैवैषेति । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामित्युपक्रमे, मोवाच तां तत्त्वतो ब्रह्मविद्यामिति मध्ये, तेषामेवैतां ब्रह्मविद्यां वदेतान्ते । तस्मान्न सांख्यपरिकल्पितौ प्रकृतिपुरुषौ वाक्यार्थः । न हि ब्रह्मा ज्येष्ठपुत्राय स्मृतिरूपां विद्यां वदतीति चकारार्थः ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥

अग्निर्मूर्द्धा चक्षुषी इत्यादिरूपं न हि प्रकृतिपुरुषयोरन्यत-

---

कत्वस्य जातिप्रयुक्तत्वे सर्वेषां तौल्याद्, दिव्यो ह्यमूर्त इति मन्त्रानन्तरमन्त्रोक्ता सृष्टिरपि सर्वेभ्यः स्यादिति सापि सांख्ये तथानङ्गीकाराद् विभिद्यते । तथा महदादिक्रमेण तत्र सृष्टिर्न तु प्राणादिक्रमेण, न वा सह, न वा ततः साक्षात् । अतोऽपि तथेत्यर्थः । एवं विशेषणभेदरूपं दूषणं व्युत्पादितम् । द्वितीयं व्युत्पादयन्ति । * व्यपदेशेत्यादि * । तथाच यदि सांख्यमतविद्याऽत्राभिप्रेता स्यात् तदा त्रिषु क्वचित् सांख्यविद्यामिति, तत्त्वविद्यामिति वा वदेत् । अतो विद्याव्यपदेशभेदादपि तथेत्यर्थः । * ब्रह्मेति * हिरण्यगर्भो वेदाचार्यः ॥ २२ ॥

रूपमपि समष्टिव्यष्टिजनकस्य यदुक्तं तदपि सांख्यमताद् भेदज्ञापकमित्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति ॥ रूपोपन्यासाच्च ॥ नचेदं रूपं श्लिष्टस्येति शक्यवचनम् । यथा सुदीप्तात् पावकादिति मन्त्रेण केवलादक्षरात् सृष्टिमुक्त्वा, ततो, दिव्यो ह्यमूर्त इति मन्त्रेण केवलस्य पुरुषस्याक्षरात् परत्वमुक्त्वा, तत, एतस्माज्जायत इति मन्त्रे एतत्पदेन केवलं पुरुषं परामृश्य ततः प्राणादिसमष्टिसृष्टिमुक्त्वा तस्यैव रूपमग्निर्मूर्द्धेतिमन्त्रे वदन्ती श्रुतिर्मन्त्रान्ते, एष सर्वभूतान्तरात्मेति केवलं परामृशति । ततोऽग्रे, तस्मादग्निः समिध इत्यादिभिर्व्यष्टिसृष्टिं वदतीति । इदं च न केवलस्य तन्मतीयस्य । तथा तैरनङ्गीकारात् । नापि केवलायाः । अन्तरात्मत्वोक्तिविरोधात् । अत प्रकृतिपुरुषयोरन्यतरस्य न सम्भवतीति । ब्रह्मवादे तु विश्वरूपत्वेन विश्व-

रस्य सम्भवति । ब्रह्मवादे पुनर्विश्वकायस्यैतद्रूपम् । सूत्रविभागात् पुनर्मुख्योपपत्तिरेवेति सूचितम् । चकारेण श्रुत्यन्तराविरोध एकवाक्यता च सर्वेषां वेदान्तानामिति। तस्मादक्षरशब्देन पुरुषशब्देन च ब्रह्मैव प्रोक्तमिति ब्रह्मविद्यैवैषेति सिद्धम् ॥२३॥

कायत्वस्यैवोक्तत्वादुपपन्नतरम् । अतो नात्र सांख्यगन्धोऽपीत्यर्थः । विशेषणभेदव्यपदेशरूपोपन्यासेऽश्य इत्यनुक्त्वा यदत्र भिन्नं सूत्रमुक्तं तत्तात्पर्यमाहुः * सूत्रेत्यादि * । *चकारेणेत्यादि* । तथाचैतद्द्वयमपि तन्मतबाधकतया चकारेण सङ्गृहीतमित्यर्थः । तेन सांख्यमतसिद्धे कार्येश्वरेऽतिव्याप्तिर्निवारिता ।

रामानुजाचार्यास्तु, यया तदक्षरमधिगम्यत इत्युपक्रान्तस्य भूतयोनेरक्षरस्यैव, यः सर्वज्ञः सर्वविदित्यग्रिमवाक्ये परामर्शादक्षरपदेन परमात्मैवोच्यते । अक्षरात् परतः पर इत्यत्र तु पञ्चम्यन्तेनाऽक्षरपदेन भूतसूक्ष्ममचेतनमुच्यते । तथाचाक्षरादव्याकृतात् परः पुरुषस्तस्मादपि परः परमात्मैव । अत्र गमकं तु भूतयोनित्वं परात्परत्वं रूपं च लिङ्गत्वात् । भूतसूक्ष्मस्याक्षरत्वं तु, अश्नुत इति वा, न क्षरतीति वा स्वविकारव्याप्त्या महदादिवन्नामान्तराभिलापयोग्यक्षरणाभावाद्वा योगेन कथञ्चिदुपपद्यत इत्याहुः । तन्नेदमवधेयम् । गीतायां द्वादशे, 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमा' इति प्रश्नेन तदुत्तरेण चाक्षरपुरुषोत्तमयोरैक्यमवस्थाभेदेन भिन्नत्वं च बोधितम् । ततः पञ्चदशे, द्वाविमौ पुरुषौ लोक इति सन्दर्भे अक्षरपुरुषादुत्तमत्वं स्वस्योक्तम् । श्वेताश्वतरश्रुतावपि, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक इत्यक्षरस्यात्मत्वं, देवस्य क्षराक्षरेशितृत्वं चोक्तम् । अत्राप्यक्षरस्य पुरुषत्वं पूर्वमुक्त्वा अक्षरात् परत्वं पुरुषस्य यदुच्यते तेन गीताद्युक्तरीतिकमेवाक्षरपुरुषयोः स्वरूपं ज्ञाप्यते । न तु तदक्षरमतिहाय भूतसूक्ष्मरूपम् । प्रकृतहानाप्रकृतकल्पनयोः प्रसङ्गात् । नच परत इति पञ्चम्यन्तवैयर्थ्यम् । एतस्याक्षरविशेषणत्वेनोपपत्तेः। सांख्ये प्रधानस्याप्यक्षरपदवाच्यत्वेन तद्वार-

णस्याप्यावश्यकत्वादिति ।

भास्कराचार्यास्तु, परत इति पदमक्षरविशेषणत्वेनाङ्गीकुर्वन्ति । अक्षरपदं चात्र प्रधानबोधकमङ्गीकुर्वन्ति । रूपं च 'कारणात्मनः कार्यात्मनावस्थितस्येति चाहुः ।

शङ्कराचार्यास्त्वग्निर्मूर्द्धेत्यादिनोक्तं रूपं परमेश्वरस्येति व्याख्याय, नेदं रूपं परमेश्वरस्य । जायमानमध्ये एतदुपन्यासात् । एतस्माज्जायते प्राण इति पूर्वं प्राणादीनां, तस्मादग्निः समिधो यस्य सूर्य इत्यनन्तरं च दर्शनात् । नच सर्वात्मत्वबोधनाय मध्ये पाठ इति युक्तम् । पुरुष एवेदं विश्वं कर्मेत्यस्य सृष्टिकथनोत्तरं वक्ष्यमाणत्वात् । अतो हिरण्यगर्भः समवर्तताग्र इति, स वै शरीरी प्रथम इति श्रुतिस्मृतिभ्यां तस्यैव जायमानत्वशरीरित्वयोर्निश्चायनात् तस्यैवेदं रूपम् । नच सूत्रवैयर्थ्यम् । परमेश्वरप्रतिपत्तिहेतुतया तस्योक्तत्वादित्यन्ये मन्यन्त इत्याहुः ।

वाचस्पतिस्तु प्रकरणापेक्षया सन्निधेर्निर्बलत्वात् प्रकरणिन एवेदं रूपमिति यद्यपि सिद्ध्यति, तथापि प्रकरणिनः शरीरेन्द्रियादिरहितस्य विग्रहवत्ताविरोधात् सिद्धे प्रकरणिनोऽसम्बन्धे मूर्धादिश्रुतीनामत्यन्तविप्रकृष्टप्रकरणापेक्षयाऽतिबलिष्ठत्वाज्जायमानमध्यपातित्वं जायमानग्रहणे कारणमुपन्यस्तं भाष्यकृतेत्याह । तन्मन्दम् । भाष्यकृता एतस्यान्यमतत्वेनैवोपन्यासात् । तदुपन्यासारम्भे, अन्ये पुनर्मन्यन्त इति पुनःशब्देनास्य पक्षस्येष्टत्वस्य स्वयमेवापादनात् । भाष्यकारस्यैवमभिप्राये तेन मूर्द्धादिश्रुतिरेव प्रमाणतयोपन्यस्येत । अतः सूत्रं भाष्यं च स्वाग्रहमात्रेण विरुन्धन्नतिपाण्डित्यं द्योतयतीति बोध्यम् । एतेनैव भैक्षवमपि दत्तोत्तरम् ।

शैवस्तु पूर्वानुसार्येव ।

माध्वास्तु, 'अपरं त्वक्षरे या सा प्रकृतिर्जडरूपिका । श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया । तामक्षरं परं प्राहुः परतः परमक्षरम् । हरिमेवाखिलगुणमक्षरत्रयमीरितम्' इति स्कान्दादक्षरपदं त्रिष्वपि रूढमङ्गीकृत्य, अक्षरात् परतः पर इत्यत्र प्रकृतितः परं यल्लक्ष्मीरूपमक्षरं तस्मादपि परोऽदृश्यत्वादिगुणकोऽक्षरशब्दवाच्यः पुरुषस्तदुभयभिन्न उक्तविशेषणादेव । यः सर्वज्ञ इत्यादिविशेषणात् प्रकृतितोऽपि भिन्नः । तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इति

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

अधिकरणत्रयेण भोगमुपपाद्य पूर्वाधिकरणे अदृश्यत्वादिगुणानुक्त्वा प्रसङ्गाद् रूपमुपन्यस्तम्। अधुना साकारब्रह्मतामुपपादयितुमिदमधिकरणमारभते । को न आत्मा किं ब्रह्मेति, आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषितमेव नो ब्रूहीति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया च मूर्द्धादिभावमुपदिश्याऽऽम्नायते ।

नामरूपाद् ब्रह्मणः शब्दब्रह्मरूपाच्चतुर्मुखाद्भेदेन व्यपदेशाच्च विरञ्च्यः। जुष्टं यदा पश्यत्यन्यमीशस्य महिमानमिति वीतशोक इतीशान्यत्वव्यपदेशाच्च रुद्रः। यदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमिति रूपोपन्यासाच्च न ब्रह्मरुद्राविस्याहुः ॥२३॥ ॥७॥

वैश्वानरः साधारणशब्दविशेषात् ॥ एवमदृश्यत्वाद्यधिकरणेनाऽन्तर्यामिणोऽदृष्टत्वेऽदृश्यत्वरूपो हेतुः प्रसङ्गाद्दर्शितः। अतः परं प्रस्तूयमानाधिकरणस्य पूर्वोक्तसर्वोपपादकत्वबोधनाय तत्प्रयोजनमाहुः * अधिकरणत्रयेणेत्यादि * । अत्ता चराचरग्रहणाद्, गुहां प्रविष्टावात्मानौ हि तद्दर्शनाद्, अन्तर उपपत्तेरित्यधिकरणत्रयेण वैशेष्यबोधनात् त्रिविधं भोगमुपपाद्यान्तर्याम्यधिकरणे तद्वैशेष्यमन्तर्यामिणि निगमयित्वा, अदृश्यत्वाद्यधिकरणे तस्यादृष्टत्वोपपादकान् अदृश्यत्वादिगुणानुक्त्वा रूपाभावादेवादृश्यत्वादीतिशङ्कानिरासायान्तरात्मनस्तत्प्रसङ्गाद्रूपमुपन्यस्तम्। परमात्माक्षरयोरभेदः परापरभावश्चोक्तः। तत् तदा सङ्गच्छते, यदि ब्रह्मणः साकारता वास्तवी स्यात् । परमात्मनो विरुद्धधर्माश्रयत्वं च स्यात्। अतस्तदुपोद्घातत्वेनाऽधुनेदमधिकरणमारभत इत्यर्थः। एवं सङ्गतिमुक्त्वा विषयवाक्यमुदाहरन्ति * को न आत्मेत्यादि * । इदं च छान्दोग्ये सप्तमप्रपाठके वर्तते। तत्रोपक्रमे, प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलनामानः पञ्चापि श्रुताध्ययनवृत्तसम्पन्नाः क्वचन समेत्य मीमांसां चक्रुः। को न

आत्मा, किं ब्रह्मेति । अत्र स्वात्मब्रह्मणी अभिन्ने भिन्ने वेति संशयो न तेषां विचारबीजं, किन्त्वस्मदुपास्य आत्मा कः, किं ब्रह्म, तदेकदेशो वेति संशयो विचारबीजमित्यनुपदमेव व्युत्पादयिष्यामः ।

यदत्र कैश्चिद् व्याख्यातम् । आत्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वाद् ब्रह्मत्वमध्यात्मपरिच्छिन्नमात्मानं निवर्तयत्यात्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्यत्वं निवर्तयति । अतो, ब्रह्म आत्मैव, आत्मा ब्रह्मैवेत्यभेदेन सर्वोऽयमात्मा वैश्वानरो ब्रह्म स आत्मेति फलिष्यतीति । तन्न । किम आवृत्त्या वाक्यभेदस्य स्फुटत्वेन विशेषणविशेष्यभावप्रतीत्यनुदयादेतदुपपादनभूताग्रिमग्रन्थानुरोधेन तथाङ्गीकारेऽपि तत्रात्मन उपास्यत्वेनैव सिद्धतया तत्र प्रत्यगात्माभेदापादनस्यासङ्गतत्वादिति । अतः पूर्वोक्तसंशय एव विचारबीजम् । मीमांसाफलं त्वग्रे वक्तव्यम् । ततः स्वविचारणाया तन्निश्चयमलभमाना उद्दालकनामानमेनं वैश्वानरोपासकं संशयवारकत्वेन सम्भावितवन्तः । सर्वेऽपि तन्निकटे यदा गतास्तदा तेन विचारितम् । एते प्रश्नार्थमागता महाश्रोत्रिया अहमिव वैश्वानरोपासका, नाहमेभ्योऽधिकोऽतोऽन्यमभ्यनुशासानीति । तत एवं निश्चित्य तद्वेत्तारं कैकेयमुपदिष्टवान् । ततस्ते षडपि कैकेयराजनिकटे गताः । तदा स राजा तेषां पृथक् पृथक् पूजां पुरोहितादिद्वारा कारयित्वा धनं दातुमारब्धवान् । यदा न जगृहुस्तदा, न मे स्तेनो जनपद इत्यादिना स्वस्य सद्वृत्ततामुक्तवान् । तथापि ते धनं न जगृहुस्तदा तेषामधिकलिप्सां सम्भाव्याहं यक्ष्यमाणोऽस्मि, ऋत्विक्समानं धनं प्रत्येकं दास्यामि, तावत् स्थातव्यमित्युक्ते, ते स्वाभिप्रायमुक्तवन्तः । आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषितमेव नो ब्रूहीति । तदा राजा तदधिकारपरीक्षार्थं, प्रातर्वः प्रतिवक्तास्मीत्युक्त्वा अन्तःपुरं प्रविष्टः । ततो द्वितीयेऽह्नि ते समिद्भारपाणयो राजसमीपं गताः । ततो राज्ञा, एते धनविद्याप्रतिष्ठावन्तोऽपि स्वाभिमानं परित्यज्यैतज्जिज्ञासयैवं समागता अतोऽधिकारिण इत्यवगत्य तत्प्रतिभापरीक्षणाय प्रत्येकं पप्रच्छ, कं त्वमात्मानमुपास्स इति । तदा तैः क्रमेण द्युसूर्यादिषु स्वस्वोपास्यात्मत्वेनोक्तेषु, एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इत्यादिना द्युसूर्यवाय्वाकाशवारिपृथिवीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयि-

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति । तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो वहुलो वास्तिरेव रयिः पृथिव्येव पादावुदर एव वेदिर्लोमानि वर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचनमास्यमाहवनीय इत्यादि ।

त्वप्रतिष्ठात्वगुणयोगं मूर्द्धविपातान्धत्वप्राणोत्क्रमणदेहविशरणवस्तिभेदपादविम्लानिकथनरूपया एकैकोपासननिन्दया च मूर्द्धचक्षुःप्राणदेहमध्यभागवस्तिपादभावमुपदिश्याग्रे आम्नायत इत्यर्थः ।

* यस्त्वेतमित्यादि * एतदर्थस्तु, यस्त्वेवं भवत्पृष्टम, एवं मुक्तप्रकारेण तमन्वयचविशिष्टमेकं, प्रादेशमात्रं, मात्रं कार्त्स्न्येऽवधारण इति कोशाच्छ्रुत्यन्तरे मूर्द्धचिवुकान्तराले प्रतिष्ठितत्वकथनात् प्रादेशपरिमाणकत्वेनावधारितम, अभिविमानं तादृशपरिमाणकत्वेऽप्यभितः सर्वतो विगतं मानं परिमाणं यस्मात् तादृशम,आत्मानं नियामकं, वैश्वानरं विश्वान् नरान्नयतीति यास्केन पृषोदरादितया निरुक्तं स्वप्रापकम् उपास्ते चिन्तयति । स सर्वेषु लोकेषु द्युप्रभृतिषु, सर्वभूतेषु चराचरेषु शरीरेषु सर्वेष्वात्मसु जीवेष्वन्नमत्ति सर्वात्मभूतः सस्तांस्तानेकदेशाभिमानिनो न्यक्कृत्य तत्तद्वीवृत्तिभिस्तत्तदिन्द्रियैश्च तद्भोग्यं स्वयं भुङ्क्ते । तस्य ह वा एतस्य सर्वावयवविशिष्टस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाः,त्वदुपास्यद्युरूपः सुतेजस्त्वगुणविशिष्टः । एवमग्रेऽपि । विश्वरूपो नानारूपत्वादादित्य. । पृथग्वर्त्मात्मा आवहोद्वहादिभेदेन वान् वायुः । सन्देहो देहमध्यभागः । वहुलः सर्वगतत्वादाकाशः । वस्तिर्नाभ्यधोभागः । रयिः, अन्नोत्पादनद्वारा धनजनकत्वाद्धनरूपा आपः । प्रतिष्ठा पादौ पृथिवी । वेदिराकारसाम्यात् । वर्हिरास्तीर्णत्वसाम्यात् । हृदय गार्हपत्यो, हृदयाद्धि मनः प्रणीतमिवानन्तरं भवतीति साम्यात् । अन्वाहार्यपचनो दक्षिणाग्निः । आहवनीयो हवनस्थानत्वसाम्यात् । एवं

तत्र संशयः । किं वैश्वानरशब्देन ब्रह्म प्रतिपादयितुं शक्यते, न वेति । अर्थस्यातिसन्दिग्धत्वात् सन्देहः । तत्रोपक्रमे ब्रह्मात्मपदप्रयोगोऽस्ति नान्यत् किञ्चित् । उपपादने त्वतद्धर्मा एव । साकारस्य तु लोकन्यायेनाब्रह्मत्वम् ।

वैश्वानरो यद्यप्यग्नावेव प्रसिद्धस्तथापि पूर्वकाण्डसिद्धत्वा-

---

विषयमुक्त्वा संशयाकारं तद्बीजं चाहुः । * किमित्यादि * । * अर्थस्येत्यादि च * । कथमतिसन्दिग्धत्वमित्यत आहुः * तत्रेत्यादि * तद्बीजे विचार्ये । उपक्रमे विचाराकारकथने ब्रह्मात्मपदयोः प्रयोगोऽस्ति, को न आत्मा, किं ब्रह्मेति । तत्र किम आवृत्त्या वाक्यभेदाऽवगमाद्विशेषणविशेष्यभावाप्रतीत्या द्वयोः प्रकरणित्वमापाततः प्रतीयते । नान्यत् किञ्चिदन्यतरस्य प्रकरणित्वोपपादकम् । अत उपक्रमस्य सन्दिग्धत्वादर्थस्यातिसन्दिग्धत्वम् । अथाग्रिमग्रन्थे, कं त्वमात्मानमुपास्स इति प्रश्नस्य दिवमेव भगवो राजन्नित्यादिप्रत्युत्तरादुपास्यस्यैवात्मनो विचारविषयत्वं, न प्रतीचोऽस्य । ततश्च समेत्येत्यस्य स्वस्वोपास्यरूपप्रकाशनेन संविदं कृत्वेत्यर्थात्, को न आत्मेत्यत्रोपास्यतया परामृष्टस्यैव विशेषजिज्ञासाबोधकं किं ब्रह्मेति वाक्यम् । तथा सत्युपपादनग्रन्थाद् ब्रह्मण एव प्रकरणित्वं निश्चीयत इत्युच्यते, तदापि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्यादिरूपस्य तन्निष्कर्षग्रन्थस्य विचारे त्वब्रह्मधर्मा एव सिद्ध्यन्ति । सुतेजःप्रभृतीनां जन्यानामेवार्थानां मूर्द्धादिरूपत्वनिष्कर्षात् । नच, 'यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता । तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता' इत्यनूद्यविधेयलक्षणयोर्विचारे मूर्द्धादीनां सिद्धानामर्थानामनूद्यत्वस्य सुतेजआदीनां जन्यानां विधेयत्वस्य चावगमात् साकारस्य ब्रह्मणोऽवयवानां नित्यानामेव तद्रूपत्वं कल्पनयोपदिश्यत इति न ब्रह्मत्वहानिरिति शङ्क्यम् । यतः साकारस्य तु लोकन्यायेनाब्रह्मत्वम् । विमतो वैश्वानरो न ब्रह्म । साकारत्वात् । द्युप्रभृतिलोकवदिति प्रयोगात् । अत एवमप्यर्थस्यातिसन्दिग्धत्वमित्यर्थः । एवं सन्देहबीजमुपपाद्य पूर्वपक्षमाहुः । * वैश्वानर इत्यादि *

देवतात्मपरिग्रहो युक्तः। ततश्च, संवत्सरो वा अग्निर्वैश्वानर इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदमिति गम्यते। ब्रह्मात्मशब्दावपि हि तत्रैव युक्ततरौ। तदुपासकस्यैवान्नभोजनत्वमपि सर्वत्र युक्तम्। प्रादेशमात्रत्वमपि मुख्यजीवत्वादस्मदाद्यपेक्षया स्थूलत्वाभिप्रायम्। विराडभिमानित्वाच्च लोकावयवत्वम्। वेदगर्भत्वादग्नित्रयात्मकत्वमिति। तस्माद्धिरण्यगर्भोपासनापरमेवैतद्वाक्यं, न भगवदुपासनापरमित्येवं प्राप्ते।

उच्यते। वैश्वानरः परमात्मैव। कुतः। साधारणशब्दविशेषात्। साधारणशब्दाद् विशेषः। ये पूर्वपक्षे साधारणशब्दाः

अग्निर्वैश्वानरो वन्हिरिति कोशस्मृतेर्वैश्वानरशब्दो भूताग्नावेव प्रसिद्धः। तथापि पूर्वकाण्डे, विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमन्हामकृण्वन्नित्यादावहःकेतुत्वकथनेनोत्कर्षवत्तया सिद्धत्वाद् देवतात्मपरिग्रहो युक्तः। पूर्वकाण्ड एव, वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति देवतात्मन्यपि सिद्धत्वात्। तत एवं देवतात्मपरिग्रहप्रस्तावप्युत्तरकाण्डे वाजिनां बृहदारण्यके सप्तान्नब्राह्मणे, संवत्सरो वा अग्निर्वैश्वानर इति श्रावणात् तैत्तिरीयाणां बृहन्नारायणोपनिषदि प्रजापतिः संवत्सर इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदं वाक्यमिति गम्यते। यद्यपि माण्डूक्यादौ, विश्वो वैश्वानरः प्रथमः पाद इति श्रूयते, तथापि तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणात् तत्परत्वमेव युक्तम्। तस्य च ब्रह्मनामकत्वाज्जीवसमष्टिरूपत्वाद् ब्रह्मात्मशब्दावपि तत्रैव युक्ततरौ। तं योऽहंब्रह्मणोपास्ते तस्य यथा क्रतुरितिन्यायेन तद्भावात् तदुपासकस्यैव सर्वत्रान्नभोजनं युक्तम्। भोजनत्वमितिपाठे, भोजनत्वं भोक्तृत्वम्। नन्द्यादित्वाल्ल्युः। शेषमुत्तानार्थम्। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं विशदीकुर्वन्ति। * उच्यत इत्यादि *। हेतुं व्याकुर्वन्ति *साधारणेत्यादि* अत्र साधार-

हिरण्यगर्भपरतया ततोऽपि विशेषोऽस्ति । येन भगवानेव वैश्वानरो भवति । प्रादेशमात्रस्यैव द्युमूर्द्धत्वादिधर्मः । न हि विरुद्धधर्माश्रयत्वं भगवद्व्यतिरिक्ते सम्भवति । सर्वभवनसामर्थ्याभावात् । साधारणाद्धर्माच्छब्द एव विशेष इति वा । विशेषादित्येव वक्तव्ये साधारणशब्दशब्दौ प्रादेशमात्रस्यैव वैश्वानरशब्दवाच्यत्वं, द्युमूर्द्धत्वादिकं तस्यैवेति समासेन द्योतयतः । अन्यथा विरोधाभावात् ।

यदपि लोकात्मकं स्थूलं रूपं तदपि भगवत एव, न हिरण्यगर्भस्येति । पुरुषत्वात्तस्य ।

णशब्दशब्दस्य, ये इत्यादिना विभजनात् साधारणशब्देभ्यो विशेष इत्येवं बहुवचनविग्रहस्य विवक्षितत्वेऽपि, ग्रहणके य एकवचननिर्देशः स ब्रह्मादिपदाश्वभोजनवाक्यगनैकजात्यभिप्रायात् । विशेष आधिक्यं, तत्किमित्यपेक्षायां स्फुटीकुर्वन्ति * प्रादेशेत्यादि * । अस्मिन् पक्षे शब्दशब्दस्य पदवाक्यसाधारण्यात् सन्देहः स्यादिति समासान्तरेण तमर्थमाहुः । * साधारणादित्यादि * । तथाच शब्दे विशेषः शब्दविशेषः । वाक्योक्तात् साधारणाद् द्युमूर्द्धत्वादेर्धर्माद् वाक्यरूपे शब्द एव यो विशेषो विरुद्धधर्माधारत्वलक्षणस्तस्मादित्यर्थः । ननु विशेषस्यैव हेतुत्वे साधारणशब्दयोः कथनस्य किं प्रयोजनमत आहुः * विशेषादित्यादि * । * समसेन द्योतयत इति * समासघटिकायाः पञ्चम्या ल्यब्लोपप्रयुक्तत्वेन श्रौतयोस्तत्प्रकृतिभूतयोः प्रादेशमात्रवाक्यद्युमूर्द्धादिवाक्यरूपयोः शब्दयोः समभिव्याहारेण परस्परसामानाधिकरण्यसूचनाद् द्योतयतः । * अन्यथेति * वैयधिकरण्ये । एतेन ल्यब्लोपार्थग्रहणे युक्तिरुक्ता । ननु सूत्रसिद्धं विरुद्धधर्माश्रयत्वं तु प्रादेशमात्राभिविमानपदयोः पौर्वापर्यसमभिव्याहाराभ्यां लभ्यते । तावता द्युमूर्द्धत्वादेर्हिरण्यगर्भसाधारण्यं कथं निवर्तेतामित्यत आहुः * यदपीत्यादि * । तत्र हेतुः * पुरुषत्वात् तस्येति * अयमर्थः । श्रुतौ पुरुषशब्दश्चतुर्द्धा प्रयुज्यते । पुरा आसेति, पुरमुष-

तीति, पुरि शेत इति त्रिधा योगेन । एकधा आकारविशेषे रूढ्या । प्रकृते च मूर्द्धाद्यङ्गश्रावणाद् रूढ एवाभिप्रेयते । सा च कुत्र मुख्येति विचारे सामान्यतः शब्दमात्रस्योङ्कारविकृतित्वेन तद्वाच्ये ब्रह्मण्येव मुख्या । आनन्दमयाधिकरणेऽन्तःस्थस्यानन्दमयस्य परस्यैव विज्ञानमयादिषु पुरुषाकारसमर्पकत्वेन विमृष्टत्वाच्च । सहस्रशीर्षा पुरुषः, वेदाहमेतं पुरुषं महान्तमित्यादावपि तथैव सिद्धत्वाच्च । एवं सति, पुरुषौ चात्ममानवावित्यभिधानकोशेनान्यत्र शक्तिग्राहणेऽपि, 'तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते । विना तं पुण्डरीकाक्षं कोऽन्यः पुरुषशब्दभाक् ॥ भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने ॥ ब्रह्माद्याः सकला देवा यक्षगन्धर्वकिन्नराः । ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति' इति शिवतत्त्वविवेकलिखितपुराणात्, 'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते । स्त्रीप्रायमितरत् सर्वं जगद् ब्रह्मपुरःसरम् ॥ स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद् वैभवादपि' इति नृसिंहपुराणाच्च परस्मिन् ब्रह्मणि वासुदेवे एव मुख्यः । अतस्तस्यैव पुरुषत्वादितरवारणाच्च । नचेतरवारणेऽपि न शिवस्य वारणमिति शङ्क्यम् । प्रकृतिस्पर्शराहित्यस्वातन्त्र्याभ्यां तस्यापि वारणात् । शिवः शक्तियुतः शश्वदिति श्रीभागवतवाक्येन, 'जगत्कारणतापन्नं शिवया मुनिपुङ्गवाः । सा तस्यापि भवच्छक्तिस्तया हीनो निरर्थक' इत्यादिपञ्चत्रिशद्भिः सूतसंहितावाक्यैश्च सर्वदा सर्वावस्थासु शिवस्य प्रकृतियुक्तत्वतदधीनत्वयोरुक्तत्वात् । शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं नचेदेवं देवो न खलु कुशलः स्पन्दितुमपीति सौन्दर्यलहर्यां शङ्कराचार्यैरपि तथाङ्गीकारादिति । नच कारणस्य सर्वाभिः कार्यावस्थाभिरवस्थावत्त्वात् तादृशं रूपं ध्यानार्थमेवोच्यते, न तु तद्वास्तवं कारणरूपमिति वाच्यम् । अत्र मूर्द्धैव सुतेजा इत्यादिना सिद्धान्येवाङ्गानि निर्दिश्य तेषां द्युप्रभृतिरूपताविधानादङ्गानामवास्तवत्वस्याशक्यवचनत्वात् । नच पृथिव्येव पादावित्यत्र विपरीतोद्देश्यविधेयभावान्नैवमिति शङ्क्यम् । पूर्ववाक्य उद्दालकं प्रति, पादौ त्वेतावात्मन इत्युक्तत्वात् । नच वैद्यके, मूत्राशयपुटो बस्तिरिति कथनादत्र तदुल्लेखेन कार्यरूपत्वमाकारस्य शङ्क्यम् । बस्तिर्नाभेरधो द्वयोरिति कोशोक्ताया नाभ्यधोभागमात्रताया अत्र विवक्षित-

विश्वस्य जडस्य नरस्य जीवस्य च भगवदंशत्वेन देवतात्त्व द् देवताद्वन्द्वे चेति विश्वानरौ । तौ निवासो यस्येति, तस्य निवास इत्यण् । तेन परमेश्वर एव वैश्वानरो भवति, नान्यः ।

त्वात् । अन्यथा जलस्य मूर्त्रीभावेनाऽप्रयोजकत्वे तस्मिन् रयित्वकथनस्य विरुद्धत्वप्रसङ्गात् । तस्य जलनामत्वाभावात् । एतद्वा अपां नामधेयं गुह्यं यदाधात्रा इतिवद् गुह्यनामत्वेनाप्यश्रावणाच्च । नच साकारस्य पूर्वपक्षोक्तेन लोकन्यायेनाऽब्रह्मत्वं शङ्क्यम् । विरुद्धधर्माश्रयत्वेन सिद्धे वैश्वानरस्य ब्रह्मत्वे तस्याप्रयोजकत्वात् । अलौकिकाऽऽकारत्वेन सत्प्रतिपक्षत्वाच्च । नचात्र मानाभावः शङ्क्यः । सहस्रशीर्षा पुरुषः, सर्वतः पाणिपादं तदित्यादिश्रुतीनामेव मानत्वात् । सर्वत्रैकस्यैव ब्रह्मणः प्रतिपाद्यत्वात् । अतः साकारस्यैव ब्रह्मताप्रतिपादनार्थमेवं कथनमिति, नात्र हिरण्यगर्भादिरूपता प्रतिपादयितुं शक्येति ।

तेन शङ्करभास्कराचार्याभ्यां यद् व्याख्यातं, साधारणयोर्वैश्वानरात्मशब्दयोर्यो विशेषो द्युमूर्द्धत्वादिस्तस्मादिति । तद्धिरण्यगर्भसाधारण्यादसङ्गतमिति बोधितम् ।

ननु भवत्वेवं, तथापि वैश्वानरशब्दस्य कथं ब्रह्मणि समन्वय इत्याकाङ्क्षायां योगरूढ्येति बोधयितुं योगं बोधयन्ति । *विश्वस्येत्यादि* । विश्वो वैश्वानरः प्रथमः पाद इतिश्रावणाद् ब्रह्माण्डदेहस्य विश्वस्य जडस्य तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणान्नरस्य तदन्तर्गतस्य मुख्यजीवस्य च पादत्वे भगवदंशत्वेन देवतात्वाद्देवताद्वन्द्वे कृते, देवताद्वन्द्वे चेति सूत्रेणानङि जाते, विश्वानरौ । ततो निवासार्थेऽणि कृते तथेति तथेत्यर्थः । तस्य निवास इत्यण् इति पाठे तु, विश्वानरयोर्निवास इति विग्रहान्तरमपि बोध्यते । तथा सत्येकोऽर्थो विग्रहोपन्यासेनेतरश्च सूत्रोपन्यासेनेत्येवमपि विरुद्धधर्माश्रयत्वाय संगृहीतं भवतीति बोधितं ज्ञेयम् । यद्यपि निरुक्ते, वैश्वानरस्य सुमतौ स्यामेत्यत्र, विश्वान्नराञ्नयति, विश्व एनं नरा नयन्तीति वा,

भगवदंशत्वादन्यत्रोपचारात् प्रयोगः। तस्माद् वैश्वानरः परमात्मा ॥ २४ ॥

अथवा विश्वानर एवेति निरुक्तिनामुक्तिः। मायणीये च विश्वेषां नराणां हित इति। अन्यत्रापि च, नरे संज्ञायामिति विश्वपदस्य दीर्घं विधाय ऋष्यणा व्युत्पादनम्। तथाप्यत्र जीवजडव्यावृत्त्यर्थमेवाचार्यस्य प्रवृत्तत्वादेव व्युत्पादनम्। ननु भवत्वेवं, योगरूढ्योः सर्वसाधारणत्वाद् व्युत्पादनमनतिप्रयोजनमिति शङ्कायामाहुः।*भगवदंशेत्यादि*। तथाच पुरुषपदवदत्रापि रूढ्यादिच्छायामात्रम्। वस्तुतस्तु जातिनिबन्धना प्रशंसानिबन्धना वा गौणीत्यर्थः। सिद्धमाहुः * नस्मादित्यादि *। * तस्मादिति *। उक्तरीतिकाद् विशेषात् सर्वेषां पदवाक्यानां तदनुगुणत्वाच्चेत्यर्थः।

रामानुजाचार्यास्तु, विशेष्यत इति विशेषो विशेष्यमाणत्वम्। जाठरभूतदेवतात्मपरमात्मसाधारणस्य 'वैश्वानरशब्दस्य परमात्मासाधारणधर्मैर्विशेष्यमाणत्वादित्येवं सौत्र हेतु व्याख्याय' औपमन्यवादीनां षण्णां, को न आत्मा, किं ब्रह्मेति विचार्य भेदस्य निर्देशाज्जीवात्मत्वे निवारिते, तेषां जीवात्मनामात्मभूतं ब्रह्म जिज्ञास्यमिति निश्चये तज्जिज्ञासुभिर्वैश्वानरात्मज्ञं कैकेयं राजानमागम्य पृच्छ्यमानो वैश्वानर आत्मा परमात्मैवेति विज्ञायते। किञ्चात्मब्रह्मशब्दाभ्यामुपक्रम्य पश्चात् सर्वेषु वाक्येष्वात्मब्रह्मशब्दाभ्यां व्यवहारे कर्तव्ये ब्रह्मशब्दस्थाने निर्दिश्यमानो वैश्वानरशब्दो दृश्यतेऽतः स शब्दो ब्रह्मैवाभिधत्त इति विज्ञायते। किञ्च। सर्वलोकसर्वभूतसर्वात्मस्वन्नादनमभिप्रोतेषीकातूलदाहवत् सर्वपाप्मदाहश्चाग्रे वैश्वानरात्मविज्ञानफलत्वेन श्राव्यमाणो ज्ञानविषयं वैश्वानरं परब्रह्मत्वेन विज्ञापयत इत्याहुः। अत्र ब्रह्मधर्मैर्विशेष्यमाणत्वं त्वायाति, परन्त्वतिक्लिष्टेनेति बोध्यम्।

भिक्षुशैवौ तु, सर्ववेदान्तसाधारणो यः शब्दविशेष आत्मब्रह्मरूप इति व्याचख्यतु.। तत्रात्मब्रह्मशब्दयोर्ब्रह्मपरताया उपपादनसापेक्षतया तयो. साध्यसमत्वेन सिद्धवद्धेतुनानर्हत्वादुपेक्ष्यमेव।

माध्वास्तु, आत्मशब्दः परं विष्णौ नान्यत्र क्वचिदिष्यत इतिस्मरणाद् विष्णवसाधारणेनात्मशब्देन विशेषणादिति व्याकुर्वन्ति।

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

व्याख्यानेन भगवत्परत्वाद् वाक्यस्य प्रमाणान्तरमाह ।

तद्ध्यात्मशब्दस्योपक्रमस्थ स्वंशयवाक्याग्रिमप्रश्नादिवाक्यनञग्रिम-निष्कर्षवाक्येषु प्रयोगेण जीवसाधारण्यदर्शनेन चोपपादमसापेक्षतया शिथिलमेव ।

तस्मात् सिद्धान्तोक्तहेतुरेव प्रबलः । यत्तु छान्दोग्यभाष्ये प्रादेशमात्राभिविमानपदयोर्व्याख्यानम् । प्रादेशा द्युमूर्द्धादिपृथिवीपादान्तास्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रो, मुखादिषु करणेष्वर्तत्वेन मीयत इति वा, द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा, प्रकर्षेण शास्त्रेणादिश्यन्त इति प्रादेशा द्युलोकादय एव, तावत्परिमाणो वा । शाखान्तरे तु मूर्द्धादिचिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति । इह न तथाभिप्रेतः । तस्य ह वा एतस्यात्मन इत्युपसंहारात् । प्रत्यगात्मतया अभिविमीयते ज्ञायत इत्यभिविमान इति । तत्तु न युज्यते । मूर्द्धचिबुकप्रतिष्ठतया प्रादेशमात्रत्वस्य काल्पनिकत्वे मानाभावात् । नच, तस्य ह वा एतस्यात्मन इत्यादिना द्युमूर्द्धत्वादिकथनमेव मानमिति वाच्यम् । तदेजति, तन्नैजति, अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः, अणीयान् व्रीहेर्ज्यायानाकाशादित्यादिश्रुतिभिः सिद्धे विरुद्धधर्माधारत्वे, अभिन्ननिमित्तोपादानतोपगमेन स्वयमभ्युपगते, मायायां युक्तिविरोधस्य भूषणत्वे च स्वीकृते द्युमूर्द्धत्वप्रादेशमात्रत्वयोः स्वमतपरमताभ्यामविरोधस्य भूषणत्वे च स्वीकृते द्युमूर्द्धत्वप्रादेशमात्रत्वयोः स्वमतपरमताभ्यामविरोधसिद्धेस्तथा कथनस्य काल्पनिकत्वानुपष्टम्भकत्वात् । प्रत्यगात्मत्वेन विमीयमानस्य विषयत्वेनाब्रह्मत्वस्य भामत्यां स्वीकारात् । व्याख्येयग्रन्थेऽपि, को न आत्मा, किं ब्रह्मेत्येतयोर्भिन्नवाक्यत्वपक्ष एकवाक्यत्वपक्षे च प्रत्यगात्मब्रह्माभेदमानाभावस्योपपादितत्वाच्च । तस्माद् विरुद्धधर्माधारत्वादिकमत्राविवादम् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ ननु पूर्वसूत्रोक्तहेतुना सिद्धे वैश्वानरस्य परमात्मत्वे किमिति सूत्रान्तरारम्भ इत्याकाङ्क्षायामाहुः । * व्याख्यानेनेत्यादि * । तथाच स्वारस्येन तथाप्रतीत्यभावाद्ग्रहवा-

केचित् स्वदेहे हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्तीति ।

स्मर्यमाणं रूपमनुमानं स्यात् । प्रादेशमात्रवैश्वानरस्य ब्रह्मत्वे । स्मरणं हि मननं श्रुतस्य भवति । श्रुतिवाक्येभ्य एव हि श्रवणम् । यदि प्रादेशमात्रवैश्वानरप्रतिपादकजातीयानां न ब्रह्मवाक्यत्वं स्यात् तदा स्मरणं नोपपद्यते । अत, इति हेतोः प्रादेशमात्रवैश्वानरो भगवानेवेति सिद्धम् ॥ २५ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ २६ ॥

किञ्चिदाशङ्क्य परिहरति । ननु यदि स्मर्यमाणमनुमानं

दित्वमाशङ्क्येतेति तन्निवारणायारम्भ इत्यर्थः । स्मर्यमाणं स्फुटीकुर्वन्ति * केचिदित्यादि * । स्मर्यमाणस्य कथमनुमानत्वमित्यत आहुः * स्मरणं हीत्यादि * । * स्मरणं नोपपद्येतेति * ये हि ब्रह्म स्मरन्ति ते श्रुतिनः श्रुत्यैव स्मरन्त्यतस्तत्राभावे तन्नोपपद्येत । तथाच प्रादेशमात्रत्वस्मरणं प्रादेशमात्रत्वस्य श्रुत्यर्थत्वानुमापकमित्यर्थः । तेन,

> अनन्तशाखासापेक्षे वैदिकार्थस्य निर्णये ।
> स्वबुद्धिकल्पितादर्थाद् बलीयानुपबृंहितः ॥

इति बोधितम् ।

अन्ये तु, 'द्यां मूर्द्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे । दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता' इति । 'यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नम' इत्युदाहृत्य स्मर्यमाणं श्रुत्यनुमापकं स्यादिति व्याकुर्वन्ति ॥ २५ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ शङ्कांशं व्याकुर्वन्ति * नन्वित्यादि *

स्यादिति वाक्यार्थो निर्णीयते, तदा स्मृत्यन्तरेणान्यथापि व्याख्येयम् । 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' इति जाठर एवाग्निर्वैश्वानरो भवति । तस्यैव भगवद्विभूतित्वात् । वाक्यार्थो यथाकथञ्चिद् योजयिष्यते । न तु विरुद्धधर्माणां विद्यमानत्वाद् भगवत्परत्वं वाक्यस्य । विरुद्धधर्माः शब्दादयः । अन्तःप्रतिष्ठानं च । अग्निर्वैश्वानर इति शब्दः केवलवैश्वानरपदे भवेत् । भगवत्परत्वं योगेन । तदग्निसाहचर्यादग्निरेव भवेत् । तस्यैव च त्रेताग्निकल्पनमुपासनार्थम् । प्राणो हि देवता तद् यद्भक्तं प्रथममागच्छेत् तद्धोमीयमित्यादिना । तदेतेभ्यो हेतुभ्योऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । पुरुषेऽन्तःप्रतिष्ठितं वेदेति भिन्नहेतुर्हेतुश्च भवतीति न चकारः । तस्माद् विरुद्धधर्माणां विद्यमानत्वान्न भगवान् वैश्वानर इति चेत् ।

---

* इति वाक्यार्थो निर्णीयत इति * एवं प्रकारेण स्मरणेन निर्णीयते । ननु भगवद्विभूतौ चेद् योज्यं, तदा भगवति योजनं कुतो निषिध्यत इत्यत आह * न त्वित्यादि * । कः शब्द इत्यनस्तं दर्शयति * अग्निरित्यादि * । अयमर्थः । वाजिनां वैश्वानरविद्याप्रकरणे, य एषोऽग्निर्वैश्वानर इति वैश्वानरसमानाधिकरणतया अग्निरिति श्रूयते । तथाच यदि समानप्रकरणे केवलो वैश्वानरशब्दः स्यात् तदा तस्मिन् पूर्वोक्तेन योगेन भवेद् भगवत्परत्वम् । प्रयुक्ते तु शब्दान्तरे । तत * तस्मादग्निसाहचर्यादग्निरेव वैश्वानरो भवेत् । यास्कोक्तस्य योगान्तरस्य तत्रापि शक्यवचनत्वात् । नच योगतौल्येऽग्नौ कुतः पक्षपात इति शङ्क्यम् । अत्राप्यग्रे हृदयं गार्हपत्य इत्यादिना तस्यैव वैश्वानरस्य त्रेताग्निकल्पनमुपासनार्थं दृश्यते । नचेदमप्युभयत्र तुल्यमिति शङ्क्यम् । प्राणो हि देवतात्राग्रे पठ्यते । तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयम् । स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेत्यादिना स्वाहायोगाच्चतुर्थ्या चावगतः । तस्य

न । तथा दृष्ट्युपदेशात् । सर्वभोक्तृत्वं भगवतो वक्तुं तथा दृष्टिरुपदिश्यते । विरुद्धधर्माणां तत्तद्भावापत्तिरित्यैश्वर्यमेव भगवतो वर्णितम् ।

तर्हि कार्यवाक्यमेवास्तु स्मृत्यनुरोधादिति चेत् तत्राह । असम्भवात् । न हि तस्य द्युमूर्द्धत्वादयो धर्माः सम्भवन्ति । उपचारादुपासनार्थं परिकल्पनं भविष्यतीति चेन्न । पुरुषमपि चैनमधीयते, वाजसनेयिनः । स एषोऽग्निर्वैश्वानरो यत्पुरुषः । स यो हैतमेवाग्निं वैश्वानरं पुरुषविधं पुरुषेन्तःप्रतिष्ठितं वेदेति ।

सुखं च जाठर एव । आहुतिप्रापकत्वात् । अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यत इति वाजसनेयिब्राह्मणोक्तादिलिङ्गात् । तदिदं सूत्रस्थेनादिपदेन सूचितम् । तदेतेभ्यो हेतुभ्यो जाठर एव ग्राह्यो, न परमात्मा । न वाऽन्तःप्रतिष्ठानात् परमात्मा ग्रहीतुं शक्यः । यतोऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । वाजसनेयिभि, स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति समामननात् । यद्यप्यन्तःप्रतिष्ठानं वाक्यस्य जाठरपरतासाधने भिन्नो हेतुरिति सूत्रे चकारोऽपेक्षितः । तथापि भक्तस्य होमीयत्वमाहुतेर्देवताप्राप्तिश्च या आदिपदेन संगृहीता, तत्राप्येतदेव प्रयोजकमिति हेतुरपि भवतीति तथात्वबोधनाय न चकारः । स्फुटमन्यत् । परिहारांशं व्याकुर्वते *न तथेत्यादि* । पूर्वोक्तहेतुना वाक्यस्य जाठरविभूतिपरत्वं न वक्तुं शक्यते । कुतः । तथादृष्ट्युपदेशात् । भगवतः सर्वभोक्तृत्वं वक्तुं जाठरदृष्टिरत्रोपदिश्यते, तस्मात् । नचोत्कृष्टे हीनदृष्टेर्दोषावहत्वस्य पूर्वं साधितत्वादत्र तादृशदृष्ट्युपदेशस्यायुक्तत्वं शङ्क्यम् । भगवतः सर्वकारणत्वेन भगवन्निष्ठानां तेषां तेषां विरुद्धधर्माणां तत्तद्भावापत्तिः । यथा कारणत्वस्याष्टाविंशतितत्त्वादिरूपता, तथा पाचकत्वस्य जाठराग्निरूपतेति स्वयं त्वविक्रिय एकरसएवेति भगवत ऐश्वर्यमेव वर्णितमतो न दोष इत्यर्थः । * तर्हीत्यादि * ननु धर्माणां तत्तद्भावापत्तिः कार्यार्थेति कार्यं मुख्यम् । तर्हीदं कार्यवाक्यमेवास्तु । गीतास्मृत्यनुरोधात् । न तु ब्रह्मवाक्यमिति चेत् तत्राहेत्य-

तस्मात् पुरुषत्वं, पाठान्तरे पुरुषविधत्वं वा जाठरस्य न सम्भवतीति भगवानेव वैश्वानरः । भगवत्परत्वे सम्भवत्यन्यकल्पना न युक्तेति ॥ २६ ॥

अत एव न देवता भूतं च ॥ २७ ॥

वैश्वानरो न ऊर्ध्वेत्यादिमन्त्रैर्देवताया महाभूताग्नेर्वा वाक्यार्थतेति कस्य चिद् बुद्धिः स्यात् । तदप्यतिदेशेनैव परिहरति । मुख्योपपत्तिर्भगवत्परत्वे सम्भवति नान्यकल्पना युक्तेति ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

अधुना परिमाणविशेषो विचार्यते । प्रादेशमात्रत्वं भगवतः स्वाभाविकं कृत्रिमं वेति । अस्मिन् सिद्ध एव पूर्वोक्त सिद्धं भवेदिति विचार्यते । तत्रास्मिन्नर्थे चत्वार ऋषयो वेदार्थचिन्तकाः प्रकारभेदेन । तत्र केवलं शब्दबलविचारका आचार्याः ।

र्थः । शेषमुत्तानम् * । पाठान्तर इति * सौत्रे पुरुषविधमिति पाठान्तरे । ननु पुरुषत्वादिकमपि काल्पनिकं पूर्ववदस्त्विति चेत् तत्राहुः । * भगवदित्यादि * सर्वे वेदा इत्यादिश्रुतिभिर्मुख्यसम्भवे गौणस्यान्याय्यत्वाच्च तथेत्यर्थः ॥ २६ ॥

अत एव न देवता भूतं च ॥ * इत्यादीत्यादिपदेन, वैश्वानरं केतुमह्नामित्यादीनां संग्रहः ॥ २७ ॥

साक्षादप्यविरोधं जैमिनि ॥ एतदादिषु पञ्चसूत्रेषु, मन्यत इत्यस्याध्याहारो ज्ञेय. । ननु चतुर्भि सूत्रै. सर्वैस्मिन्नधिकरणार्थे सिद्धे एतेषां सूत्राणां किं प्रयोजनमित्याकाङ्क्षायामाहु । * अधुनेत्यादि * । * पूर्वोक्तमिति * । असाधारणभगवद्धर्मरूपं विरुद्धधर्माश्रयत्वम् । * शब्दबलेत्यादि * शब्दस्य बलमुच्चारणक्रमादितात्पर्यम् । तद्वि-

शब्दार्थयोर्जैमिनिः । आश्मरथ्यस्तु शब्दोपसर्जनेनार्थविचारकः। केवलार्थविचारको बादरिरिति । आचार्यः पुनर्विचाराविचारयोर्दोषं पश्यन् विचारमपि वदँस्तेषामल्पबुद्धिख्यापनाय नामान्याह ।

तत्र जैमिनिरुभयबलविचारकः प्रथमं निर्दिश्यते । व्यापकस्य प्रादेशमात्रत्वे साक्षादपि कल्पनाव्यतिरेकेणापि स्वरूपविचारेणैवाविरोधं मन्यते जैमिनिः । आकाशवद् व्यापकं सर्वतःपाणिपादान्तं ब्रह्म । अत एव साकारत्वमनन्तमूर्तित्व ब्रह्मणः स्वेच्छया परेच्छया स्वभावतश्च विभक्तमिव । त्रयोऽपि नियतपरिमाणाः । अनियतपरिमाणास्तु आकाशवत् परिच्छेदनिरूप्याः । तद् वृद्धिह्रासाभ्यां तथा भवन्ति ।

चारेणार्थविचारका व्यासपादा इत्यर्थः । ननु तथापि ऋषिनामकथनस्य किं प्रयोजनमत आहुः । * आचार्यः पुनरित्यादि * । बृहदारण्यके प्रथमे गार्गिब्राह्मणे, मा ते मूर्द्धा व्यपप्तदनतिप्रश्न्या वै देवता अतिपृच्छसि गार्गि मातिप्राक्षीरित्यतिप्रश्ने दोषश्रावणेन, कठवल्ल्यां, नैषा तर्केण मतिरापनेयेति निषेधेन च काल्पनिकातिविचारे दोषः पर्यवसितः । तैत्तिरीये च, तत्त्वेव भयं विदुषोऽमन्वानस्येत्यविचारेऽपि दोषः श्रावितः । अत आचार्यस्तमिमं विचाराविचारयोर्दोषं पश्यन्, तदन्वेष्टव्यं, तद्विजिज्ञासितव्यं, सोऽन्वेष्टव्यः, स विजिज्ञासितव्य इत्यादिश्रुत्युक्तत्वाच्छब्दबलेनैव कर्तव्यं विचारमपि स्वशास्त्रे वदँस्तथा आह । तथाच शब्दबलविचारस्य मुख्यत्वज्ञापनमेव प्रयोजनमित्यर्थः । जैमिनेः प्राथम्ये हेतुः * उभयबलविचारक इति * । सूत्रं व्याकुर्वन्ति * व्यापकस्येत्यादि * कल्पनाव्यतिरेकेण व्यापकत्वप्रादेशमात्रत्वयोः कथमविरोध इत्याकाङ्क्षायां त प्रकारमुपपादयन्ति * आकाशेत्यादि * । यद्यपि श्रुतौ प्रादेशमात्रमभिविमानमिति क्रमेणोक्तं, तथापि शब्दक्रमादार्थः क्रमो बली-

स्मृतावप्युक्तम् ।
विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ।
प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति ।

यानिति पञ्चमस्य, श्रुतिलक्षणमानुपूर्व्ये तत्प्रमाणत्वादर्थाच्चेति प्रथमसूत्रे विचारितमग्निहोत्रं जुहोति यवागूं पचतीत्यत्र सिद्धम् । अर्थक्रमस्य बलिष्ठत्वानादरे अदृष्टकल्पनाप्रसङ्गात् । तदत्राप्यादरणीयम् । अन्यथाऽत्र विरुद्धधर्माधारत्वकल्पना प्रसज्ज्येत । सम्भवति चार्थक्रमादरेण परिमाणाविरोधितं प्रकारमतिहाय विरुद्धधर्माश्रयत्वकल्पनमयुक्तम् । तस्मिन् प्रकारे कथं सम्भव इति चेदित्थम् । आकाशवत् सर्वगतश्च नित्य इति, सर्वतःपाणिपादं तदिति श्रुतिभ्यामेवंविधं ब्रह्मस्वरूपं सिद्धमतः स्वरूपबलादेव ब्रह्मणः साकारत्वमनन्तमूर्तित्वं च । यदेकमव्यक्तमनन्तरूपमिति, पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति श्रुतिस्मृतिभ्यां सिद्धम् । तच्च क्वचिद्, बहु स्यामिति श्रुतेः स्वेच्छया, क्वचिच्च, यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यात् परेच्छया, क्वचिच्च पूर्वोक्तरीत्या स्वभावतश्च तं तं प्रति तत्तत्प्रकारकोपासनेन प्रकटीभवति । प्रणयस इत्यस्य तत्तद्गोचरत्वं प्रापयस इत्यर्थात् । नच रूपभेदे ब्रह्मभेदः शङ्क्यः । यदेकमिति श्रुतेरविभक्तं च भूतेषु विभक्तमिव च स्थितमिति च गीतावाक्यात् । अतः पुरुषं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितमिति त्रयोऽपि प्रकारा नियतपरिमाणाः । यदि चाकाशवदिति श्रुत्या विचार्यास्तदा ते अनियतपरिमाणा आकाशवत् परिच्छेदनिरूप्याः परिच्छेदकवृद्धिह्रासाभ्यां नानापरिमाणा भवन्ति । ननु श्रुतौ पुरुषं पुरुषविधमित्यादिकं वैश्वानरविशेषणं, न तु प्रकाराणाम् । परिमाणं च द्रव्यधर्मो, न तु धर्मधर्मोऽतो नेदं युक्तमत आहुः । * स्मृताविल्यादि * । * उक्तमिति * पुरुषत्वमुक्तम् । तथाच वैश्वानरस्यैव त्रिधा वर्तमानत्वान्नोक्तानुपपत्तिरिति सर्वमुपपन्नमित्यर्थः । तृतीयस्यानन्तरूपत्वं नियतपरिमाणत्वं च व्याकुर्वन्ति ।

भूतेषु पञ्चधा । उदरेऽङ्गुष्ठमात्रः । हृदये प्रादेशो मूर्द्धनि च मनसीन्द्रियेषु चाणुः । चित्ते व्यापकः । एकस्याप्युपक्रमे सर्वेषु तथात्ववादो विभूतिरभेदाय । तस्माद् वैश्वानरस्य पुरुषत्वात् सच्चिदानन्दरूपेणैव प्रादेशमात्रत्वं न विरुध्यते । अतः साकारब्रह्मवाद एव जैमिनेः सिद्धान्तः ॥ २८ ॥

---

* भूतेष्वित्यादि * । * पञ्चधेति * ध्यानार्थं प्रादेशमात्र आश्रयार्थमङ्गुष्ठमात्रः स्वामित्वार्थमक्षिस्थितः फलार्थं सर्वदेहस्थित आनन्दमयो वैश्वानरः शिरसि प्रतिष्ठितः सर्वार्थं इति निबन्धोक्तपञ्चकार्यार्थं पञ्चभिः प्रकारैः । * उदरेऽङ्गुष्ठमात्र इति * अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति श्रुतेस्तथा । स च, अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठतीति तैत्तिरीयश्रुतेरुदरे शरीरस्थित्यर्थम् । * प्रादेश इति * प्रादेशमात्रः । स हृदये व्याख्यातो, मूर्द्धन्यग्रे वक्ष्यते । तत्र हृदि ध्यानार्थम् । शिरसि सर्वार्थम् । चक्षुपश्चक्षुरित्यादिश्रुतेस्तत्तन्नियमनार्थं तेषु तिष्ठन् मनःप्रभृतीनामणुत्वस्य वक्ष्यमाणत्वात् तदनुरोधेनाणुः । तत् सर्वव्यापकं चित्तमाकृष्य व्योम्नि धारयेदिति वाक्ये चित्तस्य व्यापकत्वोक्तेस्तत्र तिष्ठंस्तद्वृद्ध्यर्थं व्यापकः । ननु प्रादेशमात्रस्यात्र प्रकृतत्वात् तद्विचार एव कार्यो ऽन्यविचारस्य किं प्रयोजनमित्यत आहुः । * एकस्येत्यादि * एकस्य प्रादेशमात्रस्याप्युपक्रमे सर्वभूतस्थेषु नानारूपेषु भगवत्त्ववादो विभूतिरूपस्य भगवदभेदं बोधयितुम् । तथाच वैश्वानरस्वरूपे विचारितया दिशा सर्वेषु विरुद्धधर्माधारत्वं बोध्यमिति व्यासाशयप्रकटनायायं विचार इत्यर्थः । तेन सिद्धमाहुः । * तस्मादित्यादि * । * पुरुषत्वादिति * आत्मत्वात् । पुरुषो चात्ममानवाविति कोशात् । तथाचाकाशवदित्यादिश्रुतिद्वयोक्तरीत्या स्वरूपविचारेणैव परिमाणद्वयाविरोधो जैमिनिमत इत्यर्थः । ननु जैमिनिमते साकारवाद इत्यत्र किं मानमित्याकाङ्क्षायां, जैमिनीयचतुर्लक्षणीमीमांसा, स विष्णुराह हि, तद् ब्रह्मेत्याचक्षते तद् ब्रह्मेत्याचक्षत इति सूत्रद्वयात् तदनुसारेणाहुः । * अत इत्यादि * । * अत इति * एवमुभयत्रविचारकरणात् । इदं च

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं तदपगमेन पुरुषाकारेणाधिदैविकदेवताधिष्ठितेनाभिव्यक्तः पुरुषोऽन्तर्यामी । अत एव पुरुषविध इति । अभिव्यक्तेर्हेतोः साकारत्वमपि मायापगमनकृतत्वान्न स्वाभाविकत्वम् । तथापि निर्दिश्यमानं सच्चिदानन्दरूपमेवाश्मरथ्यो मन्यते ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

बादरिः केवलयौक्तिकश्चिन्तनवशात् प्रादुर्भूतरूपानुवादिका श्रुतिरिति । यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यानुरोधात् । अन्यथा बहुकल्पनायां बुद्धिसौकर्याभावात् तार्किकादिमतेष्वपि तथात्वाद् युक्त्यनुरोधेन ब्रह्मवादोऽप्यन्यथा नेय इति हि मन्यते । अस्मिन् पक्षे त्वतात्त्विकत्वम् । अथवा मायास्थाने अनुस्मृतिः । अभिव्यक्तिस्तु तुल्या । एवं सति बादरिमतेऽपि तात्त्विकमेव रूपम् ॥ ३० ॥

सूत्रद्वयं शतदूषणीकृता व्यङ्कटाचार्याभिधेन स्वग्रन्थ उपन्यस्तम् ॥ २८ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ पतदादिषु त्रिषु सूत्रेष्वविरोधार्थमत्यस्यानुषङ्गोऽधिको ज्ञेयः । * आधिदैविकदेवताधिष्ठितेनेति * आधिदैविकी देवेषु प्रणवमात्रावाच्येषु वर्तमाना या देवता ब्रह्मविष्ण्वादिरूपा तत्तद्गुणगुणसमष्ट्यभिमानिनी तयाधिष्ठितेन शरीरतयाङ्गीकृतेन *अत एवेति* । अधिष्ठानादेव । सूत्रोक्तस्य हेतोः साकारपक्षेऽप्युपपत्तेस्तमपि पक्षमाहुः । * अभिव्यक्तेरित्यादि * । * न स्वाभाविकत्वमिति * किन्त्वर्भकौकःसूत्रोक्तव्योमदृष्टान्तेनोपरवदागन्तुकत्वम् ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ अत्रापि भाष्यमुत्तानार्थम् ॥ ३० ॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

जैमिनिमते आकारवादे नियतसाकारं मन्यमानस्तदेकदेशी नियतमेव प्रादेशमात्रं भगवद्रूपं मन्यते । तन्निराकरणाय सर्वत्र प्रादेशत्वं सम्पत्तिकृतमित्याह ।

तत्र का सम्पत्तिः कथमिति स्वयमेव श्रुत्या प्रदर्शयति । वाजसनेयिब्राह्मणे द्युप्रभृतीन् पृथिवीपर्यन्तान् वैश्वानरस्यावयवान्, अध्यात्म्ये च मूर्द्धप्रभृतिषु चिबुकपर्यन्तेषु सम्पादयन् प्रादेशमात्रमिह वै देवाः सुविदिता अभिसम्पन्नास्तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति । स होवाच मूर्द्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इत्यादिना स-

---

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ननु पूर्वं जैमिनेर्मतं प्रदर्शितमधुना प्रकारान्तरेण किमिति प्रदर्श्यत इत्याकाङ्क्षायामाहुः । * जैमिनिमत इत्यादि * परममहत्परिमाणप्रादेशमात्रयोः साक्षाद्विरोधबोधके जैमिनिमते यः साकारवादस्तस्मिन् य एकदेशी ईदृशं भगवत्स्वरूपं मन्यते । प्रादेशमात्रत्वस्य प्रदेशविशेषकृतत्वे तावन्मात्रस्य पुरुषाकारत्वाभावेन पुरुषश्रुतिविरोधादिति तदाशयः । अभिविमानत्वं जगन्निर्मातृत्वाद्, द्युमूर्द्धत्वादिकं तूपासनार्थमित्यविरुद्धम् । तन्निराकरणाय सर्वत्र * सर्वेषु वैश्वानरस्य प्रदेशेषु प्रादेशमात्रत्वं तथाह । तत्र सम्पत्तिकृतत्वे वाच्ये सा केत्याद्याकाङ्क्षायां सम्पत्तिं तत्कृतं प्रादेशमात्रत्वं च स्वयं जैमिनिः श्रुत्या प्रदर्शयतीत्यर्थः । *सम्पादयन्निति* कैकेय इति शेषः । श्रुतिं पठन्ति *प्रादेशमात्रमित्यादि* । *इत्यादिनेति* चक्षुषी उपदिशन्नुवाच, एष वै सुतेजा वैश्वानर इति । नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मात्मा वैश्वानर इति । मुख्यमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानर इति । मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानर इति । चिबुकमुपदिश-

स्पत्तिनिमित्तमेव प्रादेशमात्रत्वं वैश्वानरस्याह । न तु प्रादेशमात्र एव वैश्वानर इति । तदेकदेशिपरिहारं जैमिनिर्मन्यते ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

मुख्यं स्वसिद्धान्तमाह । व्यापक एव प्रादेश इति । न हि विरुद्धमुभयं भगवद्वचनवगाह्यमाहात्म्ये । तस्मात् प्रमाणमेवानुस-

---

न्नुवाच, एष वै प्रतिष्ठा वैश्वानर इतीत्येतावता सन्दर्भेण । अर्थस्तु, देवा द्युप्रभृतयः, सुविदिता, वैश्वानरमूर्द्धादिरूपेण भवद्भिर्मत्तः सुज्ञाताः। प्रादेशमात्रमिव ह वै अभिसम्पन्नाः प्रादेशपरिमाणकमिव वैश्वानरं, ह वै प्रसिद्ध्या प्राप्तवन्तः । कथं प्राप्तवन्त इत्याकाङ्क्षायां प्रकारं प्रतिजानीते, तथा तु व इत्यारभ्य सम्पादयिष्यामीत्यन्तम् । प्रतिज्ञातं विवृणोति । स होवाच मूर्द्धानमित्यादिना । एष द्युलोकात्मा देवः, अतिष्ठा वैश्वानरः । अतिष्ठागुणको वैश्वानरावयवः। वैश्वानरशब्दात् तस्येदमिति शैषिकोऽण् । एवमग्रेऽपि । तथाच मूर्द्धानमित्यादिनाऽध्यात्मं जीवावयवेषु तान् देवान् सम्पादयन् सम्पत्तिनिमित्तं तदाह । अतः स्थानानुरोधेन तदनुगुणा स्थितिः सम्पत्तिस्तदनुरोधनिमित्तं प्रादेशमात्रत्वं, न तु स्वाभाविकमित्यर्थः । एवं द्युप्रभृतीनामाध्यात्मिकं रूपमादायानियतपरिमाणपक्षव्याख्यानस्य श्रौतत्वसमर्थनेन नियतपरिमाणमङ्गीकुर्वाण एकदेशी निराकृतः ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ अतः परमेतस्यापि पक्षत्वसमर्थनाय सूत्रार्थं व्याकर्तुमवतारयन्ति *मुख्यमित्यादि* । * मुख्यमिति* बलाबलविचारेण सिद्धम् । तत्स्वरूपं तु व्यापक एव प्रादेश इति । व्यापकरूपेणैव प्रादेशमात्रो, न तु प्रदेशभेदरूपभेदाभिव्यक्त्यनुस्मृतिसम्पत्तिवशात् । तत्र प्रमाणम् * न हीत्यादि *। अयं श्रीभागवतपञ्चस्कन्धीयगद्यस्यार्थोपन्यासः । तेन सिद्धमाहुः । * तस्मादित्यादित्यादि * नैषा तर्केण मतिरापनेयेति श्रुतेस्तर्कस्य निषेधेन श्रौता-

तव्यं, न युक्तिः। शब्दबलविचार एव मुख्यः। ननु प्रातीतिकविरोधादन्यथात्वकल्पनम्। वैश्वानरस्य पुरुषत्वं, पुरुषविधत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं च वाजसनेयिनः समामनन्ति। न हि तस्य तद्विधत्वं, तस्मिन् प्रतिष्ठितत्वं च सम्भवति युक्त्या। अतोऽन्ये ऋषयो भ्रान्ता एव येऽन्यथा कल्पयन्तीत्यभिप्रेत्य स्वमतमाह।

एवं वैश्वानरमस्मिन् मूर्द्धचिबुकान्तराले जाबालाः समामनन्ति। एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति। सोऽविमुक्तः कस्मिन् प्रतिष्ठित इत्यादिना भ्रुवोः प्राणस्य च

नुपपत्तिं विना युक्तेरनादरणीयत्वादुपबृंहणेन विरोधे निरस्ते श्रौतक्रमानादरस्याप्रयोजकत्वात् तथेत्यर्थः। एवं सूत्रतात्पर्य्यमुक्त्वाऽस्य तत्र श्रुत्यन्तरसंमतिं प्रदर्शयन्तो व्याकुर्वन्ति *वैश्वानरस्येत्यादि*। *समामनन्तीति * स एषो वैश्वानरो यत् पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेत्यग्निरहस्ये वदन्ति। *सम्भवति युक्त्येति * भेदादिरूपया युक्त्या। तथाच ब्रह्मण श्रुत्येकसमधिगम्यत्वात् तद्बलेन विचारे तत्र भेदानुक्त्या तदभावेऽपि तन्नितयं मन्तव्यमित्यर्थः। एवमेकमामनन प्रदर्शितम्। यद्यपि सम्पत्तिरूपा युक्तिः श्रौती, तथापि कैकेयस्तथा तु व एतान् वक्ष्यामीत्यादिना मध्वादिवत् कल्पनयोपदिष्टत्वात्। न तु वास्तवरूपम्। स्वक्रतथासम्पादनवचनात्। तथा सति द्युमूर्द्धत्वादीनामध्यात्मं कल्पनोपदेशो, न तु स्वारसिकं तत्र मानम्। तच्च शब्दबलविचारे अप्रयोजकम्। दहरविद्यायां, यावान् वा अयमाकाशस्तावानन्तर्हृदय आकाश इत्यादिना कल्पनां विनैव तन्मानकथनवदत्रापि श्रुत्यन्तरे कथनात्। तथा सति सम्पत्तिकृतं प्रादेशमात्रपरत्वं जघन्याधिकारिणामुपासनार्थत्वेन पर्यवस्यति। तस्योत्तमाधिकारिणामनादरणीयमित्याशयेनाहुः। * अत इत्यादि * सूत्रे चकारादपरमामननं प्रदर्शयन्तो व्याकुर्वन्ति *एवमित्यादि*। *इत्यादिनेति* कस्मिन् प्रतिष्ठि-

यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । न ह्यनन्तः संकुचितस्थाने भवति । विशेषणवैयर्थ्यापत्तेः । युक्तिगम्या त्वब्रह्मविद्यैव । अविरोधेऽपि वक्ष्यति । श्रुतेस्तु शब्दमूलत्वादिति । ननु तथापि काचिद् वेदानुसारिणी युक्तिर्वक्तव्या, शास्त्रसाफल्यायेति चेत् । उच्यते । विरोध एव नाशङ्कनीयो वस्तुस्वभावात् । अयस्कान्तसन्निधौ लोहपरिभ्रमणे या युक्तिर्गर्भस्यौदर्यादाहे, रेतसो मयूरत्वादिभावे । न हि सर्वत्र स्वभावदर्शनाभ्यामन्योपपत्तिः कैश्चिदपि शक्यते वक्तुम् । तस्यान्ते सुषिरमित्यादिना श्रुतिरेवमेवाह ।

त इति प्रश्ने, वरणायां नास्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नासीति । सर्वानिन्द्रियकृतान् दोषान् वारयति तेन वरणा भवतीति । सर्वानिन्द्रियकृतान् पापान्नाशयति तेन नासी भवतीति । कतमच्चास्य स्थानं भवतीति । भ्रुवोः प्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीत्यन्तम् । नन्वत्रापि प्रदेशादिभेदपक्षा एव भवन्तु, को दोष इत्यत आहुः । * न हीत्यादि * नचानन्त इत्यत्र कालापरिच्छेद एवोच्यते, न देशापरिच्छेद इति शङ्क्यम् । आत्मत्वेनैव सिद्धे कालापरिच्छेदेऽनन्त इति विशेषणवैयर्थ्यापत्तेः । अतस्तद्वलाद्विरुद्धधर्माश्रयत्वमेवाभिप्रेतमित्यर्थः । ननु युक्त्या साधने को दोष इत्यत आहु । * युक्तीत्यादि * नैषा तर्केणेतिश्रुतेस्तथेत्यर्थः । ननु सूत्रकृता स्फुटतयाऽनुक्तत्वेऽयमेव सूत्राशय इत्यत्र किं गमकमत आहुः । * अविरोधेऽपीत्यादि * यद्यपि जाबालश्रुतौ वैश्वानरः स्फुटतया नोक्तस्तथापि चिबुकान्तरेऽनन्तस्य प्रतिष्ठितत्वकथनात् प्रादेशमात्रस्याभिविमानत्वं प्रत्यभिज्ञायते । अतस्तत्परत्वं तद्वाक्यस्य बोध्यम् । * नन्वित्यादिनोक्ता युक्तिस्तु स्फुटतरैव । तस्याः कथं श्रुत्यनुसारित्वमित्यत आहुः । * तस्यान्ते इत्यादि * तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति तैत्तिरीये बृहन्नारायणोपनिषदि

यशोदास्तनन्धयस्य च भगवतो मुखारविन्दे विश्वमेव दृष्ट्वा स्वप्नमायाऽविद्यानिराकरणाय सिद्धान्तमाह । अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति । उलूखलबन्धने चायमर्थो निर्णीतः । तस्मादानन्दांशस्यैवायं धर्मो, यत्र स्वाभिव्यक्तिस्तत्र विरुद्धसर्वधर्माश्रयत्वमिति चकारार्थः । तस्मात् प्रादेशमात्रो व्यापक इति वैश्वानरो भगवानेवेति सिद्धम् ॥ ३२ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

सहस्रशीर्षानुवाके सुषिरस्य सूक्ष्मना तत्र सर्वप्रतिष्ठा च श्राव्यते । सा धस्तुस्वभावादेवोपपद्यतेऽतस्तथात्वमित्यर्थः । दर्शनमुपन्यस्यन्ति * यशोदेत्यादि * अत्र स्तनन्धयपदेन अदन्तस्य षड्दिनस्य पूतनाऽसुपयःपानकर्तृनयाऽत्रस्यासाधनविरोधोऽपि स्मार्यते । * निर्णीत इति * बन्धनानां द्व्यङ्गुलन्यूनतायाः, पुनःस्वेच्छया बन्धनस्य च कथनान्निर्णीतः । शेषमतिरोहितार्थम् । एवञ्चात्र निराकारत्ववादिना कर्तृत्वासम्भवमाशङ्क्य तन्निरासाय साकारब्रह्मता विचारिता । श्रुतौ तु वरणा भ्रूः । अस्य स्थानमित्यस्येति पदेनानन्तः परामृश्यते । प्राणपदेन च नासिका । नासिके उपदिशन्नित्यत्र पृथग्वर्त्मात्मनः कथनात् । द्यौरित्याकाशः । तत्र हेतुः । लोकस्य परस्य च सन्धिरिति । जीवलोकस्य परब्रह्मणश्च सन्धाजनकत्वादिति ।

अथात्र मतान्तराणि विचार्यन्ते । तत्र जाठराग्निप्रतीकस्य जाठराग्न्युपाधिकस्य वा परमेश्वरस्योपास्यत्वं व्यासमते । जैमिनिमते तु तदुभयकल्पनं विनैव साक्षात् परमेश्वरोपासनं विधीयत इति साक्षादपीति सूत्रे व्याख्यायाभिव्यक्त्यादिसूत्रेषु प्रादेशमात्रत्वस्याविरोधो विचार्यत इति शङ्कराचार्याः प्राहु ।

तत्रेदमवधेयम् । आचार्यस्तद्गुरुः सर्ववेदव्यासकर्ता स्वयं समन्वयं प्रतिज्ञाय सरलां सुन्दरीं जैमिनिविचारितां युक्तिं श्रुत्यादि-

संमतां जानानः किमिति नोपगतवान् । अथ दुष्टां तर्हि कुतो न दूषितवानिति ।

भास्कराचार्यास्तु, नायं वैश्वानरशब्दो जाठराग्न्यभिप्रायेण प्रयुक्तो, येनात्र तद्गुणकोपासनं कल्प्येत। किन्तु यौगिकोऽयं शब्दो, विश्वान्नरान् नयतीति । तद्धितस्तु राक्षसवायसादिवत् स्वार्थे । अभिविमानशब्दश्चाभिमुख्येन विचित्रं जगन्निर्मिमीत इति वा, अभिगतश्चासौ विगतमानश्चेति वा योगेन । वैश्वानरशब्दस्य यौगिकार्थग्रहणे जाठरानलविशिष्टोपासनमनभिप्रेतं बादरायणस्येति साक्षात्सूत्रे व्याचक्रुः । तत्र बीजं तु सौत्रोऽपिशब्दः । साक्षादविरोधं जैमिनिरपीत्यन्वयादिति तदाशयः ।

रामानुजाचार्यास्तु मतद्वयेऽपि जाठरविशिष्टपरमात्मोपासनमङ्गीकृत्य, वैश्वानरशब्दोऽग्निसाधारणोऽपि परमात्मधर्मविशेषितो यथा विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवाचष्ट इति निश्चीयते । तथा स एषोऽग्निर्वैश्वानरो यत्पुरुष इति वाजसनेयिपठितोऽग्निशब्दोऽपि येनैवाग्रनयनादिना गुणेन योगाज्ज्वलने वर्तते तस्यैव गुणस्य निरुपाधिकस्य काष्ठां गतस्य परमात्मनि सम्भवादस्मिन् प्रकरणे परमात्मासाधारणधर्मविशेषितः साक्षादव्यवधानेन परमात्मानमेवाभिधत्त इति साक्षात्सूत्रार्थमाहुः ।

सम्पत्तिसूत्रे चोपासकैः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसम्पादनार्थमुरःप्रभृतीनां वेदित्वाद्युपदेश इति । आमनसूत्रे च, एत द्युमूर्द्धत्वादिविशिष्टं वैश्वानरमस्मिन्नुपासकशरीरे प्राणाहुत्याधारत्वामामनन्ति च । तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्याहुः ।

तत्रापीदमवधेयम् । अत्र औपन्यवादिसंवादवाक्येषु, मूर्द्धा त्वेष आत्मनश्चक्षुष्टेतदात्मन इत्यादिना यदुक्तं, तस्य निगमनमत्र प्रतीयते । तस्य ह वा एतस्यात्मनो वैश्वानरस्येति सर्वैः पदैस्तमेव परामृश्य मूर्द्धप्रभृतीनां समभिव्याहरणात् । तत्कथं सन्निहितपरित्यागेन व्यवहितस्योपासकस्य परामर्शः कर्तुं शक्यते । नचाग्रे सुतेजःप्रभृतिभ्योऽतिरिक्तानामुरःप्रभृतीनां वेद्यादित्वकथनात् तथेति वाच्यम् । भगवतो विश्वकायत्वाय तन्मूर्द्धादीनां सुतेजस्त्वादिदृष्ट्युपदेशवत्तस्य यज्ञत्वाय तदुरआदीनां वेदित्वादिदृष्ट्युपदेशस्य शक्यव-

चनतया तस्योपासकावयवगमकताया निश्चेतुमशक्यत्वात्। नचैवं सति तद् यदुक्तं प्रथममागच्छेदित्यादौ यः प्राणाग्निहोत्राधारत्वेनोपासकास्यादिपरिग्रहः स कथं सङ्गच्छेतेति शङ्क्यम्। सम्पत्तिसूत्रविषयवाक्ये वैश्वानरावयवानामुपासकमूर्द्धादिसम्पत्तिकथनेन तेषां तत्र मानवदनुक्तानां नखुरःप्रभृतीनामप्युपासकोरःप्रभृतिषु सम्पत्त्या मानस्याभिप्रेततया सुखेनैव तदास्यादिपरिग्रहसङ्गतेः। अत एव सर्वत्र वैश्वानरस्थितिबोधनायोपसंहारे, तस्माद्‌ हैवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य वैश्वानरे हुतं स्यादिति श्रावितम्। तस्मादत्र न जाठरप्रतीकोपासना, न वा तदुपाधिकोपासना, नापि तद्विशिष्टोपासना। किन्तु केवलपरमात्मोपासनेति निश्चयः।

शैवभिक्षू अप्येतेनैव दत्तोत्तरौ, माध्वाश्च।

प्रकृतमनुसरामः। एवमस्मिन् पादे जीवपुरःसरेणार्थसन्देहो निवारितः। मनोमयत्वादिधर्मवान् हिरण्यश्मश्रुत्वादिधर्मवानप्यलौकिकभोगयोगेऽपि दोषरहितः प्रकटसच्चिदानन्दस्वरूपोऽधिदैवादित्रयनियामकोऽक्षरादुत्कृष्टः स्वत एव साकारो विरुद्धधर्माश्रयो भगवानेव, न जीव इति। तेन सर्वान्तर्याम्येको भगवानिति सिद्धम्। आधेयरूपो विचारित इति च॥ ३२॥॥ ८॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रनिवारितहृदयान्धकारेण
पीताम्बरतनुजपुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथमाध्यायस्य द्वितीयः पादः॥ १॥ २॥

प्रथमाध्यायस्य तृतीयः पादः ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

द्वितीयपादे आधेयरूपो भगवान् प्रतिपादितः । आधाररूपोऽत्र प्रतिपाद्यते । तेन सर्वं ब्रह्मेति फलिष्यति ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ अथ तृतीयपादं विवरिषवोऽध्यायसङ्गतिस्फोरणाय पूर्वपादार्थं वदन्तः प्रस्तुतस्यार्थमाहुः । * द्वितीयेत्यादि * । अयमर्थः । पूर्वपादस्यान्तस्तद्धर्माधिकरणप्रपञ्चरूपतयाऽष्टाधिकरण्याम्, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इति लक्षणं विचारितम् । तत्र प्रथमेऽन्तःस्थस्य मनोमयत्वादीनां धर्माणां, द्वितीये हिरण्यश्मश्रुत्वादीनां च बोधनेन तादृशधर्मविशिष्टं स्वरूपमन्तर्बोधितम् । ततस्त्रिभिः कार्यबोधनेन बिभर्तिपदार्थस्य धारणपोषणात्मकं स्वरूपं बोधितम् । ततोऽन्तर्याम्यधिकरणेऽन्यत्वं परमात्मत्वमावेशः सपरिकरं लोकत्रयं च बोधितम् । ततोऽदृश्यत्वाद्यधिकरणद्वये अव्यक्तत्वमीश्वरत्वं चाक्षरादुत्तमत्वेन विरुद्धधर्माधारत्वेन च विचारितम् । तदेतदुक्तम् * आधेयरूपो भगवान् प्रतिपादित इति । तथा अदृश्यत्वाद्यधिकरणे, यस्मात् क्षरमतीतोऽहमित्यपि विचारितमेव । अतः परं तल्लिङ्गाद्यधिकरणेषु य आधाररूपो निरूपितः सोऽत्र विचार्यते । तेन, 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्' इति वाक्योत्तरार्द्धोक्तं विस्पष्टं भविष्यति । तदेतदुक्तम् । * आधाररूपोऽत्र प्रतिपाद्यत इति । द्वितीयपादोक्तमनन्यभक्तिलभ्यत्वं तु गुणोपसंहारपादे फलिष्यतीत्यतो नोक्तम् । एवं पादद्वयोक्तस्य फलं समन्वयस्तत्स्वरूपं वदन्ति *तेनेत्यादि* । ननु पूर्वपाद आधेयनिरूपणोऽप्याकाशात्मत्वाकाशज्यायस्त्वब्रह्मक्षत्रौदनकत्वलोकशरीरकत्वादिभिर्व्यापकत्वावधारणा आधाररूपताऽप्यवधारिता

इदं श्रूयते । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथा-ऽमृतस्यैष सेतुरिति ।

बाधकानां बलिष्ठत्वात् साधकानामभावतः ।
आधारधर्मा बाध्येरन्निति पादोऽभिधीयते ॥
यस्मिन्नित्यादिवाक्ये च वाक्यार्थः सर्वबाधितः ।
अर्थात् प्रकरणाल्लिङ्गादिति पूर्वं विचार्यते ॥

अत्र संशयः । द्युभ्वाद्यायतनं ब्रह्म, आहोस्वित् पदार्था-न्तरमिति । अर्थान्तरमेव च भवितुमर्हति । द्युभ्वादीनां सूत्रे मणिगणा इव प्रोतानां भारवाहकत्वान्न तद्वाहकः परमात्मा ।

भवतीति व्यर्थः पादारम्भ इत्यत आहुः । * बाधकानामित्यादि * तेषु प्रेत्याभिसम्भवाध्वपारात्त्वन्तरात्मत्वादीनां साधितत्वेन बाधकानां बलिष्ठत्वात् साधकानामसाधितत्वेन नैर्बल्यात्तदभावत आधारधर्मा ज्यायस्त्वादयो बाध्येरन्नतस्तथेत्यतो न व्यर्थ इत्यर्थः । क्रमनियामिका त्ववसरसङ्गतिः । सा च जडार्थवारणरूपा द्वितीयपादारम्भ एवो-क्तेति न पुनरुच्यते । एवं संगतिं प्रयोजनं चोक्त्वाऽधिकरणं विवरीतुं विषयवाक्यमुपक्षिपन्ति * इदं श्रूयत इत्यादि * । * श्रूयत इति * आथर्वणोपनिषद्द्वितीयमुण्डके श्रूयते । एतस्यैव वाक्यस्य प्रथमतः कुतो विचार इत्याकाङ्क्षायामाहुः । * यस्मिन्नित्यादि * । * वाक्ये-त्यादि * । * सर्वबाधित इति * सर्वैः प्रकारैर्बाधितः । * इतिर्हेतौ । अत्र बुद्धिस्थानात्मिकाधिकरणसङ्गतिरपि बोध्यते । तल्लक्षणं तु, बुद्धिस्थं चिन्त्यते यत्र बुद्धिस्थानात्मिका तु सेति । तथाच तल्लिङ्गाद्यधिकरणे आकाशपदस्य ब्रह्मवाचकत्वमङ्गीकृत्य ब्रह्मलक्षणस्य भूताकाशेऽति-व्याप्तिवारणेऽपि सांख्यमतसिद्धे प्रधानेऽतिव्याप्तिमाशङ्क्य वारणात् । बाधादिकं विवरीतुं संशयपूर्वपक्षावाहुः । * अत्र संशय इत्यादि * * अर्थान्तरमेव चेत्यादि च * । ब्रह्मवाक्यत्वबाधकान् हेतून् विवृण्व-न्तः पूर्वमर्थाद् बाधं विवृण्वन्ति * द्युभ्वित्यादि * । एवं पूर्वार्द्धोक्ता-

अन्यवाग्विमोकश्चामङ्गतः। एकविज्ञानेन सर्वविज्ञानस्य पृष्टत्वात् कथमन्यविमोकः। सेतुश्च गतिसाधनः। तस्मादफलत्वमपि। आत्मलाभान्न परं विद्यत इति विरोधश्च। अतो न ब्रह्मविद्यापरमेतद् वाक्यम्। किन्तु स्मृतिमूलं भविष्यतीत्येवं प्राप्ते।

उच्यते। द्युभ्वाद्यायतनं ब्रह्मैव। द्यौर्भूश्चादिर्येषां ते द्युभ्वादयः। तेषामायतनम्। यस्मिन् द्यौरितिवाक्योक्तानां साधकं वदन् प्रथमपरिहारमाह। स्वशब्दात्। आत्मशब्दो व्याख्यातः स्वशब्देन। अत्र न जीवस्यात्मत्वेनोपासनार्थमात्मपदं, किन्तु पूर्वोक्तानामात्मभूतम्। तेन न भारकृतो दोषः। कारणे हि का-

---

र्यात्। ब्रह्मवाक्यत्वबाधो व्याख्यातः। प्रकरणकृतं व्याकुर्वन्ति। *अन्येत्यादि*। लिङ्गकृतं तं व्याकुर्वन्ति*सेतुरित्यादि*।* स्मृतिमूलमिति * सांख्यस्मृतेर्मूलभूतम्। तथाचात्र प्रधानमेव प्रतिपाद्यम्। नचात्मपदविरोधः। योगेन तस्यापि व्याप्तिमात्रबोधकतया सङ्गतेः। अथ रूढ्यपेक्षया योगस्य नैर्बल्यं विभाव्यते, तदा पुरुषपरमस्तु। अन्या इत्यकारो डादेशः। अन्यमित्यर्थः। वाच इति। वादान्तररूपायाः। एष इति सांख्यवादः। एवं सर्ववाक्यसङ्गतेरित्यर्थः। सिद्धान्तं व्याकुर्वन्ति * उच्यत इत्यादि * कुत इत्याकाङ्क्षायां हेतुं विवृण्वन्तस्तस्योभयार्थत्वमाहुः। * साधकमित्यादि *। * साधकमिति * ब्रह्मत्वसाधकं हेतुम्। व्याख्यानेनाऽऽत्मशब्दस्फोरणस्य प्रयोजनमाहुः। * अत्र नेत्यादि * आत्मपदस्य जीवे रूढत्वादात्मत्वेन तन्निर्दिश्य जीवस्य सर्वाधारभूतब्रह्मरूपतयोपासनार्थं नात्मपदम्। किन्तु, पूर्वोक्तानां द्युभ्वादीनामात्मभूतमनारोपितानागन्तुकं यत्स्वरूपं तद्वाचकम्। एतद्बोधनार्थमेवैवं कथनम्। नोचेदात्मशब्दादित्येव वदेत्। अत इदं साधकं बाधकस्यापि परिहारकमित्यर्थः। ननु सर्वस्यात्मभूतत्वे कथं भारवाहकत्वपरिहार इत्यत आहुः। * कारणे हीत्यादि *। लिङ्ग-

धमोतं भवति । सेतुत्वं च युज्यते । तज्ज्ञानेनाऽमृतत्वप्राप्तेः । अभेदेऽपि ब्रह्मविदाप्नोति परमितिवदर्थः । तस्मादबाधितार्थत्वाल्लक्ष्यस्य सर्वगतत्वव्युत्पादकत्वाद् द्युभ्वाद्यायतनं ब्रह्मैव ॥१॥

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

ननु चोक्तं सर्वविज्ञानस्योपक्रान्तत्वादन्यवाग्विमोको विरुद्ध इति । नैष दोषः । मुक्तोपसृप्यव्यपदेशात् । मुक्तानां जीवन्मुक्तानां शरीराद्यध्यासरहितानामवान्तरप्रकरणशरधनुर्न्यायेन ब्रह्मत्वेन ज्ञातं पृथक्त्वेन वा जीवं लक्ष्ये योजयितुं तदुपसृप्यता व्यपदिश्यते । तेन शरीराद्यध्यासविशिष्टं न ब्रह्मणि योजनीयमिति ।

दोषपरिहारमाहुः । * सेतुत्वमित्यादि * । ननु सेतुत्वेनाऽमृतसाधनत्वमस्योच्यते, न त्वेतज्ज्ञानस्येति कथमेवमित्यत आहुः । * अभेदेऽपीत्यादि * तथाच भेदेऽप्यवस्थाभेदेन भेद दुभयसामञ्जस्यमिति नानुपपत्तिरित्यर्थः । सिद्धमाहु. * तस्मादित्यादि * । * तस्मादिति * भारादिदोषत्रयस्य वारणात् । * लक्ष्यस्येति * । लक्ष्यं सर्वगतं 'चैव शिरो मे सर्वतोमुख इति पूर्वमन्त्रोक्तस्य ब्रह्मणो लक्ष्यस्य ॥ १ ॥

मुक्तोपसृप्यव्यपदेशात् ॥ एवं दोषद्वये परिहृतेऽपि तृतीयस्यापरिहृतत्वादाक्षिपति * ननु चेत्यादि * । * मुक्तोपसृप्यव्यपदेशादिति * मुक्तोपसृप्य इति भावप्रधानः । मुक्तनिष्ठा या उपसृप्यता भगवन्निकटगमनयोग्यता तया कृत्वा भगवतस्तस्या उपदेशो मुक्तोपसृप्यव्यपदेशस्तस्मात् । एतद्व्यपदेशेन कथं दोष परिहार इत्यतस्तदेव व्याकुर्वते * मुक्तानामित्यादि * मुक्तपदेनात्र जीवन्मुक्ता एवोच्यन्ते । * तदुपसृप्यतेति * मुक्तनिष्ठा उपसृप्तुं योग्यता । तत्र प्रमाणमवान्तरप्रकरणम् । तत्र प्रोक्तो यः शरधनुर्न्यायस्तेन तथा ज्ञातं तथेति । अयमर्थः । अवान्तरप्रकरणे हि, तद्धे-

किञ्च । वाग्विमोक एव, न वस्तुविमोकः । वस्तुनो ब्रह्मत्वात् । वाचारम्भणमात्रत्वाद्विकारस्य । अतो न सर्वविज्ञानबाधः । अतो बाधकाभावादिदं ब्रह्मवाक्यमेव ।

ये तु श्रुतेरन्यथार्थत्वं कल्पितमतानुसारेण नयन्ति, ते पूर्वोक्तस्पष्टश्रुतिविरुद्धार्थवादिन उपेक्ष्याः ॥ २ ॥

द्धव्यं सौम्य विद्धीत्यैकाग्र्येण तदेकतानतां प्रतिज्ञाय सा कथं स्यादित्याकाङ्क्षायां, 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धीयीत । आयम्यतद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य विद्धीति' शरधनुर्न्यायेन तां बोधयित्वा, किमस्त्रं कः शर इत्याद्याकाङ्क्षायां, 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेद्' इत्यनेन शरस्य यथा प्रवेशेन लक्ष्यनिखाततया लक्ष्यप्रचुरता तथा आत्मनोऽपि तन्निखाततया तत्प्रचुरतेति तथा ब्रह्मत्वेन ज्ञातम् । अथवा, 'लक्ष्यं सर्वगतं चैव शरो मे सर्वतोमुखः । वेद्धा सर्वगतश्चैव विद्धं लक्ष्यं न संशय' इति ब्रह्मणः सकाशात् पृथक्त्वेन ज्ञातं जीवं लक्ष्ये ब्रह्मणि योजयितुमुपासानिशितत्वाधायकतद्भावगतचेतःसिद्ध्यर्थमन्यवाग्विमोकोऽत्रोच्यते । स च शरीराध्यासराहित्य एव सिद्ध्यतीति तन्मुखेन भगवतो मुक्तोपसृप्यता व्यपदिश्यते । उक्तरीत्या जीवयोग्यताकथनद्वारोच्यते । तेन शरीराद्यध्यासविशिष्टं लिङ्गशरीरं न ब्रह्मणि योजनीयमिति बोधनाय वाग्विमोकोऽत्रोच्यते । न तु सर्वविज्ञानविघाताय । लक्ष्यादीनां त्रयाणां सर्वगतत्वश्रावणादतो नैतत्कथनमुपक्रमविरोधायेत्यर्थः । एवमन्यवाग्विमोकस्य दोषत्वं प्रकरणेन निवारितम् । अतः परमर्थेनाऽपि निवारयन्ति * किञ्चेत्यादि * अर्थस्तु स्फुट एव । एवं सूत्रार्थं व्याख्यायैकदेशिमतमनूद्य दूषयन्ति * ये त्वित्यादि * । ये मायावादिनः परब्रह्मणः साकारताममन्वानाः श्रुतेर्व्याख्येयाया, यस्मिन् द्यौरित्यस्या अन्यथार्थत्वं, सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यायतनवद्भावस्य, सर्वं ब्रह्मेति सामानाधिकरण्यस्य च श्रावणाद् यथा शाखा स्कन्धो मूलं चेत्यनेकात्मको वृक्ष एवं नाना-

नानुमानमतच्छब्दात् ॥ ३ ॥

ननु जडधर्मा जडदृष्टान्ताः प्रकरणे बहवः सन्ति। अरा इव ब्रह्मपुरे मनोमय इत्यादि।

रसो विचित्र आत्मेतिशङ्कासम्भवे तद्वारणायात्र, तमेवैकं जानथा-त्मानमिति सावधारणमाह। यथा, यस्मिन्नास्ते देवदत्तस्तदू आनये-त्युक्ते आसनमेवानयति, न देवदत्तम्। तद्वदायतनभूतस्यैकरसस्यैवा-त्मनो विज्ञेयत्वमुपदिश्यते। अन्या वाच इत्यनेन विकारानृताभिस-न्धस्य चापवादः। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति दोषश्रावणात्। सर्वं ब्रह्मेति सामानाधिकरण्यं तु प्रपञ्चप्रविलापना-र्थं, नानेकरसताप्रतिपादनार्थम्। स यथा सैन्धवघनोऽनन्तरो-ऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति श्रावणादित्येवमर्थत्वं, प्रपञ्चो मायिक इतिकल्पित-मतानुसारेण प्रापयन्ति। ते * पूर्वोत्तरस्पष्टश्रुतिविरुद्धार्थवादिनो,'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथा-ऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्तीति। एत-स्माज्जायते प्राण इति। अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावित्यादि। आविःसन्निहितं गुहाचरं नाम महत्पदम्। अत्रैतत्सर्वमर्पितमेज-त्प्राणन्निमिषच्च यद्' इत्यादयः पूर्वाः। अरा इव रथनाभावित्याद्या आसमाप्तिवर्तमाना उत्तराः, स्पष्टास्तत्तद्दृष्टान्तपूर्वकब्रह्मकार्यब्रह्मरूप-विरुद्धधर्माधारत्वाद्विब्रह्मधर्मप्रतिपादकतया स्फुटार्था या श्रुतय-स्तद्विरुद्धो यः प्रपञ्चमायिकत्वादिरूपोऽर्थस्तद्वादिनो वैयात्यादेकदे-शिकमादाय तं निर्णीतत्वेन वदन्त, उपेक्ष्या आग्रहवादित्वाद् भूता-विष्टा इवानादरणीया इत्यर्थः ॥ २ ॥

नानुमानमतच्छब्दात् ॥ इदमेवाधिकरणं पुनर्निषेधमुखेन वि-चारयन् पूर्वं जडं निरस्यतीत्याशयेनात्र पूर्वपक्षं दर्शयन्ति * नन्वि-त्यादि *। कुत्र सन्तीत्यपेक्षायां तन्मन्त्रप्रतीकं दर्शयन्ति * अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जा-यमान इत्यत्र नाडीसङ्घाताधिकरणत्वं शरीरधर्मत्वाज्जडधर्मः। रथ-

तस्मात् प्रकृतिपुरुषनिरूपकसांख्यानुमापकमेवैतत्प्रकरण-
मस्तु । निर्णीतमप्यक्षराधिकरणे जडधर्मात् पुनरुज्जीवनम् ।
तस्माद् द्युभ्वाद्यायतनं प्रकृतिरेव भवितुमर्हतीति चेन्न । अनुमानं
तन्मतानुमापकं न भवति । कोऽपि शब्दो निःसन्दिग्धस्तन्मत-
ख्यापको नास्ति । ब्रह्मवादख्यापकास्तु बहवः सन्त्यात्मसर्वज्ञा-
नन्दरूपादिशब्दाः । अतः सन्दिग्धा जडधर्मत्वेन प्रतीयमाना

नाभिदृष्टान्तो जडदृष्टान्तः । तथा, यः सर्वज्ञः सर्वविद् यस्यैष
महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठित इत्यत्र
पुरमिव पुरमिति पुरपदबोधिनो दृष्टान्तो भूमिष्ठमहिमवत्त्वं शरीर-
धर्मः । तथा, मनोमयः प्राणशरीरनेता इत्यत्र मनोमयत्वं विकार-
धर्मः । * इत्यादीत्यादिपदेन, हिरण्मये परे कोश इत्यादिमन्त्रोक्तानां
शुभ्रत्वप्रकाशाभावादीनां संग्रहः । आत्मसर्वज्ञादिशब्दाश्चेतनधर्म-
बोधकाः पुरुषनिरूपकाः । * तस्मादिति * प्रकृतिपुरुषबोधकपद-
सत्त्वात् । नन्वस्य प्रकरणस्यादृश्यत्वाधिकरणे ब्रह्मपरताया व्यु-
त्पादितत्वात् सिद्धे तथात्वे पुनः किमर्थोऽयं प्रयास इत्यत आहुः ।
* निर्णीतमित्यादि * । यद्यपि तत्र तथा निर्णीतं, तथापि तत्रान्तरा-
त्मत्वेनाधेयतया ब्रह्म सिद्धं, न त्वाधारतयेति । रथनाभ्यादिदृ-
ष्टान्तसहकृतान्नाडीसङ्घाताधारत्वादिरूपाज्जडधर्मादाधारभूतेऽक्षरे
प्रकृतिरूपताया पुनरुज्जीवनं सम्भवतीति विशिष्टाद्वैतमेव भवेन्न तु
शुद्धब्रह्मवाद इति तदभावाय प्रयास इत्यर्थः । सिद्धान्तं व्याच-
क्षते * अनुमानमित्यादि * इदं प्रकरणं सांख्यमतमूलभूतं, तद-
साधारणधर्मबोधकशब्दवत्त्वादित्यनुमानं तन्मतानुमापकं न भव-
ति । तत्र हेतुः । * कोऽपीत्यादि * । अयमर्थः । एतेषु मन्त्रेषु यत-
च्छब्दात् तयोश्च नित्यसम्बन्धान्नाडीसङ्घाताधिकरणत्वमन्तःप्रवि-
ष्टस्य सञ्चरतो भोक्तुः प्रतीयते । दृष्टान्तस्तु विष्टम्भकत्वमात्रे । अ-
न्यथा दृष्टान्तीयाशेषधर्मापत्तिः पक्षे भवन्ती अनुमानमेवोच्छेदयेत् ।
एवं, सर्वत इत्यत्राप्यात्मन एव महिमा । एवं सर्वेषां शब्दानां स-

अपि ब्रह्मधर्मा एवेति युक्तम्। न हि ब्रह्मवादः श्रुतिव्यतिरिक्ते सिद्धोऽस्ति। येन ब्रह्मधर्माभावो निश्चेतुं शक्येत।

तस्मात् सर्वाधारत्वेन निरूप्यमाणः परमात्मैव, न प्रधानमिति॥ ३॥

प्राणभृच्च॥ ४॥

नन्वस्ति निर्णायकं प्राणानामोतत्ववचनम्। मनोमयः प्राणशरीरनेतेति च। अतो जीवधर्माः केचन, जडधर्माश्चापरे सर्वेशत्वादयोऽपि योगप्रभावाज्जीवधर्मा इति। तस्माज्जडजीवविशिष्टः सांख्यवाद एव युक्त इति चेत्। न। प्राणभृज्जीवो न सम्भवति। अतच्छब्दादेव। नह्यानन्दाऽमृतरूपः स भवितुमर्हति तन्मते। पृथग्योगकरणमुत्तरार्थम्॥ ४॥

न्दिग्धत्वे न तैः सांख्यमतसिद्धिरित्यर्थः। ननु मास्तु सांख्यमतसिद्धिस्तैर्मतान्तरमेव सिद्ध्यतित्यत आहुः * न हीत्यादि *। किं तन्मतान्तरम्। ब्रह्मबोधकमन्यद्वा। यद्याद्यः पक्षस्तदा तु श्रुत्येकसिद्धत्वाद् ब्रह्मवादस्यैव सिद्धिः। यद्यन्यस्तदा त्वात्मत्वसर्वज्ञत्वानन्दरूपत्वादीनां ब्रह्मधर्मत्वाभावसाधकं हेत्वन्तरं मृग्यम्। तच्चात्र न दृश्यत इति न तस्यापि सिद्धिरित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि *॥ ३॥

प्राणभृच्च॥ निषेधमुखविचारे जीवनिरसनायाम पूर्वपक्षं दर्शयन्ति * नन्वित्यादि *। * निर्णायकमिति * सांख्यमतनिर्णायकम। सिद्धान्तमाहुः। * नेत्यादि *। * पृथग्योगकरणमिति *। सूत्रपृथक्करणं, नशब्दयोगकरणं चोत्तरसूत्रेष्वन्वयार्थमित्यर्थः। नचानन्दाऽमृतरूपत्वमुपासनार्थमुच्यत इति वाच्यम्। विभातीत्यस्य विरोधात्। उपासनायां विभानाभावात्। नच तत् फलबोधकमिति वाच्यम्। तन्मत आनन्दस्य प्रकृतिधर्मत्वेन फलताया वक्तुमशक्यत्वात्। 'मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्नि-

भेदव्यपदेशात् ॥ ५ ॥

विशेषहेतुमाह । तमेवैकं जानथेति कर्मकर्तृभावः प्रतीयते । अतो भेदव्यपदेशान्न प्राणभृज्जीवः ॥ ५ ॥

प्रकरणात् ॥ ६ ॥

जीवजडसाधारणनिराकरणाय विशेषहेतुमाह । प्रकरणं हीदं ब्रह्मणः । ब्रह्म देवानामित्यारम्भे, स ब्रह्मविद्यामिति, तेषामेवैतां ब्रह्मविद्यामित्यन्ते च ब्रह्मविद्याया एव प्रकरणित्वमवगम्यते । ब्रह्मैवेदममृतं पुरस्तादित्यादिभिर्विस्पष्टो ब्रह्मवादः प्रतीयते ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ ७ ॥

सर्वस्याप्यन्यथाभावशङ्कया विशेषहेतुमाह । द्वा सुपर्णेति

णाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद् विभाति' इति मन्त्रे आनन्दरूपस्याऽमृतस्य विभातो विज्ञानेन दर्शनविषयत्वश्रावणेनानन्दरूपत्वस्यात्मधर्मतायाः स्फुटत्वाच्चेति ॥ ४ ॥

भेदव्यपदेशात् ॥ * विशेषहेतुमाहेति * उक्तस्य हेतोर्मन्त्रान्तरगतत्वेन प्राकरणिकत्वात् प्रकरणस्य ब्रह्मपरतासाधकत्वं, न तु विषयवाक्यस्य तथात्वसाधकत्वमित्यतस्तन्मन्त्रगतं हेतुमाहेत्यर्थः ॥५॥

प्रकरणात् ॥ * जीवेत्यादि * ननु यद्यपि मन्त्रगतो हेतुर्जीवव्यावर्तकस्तथाप्येकशब्दस्य मुख्यार्थत्वाङ्गीकारे द्वितीयसिद्धावेवकारस्यासङ्कुचितान्ययोगव्यवच्छेदकताया उपगन्तुमशक्यत्वात्, तमपि जानथ, ततोऽपि मुख्यमात्मानं जानथेत्येवं वचनव्यक्तावस्य मन्त्रस्य जडजीवसाधारणता स्यादतस्तदभावाय तथाहेत्यर्थः । शेषं स्फुटम् ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ * सर्वस्येत्यादि * ब्रह्मपदस्य जीवसा-

वाक्ये, अनश्नन्नन्यो अभिचाकशीतीति केवलस्थितिः परमात्मनः, कर्मफलभोगो जीवस्य । अतः स्थित्यदनाभ्यां जीवपरमात्मानावेव मध्ये परामृष्टौ । न हि सांख्यमतमेतादृशं भवति । अतोऽस्य वैशेषिकोपपत्तेर्निश्चयमानत्वात् प्रातिलोम्येन सर्वा उपपत्तयो दृढा इति द्युभ्वाद्यायतनं भगवानेवेति सिद्धम् । यद्यपि पैङ्ग्युपनिषदि, द्वा सुपर्णेत्यस्यान्यथा व्याख्यानं प्रतिभाति, तदृचां प्रदेशविशेषेऽन्यथा व्याख्यानं न दोषाय । तस्मात् सत्त्वक्षेत्रज्ञौ जीवब्रह्माणौ व्याख्येयौ ॥ ७ ॥

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

इदं श्रूयते। यो वै भूमा तत् सुखमिति ।सुखलक्षणमुक्त्वा भूम्नो लक्षणमाह । यत्र नान्यत् पश्यति नान्यच्छृणोति । नान्यद्विजानाति स भूमेति । तत्र संशयः । भूमा वाहुल्यमाहोस्विद् ब्रह्मेति । तत्र प्रपाठकारम्भे, ततस्त ऊर्ध्वं वक्ष्यामीति प्रतिज्ञात-

———

धारण्यात् सर्वस्य प्रकरणस्य जीवपरत्वशङ्कया तद्गतं तमाहेत्यर्थः । * प्रातिलोम्येनेति * स्थित्यदनयोः प्रकरणबलाधायकत्व, तस्य सत्पूर्वहेतुबलाधायकत्वमित्येवं वैपरीत्येन । ननु न दृढाः । द्वासुपर्णेति मन्त्रस्य पैङ्गिरहस्यब्राह्मणे सत्त्वक्षेत्रज्ञपरत्वेन व्याख्यानादित्यत आहुः । * यद्यपीत्यादि * । * जीवब्रह्माणाविति * व्यष्टिसमष्टिजीवौ । अमुक्तमुक्तजीवौ वा । इदं यथा तथा गया, गुहां प्रविष्टावित्यधिकरणस्थे, विशेषणाच्चेति सूत्रे सम्यगुपपादितमिति, नात्रोच्यते । एवमत्राधिकरणे, यस्यान्तःस्थानि भूतानीति विचारितम् ॥ ७ ॥ ॥ १ ॥

भूमा सम्प्रसादादध्युपदेशात् ॥ विषयवाक्यमनुपन्यस्यन्ति * इदं श्रूयत इत्यादि * श्रूयत इति * छान्दोग्यनवमप्र[illegible] नारदसंवादे श्रूयते।अत्र कः संशयः, कुतश्चेत्यत [illegible] *

त्वाद् वेदादीनां नामत्वमुक्त्वा ततो भूयस्त्वं वागादीनां प्राण-पर्यन्तानामुक्त्वा मुख्यप्राणविद्याया अवरब्रह्मविद्यात्वख्यापनार्थमर्द्धप्रपाठकं समाप्य ततोऽपि विज्ञानादीनामन्तरङ्गाणां सुखान्तानां भूयस्त्वमुक्त्वा सुखस्य फलत्वात् तस्यैव भूयस्त्वं वदति ।

यद्यपि, तरति शोकमात्मविदिति नारदप्रश्नाद् भूम्नो ब्रह्मत्वं प्रकरणाद् वक्तुं शक्यते, तथापि तस्यैवाथात आत्मादेश इत्यहङ्कारादेशवदात्मादेशोऽप्यस्ति । तेनाब्रह्मत्वेऽपि प्रश्नसिद्धिः । तस्य सुखबाहुल्यस्य स्वे महिम्नि प्रतिष्ठितत्वं सर्वतः पू-

---

* वदतीत्यन्तम् * । * समाप्येति * अपह्नवनिवारणश्रावणेन समाप्य । तथाच भूयस्त्वमुपक्रम्यान्ते, यत्र नान्यदित्यादिना नित्यसुखभूयस्त्वमेवोपसंहरन्ति । तस्माद् बाहुल्यं वाक्यार्थत्वेन वक्तुं शक्यते । मध्ये च मुख्यप्राणविद्याया अवरत्वबोधनं ब्रह्मलिङ्गम् । बृहदारण्यके व्रतमीमांसायां ब्रह्मोपासकस्य जीवस्यापि मुख्यप्राणव्रतधारणस्यैवाभिप्रेततया जीवापेक्षया प्राणस्योत्कर्षे बोधितेऽप्येष तु वा अतिवदति यः सत्येनातिवदतीत्यनेन सत्यापेक्षयां निकर्षबोधनात् । अतो ब्रह्मापि तथा वाक्यार्थत्वेन वक्तुं शक्यते । अत एवं संशय इत्यर्थः । पूर्वपक्षमाहुः । *यद्यपीत्यादि* । *तस्यैवेति भूम्न एव । अयमर्थः । यद्यप्यत्र भूयस्त्वं प्रकृतं, तथाप्यस्य वाक्यस्यात्मज्ञानार्थकनारदप्रश्नेन प्रवृत्तत्वादात्मैव प्रकरणी । स एवोपसंहारेऽपि भूमत्वेन निश्चायितोऽमृतत्वेन विशेषितश्चात उपक्रमोपसंहाररूपात् प्रकरणाद् भूम्नो ब्रह्मत्वं वक्तुं शक्यते । तथाप्युपान्ते, अथातोऽहङ्कारादेश इतिवदथात आत्मादेश इत्यादिनोक्त आत्मादेशोऽप्यस्तीत्यहङ्कारादेशे सर्वत्र विद्यमानत्वेन सर्वत्वेन च भूयस्तयोक्तस्याप्यहङ्कारस्य तदुपहितस्यात्मनो वा यथा न ब्रह्मत्वं तथा आत्मादेशे तथोक्तस्य केवलस्यात्मनोऽपि न ब्रह्मत्वम् । आत्मा चात्र सुखस्य स्वरूपमेव । पूर्वाधिकरणेऽनारोपितानागन्तु-

णविषयलाभेऽपि भवति, सुषुप्तावपीति तयोरन्यतरद् ग्राह्यम् । तत्राप्यन्तरङ्गत्वात् सुषुप्तिरेवात्र भूमत्वेनोच्यते । न सुखबाहुल्यम् । सुषुप्तिरूपमेव भूमेत्येवं प्राप्ते ।

उच्यते । भूमा भगवानेव । कुतः । सम्प्रसादादध्युपदेशात् । सम्प्रसादः सुषुप्तिः । तस्मादधि आधिक्येनोपदेशात् । यद्यपि नान्यत् पश्यतीत्यादि समानं, तथापि स एवाधस्तादि-

---

कस्य वस्तुस्वरूपस्यैवात्मपदवाच्यताया उपगमात् । नच शोकतरणरूपफलाभावात् प्रश्नापूर्तिः शङ्क्या । विविक्तजीवात्मज्ञानस्यैव तादृशसुखस्वरूपज्ञानस्याप्यात्मज्ञानत्वेनात्मविद्यामुक्तफलोपपत्त्या पूर्तिसिद्धेः । ब्रह्मण एवात्मत्वादिना ज्ञानस्य विवक्षितत्वे गमकानुपलम्भात् । नच भूम्नः स्वमहिमप्रतिष्ठितत्वश्रावणात् तस्य च ब्रह्मासाधारणत्वाद् ब्रह्मत्वं शङ्क्यम् । तस्यार्थस्यात्राभावात् । आत्मैवाधस्तादित्यादिना तस्य सर्वत्र व्याप्तेरुक्तत्वात् सर्वतः पूर्णविषयलाभे सुखपूर्णतयाऽनाकाङ्क्षायां तस्य पूर्णत्वानुसन्धाने स्वप्रतिष्ठतायाः सम्भवदुक्तिकत्वात् । यदि च तस्य लाभस्य प्रयाससाध्यत्वेन सुखबाहुल्यं नाङ्गीक्रियते तदा सुषुप्तिरस्तु । तत्रापि न कञ्चन कामं कामयत इति तद्यथा प्रियया स्त्रिया सम्परिष्वक्त इत्यादिश्रावणात् । अत उभयोर्मध्ये यदुचितं तदङ्गीकार्यमिति तथेत्यर्थः । सिद्धान्तं व्याकुर्वते *उच्यत इत्यादि* । *सम्प्रसादः सुषुप्तिरिति* बृहदारण्यकेऽस्ति । स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वेति । सम्यक् प्रसादोऽस्मिन्निति व्युत्पत्त्या सम्प्रसादः सुषुप्तिः । तत्र यद्वैतन्न पश्यतीत्यादिनाऽन्यदर्शनाद्यभाव उच्यत इति, नान्यत् पश्यतीत्यादि सुषुप्त्या समानम् । तथापि, स एवाधस्तादित्यादिनोक्ता सर्वत्र व्याप्तिः सर्वत्वं च ततोऽधिकमुच्यते । तथा सङ्गतं भवत्यात्मशब्दस्य मुख्यवृत्तता च विमुच्यते । नच भावार्थप्रत्ययप्रक्रमय, बहोर्लोपो भू च बहोरिति पाणिनीयसूत्रे व्युत्पादितो भूमशब्दो नानात्वं बाहुल्यं वा वक्ष्यति । तथापि प्रकृते, यदल्पं तन्मर्त्यमिति श्रावणात् संख्यां परित्यज्य बाहुल्यमेव वदिष्यति । स च धर्म एव,

स्यादिना तु ततोऽप्यधिकधर्मा उच्यन्ते । न हि सुषुप्तेः सर्वत्वादिधर्माः सम्भवन्ति । आत्मशब्दश्च मुख्यतया परिगृहीतो भवति । भावशब्दस्यापि सर्वत्वाद् भगवति वृत्तिरदोषः । तस्माद् भूमा भगवानेव ॥ ८ ॥

न तु ब्रह्मेति शङ्कनीयम् । भगवतः सर्वत्वस्यात्र श्रावणेन सर्वत्वाद् भावशब्दस्यापि भगवति वृत्तिरदोषः । सर्वशब्दबीजभूतप्रणवार्थत्वेन तत्रैव सर्वेषां मुख्यवृत्तत्वाच्चेति । तस्माद् भूमा भगवानेवेति सिद्धमित्यर्थः ।

अत्र संशयोपन्यासे प्रथमकोटौ शङ्करभास्करमध्वाचार्याः शैवश्च प्राणमाहत्य सुषुप्तौ तस्य जागरणात् सम्प्रसादत्वं तस्याहुः ।

तद्विज्ञानेन्द्रभिक्षुणैवं दूष्यते । प्राणस्य सुखरूपताया एवासम्भवेन संशयासम्भवात् । तस्मिन् प्रकरणे प्राणाद्याधिक्योपदेशाभावात् सम्प्रसादशब्दस्य प्राणावाचकत्वाच्च । श्रुतौ सम्प्रसादशब्दो जीवे सुषुप्ताख्यतदवस्थायां च दृश्यते । स एष सम्प्रसादोऽस्माच्छरीरात् समुत्थायेति, स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वेति । तत्र जीवे सम्प्रसादस्यौपाधिकतया धर्मधर्म्यभेदेनौपचारिकः । सुषुप्तावस्थायां तु प्रतिक्षणं सत्त्ववृद्ध्या सम्प्रसीदति चित्तमस्यामिति व्युत्पत्त्या यौगिकः । प्रसादप्रीत्योः पर्यायत्वात् सुख एव सम्प्रसादशब्दो मुख्यः । सत्त्वे तु प्रसादरूपिणि सकलस्मृतिषु प्रसिद्ध एव सम्प्रसादशब्द इति । प्राणे च सम्प्रसाद ... रकृतं, तथादृश्यत इति सम्प्रसादशब्दस्य प्राणार्थत्वोपवर्णनमनु ... प्रकरणे ।

अत्रापि कश्चिद् विशेषः । क्रमसंक्रमशब्दयोरिव ... एतश्चात ... म्प्रसादशब्दयोरपि नैकार्थत्वम् । अतः सम्प्रसादशब्दः सु... यौगिक एव । सत्त्वे तु स्मृतावपि न प्रसिद्ध इति तदनुपन्यासादेव ज्ञायते । सुषुप्तौ च न प्रतिक्षणं सत्त्ववृद्धिः । तस्यास्तामसावस्थात्वात् । तमोऽभिभूत सुखरूपमेतीति श्रुतिः सत्सम्पत्तिमेव वदतीति न तयापि तथात्वसिद्धिः । जागरणं तु ज्ञानप्रधानेन सत्त्वेनेति मम प्रतिभाति ।

रामानुजाचार्यास्तु संशये भूमगुणविशिष्टं प्रत्य ... ानन्तु

धर्मोपपत्तेश्च ॥ ९ ॥

नान्यत् पश्यतीत्यादयोऽपि धर्मा ब्रह्मणि न विरुध्यन्ते । स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीति न्यायेन । यत्र हि द्वैतमिव भवतीत्यादिश्रुत्या उभयत्राम्नानात् । अन्यादर्शनादयो

निक्षिप्य प्राणसहचारित्वादश्वत्थोपक्रोशानुपक्रोशाभ्यां तस्य चेतनत्वं निश्चित्य प्राणशब्दवाच्यत्वं चाङ्गीकृत्य सूत्रव्याख्याने तस्यैव सम्प्रसादत्वमुक्तश्रुत्याऽऽहुः । तद्युक्तमेव । सप्तमीतत्पुरुषेण सुषुप्ताविव षष्ठीतत्पुरुषेण जीवेऽपि योगस्य सत्त्वात् । सिद्धान्ते तु जीवापेक्षया प्राणोत्कर्षस्य बोधनाज्जीवस्यापि निवृत्तस्तत्सम्प्रसादतागमकस्याभावाच्च तदनुल्लेखः ।

विषयवाक्ये तु रामानुजमध्वभास्कराचार्या भिक्षुशैवौ च, यत्र नान्यत् पश्यतीत्यादेर्भूमातिरिक्तयावद्दर्शननिषेधो नार्थः । किन्तु निरवधिसुखरूपे ब्रह्मण्यनुभूयमाने ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वात् कृत्स्नस्य वस्तुजातस्यैश्वर्यविशिष्टब्रह्माभिन्नत्वेन न पश्यतीति । एतदेवोपपादयति वाक्यशेषः, स वा एष एवं पश्यन्नेवं मन्वान इत्यादिः । 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश' इति मन्त्रश्च । इदं चास्माकमप्यभीष्टम् ॥ ८ ॥

सिद्धान्त व्या पत्तेश्च ॥ ननु भवतु सम्प्रसादाद् भूम्न आधिक्योपदे- बृहदारण्यके भूमजिज्ञासया प्रश्ने भूमलक्षणत्वेन, यत्र नान्यत् पश्यतीति । सम्यग्यमुच्यते । तत्र योऽन्यदर्शनादिनिषेध. स तु सुषुप्तेरसायद्वैतत्र । तदितरल्लक्षणं तु नेहोच्यते । भूम्न इति भूमपर्यन्ता अस्त्वविद्याऽस्तु । ततो भूमाधारमारभ्यात्मविद्येति शङ्कायामिदमुच्यते ॥ धर्मोपपत्तेरिति ॥ तदेतद् व्याकर्तुं गृह्णन्ति । * नान्यादित्यादि * कुतो न विरुध्यन्त इत्याकाङ्क्षायां विभजन्ते * स्वाप्ययेत्यादि * । यथाऽस्मिन् सूत्रे ब्रह्मधर्माविर्भावः स्वाप्ययसम्पत्त्योर्नियतः । मय्येव सकलं जातमित्यादिवाक्यानुरोधात् । अन्यत्रानियत इति वामदेवश्रावणात् दितम् । तेन न्यायेनान्यदर्शनाद्यभावोऽपि मैत्रेयीब्राह्मणे;

भगवति न विरुद्ध्यन्ते । चकाराद फलं तस्यैवोपपाद्यत इत्याह ।

स वा एष एवं पश्यन्नित्यादिना सहस्राणि च विंशतिरित्यन्तेन । तेन भूमा ब्रह्मैवेति सिद्धम् ॥ ९ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥

गार्गीब्राह्मणे कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमन-

---

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेवैतदित्येकीभावदशायां, यद्वैतन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्नास्ति तु ततोऽन्यद्विभक्तं यत् पश्येदित्यविभागदशायां चेत्युभयत्राम्नानाद्दशाद्वये नियतः । यत्र नान्यत् पश्यतीति वाक्योक्तस्तु भूमविद्यायामनियतः । न पश्य इति मन्त्रे, सर्वं हि पश्यः पश्यतीति वाक्यानुरोधाद्, यस्मिन् विदिते सर्वं विदितं भवतीत्यादिवाक्यानुरोधाच्चेत्यर्थः । अत एतेऽन्यादर्शनादयो धर्मा भगवति न विरुद्ध्यन्तेऽतो लक्षणेऽतिव्याप्त्यभावाद् भूमविद्या ब्रह्मविद्या, नान्यविद्येत्यर्थः । एतदेव विशदयन्ति । * चकारादित्यादि * । * तस्यैवेति * अविभागद्रष्टुः । प्रलये संज्ञाभावात् स्वेन रूपेण द्रष्टृत्वाभावादिति । इदं सर्वं तृतीयाध्याये लिङ्गभूयस्त्वाधिकरणे व्युत्पाद्यमतोऽत्र नोच्यते । फलं किमित्यत आहुः । * स वा इत्यादि * । तथाचेदमविभागदशागमकमित्यर्थः । एवञ्चानेनाधिकरणेन वहिर्व्याप्तस्याप्यानन्दमयत्वं साधितम् । तथानन्दमयाधिकरणोक्तस्यानन्दमयत्वस्य बुद्धिवृत्तिरूपसुषुप्तिधर्मत्ववारणं कृतमतः प्रसङ्ग एव सङ्गतिः । तथा येन सर्वमिदं ततमित्यपि साधितम् । सर्वस्य विस्तारस्य सुखप्रयुक्तत्वादिति । भक्त्या लभ्यस्त्वनन्ययेति तु साधनाध्याये विचार्यम् ॥ ९ ॥ २॥

अक्षरमम्बरान्तधृतेः ॥ विषयादिकमुपन्यस्यन्ति * गार्गीब्राह्मण इत्यादि * । अत्र प्रथमे ब्राह्मणे, यदिदं सर्वमप्स्वोतं च प्रोतं च

णित्यादि श्रूयते । तत्र संशयः । किमक्षरशब्देन पदार्थान्तरं, ब्रह्म वेति ।

तत्राचेतनसाधारणयाद् वर्णतुल्यत्वादाकाशवदस्याप्यब्रह्मत्वमेव । द्युभ्वाद्यायतनविरोधस्तु तुल्यः । अत एवागतार्थता अदृश्यत्वाद्यधिकरणेन । न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते । अतोऽचेतनतुल्यत्वाद् ब्रह्मवादस्यासमाप्तत्वादाग्रहाविष्टत्वात् मष्टुः स्त्रीत्वाच्च, स्मरो धा व आकाशाद्भूयानितिवत् कयाचिदुपपत्त्या स्मरणकालभूतसूक्ष्मप्रकृतिजीवविशेषाणामन्यतरपरिग्रह इति वक्तव्यमुपासनार्थम् । अत्र हि प्रापञ्चिकसर्वधर्मराहित्यं ब्रह्मधर्मत्वं च प्रतीयते । तदुपासनार्थत्व उपपद्येत । ब्रह्मत्वपरिग्रहे तु वैयर्थ्यमेव । उपदेष्टृत्वाभावात् । तस्मादक्षरमन्यदेव ब्रह्मधर्मत्वेनोपास्यमित्येवं प्राप्ते ।

कस्मिन् वाऽऽप ओताश्च प्रोताश्चेत्यादिप्रश्नोत्तरैरबाद्याकाशान्तरिक्षलोकद्युलोकादित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकगन्धर्वलोकप्रजापतिलोकब्रह्मलोकपर्यन्तं पूर्वपूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्वं निरूप्य पुन. प्रश्नान्तराभावार्थं, मा ते मूर्द्धा व्यपतदनतिप्रश्न्या वै देवता अति पृच्छसि गार्गि मातिप्राक्षीरित्युक्तम् । तत आरुणिसंवादोऽन्तरं पुनरपि गार्गी प्रपच्छ । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति । तत्र आकाश इत्युत्तरे, पुनराकाशविषयके ओतप्रोतत्वप्रश्ने, एतद्वैतदक्षरं गार्गीत्याद्युत्तरम् । सोऽत्र विषयः । तत्राक्षरशब्दे संशयः । किं पदार्थान्तरं ब्रह्म वेति । अत्र पदार्थान्तरपदेन जडजीवयोर्ग्रहणम् । तत्र ओतप्रोतत्वं विकारित्वापादकतया जडलिङ्गम् । अमृताक्षरं हरः, क्षरात्मानावीशते देव एक इति श्रुत्यन्तरे अक्षरपद जीवबोधकतया प्रसिद्धं जीवलिङ्गं, प्रशासनं च ब्रह्मलिङ्गमिति त्रिष्वपि बीजम् । पूर्वपक्षमाहुः । * तत्राचेतनेत्यादि * । ओतप्रोततया विकारित्वेनाचेतनसाधारण्यात् । अहं त्वा

उच्यते । अक्षरं परमात्मैव । कुतः । अम्बरान्तधृतेः । श्रुतिं व्याख्याय सिद्धं हेतुमाह । अत्रैक एव प्रश्न उत्तरं चैकम् ।

याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थामिति द्वयोः प्रश्नयोः क्लेशजनकतया प्रथमप्रश्नोत्तरभूताकाशवदस्य द्वितीयप्रश्नोत्तरभूतस्याक्षरस्याप्यब्रह्मत्वमेव । किञ्च । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतमित्यत्र यथोतत्वं पदार्थभेदेन भारवाहकत्वमवगमयत्येवमत्र प्रोतत्वमपि, मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति स्मार्तदृष्टान्ताद् भारवाहकत्वमेव गमयिष्यतीति द्युभ्वाद्यायतनत्वेन विरोधोऽपि तुल्यः * तत्रैवात्रापि समानः । किञ्च द्युभ्वाद्यधिकरणे अक्षरस्य ब्रह्मरूपतायाः सुविचारितत्वात् किमनेनाधिकरणेन । अतः पृथग्विचारादेव विषयभेदोऽवसीयत इति न तेनास्य गतार्थता । न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते । अत्र तु ते तथा क्रियन्त इति सिद्धो विषयभेदः । अतो विषयभेदादचेतनतुल्यत्वाद् ब्रह्मवादस्यार्गिसंवादेऽन्तर्यामिनिरूपणेनैव समाप्तत्वात् प्रष्टुर्गार्गीरूपस्याब्रह्मविच्छ्वेन स्त्रीत्वेन च ब्रह्मविद्याश्रवणेऽनधिकारित्वादत्र, स्वरो वा आकाशाद् भूयानित्यत्र यथा आकाशं भोग्यत्वेन गृह्णतः स्मरणस्य तद्व्याप्त्या बृहत्त्वयोगेन भूयस्त्वं, तथा, अश्नुत इति, न क्षरतीति वा योगेन कथञ्चिदुपपत्त्या स्मरणाद्यन्यतमस्याचेतनस्य जीवविशेषस्य वोपासनार्थं परिग्रह इति वक्तव्यम् । यत्तु पुनरत्राक्षरेऽस्थूलादिवाक्यैः प्रापञ्चिकधर्मराहित्यं प्रशासनरूपब्रह्मधर्मवत्त्वं च प्रतीयते, तत्तूपासनार्थम् । नचात्रैतदनुरोधेन ब्रह्मैव वाक्यार्थ इति युक्तम् । प्रष्टुर्ब्रह्मश्रवणानधिकारस्योपपादितत्वेनात्र वक्तुरुपदेष्टृत्वाभावाद्वाक्यवैयर्थ्यापत्तेरिति । सिद्धान्तं व्याकुर्वन्ति * उच्यत इत्यादि * । नन्वम्बरान्तधृतेर्विषयवाक्ये अदृश्यमानतया तस्याक्षरे वक्तुमशक्यत्वात् स्वरूपासिद्धोऽयं हेतुरित्याशङ्क्याहुः । * श्रुतिमित्यादि * तथाच तात्पर्यसिद्धत्वान्न स्वरूपासिद्ध इत्यर्थः । तात्पर्यसिद्धत्वं व्याकुर्वन्ति *अत्रैक इत्यादि* । यद्यप्यत्र

बनारससंस्कृतसीरीज़नाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ।॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रह अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख० ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ५ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहित खण्ड ३ । द्वितीयभागः तृतीयाकाण्डम् हेलाराजटीकासहित खण्ड २)	५	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
विवरणोपन्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०
तत्त्वदीपनम् (पञ्चपादिकाविवरणस्य व्याख्यानम्) ख० ८	८	०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचितः) खण्डानि ३	३	०
टुप्टीका खण्डानि ४	४	०

पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽऽख्यवृत्ति स०	१	०
व्याकरणमिताक्षरा। श्रीमदन्नंभट्टप्रणीता खण्डानि ६	६	०
रसमञ्जरी। व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३	३	०
भेदधिक्कारः व्याख्यासहित. श्रीमदप्पयदीक्षितकृत उपक्रमपराक्रमसहितः खण्डे २	२	०
बोधसारो नरहरिकृतः तच्छिष्यदिवाकरकृतटीकया स० ख० ६	६	०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिर्विरचिता।	१	०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्योतिषग्रन्थः खण्डे २	२	०
श्रीमदणुभाष्यम्। श्रीश्रीवल्लभाचार्यविरचितम। गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्यव्याख्या समेतम् खण्डानि ४	४	०
तत्त्वशेखरः। श्रीभगवल्लोकाचार्यप्रणीतः। तथा-तत्त्वत्रयचुलुकसंग्रहः। कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः।	१	[illegible]

ब्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस